सिद्धान्तशिखामणि-भगवद्गीतयोः

मीमांसा



Q234:2(R65,6)
15P4

डॉ. सिद्धरामपण्डिताराध्यशिवाचार्यः

೧೨

Q234:2(R65;6) 8369
15P4

Siddharampanditaradhy
Shivacharya
Siddhantasikhamani
bhagawadgita
mimansa.

सिद्धान्तशिखामणि-भगवद्गीतयोः
मीमांसा

लेखकः
डॉ. सिद्धरामपण्डिताराध्य शिवाचार्यः
एम.ए., पी-एच्.डी.,
हिप्परगी-हिरेमठः
लब्धस्वर्णपदकः,
शक्तिविशिष्टाद्वैतवेदान्ताचार्यः,
एम.ए. (कन्नड)

प्रकाशकः
श्रीमद्वीरशैवसद्बोधनसंस्था
श्रीजगद्गुरुरम्भापुरीवीरसिंहासनमहापीठम्
बाळेहोन्नूरु - ५७७ ११२
चिक्कमगळूरु - मण्डलम्, कर्नाटक

प्रकाशकः
श्रीमद्वीरशैवसद्बोधनसंस्था श्रीजगद्गुरुरम्भापुरीवीरसिंहासनमहापीठम्
बाळेहोन्नूरु - ५७७ ११२, चिक्कमगळूरु - मण्डलम्, कर्नाटक.
दूरवाणि : (०८२६६) ६५०४२४

© लेखकस्य

Q234;2(R65,0)
15P4

प्रथम संस्करणम् : मार्च ४, २००४

मूल्यम् : २००/-

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamwadi Math, Varanasi
Acc. No. 8369

अक्षरसंयोजनम् :
शिवशक्ति-कम्प्यूटर-प्रोसेस
जंगमवाड़ीमठ, वाराणसी

मुद्रकः :
अनुभव प्रिंटर्स
१२१३, ५ विभागः, राजाजिनगरः,
बेंगळूरु - ५६० ०१०.
दू : २३४०१५७७, २३४०१९५५

Shri Jagadguru Rambhapurishwara Granthamala - 45

Siddhāntaśikhāmaṇi-Bhagavadgītayoḥ Mīmāmsā

By

Dr. Siddharamapanditaradhya Shivacharya Swamiji

M.A., Ph.D.

Hipparagi - Hiremath
Gold Medalist
Shaktivisistadvaita Vedantacharya
M.A. (Kannada)

Shrimadveerashaiva Sadbodhana Samsthe
Shri Jagdguru Rambhapuri Mahapeeṭha
BALEHONNURU - 577 112 Chikkamagalur District, Karnataka

"Siddanthasikhamani - Bagavadgitayoh Mimamsa" By Dr. Siddharamapanditaradhya Shivacharya Swamiji, Hipparagi, Hiremath, Bagalkot District, Published by Shrimadveerashaiva Sadbodhana Samsthe, Sree Jagadguru Rambhapuri Veerasimhasana Mahapeetha, Balehonnur - 577 112, Phone : (08266) 650424.

© Author

First Published : March 4, 2004

Copies : 500

Price : **Rs. 200-00**

Laser Typeset at :
Shiva-Shakti Computer Process
Jangamawadimath, Varanasi

Printed at :
Anubhava Printers
1213, 5th Block, Rajajinagar
Bangalore - 560 010
Phone : 23401577, 23401955

परीक्षकप्रतिवेदनम्

काशीहिन्दूविश्वविद्यालयस्य चक्रवर्ती इत्युपधिप्राप्तये - 'भगवद्गीता-सिद्धान्तशिखामण्योः समीक्षात्मकमध्ययनम्' इति नामकशोधप्रबन्धः सिद्धरामदेव हिरेमठः इत्यनेनानुसन्धात्रा प्रस्तुतः परिशीलितो मया।

प्रभूतपरिश्रमेणलिखितोऽयं शोधप्रबन्धस्तु सुतरां श्लाघार्होऽस्ति। मूलग्रन्थद्वयप्रतिपाद्यतत्त्वानां सरलभाषाशैल्या प्रतिपादकः सुव्यक्तः शोधनियमलिप्तो मनोहरनिबन्धोऽस्ति; सन्दर्भप्रमाणवचनपरिपुष्टश्च। तदुपाधिप्रदानाय योग्योऽयं प्रबन्धकर्ता।

भृशं प्रकाशनार्थं प्रबन्धो वरीयतां प्राप्नोति - इति।

प्रो. रामकृष्णः भट्टः वि.



श्रीरम्भापुरीवीरसिंहासनाधीश्वराणां

श्री १००८ जगद्गुरु प्रसन्नरेणुकवीरसोमेश्वरशिवाचार्यभगवत्पादानां

शुभाशीर्वचनम्

अस्ति खलु निगमा आगमाश्चेति भारतीयधर्म-दर्शनानां साहित्यस्य मूलं स्रोतोद्वयम्। तत्र निगमा भगवतः शिवस्य निःश्वासेन निःसृताः, आगमाश्च तस्य वैखरीवाण्या विनिर्गताः। उभे अपि साहित्ये स्वशिवत्वविस्मृतानां जीवभावमापन्नानां मानवानां सर्वेषां संसारबन्धनिवृत्तिशिवत्वावाप्तिद्वारा हितमेव साधयतः। भारतीयं सर्वं वाङ्मयं प्रत्यक्षेण परोक्षेण वा निगमागमाभ्यां प्रभावितमस्ति। तत्र निगमानां 'वेद' इत्यपरं नाम वर्तते। तस्य अन्तिमे भागे प्रतिपादिता उपनिषदो वेदान्ता इत्याख्यायन्ते। इमा वेदानां प्रधानभागत्वेनाभिहिताः। एतासां साररूपा एव भगवद्गीता। सा चौपनिषत्सिद्धान्ताभिव्यञ्जिका विश्वजनमान्या कृष्णार्जुनसंवादरूपा।

आगमपरम्परायां कामिकादिवातुलान्ता अष्टाविंशतिसंख्याकाः शैवागमाः सिद्धान्ता इत्यभिधीयन्ते। एषां सिद्धान्तापरपर्यायाणां शैवागमानां साररूपोऽयं ग्रन्थः श्रीसिद्धान्तशिखामणिः। स च रेणुकागस्त्यसंवादरूपेण स्वात्मसाधनसुलभोपाय-भूतैकोत्तरशतस्थलतत्त्वप्रतिपादको वीरशैवधर्मदर्शनग्रन्थः।

कर्णाटकप्रान्तस्य हिप्परगि-हिरेमठाध्यक्षेण डॉ. सिद्धरामपण्डिताराध्यशिवाचार्येण "भगवद्गीता-सिद्धान्तशिखामण्योः समीक्षात्मकमध्ययनम्" इति विषयमधिकृत्य शोधप्रबन्धो लिखितः, काशी-हिन्दूविश्वविद्यालयेन चक्रवर्ती (पीएच.डी.) इत्युपाधिश्च

प्राप्तः। स शोधप्रबन्ध एव साम्प्रतं "सिद्धान्तशिखामणि-भगवद्गीतयोः मीमांसा" इति नाम्नाऽस्मदीयेन श्रीमद्वीरशैवसद्बोधनसंस्थानेन प्रकाशनमधिगम्यत इत्यतिशयाह्लादास्पदोऽयं विषयः

ग्रन्थेऽस्मिन् संशोधकविद्वान् लेखकोऽत्र भगवद्गीतायाः सिद्धान्तशिखामणेश्च दार्शनिकविचारान् सम्यक् परिशील्य गीतायाः सर्वाणि दार्शनिकानि तत्त्वानि सिद्धान्तशिखामणिप्रतिपादितवीरशैवसिद्धान्ते समन्वितानि भवन्तीति युक्तिप्रमाण-पुरःसर साधु साधितवान्। आशास्महे वयं यदयं ग्रन्थः प्राचीनाचार्यपरम्परामनुसरन् विद्वल्लोकमाकर्षति, प्रवर्धयति च तेषां मनसि वीरशैवीयवैशिष्ट्यवगमनलालसामिति।

अन्ते चास्य लेखकः परमदयालुपरमेश्वरस्य रेणाकादिपञ्चाचार्याणां रम्भापुरी-पीठपरम्परागतसकलपूर्वाचार्याणां चाशीर्वादार्हः सन्नेवमेव भविष्यति कालेऽपि साहित्यसेवानिरतः आयुरारोग्यादिसकलभाग्यानि विन्दत्वित्येवोक्त्वा विरम्यते।

इत्याशिषः

* * *

श्रीकाशीज्ञानसिंहासनाधीश्वराणां
श्री १००८ जगद्गुरु डॉ. चन्द्रशेखरशिवाचार्यभगवत्पादानां

शुभाशीर्वचनम्

सिद्धान्तशिखामणि-भगवद्गीते दार्शनिकलोकस्य वादविवादात्मकं खण्डन-मण्डनादिकं परिहाय पारस्परिकसमन्वयार्थं प्रवर्तेते। अत एव श्रीसिद्धान्तशिखामणौ-

अगस्त्य खलु सिद्धान्ता विख्याता रुचिभेदतः।
भिन्नाचारसमायुक्ता भिन्नार्थप्रतिपादकाः ।।

सांख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा।
एतानि मानभूतानि नोपहन्यानि युक्तिभिः।। इति।

भगवद्गीतायां-

ध्यानेनात्मनि विन्दन्ति केचिदात्मानमात्मना।
अन्ये सांख्येन योगेन कर्मयोगेन चापरे।।

अन्ये त्वेवमजानन्तः श्रुत्वाऽन्येभ्य उपासते।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः।।

इति चोक्तम्। उभयग्रन्थयोरीदृशीं समन्वयदृष्टिमवलोकयता ग्रन्थकारेणात्र तयोः समन्वयपरैव या समीक्षा साधिता, साधुरेव सा।

षट्परिच्छेदात्मके ग्रन्थेऽस्मिन् गीतावाङ्मयपरिचय-सिद्धान्तशिखामणि-वाङ्मयपरिचयानन्तरमुभयग्रन्थयोः सम्मतान् ईश्वर-शक्ति-जीव-जगद्-बन्ध-मोक्ष-

मोक्षोपायरूपान् दार्शनिकविचारान् प्रत्येकतया प्रतिपाद्य तदनु तयोः समन्वय आसाधितः। वस्तुतस्तौलनिकमीमांसा साम्य-वैषम्य-वैशिष्ट्यमिति त्रिविधरूपेण भवति, किन्त्वत्र तद्विहाय समन्वयपरा मीमांसोपस्थापिता। अन्ते च सृष्टिप्रक्रिया-साम्प्रदायिकाचरणादिकं विहाय गीता-सिद्धान्तशिखामण्योर्दार्शनिकतत्त्वेषु सुतरां समुपपद्यते समन्वय इति निर्णीतमस्ति।

सिद्धान्तशिखामणिभगवद्गीतयोर्दार्शनिकविचारा वस्तुतो ग्रन्थान्तरेषु समुपलभ्यन्ते तत्र तत्र, किन्तु तयोस्तौलनिकी समीक्षा नान्यत्रोपलभत इत्ययमत्रत्यः समन्वयोऽनितरसाधारणो विषयः।

संशोधकलेखको डॉ. सिद्धरामपण्डिताराध्यशिवाचार्योऽतिशयेन प्रयत्नेन तौलनिक बुद्ध्या उभयोर्ग्रन्थयोर्दार्शनिकमीमांसा कृता, सातीव शोभना सामाजिकप्रज्ञया च परिपूर्णाऽस्ति। प्रायः सर्वत्र दार्शनिकतत्त्वविषये दार्शनिकग्रन्थविषये च परस्परं कलहायमाना एव जना दरीदृश्यन्ते। एतादृशेन कलहेन गृहे-गृहे, ग्रामे-ग्रामे, देशे-देशे, राष्ट्रे-राष्ट्रे चाशान्तिः प्रस्फुटिता भवति। अशान्तिर्न कस्यापि प्रिया। सर्वो जनः शान्तिप्रिय एव।

तादृशशान्त्यर्थं सामाजिकेषु दार्शनिकेषु भगवद्भक्तेषु च सामन्वयी बुद्धिरावश्यकी। तदर्थमेतादृशां समन्वयविचारधाराविशिष्टानां ग्रन्थानामध्ययनमध्यापनं च परमावश्यकम्। अत एवास्मत्-शोधसंस्थानेन ग्रन्थस्यास्य प्रकाशनं क्रियते। शैवभारतीशोधप्रतिष्ठानस्य निदेशका आगमशास्त्रस्य मर्मज्ञाः पण्डितप्रवरा व्रजवल्लभद्विवेदमहानुभावाः शोधग्रन्थस्यास्य प्रशंसापरा विद्वत्सम्मतिं प्रदत्तवन्तः। अनया सम्मत्या ग्रन्थस्यास्य महत्त्वं परिवर्धितम्। आशास्महे डॉ. सिद्धरामपण्डिताराध्य-शिवाचार्यस्यास्य शोधग्रन्थस्य अध्ययनेन जिज्ञासुच्छात्राणां समन्वयबुद्धेर्लाभः स्यादिति। अस्य शोधप्रबन्धस्य मार्गदर्शका वेदान्त-सिद्धान्ततत्त्वज्ञाः पण्डिततल्लजाः सुधांशुशेखर-शास्त्रिमहाभागा अपि साधुवादार्हाः।

अस्मिन् शुभसन्दर्भे ग्रन्थप्रकाशनकर्मणि सहकृतेभ्यो डॉ. गंगाधर-केण्डदमठ-चिदानन्द-ओ. हिरेमठ(कसगी)प्रभृतिभ्योऽनन्ताः मङ्गलाशीर्वादाः प्रदीयन्ते। भगवतो विश्वनाथस्य, मातायाः अन्नपूर्णायाः, जगद्गुरुविश्वाराध्यस्य च कृपाशीर्वादेन डॉ. सिद्धरामपण्डिताराध्यशिवाचार्य आयुरारोग्यसम्पन्नो भूत्वा इतोऽप्यतिशयेन साहित्य-सेवया समाजे शान्तिप्रतिष्ठापनार्थं प्रयतत्वित्यस्माभिर्भूयो भूय आशीर्वादार्होऽस्ति।

इत्याशिषः

राष्ट्रपति सम्मानीतानां काशीजङ्गमवाडीमठ–
शैवभारतीशोधप्रतिष्ठानस्य निदेशकानां
प्रो. व्रजवल्लभ द्विवेदमहोदयानां

सम्मतिः

अथायं प्राकाश्यमेति सिद्धान्तशिखामणि–भगवद्गीता मीमांसा नामको ग्रन्थः श्रीमता डॉ. सिद्धरामपण्डिताराध्यशिवाचार्यनाम्ना विदुषा हिप्परगि हिरेमठस्य मठाधिपतिना सुसंदृब्धः। एभिर्महानुभावैः 'पीएच.डी.' (चक्रवर्ती) इत्युपाधिप्राप्तये "भगवद्गीता–सिद्धान्तशिखामण्योः समीक्षात्मकमध्ययनम्" इति शीर्षकः शोधप्रबन्धः काशीहिन्दूविश्वविद्यालयप्राच्यविभागीये संस्कृतमहाविद्यालये प्रस्तुत आसीत्। तस्यैवेदं संशोधितं परिष्कृतं संस्करणं विदुषां पुरतः समुपस्थाप्यते।

षट्परिच्छेदात्मकोऽयं ग्रन्थः। तत्र संपूर्णस्यास्य ग्रन्थस्य संक्षिप्तः परिचयो भूमिकाभागे (पृ. ४–५) द्रष्टुं शक्यते, विषयसूच्यां च तत्र तत्र प्रतिपादितानां विशिष्टानां विषयाणाम्। अत्रेदं विशेषतोऽवधेयं यद् भगवद्गीतोक्तानां सिद्धान्तशिखामणि–प्रतिपादितानां च दार्शनिकतत्त्वानां समन्वयात्मिका समीक्षा नाधुनावधि कुत्रापि कृता। अतोऽत्रत्यो विचारः समीक्षात्मकोऽनितरसाधारणः। तस्मादस्य ग्रन्थस्य तृतीय–चतुर्थ–पञ्चम–षष्ठपरिच्छेदानामन्तिमो भाग उपसंहारश्च ज़ीवातुभूत इति विशेषतोऽवधानार्ह इत्यवधेयं विपश्चिद्भिः।

महार्थमञ्जरीकारेण चोलदेशीयेन महेश्वरानन्देन स्वोपज्ञपरिमलटीकाया अन्तिमे भागेऽनितरसाधारणं वैशिष्ट्यं भगवद्गीतायाः शाक्तदर्शनपद्धत्या समुन्मीलितम्, तथैवात्र विदुषा लेखकेन शैवागमपद्धत्या, विशेषतो वीरशैवधर्म–दर्शनमनुसृत्य भगवद्गीताया वैशिष्ट्यं प्रख्यापितमिति शिवगीतानाम्नाऽपि सिद्धान्तशिखामणिग्रन्थः परिचेतुं शक्यत इति गाढं–बाढं वयं वक्तुं शक्नुमः। श्रीमद्भगवद्गीतायाः श्रीसिद्धान्तशिखामणेश्चानितरसाधारणं वैशिष्ट्यं वर्तते भारतीये वाङ्मय इति जानीमो वयम्। सोऽयं विषयः सप्रमाणमत्र साधित इति साधुवादार्होऽयं सिद्धरामपण्डिताराध्यशिवाचार्य इति। एवं कुर्वताऽनेन प्राचीनाचार्यपरम्परैवानुसृता।

अत्रास्तिकनास्तिकदर्शनानाम्, प्रस्थानत्रय्याः, भगवद्गीतासंबद्धस्य साहित्यस्य च प्राधान्येन निगमाधारितस्य; आगमाधारितस्य च तान्त्रिकवाङ्मयस्य वैष्णव-शाक्त-शैव-वीरशैवभेदभिन्नस्य प्राधान्येन सिद्धान्तशिखामणिसंबद्धसाहित्यस्य स्वरूपं समुपस्थापयता ग्रन्थकारेण निगमागमयोः समन्वयो नानामतसमालोचनपुरस्सरं समुन्मीलित इत्यवधातव्यं सुज्ञैः पाठकैः। शिवशक्तिविमर्शः, वैषम्यनैर्घृण्यदोष-परिहारः, जगत्सत्यत्वम्, बन्धमोक्षस्वरूपम्, जीवन्मुक्तिमीमांसा, ज्ञान-भक्ति-कर्मादीनां मोक्षोपायानां विवेचनम्, ज्ञानकर्मसमुच्चयवादः, शक्तिपातः (ईश्वरानुग्रहः), अष्टावरण-पञ्चाचार-षट्स्थलसदृशा वीरशैवधर्मदर्शनसंबद्धा विषयाश्चात्र विस्तरेण सप्रमाणं व्याख्याता दृश्यन्ते।

विदुषा लेखकेन सर्वेऽप्यत्र समालोचिता धार्मिका दार्शनिकाश्च विषयाः पूर्वं भगवद्गीतापद्धत्या, तदनु सिद्धान्तशिखामणिपद्धत्या, अन्ते च तौलनिकसमालोचन-पद्धत्या विवृता इति निभालयन्तु तत्रभवन्तो भवन्तः। एवं कुर्वताऽनेन भारतीय-दर्शनेषु गीतायाः सिद्धान्तशिखामणेश्च किमप्यपूर्वं महत्त्वं समुन्मीलितम्। नैतावदेव, साम्प्रतमनयोः सामाजिकी उपयोगिता सांस्कृतिकमवदानं च कीदृशमिति विवेचयता ग्रन्थयोरनयोः सामाजिक उपयोगोऽपि प्रख्यापितः।

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्।।

इति भगवद्गीतावचनमनुस्मरता ग्रन्थकारेण शक्तिपातप्रसङ्गे न केवलमुत्तम-कुललब्धजन्मनामेव भवति परा गतिः, अपि तु शिवभक्ति-गुरुनिष्ठा-सदाचारा-द्युत्कृष्टगुणगणसमन्वितानां हीनकुलप्राप्तजन्मनामपि सिद्ध्यति भवगदनुग्रह इति "स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः" इति दिशा मानवमात्रस्य मोक्षाधिकारित्वमत्र समर्थ्यते। इदमेव च वर्तते भगवद्गीतायाः सिद्धान्तशिखामण्यादि-निदर्शितस्य वीरशैवधर्मदर्शनस्य च वैषम्यनैर्घृण्यादिदोषग्रस्तस्य परस्परं कलहायमानस्य च सम्पूर्णस्य विश्वस्य कृते शान्तिसंदेश इत्यभ्युदयनिःश्रेयसयोः साधकोऽयं ग्रन्थो भारतीयदर्शनसंस्कृतिप्रियाणां नूनं पठनार्हः। ईदृशस्य ग्रन्थस्य लेखकोऽयं शिवाचार्योऽस्माभिः साधुवादशतैः सभाज्यते। प्रवर्ततां नाम ईदृशो ज्ञानयज्ञो निरन्तरं मानवानुग्रहाय इत्येवोक्त्वा विरम्यते।

व्रजवल्लभद्विवेदः

काशीहिन्दूविश्वविद्यालयस्य वैदिकदर्शनविभागाध्यक्षानां–
शोधप्रबन्धस्यास्य मार्गदर्शकानां
श्रीमतां डॉ. सुधांशुशेखरशास्त्रिमहाभागानां

विद्वदभिप्रायः

आनन्दमानन्दकरं प्रसन्नं
ज्ञानस्वरूपं निजभावयुक्तम्।
योगीन्द्रमीड्यं भवरोगवैद्यं
विश्वेश्वरं नित्यमहं नमामि।।

अथेदं प्रत्यक्षगोचरतामधिगच्छति शिवचार्येण सिद्धरामपण्डिताराध्य–हिरेमठेन सम्पादितं ग्रन्थरत्नमिदानीं 'श्रीसिद्धान्तशिखामणि–भगवद्गीतयोः मीमांसा' नामकमिति परमहर्षास्पदम्।

तत्र सन्ति तावन्नैकविधाः सत्सम्प्रदायास्तत्तदाचार्यप्रवरैः प्रवर्तिताः प्रमाणभूता एव। तत्रापि वीरशैवसम्प्रदायस्य शक्तिविशिष्टाद्वैतमतप्रतिष्ठापकतयाऽतीव महनीयता नाविदिता सचेतसाम्। तदुक्तं सिद्धान्तशिखामणौ–

सिद्धान्ताख्ये महातन्त्रे कामिकाद्ये शिवोदिते।
निर्दिष्टमुत्तरे भागे वीरशैवमतं परम्।।

पारमेश्वरागमेऽप्युक्तम्–

वीरशैवे विशेषोऽस्ति सावधानमतिः शृणु।
यस्य विज्ञानमात्रेण जायतेऽयं सदाशिवः।। इति।

यद्यपि केषाञ्चित्कापालादिशैवमतानामवैदिकत्वं समुद्घोषितं क्रियासारादौ–

कापालादिमतान्याहुः शैवान्यन्यानि यानि च।
अवैदिकानि सर्वाणि नाचरेत्तानि वैदिकः।। इत्यादिना

तथापि वीरशैवमतस्यास्ति सर्वथैव वैदिकत्वं, निगमागमयोः समन्वयश्चापि तत्र प्रतिपादित एव। अत एवोक्तं श्रीकरभाष्यकारैः ब्रह्मसूत्रभाष्ये–

श्रुत्यैकदेशप्रामाण्यं द्वैताद्वैतमतादिषु।
द्वैताद्वैतमते शुद्धे विशेषाद्वैतसंज्ञिते।
वीरशैवैकसिद्धान्ते सर्वश्रुतिसमन्वयः।। इति।

तत्र यथा श्रीमद्भगवद्गीतायाः– "सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्", "तदिदं गीताशास्त्रं समस्तवेदार्थसारसंग्रहभूतम्", "सर्वशास्त्रमयी गीता" इत्यादिवचननिचयैः सर्वोपनिषत्सारसंग्रहभूतत्वं सर्वशास्त्रमयत्वं च प्रतिपादितम्, तथैव श्रीमदाचार्यप्रवरैः श्रीशिवयोगिशिवाचार्यैः प्रणीतः सिद्धान्तशिखामणिग्रन्थोऽपि सर्वेषां शैवागमानां सारसंग्रहभूतो निगमागमसमन्वयप्रतिपादकः। तद्विषये तैरेवोक्तम्–

आलोक्य शैवतन्त्राणि कामिकाद्यानि सादरम्।
वातुलान्तानि शैवानि पुराणान्यखिलानि च।।
तेष्वागमेषु सर्वेषु पुराणेष्वखिलेषु च।
पुरा देवेन कथितं देव्यै तन्नन्दनाय च।।
तत्सम्प्रदायसिद्धेन रेणुकेन महात्मना।
गणेश्वरेण कथितमगस्त्याय पुनः क्षितौ।।
वीरशैवमहातन्त्रमेकोत्तरशतस्थलम्।
अनुग्रहाय लोकानमभ्यधात् सुधियां वरः।। इत्यादि।

एवञ्च निश्चप्रचमिदं यद् द्वयोरप्यनतिसाधारणयोः श्रीमद्भगवद्गीता–सिद्धान्तशिखामण्योः समीक्षात्मकः प्रस्तुतप्रबन्धोऽयं सर्वेषामेव जिज्ञासूनां जिज्ञासोपशान्त्यर्थमुपायभूतः सन्नुपकरिष्यति तानिति द्रढीयान्नो विश्वासः।

अन्ते चाहं ग्रन्थरत्नस्यास्य सर्वत्राप्रतिहतं प्रचारं प्रसारं ग्रन्थकर्तुश्च सर्वविधान्युन्नतिञ्च कामयमानो भगवन्तमकारणानुग्रहैकवपुषं विश्वगुरुं श्रीकाशीश्रीविश्वेश्वरं प्रार्थये यत्प्रेयान् श्रीशिवाचार्यसिद्धरामपण्डिताराध्य–हिरेमठः स्वस्थः प्रसन्नः सन्नीदृश्येन लोकोपकारिणा कार्येण सर्वदैवोपकुर्यात् सज्जनानिति।

२४.२.०४ **डॉ. सुधांशुशेखरशास्त्री**

धारवाड–कर्नाटकविश्वविद्यालयस्य
पूर्व संस्कृतविभागध्यक्षानां
डॉ. मल्लिकार्जुनपरड्डिमहानुभावानाम्

शुभाशंसनम्

शिवागमादिसद्ग्रन्थनिरूपितमिदं पुरा ।
काललीलाखिलीभूतं वीरशैवमतं परम् ।।
(बसवभास्करोदरयः)

इति वचनानुसारं निगमागमप्रसिद्धं वीरशैवमतं विस्मर्यमाणं विलोक्य शिवयोगिना शिवाचार्येण वीरशैवदर्शनस्वरूपनिरूपणैकाग्रमनसा शिवागमादिप्रमाणग्रन्थसारभूतं सिद्धान्तशिखामण्याख्यं ग्रन्थरत्नं रेणुकागस्त्यसंवादरूपं विरचयता महानुपकारः कृत इति वक्तुं शक्यते।

अनयैव प्रणाल्या तत्पूर्वकाल एव वेदवेदान्तानन्तराशेरध्ययनाशक्तानां मुमुक्षूणां कृते, उपनिषत्सारभूतं कृष्णार्जुनसंवादरूपं कृतिरत्नं रचयता भगवता विशालबुद्धिना वेदव्यासेन महान् लोकोपकारः कृत इति यदुक्तं तत्समीचीनमेव।

"ममैवांशो जीवलोके जीवभूतः सनातनः" इत्यादिना वाक्येन जीवेश्वराविर्भावसम्बन्धः, "असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्" इत्यादिवाक्यैश्च जगन्मिथ्यात्ववादखण्डनं यथा भगवद्गीतायां कृतं वर्तते तथैव सिद्धान्तशिखामणौ शिवजीवाभेदवर्णनं जगत्सत्यत्वनिरूपणं च कृतमिति शक्यते वक्तुम्। ईश्वरसगुणनिर्गुणस्वरूपवर्णने जीवजगदादितत्त्वविस्तारे चैतद्ग्रन्थद्वयसमन्वयः सम्यगत्र शोधप्रबन्धे विमर्शितः। बन्धमोक्षस्वरूपादिके विषयेऽपि द्वयोः साम्यं तथा मीमांसितं, यथा सिद्धान्तशिखामणिपूर्णज्ञानाय भगवद्गीताध्ययनमवश्यं करणीयमिति विदुषां मनसि प्रेरणोत्पद्यते। अपि तु वेदानुसारित्वात् वीरशैवमते सर्वश्रुतिसमन्वयोऽवगन्तव्य इति प्रमाणवाक्यानुसारं सर्वेषामपि दर्शनानामादरः कृतः शिवयोगिशिवाचार्येण।

एवं षट्परिच्छेदात्मके शोधप्रबन्धेऽस्मिन्नेकविंशतिपरिच्छेदात्मकं सिद्धान्तशिखामण्याख्यग्रन्थरत्नं तथा विस्तरेण विमर्शितं यथा सर्वोऽपि सारस्वतलोको विशेषतः मुमुक्षुवर्गोऽस्याध्ययनोत्सुको भवतीति श्रुणिदुं मे मनो हर्षातिरेकमनुभवति। विद्वज्जना-भिनन्दनार्होऽयं लेखकः श्री ष. ब्र. डॉ. सिद्धरामपण्डिताराध्यशिवाचार्यः श्रीसिद्धान्तशिखामणेरध्ययनं विविधैर्दृष्टिकोणैः कृत्वा ग्रन्थस्यास्य महिमानं सारस्वतलोके प्रसारयतु प्रचारयतु चेति सप्रश्रयं प्रार्थयामि।

अन्ततः–

श्रीसिद्धान्तशिखामणेरनुदिनं कृत्वा समीक्षां सुधीः
वेदार्थं निखिलागमादिनिवहं सम्यक् समीक्ष्यादरात्।
यत् सारस्वतवैभवं बुधनुतं तत्सारभूतं पुनः
ग्रन्थानां यदि लेखनं वितनुते धन्यस्तदन्यो कुतः।।

विदुषां वशंवदः
शिवकविः
डॉ. परट्टी मल्लिकार्जुनः
धारवाड़

ವೀರಶೈವ ಮತಾಚಾರ್ಯೋ ವೀರ ಸಿಂಹಾಸನಾಧಿಪಃ ।
ಜಗದ್ಗುರು ರೇಣುಕಾರ್ಯೋ ಜಿಯಾತ್ಸೋಮೇಶ ಸಂಭವಃ ॥



ಶ್ರೀ ಜಗದ್ಗುರು ರೇಣುಕಾಚಾರ್ಯರು

ಶ್ರೀ ಶಿವಾನಂದ ಜಗದ್ಗುರುಗಳು

ಶ್ರೀ ಗಂಗಾಧರ ಜಗದ್ಗುರುಗಳು

ಶ್ರೀ ವೀರ ರುದ್ರಮುನಿ ಜಗದ್ಗುರುಗಳು



ಶ್ರೀಮದ್ರಂಭಾಪುರೀ ವೀರ ಸೋಮೇಶ್ವರ ಜಗದ್ಗುರುಗಳು



शिवपूजापारावारेभ्यः परमकरुणावतारेभ्यो
नित्यं निरतिशयविरतेभ्यो मम स्फूर्तिचेतनरूपेभ्यो
हिप्परगि-हिरेमठस्य गुरुचरणेभ्यो
लिं. श्री ष.ब्र. सिद्धरामशिवाचर्येभ्यः
समर्प्यत इदं ग्रन्थकुसुमं सभक्तिप्रश्रयेन।

ॐ

भूमिका (उपक्रमः)

ध्यायामि परमात्मानं शिवं तं लिङ्गरूपिणम्।
पराशक्तिविशिष्टं हि सच्चिदानन्दमोदिनम्।।

अथायं समुपस्थाप्यते सत्त्ववतां तत्त्वचिन्तकानां पुरतो नूतनया सरलया च शैल्या विरचितो भगवद्गीता–सिद्धान्तशिखामण्योर्दार्शनिकतत्त्वानां समन्वयसमन्वितः "भगवद्गीता–सिद्धान्तशिखामण्योः समीक्षात्मकमध्ययनम्" इति नामकः शोधप्रबन्धः "सिद्धान्तशिखामणि–भगवद्गीतयोः मीमांसाः" इति नाम्ना ग्रन्थरूपेण।

प्रवृत्तिनिमित्तम्

ख्रि. १९८९ तमाब्दतोऽद्यावधि यावत् प्राक्सम्पादितसुकृतविशेषेण विश्वनाथावासभूतकाशीवासलाभान्वितोऽहं ख्रि. १९९६ तमाब्दे सम्पूर्णानन्द–संस्कृतविश्वविद्यालयेऽधीयमानः शक्तिविशिष्टाद्वैतवेदान्ताचार्यपरीक्षामुत्तीर्य अतः परं स्वस्थानं गच्छेयमिति चिन्तयन्तं मामाहूय काशीज्ञानसिंहासनाधीश्वराः श्री १००८ जगद्गुरु डॉ. चन्द्रशेखरशिवाचार्यमहास्वामिन आज्ञापितवन्तः– "वीरशैवसाहित्य–माश्रित्य अनुसन्धानं विधाय 'पीएच. डी.' इत्युपाधिं सम्पाद्य ततः स्वस्थानं गन्तव्यमिति। तैरेवमाज्ञप्तस्य वीरशैवदर्शनस्य विशाले वाङ्मये किं विषयमधिकृत्य गवेषणं करणीयमिति चिन्तयतो मम मनसि विचारोऽयमागतः– "श्रीकृष्णार्जुन–संवादजनिता व्यासविरचिता सर्वोपनिषत्साररूपा भगवद्गीता यैः समन्वयपरैर्विचारैः सकलजनानुरागं सम्पाद्य विश्वविश्रुतयशोमती भूताऽस्ति, ते सर्वे रेणुकागस्त्य–संवादरूपे शिवयोगिशिवाचार्यविरचिते सिद्धान्तशिखामणौ समुपलभ्यन्ते तस्माद् भगवद्गीतया साकं सिद्धान्तशिखामणेः समीक्षा क्रियेत चेत्, तर्हि सिद्धान्त–शिखामणेरप्युत्कृष्टतमा भगवद्गीतासमानमान्या विचारा विदुषां समक्षं प्रकाशिताः स्युः" इति।

विचारमिमं पुरतः प्रस्त

प्रदत्तवन्तः । ततः का

विभागाध्यक्षपदमलङ्कुर्वतामकारणकरुणया परोपकारनिरतानां श्रीमतां डॉ. सुधांशुशेखरशास्त्रिमहाभागानां समक्षमहं ममाभीप्सां प्रकटितवान्। तैरपि प्रमुदितान्तःकरणैर्गीतासिद्धान्तशिखामणिविषये गवेषणं विधातुमनुज्ञा प्रदत्ता, स्वीयनिर्देशनप्रदानाश्वासनं च प्रदत्तम्। अथ निश्चितम्– "भगवद्गीता–सिद्धान्त–शिखामण्योः समीक्षात्मकमध्ययनम्" इति विषयमाश्रित्य गवेषणं विधेयमिति।

मुख्यमुद्देश्यम्

भगवद्गीता–सिद्धान्तशिखामण्योरुपरि केन प्रकारेण समीक्षा विधेयेति जिज्ञासया ग्रन्थानवलोकयन्नहं तत्रापश्यं यत्–

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना।
अन्ये सांख्येन योगेन कर्मयोगेन चापरे।।
अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः।।[1]

इति भगवान् श्रीकृष्णो मोहमूढमर्जुनं प्रति तदानीन्तने काले मोक्षोपायत्वेन प्रचलितानां ध्यान–ज्ञान–कर्म–भक्त्यादिसकलमार्गाणां मोक्षप्रदत्वमुपदिश्य तेषां समन्वयमुपस्थापितवान् गीतायाम्। सिद्धान्तशिखामणौ च–

अगस्त्य खलु सिद्धान्ता विख्याता रुचिभेदतः।
भिन्नाचारसमायुक्ता भिन्नार्थप्रतिपादकाः।।
सांख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा।
एतानि मानभूतानि नोपहन्यानि युक्तिभिः।।[2]

इत्युपदेशप्रारम्भे एव रेणुकभगवत्पादा नानागमश्रवणसंजातसंशयमगस्त्यं प्रति रुचिभेदेनाधिकारभेदेन च प्रवृत्तानां विभिन्नमतानां परस्परखण्डनमण्डनादिकं निराकृ[illegible] समन्वयदृष्टिं दर्शयामासुः। एवं सर्वसमन्वयार्थं प्रवृत्तयोर्भगवद्गीता–सिद्धा[illegible]ण्योः समीक्षाऽपि समन्वयपरैव भवति चेत् तर्हि उभयोर्मूलमुद्देश्यं

[illegible]

समतनमेवेति गाढं बाढं साधयितुं शक्येतेति भावेनाहं समन्वयात्मिका समीक्षा विधेयेति निश्चयं व्यदधाम्। अपरं च–

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्।।[1]

इत्युक्त्या गीताया वेदानां प्रधानाङ्गभूतानामुपनिषदां साररूपत्वं ज्ञायते। "आलोक्य शैवतन्त्राणि कामिकाद्यानि सादरम्"[2] इति शिवयोगिशिवाचार्येण च सिद्धान्तशिखामणेः शैवागमोपजीव्यत्वप्रतिपादनादस्य शैवागमसाररूपत्वं ख्याप्यते। तथैव–

सिद्धान्ताख्ये महातन्त्रे कामिकाद्ये शिवोदिते।
निर्दिष्टमुत्तरे भागे वीरशैवमतं परम्।।[3]

इत्येवं वीरशैवमतस्य कामिकादिवातुलान्तानां शैवागमानामन्तभागप्रतिपादितत्वं ज्ञायते। तस्माद्यथा वेदानामन्तभागनिहिता उपनिषदो वेदसाररूपा वेदानां प्रमुखा अङ्गभूता वेदान्तमिति नामभाजो भवन्ति, तथा शैवागमानामन्तभागोपदिष्टं वीरशैवमतं शैवागमसाररूपं तत्प्रमुखमङ्गभूतं शैवागमान्तमिति नामभाग् भवितुमर्हति। एवं शैवागमसाररूपस्य वीरशैवधर्मस्य तत्त्वप्रतिपादकत्वादपि सिद्धान्तशिखामणेः शैवागमसाररूपत्वमभिव्यज्यते।

तदेवमुपनिषत्सारभूताया गीतायाः, शैवागमसारभूतस्य सिद्धान्तशिखामणेश्च समन्वयात्मकेन समीक्षणेन तत्पृष्ठभूमावुपनिषदां शैवागमानां च समन्वयमप्युपपद्यते, "परस्पराविरूद्धार्थाः शिवोक्ता निगमागमाः"[4] इति नीलकण्ठशिवाचार्योक्तिः सार्थक्यं याति चेति भावेन 'भगवद्गीता-सिद्धान्तशिखामण्योः समीक्षात्मकमध्ययनम्' इति विषयमाश्रित्य गवेषणव्यापारे प्रवृत्तोऽहम्। अत एव प्रबन्धे प्रसङ्गानुसारमुपनिषत्-शैवागमवचनान्यप्युद्धृतानि सन्ति।

किञ्च, प्रत्येकस्मिन् धर्मे नैतिक-साम्प्रदायिक-दार्शनिकभेदेन त्रिविधा विचाराः प्रतिपादिता भवन्ति। तत्र सत्य-अहिंसा-परोपकार-दया-क्षमादिसद्गुणसंबद्धा

---

[1] *भ. गी. मा: ६*

[2] *सि. शि. १.२५*

[3] *सि. शि. ५.१४*

[4] *क्रियासार. भा. १, पृ. ४*

नैतिकविचाराः। लिङ्गभस्मचक्रचन्दनधारणादितत्तद्धर्मासाधारणाचरणसम्बद्धाः साम्प्रदायिकविचाराः। ईश्वर-जीव-जगत्-बन्ध-मोक्षादीनां स्वरूपसम्बद्धा दार्शनिकविचाराः ।

वीरशैवदर्शने इमे त्रिविधा अपि विचाराः प्रतिपादिताः। तद्धर्मीयतत्त्वप्रतिपादके सिद्धान्तशिखामणावपि ते निरूपिताः सन्ति। तथा हि–

अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दया क्षमा।
दानं पूजा जपो ध्यानमिति धर्मस्य संग्रहः।।[१]

इत्यत्र रेणुकभगवत्पादैर्नैतिकविचारा उपदिष्टाः। एवमेवाष्टावरण-पञ्चाचार-षट्स्थलोपासनात्मकवीरशैवीयासाधारणाचरणरूपेण साम्प्रदायिकविचाराः, शिव-जीव-जगत्-बन्ध-मोक्षानां स्वरूपसम्बद्धा दार्शनिकविचाराश्च निरूपिताः।

प्रत्येकस्मिन् धर्मे प्रायो नैतिकविचाराः सर्वसमाना भवन्ति। साम्प्रदायिकविचाराः परस्परं भिन्नभिन्नाः। दार्शनिकविचाराः क्वचिद् भिन्नाः, क्वचिदभिन्नाश्च भवन्ति। अत एव तुलनात्मकमध्ययनम्, समीक्षा, समन्वयो वा दार्शनिकविचाराणामेव प्राय उपपद्यते। तस्मादत्र शोधप्रबन्धे सिद्धान्तशिखामण्युक्तवीरशैवधर्मस्य दार्शनिकतत्त्वैः साकं भगवद्गीतोक्तदार्शनिकतत्त्वानां समन्वयरूपः समीक्षाप्रयासः कृतः।

ग्रन्थस्वरूपनिर्देशः

प्रबन्धोऽयं षट्परिच्छेदात्मकः। तत्र प्रथमपरिच्छेदे गीतावाङ्मयस्य परिचयो निरूपितः। तत्पृष्ठभूमावास्तिकनास्तिदर्शनविभागं प्रस्थानत्रयीविचारं च निरूप्य, तत्र गीतायाः स्थानं महत्त्वं च निर्दिश्य, तस्या उपनिषन्मूलकत्वं शिवोपदेशमूलकत्वं च दर्शितम्। गीतापरिचयसन्दर्भे कृष्णार्जुनयोरैतिहासिकत्वम्, गीताकालः, तस्या निरूपणशैली, प्रमुखा भाष्यकाराः, गीतानन्तरीयगीतासाहित्यमित्यादिविषयाश्च निरूपिताः सन्ति।

द्वितीयपरिच्छेदो निगमागमविभागाख्यः। तत्र निगमागमस्वरूपं निर्दिश्य शैवागमानां परिचयम्, सिद्धान्तशिखामणेर्वीरशैवागममूलकत्वम्, रेणुकागस्त्ययो-

---

[१] सि. शि. १६.५९

श्चारित्रिकैतिह्यम्, सिद्धान्तशिखामणेः परिचयम्, ग्रन्थकर्तुरैतिह्यम्, सिद्धान्तशिखामणेः संस्कृतप्राकृतटीकाकारा इत्यादिविषयाः प्रतिपादिताः।

शिवशक्तिविमर्शाख्ये तृतीयपरिच्छेदे गीताभिमतेश्वर-तच्छक्तिस्वरूपं सप्रकारं निरूप्य, सिद्धान्तशिखामण्यनुसारं वीरशैवाभिमतपरशिव-तच्छक्तिस्वरूपम्, तयोः सम्बन्धः, ईश्वराङ्गीकारप्रयोजनमित्यादिविषयान् प्रतिपाद्य, तदनूभयसम्मतेश्वर-तच्छक्तिस्वरूपसमीक्षोपस्थापिता।

जीव-जगत्स्वरूपविमर्शाख्ये चतुर्थपरिच्छेदे गीतानुसारं जीवस्वरूपम्, तस्य परमात्मनोंऽशत्व-लोकान्तरगमन-क्षेत्रक्षेत्रज्ञादिविचारनिरूपणपुरःसरं प्रतिपाद्य, जगत्स्वरूपविचारे गीता कं वादं मनुते? जगत्स्वरूपं च कीदृशम्? इति विषयम्, सिद्धान्तशिखाण्यनुसारं किं जीवस्वरूपम्? जीवपरमात्मनोरङ्गाङ्गिभावो भेदाभेदश्च कीदृशः? जगत्स्वरूपं किम् ? अविकृतपरिणामवादः कीदृशः ? कथमिदं जगदुत्पन्नम्? इत्यादिविचारान् निरूप्य तदनु गीतासिद्धान्तशिखामण्यभिमतजीव-जगत्स्वरूपसमन्वयो विहितः।

बन्ध-मोक्षस्वरूपविमर्शाख्ये पञ्चमपरिच्छेदे गीतायां बन्धत्वेनोक्तस्य सत्त्व-रजस्-तमोनामकगुणत्रयस्य स्वरूपम्, तन्निवृत्तिपरमेश्वरावाप्तिरूपमोक्षस्वरूपम्, जीवन्मुक्तयोगिनां स्वरूपं च निरूप्य, सिद्धान्तशिखामण्युक्तवीरशैवदर्शने बन्धरूपाणव-मायीय-कार्मिकाख्यमलत्रयस्वरूपम्, तन्निवृत्तिशिवत्वावाप्तिरूप-मोक्षस्वरूपम्, जीवन्मुक्तशिवयोगिस्वरूपं च निरूप्य तदनन्तरमुभयसम्मतबन्ध-मोक्षस्वरूपसमीक्षा व्यवस्थापिता।

मोक्षोपायविमर्शाख्ये षष्ठपरिच्छेदे गीतायां मोक्षोपायत्वेनाभिमतानां ज्ञान-कर्म-ध्यान-भक्तीनां स्वरूपविवेचनपूर्वकं कथं तेषां मोक्षोपायत्वम्? इति विषयं निरूप्य, सिद्धान्तशिखामणौ मोक्षसाधनत्वेन प्रतिपादितानां शिवदीक्षा-ज्ञानकर्मसमुच्चय-शिवानुग्रह-अष्टावरण-पञ्चाचार-षट्स्थलोपासनानां स्वरूपम्, तेषां मोक्षजनकत्वं च प्रतिपाद्य, पश्चाद् गीतोक्तमोक्षोपायानां वीरशैवसिद्धान्तोक्तमोक्षोपायेषु समन्वयः स्थापितः।

अन्ते चोपसंहारे भारतीयदर्शनेषु गीतायाः सिद्धान्तशिखामणेश्च महत्त्वम्, साम्प्रतमनयोः सामाजिकीमुपयोगितां सांस्कृतिकमवधानं च दर्शयित्वा प्रस्तुतनिबन्धस्य विहगावलोकनप्रसङ्गे गीताभिप्रायः सिद्धान्तशिखामण्युक्त-

वीरशैवदर्शने कथं सर्वभावेन समन्वितो भवतीति विषयं च निरूप्य वीरशैवदर्शनस्योत्कृष्टत्वं निरूपितम्।

तत्र भगवद्गीतावाङ्मयपरिचयः, सिद्धान्तशिखामणिपरिचयश्चान्यत्र ग्रन्थेषु क्वचिदुपलभेते। एवमेव भगवद्गीताभिमतानामीश्वर-जीव-जगत्-बन्ध-मोक्ष-मोक्षोपायाख्यदार्शनिकतत्त्वानाम्, सिद्धान्तशिखामण्युक्तवीरशैवदर्शनाभ्युपगतानामीश्वरादिदार्शनिकतत्त्वानां च प्रकारान्तरेण विवेचनमुपलभते तत्तत्साम्प्रदायिकग्रन्थेषु तत्र तत्र। किन्तु "भगवद्गीता-सिद्धान्तशिखामण्योः समीक्षात्मकमध्ययनम्" इति नामके शोधप्रबन्धे व्यवस्थापिता गीताभिमत-सिद्धान्तशिखामण्यभिमत-दार्शनिकतत्त्वयोः समन्वयात्मिका समीक्षा नान्यत्रोपलभत इतीयमत्रत्यः समीक्षापरो विचारोऽनितरसाधारणः। तस्मादस्य शोधप्रबन्धस्य तृतीय-चतुर्थ-पञ्चम-षष्ठ-परिच्छेदानामन्तभागे उपसंहारे च विवेचितः समीक्षाभागोऽस्य प्रबन्धस्य प्राणभूतः। यत्किञ्चिन्नावीन्यम्, तदत्रैव। तस्मादत्रोपपादितसमस्तविचाराः द्रष्टव्याः, तत्रापि समन्वयात्मकसमीक्षाभागो विशेषतोऽवधेयस्थानं मनीषिणाम्।

वस्तुतोऽत्र प्रथमं भगवद्गीतासम्बद्धा विचाराः, तदनु सिद्धान्तशिखामणिसम्बद्धा विचाराः, अन्ते च तयोः समीक्षा, एवं क्रमेणोपस्थापिता, अथापि नामसौन्दर्यार्थंमस्य ग्रन्थस्य "सिद्धान्तशिखामणि-भगवद्गीतयोः मीमांसा" इति नामपरिवर्तनं कृतम्।

कृतज्ञताज्ञापनम्

अतः परं कष्टसाध्येऽस्मिन् महाकार्ये साफल्यप्राप्त्यर्थं महापुरुषैर्मनीषिभिर्गुरुभिश्च बहु स्वल्पं वा साहाय्यमकारि, येषामत्र कार्ये मनागपि साहाय्यं वरीवर्ति, तेषां सर्वेषामहमधमर्णी। अतस्तेभ्यः किञ्चिदपरं कर्तुमहमप्रभुरपि तदीयोपकारस्मरणावनद्धकन्धरः सन् सप्रयासं कृतज्ञताज्ञापनं तु विदधाम्येव।

तत्र प्रथमतस्तत्रभवतां शिवपूजापरायणानां परमकरुणावताराणां नित्यं निरतिशयविरतिनिरतानां साम्प्रतं त्यक्तकलेवराणां कीर्तिकायेन विद्योतमानानां मम धर्मगुरूणां श्री. ष. ब्र. सिद्धरामशिवाचार्यमहास्वामिनां चरणारविन्दयोः सश्रद्धं शिरसा नैकशः प्रणामाञ्जलीन् निवेदयामि, येषां सदनुग्रहेण मन्मनसि सुरभारती-साहित्याध्ययनप्रेरणा समुत्पन्ना।

अतः परं समाजहितार्थमेव प्रयतितवतैस्तदुद्धारायैव लब्धजन्मैः पूज्यपादैः साम्प्रतं शिवसामरस्यमधिगतैः श्री. म. नि. प्र. कुमारशिवयोगिमहास्वामिभिर्विरचिते श्रीमद्वीरशैवशिवयोगमन्दिरे (कर्णाटक) पूर्वं संस्कृतमध्यापयद्भ्यो 'हुब्बल्लि होसमठस्य श्री. म. नि. प्र. शिवबसवमहास्वामिभ्यः, 'केलदी' हिरेमठस्य श्री ष. ब्र. डॉ. गुरुसिद्धदेवशिवाचार्यस्वामिभ्यः, 'इटगी' हिरेमठस्य वे. मू. चन्नबसवशास्त्रिभ्यश्च प्रणामाञ्जलिभिः कृतज्ञतां ज्ञापयामि। एभिर्महानुभावैरहं संस्कृताक्षरादारभ्य काश्यागमनपर्यन्तं यावत् संस्कृतभाषादिविविधविद्याः प्रपाठिताः।

अथाहं काशीजङ्गमवाडीमहामठस्य संस्थानाधीश्वराणां नैकविद्यापारङ्गतानां विद्यावारिधि-विद्यावाचस्पतीत्याद्युपाधिविभूषितानां श्री १००८ जगद्गुरु डॉ. चन्द्रशेखर शिवाचार्यमहास्वामिनां दिव्यपदपद्मयोः सभक्तिप्रश्रयं कोटिशः प्रणामाञ्जलीन् समर्प्य कृतज्ञतां विज्ञापयामि। इमे आचार्यप्रवदाः काशीमाजिगमिषुं मां काशीमानीय, एतादृशे महर्घेऽपि कालेऽद्यावधि यावत् जङ्गमवाडीमठे निःशुल्कावासभोजनादिकं प्रेम्णा प्रदाय शास्त्रचर्चादिभिश्च मामुपकृतवन्तः, स्वयमनेकविद्याविशारदा विद्यानुरागिणो विद्यार्थ्यनुरागिणश्चेमे मय्यकारणकरुणया वीरशैवसिद्धान्तान् प्रसङ्गानुसारमुपदिश्य मामनुसन्धानकार्ये प्रोत्साहितवन्तश्च।

एवमेव कर्णाटके स्वीयया सामाजिकप्रज्ञयाऽऽनन्तकार्यारम्भकारिणां रम्भापुरी-वीरसिंहासनाधीश्वराणां श्री १००८ जगद्गुरु-प्रसन्नरेणुकवीरसोमेश्वरशिवाचार्य-भगवत्पादानां चरणारविन्दयोः संश्रद्धः सन्नहं भक्तिपुरःसरं अनन्तशः प्रणम्य कृतज्ञतां समर्पयामि। इमे च महाचार्याः शोधग्रन्थममुं स्वीयया श्रीमद्वीरशैव-सद्बोधनसंस्थया प्रेम्णा प्रकाशितवन्तः। स ग्रन्थः पूज्यपादानां द्वादशवर्षीयपीठारोहण-समारोहसन्दर्भे लोकार्पणमधिगच्छतीतीदं मम पुण्यविशेष एवेति भावये।

अतः परं महामहिमशालिनामामूलाग्रवेदान्तादिनानाशास्त्रवेतॄणामुदारचरितानां नैकच्छात्राणामनुसन्धाने मार्गनिर्देशकानां परमदायालूनां परमादरणीयानां गुरुचरणानां काशीहिन्दूविश्वविद्यालयस्य संस्कृतविद्याधर्मविज्ञानसङ्कायस्य पूर्वसङ्कायप्रमुखानां श्रीमतां डॉ. सुधांशुशेखरशास्त्रिमहाभागानां पवित्रचरणयोरहं सश्रद्धं प्रणामाञ्जलिभिः कृतज्ञतां समर्प्रयामि। एभिर्महाभागैर्महदनुकम्पयाऽस्मिन् दुःसाध्येऽनुसन्धानकार्ये प्रवृत्तस्य मम निर्देशकत्वमङ्गीकृत्य लेखगतस्खालित्यसुधारपूर्वकं नूतनविषयलेखन-सूचनानिर्देशपुरःसरं च प्रेम्णा सम्यङ्मार्गदर्शनं च कृत्वा शोधप्रबन्धस्य पूर्णता

प्रापिता।

अथाहं शैव-शाक्त-तन्त्रागमादिवाङ्मये विश्वविश्रुतयशस्केभ्यो निष्कामभावेनैव सर्वोपकारकर्तृभ्यः सततलेखननिरतेभ्यः कर्मयोगिभ्योऽनुसन्धातॄणां मार्गदर्शनकुशलेभ्यो राष्ट्रपतिसम्मानितेभ्यो जङ्गमवाडीमहामठस्य शैवभारतीशोधप्रतिष्ठानस्य निर्देशकेभ्यः सुश्रद्धेयेभ्यः पं. व्रजवल्लभद्विवेदमहोदयेभ्यः सविनयं प्रणामाञ्जलिपुरःसरं कृतज्ञतामुपहरामि। एते महानुभावाः प्रबन्धमेनमामूलाग्रं समवलोक्य मम लेखनगता अशुद्धीर्निष्कास्य, आवश्यकविषयाणां लेखनार्थं च संसूच्य निर्दोषमिमं प्रबन्धं कृत्वा विश्वासवर्धनवचनैर्मां प्रोत्साहितवन्तः शोधकार्ये।

अतः परं काशीहिन्दूविश्वविद्यालयस्य वैदिकदर्शनविभागस्य विभागाध्यक्षेभ्यः श्रीमद्भ्यो डॉ. जी. आञ्जनेयशास्त्रिमहाभागेभ्यः, पूर्वविभागाध्यक्षेभ्यः श्रीमद्भ्यो डॉ. कृष्णकान्तशर्ममहाभागेभ्यः, न्यायवैशेषिकाचार्येभ्यः श्रीमद्भ्यो डॉ. के. ई. धरणीधरन्महाभागेभ्यश्च सश्रद्धं प्रणामाञ्जलिभिः कृतज्ञतां समर्पयामि। इमे सर्वेऽपि परमादरणीया आचार्या अनुसन्धानकार्ये मह्यमनेकविधानि निर्देशनानि प्रदाय मामुपकृतवन्तः।

एतदतिरिक्तं प्रबन्धेऽस्मिन् येषां विदुषां तत्कृतीनां वोपयोगो मया विहितस्तेभ्यः सर्वेभ्यः प्राचीनेभ्यो वर्तमानेभ्यश्च सश्रद्धं प्रणामाञ्जालीनावहामि। जङ्गमवाडीमहामठेऽध्ययनन्रितेभ्यः श्रीविश्वाराध्यशिवाचार्य-श्रीनूरन्दशिवाचार्य-श्रीमल्लिकार्जुनदेव-श्रीमहान्तदेव (हेब्बल्लि)- श्रीविश्वमहान्तदेव (दुरदुण्डी)- के. बी. गौडर प्रभृतिभ्योऽपि सुहृत्प्रवरेभ्यः कृतज्ञतां ज्ञापयामि। एते सर्वेऽनुसन्धान-निरताय मह्यं कार्यवैविध्येन साहाय्यं कृतवन्तः।

एवमेव शोधप्रबन्धमिमं टङ्कणादिना सुसज्जीकृतवन्तं राजशेखरहिरेमठं तथैव चन्दना बनर्जीं च धन्यवादशतैः सभाजयामि शोधप्रबन्धरूपस्यास्य ग्रन्थरूपेणमुद्रणवेलायांमति'सहकारं प्रदत्तवन्तं डॉ. जि.सि. केण्डदमठमहोदयम्, टङ्कणकार्येण सहाय्यं कृतवन्तं चिदानन्द ओ. हिरेमठ (कसगी) चाभिवादान् ज्ञामपयामि। अन्तेऽहं विदुषां पुरतः ग्रन्थमेनं "सिद्धान्तशिखा-भगवद्गीतयोः मीमांसा" इति नामानं प्रस्तुवन्निद-मनुभवामि-

गच्छतः स्खलनं मह्यां दृश्यते महतामपि।
प्रमादा यदि मद्ग्रन्थे विद्यन्ते विदुषां दृशि।।

प्रेम्णा सम्मार्जितव्यास्ते सुतं मातेव स्नेहला।
गृह्णन्तु ते ह्युत्तमांशं क्षीरं हंसा इवाम्भसि।।इति।

जङ्गमवाडीमठः, वाराणसी
२६-२-२००४
गुरुवासरः

विद्वद्विधेयः
डॉ. सिद्धरामनण्डिताराध्यशिवाचार्यः
हिरेमठः, हिप्परगी

* * *

सन्दर्भग्रन्थसङ्केताक्षरसूची

अ.को.	अमरकोशः
अ.सि.	अद्वैतसिद्धि
अनु.सू.; अ.सू.	अनुभवसूत्रम्
ई. उ.	ईशावास्योपनिषत्
ई. गी.	ईश्वरगीता
ई.प्र.वि.वि.	ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनी
कठ.	कठोपनिषत्
का.आ.; कारणा.	कारणागमः
किरणा.	किरणागमः
कूर्म. पु.	कूर्मपुराणम्
केनो.	केनोपनिषत्
कैवल्यो	कैवल्योपनिषत्
कै. सा.	कैवल्यसारः
कौषी.	कौषीतकिब्राह्मणोपनिषत्
क्रि. सा.	क्रियासारः
गणे. पु.	गणेशपुराणम्
गी. द.	गीतादर्पणः
च. ज्ञा.	चन्द्रज्ञानागमः
च. ज्ञा. आ.	,,
छा. उ.	छान्दोग्योपनिषत्
त. प्र.	तत्त्वप्रकाशः
त. सं.	तर्कसंग्रहः
तै. उ.	तैत्तिरीयोपनिषत्
तै. सं	तैत्तिरीयसंहिता

त्रि.म.ना.	त्रिपाद्विभूतिमहानारायणोपनिषत्
देवीकालो.	देवीकालोत्तरागमः
देवीभाग.	देवीभागवतम्
ध. शि.	धर्मशिरोमणिः
ना. पु.	नारदपुराणम्
नृसिंह. पु.	नृसिंहपुराणम्
न्या.सि.मु; बा. व्या.	न्यायसिद्धान्तमुक्तावली 'बालप्रिया' हिन्दी व्याख्या
पञ्च.	पञ्चदशी
पा. आ.; पारमे. आ.	पारमेश्वरागमः
पा. त	पारमेश्वरतन्त्रम्
पा. सू.	पाणिनिसूत्रम्
प्रश्नो.	प्रश्नोपनिषत्
बृ. उ.	बृहदारण्यकोपनिषत्
ब्र. वि.	ब्रह्मविद्योपनिषत्
ब्र. सू.	ब्रह्मसूत्रम्
ब्र. सू. शा. वृ.	ब्रह्मसूत्रशाङ्करीवृत्तिः
ब्र. सू. श्रीकर	ब्रह्मसूत्रश्रीकरभाष्यम्
भ. गी.	भगवद्गीता
भ.गी.रा.भा.	भगवद्गीतारामानुजभाष्यम्
भ.गी.शा.भा.	भगवद्गीताशाङ्करभाष्यम्
भ. सं. उ.	भवसन्तरणोपनिषत्
भा.आ.प.	भारतीयआध्यात्मिक परम्परे
भाग. पु.; भागव.	भगवतमहापुराणम्

भा. द.	भारतीय दर्शन
भास्करी	भास्करी
मनुस्मृ.	मनुस्मृतिः
म. भा.	महाभारतम्
महाना.	महानारायणोपनिषत्
मुकुटा.	मुकुटागमः
मुक्तिको.	मुक्तिकोपनिषत्
मुण्ड.; मुण्डको.	मुण्डकोपनिषत्
मृ. आ.; मृगेन्द्रा.	मृगेन्द्रागमः
योगवा.	योगवासिष्ठम्
यो. सू.	योगसूत्रम्
यो. सू. भा.	योगसूत्रभाष्यम्
यो. सू. वृ.	योगसूत्रभोजवृत्तिः
रघु.	रघुवंशमहाकाव्यम्
र. त्र.	रत्नत्रयम्
लि. धा. च.	लिङ्गधारणचन्द्रिका
लि. पु.	लिङ्गमहापुराणम्
वा. पु.	वायुपुराणम्
वा. शु. त.	वातुलशुद्धाख्यतन्त्रम्
वि. पु.; विष्णु. पु.	विष्णुपुराणम्
वी. आ. च.	वीरशैवानन्दचन्द्रिका
वी.मा.आ.सं.	वीरमाहेश्वराचारसंग्रहः
वी. स. सं.	वीरशैवसदाचारसंग्रहः
वे. सा.	वेदान्तसारः
श. वि. द.	शक्तिविशिष्टाद्वैतदर्शनम्
श. वि. सि.	शक्तिविशिष्टाद्वैतसिद्धान्तः
शाण्डि. उ.	शाण्डिल्योपनिषत्
शि. गी.	शिवगीता
शि. द.	शिवाद्वैतदर्पणः
शि. परि.	शिवाद्वैतपरिभाषा
शि. पु.	शिवमहापुराणम्
शिव. म. स्तो.	शिवमहिम्नस्तोत्रम्
शिव. रत्ना	शिवतत्त्वरत्नाकरः
शिवा. मञ्ज.	शिवाद्वैतमञ्जरी
शि. सू.	शिवसूत्रम्
शि. सू. वि.	शिवसूत्रविमर्शिनी
श्रीजाबालदर्शनो.	श्रीजाबालदर्शनोपनिषत्
श्रीमद्भा.	श्रीमद्भागवतम्
श्वे. उ.	श्वेताश्वतरोपनिषत्
ष. स.	षड्दर्शनसमुच्चयः
स. द. सं.	सर्वदर्शनसंग्रहः
स. ल. सं.	सर्वलक्षणसंग्रहः
सां का.	सांख्यकारिका
सां. सू.	सांख्यसूत्रम्
सि. कौ.	सिद्धान्तकौमुदी
सि. शि.	सिद्धान्तशिखामणिः
सि. शिखो.	सिद्धान्तशिखोपनिषत्
सि. शि. तत्त्व.	सिद्धान्तशिखामणितत्त्वप्रदीपिका व्याख्या
सि.शि.स.	सिद्धान्तशिखामणिसमीक्षा
सि. सा.	सिद्धान्तसारावलिः
सूक्ष्मा.	सूक्ष्मागमः
स्कन्द. पु.	स्कन्दमहापुराणम्

* * *

विषयसूची

शुभाशीर्वचनम् [i]
शुभाशीर्वचनम् [iii]
सम्मतिः [v]
विद्वदभिप्रायः [vii]
शुभाशंसनम् [ix]
परीक्षकप्रतिवेदनम् [xi]
भूमिका (उपक्रमः) [xii]
सन्दर्भग्रन्थसङ्केताक्षरसूची [xxi]
विषयसूची [xxiii]

प्रथमोऽध्यायः

गीतावाङ्मयपरिचयः १-४७

दार्शनिक पृष्ठभूमिः– १, आस्तिक-नास्तिकदर्शनानि– २, प्रस्थानत्रयी– ६, उपनिषदः– ६, ब्रह्मसूत्रम्– ८, भगवद्गीता– ९ , प्रस्थानत्रय्यां गीतायाः स्थानं महत्त्वं च– १२, गीताया उपनि–षन्मूलकत्वं शिवोपदेशमूलकता च– १८, श्रीकृष्णार्जुनयोश्चारित्रि–कैतिह्यम्– २३, श्रीकृष्णस्यावतारवादः– २६, अवतारवादे तात्त्विकी दृष्टिः– २६, अवतारवादे पौराणिकी दृष्टिः– २८, गीतायाः कालः–३१, उपदेशविधानं निरूपणशैली च– ३६, गीतायाः प्रमुखा भाष्यकाराष्टीकाकाराश्च– ४०, श्रीमद्भगवद्गीतानन्तरीयगीतासाहित्यम्– ४४, महाभारतस्य गीताः– ४४, पुराणादिग्रन्थगतगीताः– ४५, स्वतन्त्रगीताः– ४७

द्वितीयोऽध्यायः

निगमागमविभागः सिद्धान्तशिखामणिपरिचयश्च ४८-१२०

निगमा आगमाश्च– ४८, निगमागमोत्पत्तिविचारः– ५१, तन्त्राणां प्रभेदाः–५६, वैष्णवागमाः– ५६, शाक्तागमाः– ५७, शैवागमाः– ५८, निगमागमेषु शैवागमानां स्थानं महत्त्वं च– ६०, शैवागमेषु वीरशैवागमानां स्थानं महत्त्वं च– ६५, वीरशैवप्रभेदाः– ७१, केषाञ्चन वीरशैवागमानां परिचयः– ७२, वीरशैवग्रन्थेषूद्धृता अपरे आगमाः– ८०, श्रीसिद्धान्तशिखामणेर्वीरशैवागममूलकत्वम्– ८२, रेणुकाचार्याणां चारित्रिकैतिह्यम्– ८५, अगस्त्यमुनेश्चारित्रिकैतिह्यम्– ८९, रेणुकाचार्याणामवतारवादः– ९१, श्रीरेणुकभगवत्पादानां त्रिकोट्याचार्यरूपधारणलीला– ९७, आचार्याणां लिङ्गविलयः– ९८, ग्रन्थस्य ग्रन्थकर्तुश्चैतिह्यम्– १००, ग्रन्थकालनिर्णये दासगुप्तानामनवधानता– १०४, श्रीकरभाष्यात् सिद्धान्तशिखामणेः प्राचीनत्वम्– १०६, सी. हयवदनरावस्य भ्रमनिरासः– १०७, शिवयोगिशिवाचार्यस्य देशविचारः– ११०, गीतायाः प्रभावः– ११०, प्रतिपादनशैली– ११२, श्रीसिद्धान्तशिखामणेर्व्याख्याकाराः– ११७

तृतीयोऽध्यायः

शिवशक्तिविमर्शः १२१-१५५

गीतायां प्रकाशविमर्शात्मकब्रह्मविमर्शः– १२१, ब्रह्मणः सर्वगतत्वम्– १२४, गीतायां शक्तीनां स्वरूपम्– १२५, ईश्वरसद्भावे हेतुः प्रयोजनं च– १२८, ईश्वरस्य विभूतयः– १३१, वैषम्यनैर्घृण्यदोषपरिहारः– १३२, सिद्धान्तशिखामण्यनुसारेण शिवस्वरूपम्– १३४, शक्तिस्वरूपम्– १३६, शक्तिसद्भावे मानम्– १३८, शिवशक्त्योः सम्बन्धः– १३८, शक्तिविशिष्टाद्वैतपदस्यान्वर्थकता– १३९, शक्तेर्भेदाः– १४०, परशिवस्य महेश्वरशब्दाभिधेयत्वम्– १४०, महेश्वराङ्गीकारे प्रयोजनम्– १४२, सृष्टेर्लीलारूपत्वम्– १४४,

वैषम्यनैर्घृण्यदोषपरिहारः- १४५, उभयसम्मतेश्वरशक्तिस्वरूपसमीक्षा- १४८, शक्तिस्वरूपसमीक्षा- १५०, ईश्वराङ्गीकारप्रयोजनसमीक्षा- १५२, ईश्वरस्य जगत्कारणत्वसमीक्षा- १५२, वैषम्यनैर्घृण्यदोषपरिहारसमीक्षा- १५४

चतुर्थोऽध्यायः

जीवजगत्स्वरूपविमर्शः १५६-२२०

गीतानुसारं जीवस्वरूपम्- १५६, क्षेत्रक्षेत्रज्ञविचारः- १५८, जीवात्मनोऽणुत्वम्- १५९, जीवेश्वरयोरंशांशिभावसम्बन्धः- १६१, जीवपरमात्मनोर्भेदोऽभेदो वा- १६२, जीवस्य लोकान्तरगमनम्- १६५, ऊर्ध्वगतिः- १६६, मध्यगतिः- १६८, अधोगतिः- १६८, गीतानुसारं जगत्स्वरूपम्- १६९, गीतोपवर्णितः संसारवृक्षः- १७१, जगत्कारणविवेचनम्- १७१, सृष्टिविचारः- १७५, परमात्मसृष्टिः- १७५, हिरण्यगर्भसृष्टिः- १७८, सिद्धान्तशिखामण्यनुसारेण जीवस्वरूपम्- १७९, पिण्डपिण्डज्ञानविचारः- १८१, जीवात्मनोऽणुरूपत्वम्- १८२, जीवपरमात्मनोरङ्गाङ्गिभावः- १८४, जीवात्मनो बहुत्वम्- १८८, जीवपरमात्मनोर्भेदाभेदः- १९०, श्रीसिद्धान्तशिखामण्यनुसारं जगत्स्वरूपम्- १९३, जगदुभयकारणविवेचनम्- १९६, सृष्टिविचारः- १९८, षट्त्रिंशत्तत्त्वानां विकासक्रमः- १९८, त्रिवृत्करणम्- २०४, प्रपञ्चपरमेश्वरयोर्भेदाभेदसम्बन्धः- २०५, जगत्सत्यत्वम्- २०५, उभयसम्मतजीवजगत्स्वरूपसमीक्षा- २०८, जीवपरमात्मनोरंशांशित्वसमीक्षा- २१०, जीवपरमात्मनोर्भेदाभेदसमीक्षा- २११, जगत्स्वरूपसमीक्षा- २१४, सृष्टिसमीक्षा- २१६, जगत्सत्यत्वसमीक्षा- २१७

पञ्चमोऽध्यायः

बन्धमोक्षस्वरूपविमर्शः २२१-२६८

गीतानुसारेण बन्धस्वरूपं बन्धनकारणानि च- २२२, गुणत्रयस्वरूपम्- २२२, सत्त्वगुणः- २२३, रजोगुणः- २२५, तमोगुणः-

२२७, मोक्षस्वरूपम्– २३२, जीवन्मुक्तयोगिनां स्वरूपम्– २३३, सिद्धान्तशिखामण्यनुसारं बन्धस्वरूपम्– २४३, बन्ध (मल) स्वरूपम्– २४३, आणवमलः– २४४, मायीयमलः– २४५, कार्ममलः– २४७, पशोर्दुःखत्रयभोक्तृत्वम्– २४९, सिद्धान्तशिखाण्यनुसारं मोक्षस्वरूपम्– २५०, मुक्तेरानन्दरूपत्वम्– २५३, जीवन्मुक्तशिवयोगिनां स्वरूपम्– २५४, जङ्गमस्वरूपम्–२५८, उभयसम्मतबन्धमोक्षस्वरूपसमीक्षा–२६१, बन्धस्वरूपसमीक्षा–२६२, मोक्षस्वरूपसमीक्षा– २६५, जीवन्मुक्तयोगिनां स्वरूपसमीक्षा– २६६

षष्ठोऽध्यायः

मोक्षोपायविमर्शः २६९-३६९

गीतानुसारेण ज्ञानस्वरूपम्– २७०, ज्ञानस्य त्रैविध्यम्– २७१, ज्ञानस्य प्रतिबन्धकावरणानि– २७१, ज्ञानसाधनानि– २७२, ज्ञानस्य मोक्षहेतुत्वम्– २७५, कर्मणः स्वरूपम्– २७६, कर्मणस्त्रैविध्यम्– २७६, कर्मयोगः– २७७, धार्मिकाचरणानि– २८१, कर्मयोगस्य मोक्षहेतुत्वम्– २८२, गीतानुसारं ध्यानयोगस्वरूपम्– २८४, योगसाधकेनानुष्ठेया नियमाः– २८५, योगसाधनपद्धतिः– २८८, योगसाधनस्य निर्वाणहेतुत्वम्– २८९, भक्तिस्वरूपम्– २९०, भक्तियोगे न जातिभेदः– २९२, उपासनविधानम्– २९३, भक्तियोगस्य मोक्षहेतुत्वम्– २९५, गुरुशिष्यस्वरूपम्– ३००, सिद्धान्तशिखामण्यनुसारं मोक्षोपायस्वरूपम्– ३०१, शिष्यस्वरूपम्– ३०२, गुरुस्वरूपम्– ३०३, गुरुसेवा– ३०६, दीक्षाङ्गभूतो मलपरिपाकः– ३०८, शक्तिपातः– ३१०, शक्तिपाते न वर्णाश्रमभेदः– ३११, दीक्षास्वरूपं तत्प्रभेदाश्च– ३१२, दीक्षाया मोक्षोपायता– ३१७, ज्ञानकर्मणोः स्वरूपम्– ३१८, ज्ञानकर्मसमसमुच्चयवादः– ३२०, शिवानुग्रहस्य मोक्षकारणत्वम्– ३२५, धार्मिकाचरणानि– ३२६, अष्टावरणानि– ३२७, पञ्चाचाराः– ३३६, षट्स्थलोपासनविधानम्– ३४५, उभयसम्मतमोक्षोपायसमीक्षा– ३५८, ज्ञानकर्म-

णोर्मोक्षोपायसमीक्षा– ३५८, कर्मयोगसमीक्षा–३६३, ज्ञानस्वरूपसमीक्षा– ३६४, ध्यानयोगसमीक्षा– ३६४, शिवानुग्रहसमीक्षा– ३६६

उपसंहारः ३७०-३८७

भारतीयदर्शनेषु गीतायाः सिद्धान्तशिखामणेश्च महत्त्वम्– ३७२, साम्प्रतमनयोः सामाजिकी उपयोगिता सांस्कृतिकमवधानं च– ३७६, प्रस्तुतनिबन्धस्य विहगावलोकनम्– ३७९

सहायकग्रन्थसूची ३८८-३९३

* * *

प्रथमोऽध्यायः

गीतावाङ्मयपरिचयः

ॐश्रीमद्रेणुकाचार्यं गीताचार्यं च सादरम्।
प्रणम्य क्रियते तेषामुपदेशसमन्वयः।।

धर्मप्रधानेऽस्मदीये भारते वर्षे चिराद् दृश्यते खलु दार्शनिकचिन्तन-परम्परा। "दृशिर् प्रेक्षणे" (भ्वा. १०५७) इति धातोः "ल्युट् च"[१] इत्यनेन लुटि अनादेशे दर्शनशब्दो निष्पद्यते। तस्माद् "दृश्यते ज्ञायते आत्मा अनेनेति दर्शनम्" इति व्युत्पत्या आत्मज्ञानसाधकं शास्त्रं दर्शनमित्युपपद्यते।

ननु दृश्यते ज्ञायते आत्मा अनेनेति दर्शनमिति व्युत्पत्तिर्युक्तियुक्ता न भवेत्, चार्वाकादिषु नात्मनो न वा तस्य साक्षात्कारसाधनमार्गस्योपपादनमस्ति, तथापि तेषां दर्शनशब्देन व्यवहारो दृश्यत इति चेन्न, चार्वाकादिष्वप्यात्मतत्त्वाङ्गीकारात्। तथा ह्यात्मशब्देन न केवलं निर्गुणं निराकारं शुद्धबुद्धमुक्तस्वरूपचेतनमेव गृह्यते, अपि तु येन यत् तत्त्वं परममिति स्वीक्रियते तत्कृते तदेवात्मतत्त्वम्। चार्वाकादिभिरपि शरीरमेवात्मा दैहिकसुखमेव आत्मानन्दः तदवाप्तुं क्रियमाणो यत्न एवात्मसाधनमिति स्वीकृतत्वात्। तदुच्यते श्रीरेणुकभगवत्पादैः- "शरीरमेव चार्वाकैरात्मेति परिकीर्त्यते"[२] इति, चार्वाकमतानुयायिभिः-

देहः स्थौल्यादियोगाच्च स एवात्मा न चापरः।
अङ्गनालिङ्गनाजन्यं सुखमेव पुमर्थता।
देहस्य नाशो मुक्तिस्तु न ज्ञानान्मुक्तिरिष्यते।।[३]

इति तन्मताङ्गीकृतमात्मत्वं तत्प्राप्तिसाधनं च प्रतिपादितम्। मतमिदं युक्तियुक्तं न वेत्ययमपरो विचारः। तस्माद्युक्तमेवोपर्युक्तदर्शनशब्दव्युत्पत्तिलक्षणम्। उक्तं च सिद्धान्तशिखामणिसमीक्षायां- "दृश्यते साक्षात्क्रियते परमतत्त्वं येन तद्दर्शनम्"[४] इति।

---

[१] पा. सू. ३.२.११५
[२] सि.शि. ५.५५
[३] न्या.सि.मु.; बा.व्या.; पृ. २२०
[४] सि.शि.समीक्षा, पृ. १

आस्तिकनास्तिकदर्शनानि

प्रायो भारतीयेषु दर्शनेषु प्रधानतया आस्तिको नास्तिकश्चेति विभागद्वयं परिगणितम्। तत्रास्तिकनास्तिकशब्दयोरर्थनिर्णये विद्वत्सु नैकमतिर्वर्तते। तत्रेश्वरास्तित्ववादिन आस्तिकास्तद्विपरीता नास्तिकाः, परलोकास्तित्ववादिन आस्तिकास्तद्विरूद्धा नास्तिकाः, निगमागमप्रामाण्याभुपगन्तार आतिस्तकास्तन्निन्दका नास्तिकाश्चेति सन्ति त्रयो वादाः प्रमुखाः।

तत्र श्रीमाधवाचार्याः– "नास्तिकशिरोमणे! तावदीर्ष्याकषायिते चक्षुषि निमील्य परिभावयतु भवान्"[1] इति प्रपञ्चस्रष्टृत्वेनेश्वराङ्गीकतॄन् मीमांसकान् नास्तिकशब्देन सम्बोधयामासुः। अनेनेश्वरास्तित्ववादिन अस्तिकास्तद्विपरीताश्च नास्तिका इति तेषामभिप्रायो ज्ञायते।

अन्यैश्च परलोक एव आस्तिक-नास्तिकशब्दाभ्यां सम्बद्ध इति मन्यन्ते। तथा हि "अस्ति नास्ति दिष्टं मतिः"[2] इत्यस्य पाणिनीयसूत्रस्य व्याख्यानावसरे वामन[3]-कैयट[4]-भट्टोजिदीक्षिता[5]दिभिः परलोकोऽस्तीति मतिर्यस्य स आस्तिकः, तद्विपरीतो नास्तिक इत्यभिप्रायो निरूप्यते। एवमेव श्रीधराचार्येणापि "आस्तिक्यम्, अस्ति परलोक इति निश्चयः"[6] इति, श्रीमता गौरीशङ्करभिक्षुणा– "परलोकसत्ताविषयकाबाधितज्ञानवत्त्वमास्तिकत्वम्"[7] इति च निरूपणमुखेन परलोकास्तित्ववादिन आस्तिकास्तद्विपरीताश्च नास्तिका इति पक्षोऽङ्गीक्रियते।

पुनरन्ये च निगमागमप्रामाण्यास्तित्वादिनामास्तिकत्वं तद्विरुद्धानां च नास्तिकत्वं सूचयन्ति। तत्र मनुः–

> योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद् द्विजः।
> स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः।।

---

१. स.द.सं., पृ. ५१०
२. पा.सू., ४.४.६०
३. द्र. पा.सू., ४.४.६० काशिकावृत्ति।
४. तत्रैव महाभाष्यप्रदीपे।
५. द्र. सि.कौ., पृ. २६४
६. भ.गी., १८.४२ श्रीमधरी।
७. स.ल.सं., पृ. ३३
८. मनु. स्मृ., २.११

इति वेदनिन्दकं नास्तिकशब्देन प्रतिपादितवान्। श्रीमच्छङ्करभगवत्पदाः– "आतिस्तक्यमास्तिकभावः श्रद्धधानता आगमार्थेषु"[१] इति, श्रीगौरीशङ्करभिक्षुः– "शास्त्राद्युक्तविषयकविश्वासत्वमास्तिकत्वम्"[२] इति श्रीवीरराघवाचार्याः– "आस्तिक्यं शास्त्रार्थे सत्यतानिश्चयः"[३] "आस्तिक्यं शास्त्रार्थविश्वासः"[४] इति प्रतिपादयामासुः। एतदभिप्रायेण निगमागमप्रामाण्याभ्युपगन्तार आस्तिकास्तद्विपरीताश्च नास्तिका इति विज्ञायते।

अत्रेदं विचारणीयं यत् किमास्तिका ईश्वरास्तित्ववादिनोऽथवा परलोकास्तित्ववादिन उत वा निगमागमप्रामाण्याभ्युपगन्तार इति। यदीश्वरास्तित्ववादिन एवास्तिकास्तद्विरुद्धाश्च नास्तिकाः स्युः, तदा कपिलजैमिनिप्रभृतिदार्शनिकमहर्षयोऽपि नास्तिका भवेयुः, तैरपि कर्मफलप्रदातृत्वेनापूर्वमङ्गीकरणमुखेनेश्वरस्याऽनङ्गीकृतत्वात्। भवन्तु नास्तिकास्ते तत्र का हानिरिति चेत्, न तत्र पूर्वमीमांसानिर्मातुर्महर्षेर्जैमिनेर्नास्तिकत्वे वेदोक्तनित्यनैमित्तिकादिकर्मानुष्ठानरूपपूर्वकाण्डस्य नास्तिकत्वम्, येन विना चित्तशुद्धेरभावः, चित्तस्यैवाशुद्धत्वे न ज्ञानोदयः, तदभावे मोक्षस्याकाशकुसुमत्वं, नास्तिकत्वापत्तिश्च। सांख्याचार्यस्य कपिलमहर्षेर्नास्तिकत्वे पवित्रस्य सांख्यतत्त्वस्य नास्तिकपोषकत्वापत्तिः। न तावत् कुत्रापि शास्त्रेषु कपिलादीनां नास्तिकत्वं श्रूयते; प्रत्युत सर्वैरप्यास्तिकत्वेन तेषां नामनिर्देशः कृतः।

परलोकास्तित्ववादिन आस्तिकास्तद्विपरीता नास्तिका इति ब्रूमश्चेत् तर्हि जैन–बौद्धदर्शनयोरप्यास्तिकदर्शनेष्वन्तर्भावापत्तिः तयोरपि कर्मसिद्धान्ताङ्गीकृतत्वात्। तस्मात् प्रायः अधिका आलोचकाश्चार्वाक–जैन–बौद्धदर्शनेषु वेदविधानं निराकृत्य तस्य निन्दां विहितत्त्वात् तेषां दर्शनानामास्तिकत्वं निराकृत्य नास्तिकत्वं समर्थयामासुः।

"श्रौते स्मार्ते च विश्वासो यत्तदास्तिक्यमुच्यते"[५] इत्युपनिषदुक्त्यनुसारम्, "नास्तिको वेदनिन्दकः"[६] इति मनुस्मृतेरुक्त्यनुसारेण च ये वेदप्रामाण्याभ्युपगन्तार

---

[१] भ.गी., १८.४२ शां.भा.।
[२] स.ल.सं., पृ. ३३
[३] भागव. ११.१७–१८ वीर व्या.।
[४] तत्रैव ११.१९–३३
[५] श्री जाबालदर्शनो, २.६
[६] मनु. स्मृ., २.११

आस्तिका तन्निन्दकाश्च नास्तिका इति पक्षमङ्गीकुर्वन्ति। तेषामाशयोऽयं यद्, एवमङ्गीकारेण न सांख्यानां न वा मीमांसकानां नास्तिकत्वापत्तिः, तैरपि वेदागमप्रामाण्याङ्गीकृतत्वात्। न च जैन-बौद्धयोरास्तिकदर्शनेष्वन्तर्भावापत्तिः, तयोर्निगमागमप्रामाण्यानङ्गीकारात्।

चिन्तनीयोऽयमत्र विषयः– बौद्धाः किमर्थं निगमनिन्दायां प्रवृत्ता इति। तथा हि– अत्र बौद्धानां निगमप्रामाण्यनिराकरणे तत्रापि विशेषतया कर्मकाण्डस्य निन्दकत्वे न कारणाभावः। जैनबौद्धधर्मयोः प्रादुर्भावकाले वैदिकधर्मानुयायिनो वेदागमसारभूतं नैजपरमतत्त्वविज्ञानचिन्तनमेव विस्मृत्य केवलं बाह्याडम्बरप्रदर्शकानां पुरोहितानां मुखराणां वशीभूय यज्ञादिकर्मकाण्डे तदन्तर्गतपशुहिंसायां निमग्नाः वेदाधारमुखेन स्वार्थविषयमेव साधयन्ति स्म। तानवधातुं बौद्धदर्शनप्रवर्तको बुद्धो वेदाङ्गभूतं कर्मकाण्डं निराकृतवान्। बाह्ये वेदनिन्दां कुर्वन्नप्यान्तरे तत्सारभूतं निर्वाणप्रापकसाधनमेवोपदिश्य प्रचोदितवान् मौढ्याचारपथगान्। अत एवोपनिषदुक्ताशय एवानेकत्र बुद्धोपदेशे सम्मिलितमस्ति।[1] एनमेवाभिप्रायं डॉ. राधाकृष्णन्-महाभागः[2] स्वामिप्रभवानन्दमहोदयश्च[3] स्वीकुरुतः।

तथापि यदि वेदनिन्दकहेतुत्वेनैव बौद्धानां नास्तिकत्वं मन्येत तर्हि, भगवद्गीतासांख्यकारिकादिग्रन्थेष्वपि कुत्रचिद्वेदनिन्दादृष्टत्वात् तेषामपि नास्तिकता दुर्निवार्या भवेत्। तथा हि "त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन"[4] "श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चलः"[5] "वेदवादरताः पार्थ नान्यदस्तीतिवादिन--- समाधौ न विधीयते"[6] इति गीतायां; "दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः"[7] इति सांख्यकारिकायां च दृश्यते। एतदनुसारेण गीतादिग्रन्थानामेव नास्तिकत्वेऽस्माकं दर्शनसौध एव धराशायी भवेत्, अत एव केचन आलोचका आस्तिकत्वपरिचायकेषु ईश्वर-परलोक-वेदाख्येष्वेकस्यापि सत्वे तदास्तिकदर्शनम्, एकस्याप्यभावे तन्नास्तिकदर्शनमित्युपपादयन्ति। अनेन जैन-बौद्धदर्शनयोरास्तिकत्वपरिचायकेषु परलोकस्य (कर्मसिद्धान्तस्य) स्वीकारात् तेषां

---

[1] द्र. भा.द.; भा. १, पृ. ५५९-५६०
[2] द्र. तत्रैव, पृ. ५९८-५९९
[3] द्र. भा.आ.प., पृ. ४-५
[4] भ.गी., २.४५
[5] भ.गी., २.५३
[6] भ.गी., २.४२-४४
[7] सां.का., २

न नास्तिकतेति; चार्वाकदर्शने नेश्वरस्य, नापि परलोकस्य न वा वेदप्रामाण्यस्याङ्गीकारात् तद्दर्शनमेव नास्तिकमिति व्यवस्थापयन्ति। श्रीबलदेवो-पाध्यायाद्यालोचकाः[1] एनमेव पक्षमाश्रयन्ति।

तथापीदमत्रावधेयम्– आस्तिकनास्तिकयोर्भेदं वेदप्रामाण्यमुखेन कृतवतां पूर्वाचार्याणामान्तराभिप्रायोऽयं यत्, ईश्वरपरलोकाद्यास्तिकत्वपरिचायकविषयेषु निगमागमेतरप्रामाण्याभावान्निगमागम एवात्र परमं प्रमाणम्। उक्तं च गीतायां भगवता श्रीकृष्णेन–

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम्।

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कुर्तमिहार्हसि।।[1] **इति।**

एतद्वचनानुसारेण शास्त्रलक्षणनिगमागमानामेवैहिकामुष्मिकजीवने कर्तव्याकर्तव्यनिर्धारणसमर्थत्वात् तदनुसारमेवात्र लोके प्रवर्तितव्यम्। तस्माज्जीवनव्यवस्थापकेषु निगमागमवचनेषु येषां न विश्वासस्ते नास्तिका येषां च विश्वासस्त आस्तिका इति। अनेनैवाभिप्रायेण निगमागमप्रामाण्यमङ्गीकुर्वाणा न्याय-वैशेषिक-सांख्य-योग-पूर्वमीमांसा-उत्तरमीमांसाख्यवैदिकदर्शनान्यास्तिकदर्शनानीति कथ्यन्ते। अन्ये च चार्वाक-जैन-बौद्धदर्शनान्यवैदिकानि नास्तिकदर्शनानीति व्यवह्रियन्ते। अत्र पूर्वोक्तसांख्यादिषड्दर्शनानि आगमसम्मतदर्शनानि[2] च पूर्णास्तिकदर्शनानीति, जैन-बौद्धदर्शनेऽर्धास्तिकदर्शने इति, चार्वाकमतमात्रं पूर्णनास्तिकदर्शनमिति चोक्ते सत्यतोऽप्यधिकं सामञ्जस्यं भेवेदित्यस्माकमभिप्रायः। दर्शनानामांस्तिकत्वनास्तिकत्वविचारो ग्रन्थान्तरेषु विस्तरेण वर्तत एव।

साम्प्रतमास्तिकत्वपरिचायकेषु प्रमुखयोर्निगमागमयोः प्रतिनिधिरूपयोर्भगद्गीतासिद्धान्तशिखामण्योः परस्परसमीक्षा क्रियमाणा वर्तते। तत्र प्रस्थानत्रयस्यास्तिकानां प्रधानाङ्गत्वात्, अस्मदीयविषयसम्बद्धाया गीतायाः प्रस्थानत्रयान्तर्गत्वाच्च तद्विषयकविचार आवश्यक इति मत्वा प्रस्थानत्रयविचारः किञ्चित्प्रस्तूयते।

---

१. द्र. (बलदेवोपाध्यायस्य) भारतीय दर्शन, पृ. १६

२. भ.गी., १६.२४-२५

३. तन्त्रं तु षड्विधं प्रोक्तं षड्दर्शनविभेदतः।
वीरशैवं वैष्णवं च शाक्तं सौरं विनायकम्।।
कापालिकमिति ज्ञेयं दर्शनानि षडेव हि।। (पा.आ., १.२२-२३)
(द्र.विस्तारार्थं तत्रैव प्रथमे पटले)

प्रस्थानत्रयी

इह खलु प्रत्येकं धर्मस्यैकैकः पवित्रो ग्रन्थः धर्मग्रन्थरूपेण विहितः। यथा क्रैस्तानां बैबल्, महम्मदीयानां खोरान्, बौद्धानां च धम्मपद इति। प्रायः धर्मग्रन्थेषु स्वात्मसाधनमुखेन साक्षात्कृतपरमसत्यानामनुभवसिद्धानामनुभववचनानि, मनुष्याणामिह परसौख्यकारणानि विद्यन्ते। त एव ग्रन्थास्तत्तन्मतानां परमप्रमाणभूता अध्यात्मसाधनरतानां सहाय्यहस्ताश्च वर्तन्ते। अस्यामेव श्रेण्यां प्रस्थानत्रय्यपि भारतीयानामास्तिकदर्शनानामाधारग्रन्थरूपेण मानभूतास्ति। प्रथितमेव खलु प्रस्थानत्रयी नामोपनिषद् ब्रह्मसूत्रभगवद्गीताख्यास्त्रयो दार्शनिकग्रन्था इति। जीवानामाध्यात्मिकसाधनमुखेन ब्रह्मसाक्षात्काररूपब्रह्मैक्यसिद्धिविषये दिक्सूचिवन्मार्गनिर्देशकत्वादेतेषां त्रयाणां ग्रन्थानां प्रस्थानत्रयीति विख्यातिः। अत एव भारतीयतत्त्वशास्त्रसौधस्याधारस्तम्भसदृशेष्वेषु त्रिषु प्रस्थानेषु स्वमतप्रमाण्यं प्रायः सर्वे दार्शनिका भारतीया आस्तिकाः परिशोधितवन्तः, शङ्करभगवत्पादाद्यनेके आचार्यास्तदधिकृत्य स्वमतसम्मतभाष्याणि विरचयामासुश्च। तत्र प्रथमा उपनिषद्, द्वितीयं ब्रह्मसूत्रम्, तृतीया च भगवद्गीतेति तेषां क्रमः।

१. उपनिषदः

उप-नि-षदॢ विशरणगत्यवसादनेषु (भ्वा. ५९३) इति धातोः 'उपनिषत्' शब्दो निष्पद्यते, स च सद्गुरोः समीपमुपविश्याध्यनीया गूढा ब्रह्मविद्येत्यर्थं प्रकाशयति। अनया विद्ययैवाविद्यानिवृत्तिः, परमश्रेयोरूपब्रह्मत्वावाप्तिश्च सम्भवा। अत एवोच्यते तदुत्पत्तिम् "उपनिषादयति नाशयति गर्भजन्मजरात्मकं संसारम्, उपगमयति प्रयाति ब्रह्म, उपनिषण्णं वा परं श्रेयोऽस्यामिति उपनिषद्" इति।

प्रस्थानत्रयीष्वत्यन्तप्राचीनतमानां ब्रह्मविद्याप्रतिपादिकानामुपनिषदां वेदानामन्तभागप्रतिपादितत्वाद् वेदानामन्तस्सारसत्त्वनिर्धारकत्त्वाच्च ता एवोपनिषदो वेदान्ता इत्यभिधीयन्ते। तदुक्तं मेदिनीकोशे– भवेदुपनिषद्धर्मे वेदान्ते विजने स्त्रियाम्" इति वेदान्तसारे च– "वेदान्तो नामोपनिषत्प्रमाणम्"[1] मुक्तिकोपनिषदि च– "तिलेषु तैलवद्वेदे वेदान्तः सुप्रतिष्ठितः"[2] इत्युपनिषदां वेदान्तापरपर्यायत्वं वेदानां साररूपत्वं च निर्दिष्टम्।

---

[1] *वेदान्तसारे, पृ.२*

[2] *मुक्तिको., १.९*

अत्रोपनिषदां संख्याविषये विदुषां नैकमतिर्दृश्यते। केचनाशीत्यधिकैकशतोत्तरसहस्रा (११८०) उपनिषद इति, केचन विंशत्युत्तरद्विशता (२२०) इति, अपरे चाष्टोत्तरशता (१०८) इति कथयन्ति। परन्त्विदानीमुपलभ्यमाना उपनिषदो विंशत्युत्तरद्विशता (२२०) एवेति 'उपनिषदङ्के' तासां नामनिर्देशः कृतः।[1] तत्र का उपनिषदो विदेहमुक्तिसाधिका इति जिज्ञासायां, मुक्तिकोपनिषद्यष्टोत्तरशतानाम् (१०८) उपनिषदां नामनिर्देश उपलभ्यते।[2] किन्तु शङ्कराचार्यभगवत्पादाद्याचार्यैः– 'ईश–केन–कठ–प्रश्न–मुण्डक–माण्डूक्य–तैत्तरीय–ऐतरेय–छान्दोग्य–बृहदारण्य–काख्यदशोपनिषत्स्वेव भाष्याणि रचितानि। एतदतिरिक्तं रानडेमहाभागा उपनिषदां कालानुक्रमप्रतिपादनसन्दर्भे कालानुक्रमेण पञ्चभागेन विभज्य त्रयोदशोपनिषदामुल्लेखं विधाय तासां प्रामाणिकत्वमुपस्थापितवन्तः।[3]

---

[1] *द्र., उपनिषदङ्कः, पृ. १५३–१५६*

[2] *"ईशकेनकठप्रश्नमुण्डमाण्डूक्यतितित्तिरिः ॥*
ऐतरेयं च छान्दोग्यं बृहदारण्यकं तथा॥
ब्रह्मकैवल्यजाबालश्वेताश्वो हंस आरुणिः॥
गर्भो नारायणो हंसो बिन्दुर्वादशिरः शिखा॥
मैत्रायणी कौषितकी बृहज्जाबालतापनी॥
कालाग्निरुद्रमैत्रेयी सुबालसुरिमन्त्रिका॥
सर्वसारं निरालम्बं रहस्यं वज्रसूचिकम्॥
तेजोनादध्यानविद्या योगतत्त्वात्मबोधकम्॥
परिव्राट् त्रिशिखी सीता चूडा निर्वाणमण्डलम्॥
दक्षिणं शरभं स्कन्दं महानारायणाह्वयम्॥
रहस्यं रामतपनं वासुदेवं च मुद्गलम्॥
शाण्डिल्यं पैङ्गलं भिक्षुमहच्छारीरकं शिखा॥
तुरीयातीतसंन्यासपरिव्राजाक्षमालिका ॥
अव्यक्तैकाक्षरं पूर्णा सूर्याक्षाध्यात्मकुण्डिका॥
सावित्र्यात्मा पाशुपतं परं ब्रह्मावधूतकम्॥
त्रिपुरातपनं देवीत्रिपुरा कठभावना॥
हृदयं कुण्डली भस्म रुद्राक्षगणदर्शनम्॥
तारसारमहावाक्यपञ्चब्रह्माग्निहोत्रकम् ॥
गोपालतपनं कृष्ण याज्ञवल्क्यं वराहकम्॥
शाटयायनी हयग्रीवं दत्तात्रेयं च गारुडम्॥
कलिजाबालवालिसौभाग्यरहस्यत्रृचमुक्तिका॥" (मुक्तिको. १.३०–३९)

[3] *१. बृहदारण्यक, छान्दोग्य, २. ईश, केन, ३. ऐतरेय, तैत्तरीय, कौषीतकी, ४. कठ, मुण्डक, श्वेताश्वतर, ५. प्रश्न, मैत्रेयी, माण्डूक्य।*

इदमत्रावधेयं यत् मूलप्रमाणभूतानामुपनिषदां संख्या, दश त्रयोदश वा भवतु, भारतवर्षे असंख्यशास्त्राणामङ्गीकारात्, विद्यानां बाहुल्याच्च तदसंख्यशास्त्रविद्यागर्भिता उपनिषदः क्रमेण वृद्धिङ्गताः। नैता उपनिषदो मूलोपनिषद्विरुद्धार्थप्रतिपादकाः, अपि तु तासामुपनिषदामेवार्थं विस्तरेणार्थान्तरेण च प्रकटीकुर्वन्ति। तस्मादुपनिषत्सु केषाञ्चन प्रामाण्यं केषाञ्चन चाप्रामाण्यमिति नाशङ्कनीयम्, अन्यथा यस्मै यद्रोचते तस्य प्रामाण्यम्, यन्न रोचते तस्याप्रामाण्यत्वं च भवेत्, येन सर्वत्र शास्त्रे स्वेच्छानिर्धारणप्रवृत्यापत्तिः स्यात्। तस्माज्जिज्ञासूनामधिकारभेदेन रुचिभेदेन चानेकासूपनिषत्सु स्वस्वाधिकारं विज्ञाय, उपनिषदध्ययनरतो भूत्वात्मिकीं शान्तिमुपलभ्येतेत्येवोपनिषदामाशयः। श्रद्धान्वितः साधक आत्यन्तिकया निष्ठया यद्येकामप्युपनिषदमध्येति चेत् तर्हि तदलं बन्धनिवृत्तये। तत्कैवल्यसाधनस्योपनिषज्ज्ञानस्य दार्ढ्याभावेऽधिकानामुपनिषदामध्ययनं क्रमशः कर्तव्यमिति। तदुक्तं मुक्तिकोपनिषदि–

माण्डूक्यमेकेवालं मुमुक्षूणां विमुक्तये।
तथाप्यसिद्धं चेज्ज्ञानं दशोपनिषदं पठ।।

ज्ञानं लब्ध्वाचिरादेव मामकं धाम यास्यसि।
तथापि दृढता नो चेद्विज्ञानस्याञ्जनासुत।।

द्वात्रिंशाख्योपनिषदं समभ्यस्य निवर्तय।
विदेहमुक्ताविच्छा चेदष्टोत्तरशतं पठ।।[१] इति।

क्रमशोऽधिकानामुपनिषदामध्ययनं तज्ज्ञानस्यैव दार्ढ्यमित्युक्त्वा तद्दृढीभूतेन ज्ञानेन ब्रह्मसाक्षात्कारसिद्धिरितीदं प्रथमं प्रस्थानम्।

२. ब्रह्मसूत्रम्

तत्र भगवता बादरायणेन प्रणीतानि ब्रह्मसूत्राण्येव द्वितीयप्रस्थानत्वेन प्रसिद्धानि। ब्रह्मविषयप्रतिपदकसूत्रयुक्तोऽयं ग्रन्थः चतुरध्याययुतः प्रत्येकस्मिन्नध्याये चतुष्पादत्वेन षोडशपादसहितश्च वर्तते। अत्रोपपादितसूत्राण्येव शारीरकसूत्र-ब्रह्मसूत्र-वेदान्तसूत्र-व्याससूत्रेत्याद्यनेकनामभिर्व्यवह्रियन्ते।

---

[१] *मुक्तिको., १.२६-२९*

तत्र शरीरमेव शारीरकम्, तत्र भवः शारीरको जीवः, स सूत्र्यते याथातथ्येन निरूप्यते यैस्तानि शारीरकसूत्राणीति व्युत्पत्या जीवस्वरूपनिरूपकत्वात्तेषां शारीरकसूत्राणीति, ब्रह्मस्वरूपनिरूपकत्वात् ब्रह्मसूत्राणीति, वेदान्तापरपर्यायोपनिषदुक्तार्थ एव नानाशङ्कापरिहारपुरस्सरं सूत्रवदनुस्यूतत्वाद्वेदान्तसूत्राणीति, भगवद्व्यासप्रणीतत्वाद् व्याससूत्राणीति च व्यपदिश्यन्ते। तदुक्तं श्रीमता मधुसूदनसरस्वत्या "चतुरध्यायी शारीरकमीमांसा 'अथातो ब्रह्मजिज्ञासा' इत्यादिः 'अनावृत्तिशब्दात्' इत्यन्ता जीवब्रह्मैक्यसाक्षात्कारहेतुश्रवणाख्यविचारप्रतिपादकान्न्यायानुपदर्शयन्ती भगवता बादरायणेन कृता।"[1] इति तत्सूत्रप्रणेतुर्नामनिर्देशनपुरस्सरं तत्प्रतिपाद्यविषयं च सङ्क्षेपेणोद्धृतम्।

एवमुपनिषदुक्तजीवब्रह्मणोः, तदैक्यस्य, तत्साक्षात्कारकारणसाधनानां च स्वरूपं चेतरनानाशङ्कापरिहारद्वारा सूत्रितमत्र सूत्रेषु। अत एवैतेषां ब्रह्मसूत्राणामाध्ययनचिन्तनाभ्यां ब्रह्मसाक्षात्कारसिद्धिरितीमानि सूत्राणि द्वितीयप्रस्थानत्वेनोपस्थापितानि।

३. भगवद्गीता

तत्र भगवता व्यासेन प्रणीतस्य महाभारतस्य भीष्मपर्वान्तर्गता भगवद्गीता प्रस्थानत्रय्यां तृतीया। सा चोपदिष्टा महाभारतस्य कुरुक्षेत्रयुद्धे रणाङ्गणे। यदाऽर्जुनः शत्रुपक्षस्थान् पितामहादिस्वबन्धून् शस्त्रास्त्रविद्याचार्यं द्रोणं स्वगुरुं चावलोक्य ममत्ववशीभूतः–

दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम्।
सीदन्ति मम गात्राणि मुखं च परिशुष्यति।
वेपथुश्च शरीरे मे रोमहर्षश्च जायते।।[2]

इत्यादिभिः स्वावस्थां प्रकटयन् मोहाविष्टः शोकसंविग्नमानसो विषण्णवदनः युद्धपराङ्मुखो भवति, तदा गीताचार्यो भगवान् श्रीकृष्णः–

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ।।

---

[1] शि.म.स्तो., श्लो.७, मधुसूदनी व्याख्या

[2] भ.गी., १.२८-२९

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप।।[१]

इत्याद्यनेकयुक्तिभिरर्जुनमुपदिदेश। तन्मुखेन तस्य ममत्वं दुर्बलत्वं युद्धविमुखत्वं च दूरीकृत्य तमर्जुनं युद्धाय कृतनिश्चयं करोति। एवमर्जुनविषादयोगादारभ्य मोक्षसंन्यासयोगपर्यन्तमुपदिष्टा एवाष्टादशाध्यायी, सप्तशतश्लोकीया भगवद्गीता जाता। अर्जुनशोकमोहपरिहारवदेवास्या अध्ययनचिन्तनमननरतानां शोकमोहापहारिणी, योगक्षेमभारवाहिनी च वर्तते। तद्गीतपठनेनैवेतरनानाशास्त्राध्ययनजन्यज्ञानोपलब्धिर्जायते, अत्रैव भक्ति-ज्ञान-क्रिया-योग-यागाद्यनेकशास्त्रविचाराणां प्रतिपादितत्वात्। तस्माद्गीताध्ययनमनेकशास्त्राध्ययनसदृशम्। उक्तं च भगवद्गीतामाहात्म्ये–

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता।।[२] इति।

श्रीमच्छङ्करभगवत्पादाचार्या अपि– "तदर्थे विज्ञाते समस्तपुरुषार्थसिद्धिः" इति भगवद्गीताया अध्ययनेन, तदर्थविज्ञानेनाखिलपुरुषार्थप्राप्तिरिति प्रतिपादयन्ति। एवं जिज्ञासूनां साधकानां कैवल्यदायिनी वर्तत इत्यतो भगवद्गीता तृतीयप्रस्थानत्वेनाभिहिता।

एवमुपनिषद्-ब्रह्मसूत्र-भगवद्गीताख्यं प्रस्थानत्रयं जिज्ञासूनां मुक्तिसिद्धये कल्पते। अत्रावधेयं यत् भगवान् बादरायणो व्यास एवैतेषां प्रवचनकर्तेति। स एव खलु गुरुशिष्यश्रवणपरम्परामुखेन श्रुतिरूपेण स्थितस्यैकीभूतस्य वेदस्य ऋग्वेद-यजुर्वेद-सामवेद-अथर्वणवेदाख्यभेदेन विभागचतुष्टयं कृत्वा तेभ्यः सुव्यवस्थितं रूपं प्रदत्तवान्।[३] प्रस्थानत्रय्यां प्रथमानामुपनिषदां तत्तद्वेदान्तर्गतत्वात् ता उपनिषदो भगवातो व्यासस्य प्रवचनान्तर्गता एव। वस्तुतस्तूपनिषदां वेदानामपौरुषेयत्वान्न कोऽपि तासां प्रणेता विद्यते, तथापि व्यासो वेदविभजनमुखेनोपनिषत्स्वपि तथा कृतवान्। अनयैव दृष्ट्योपनिषदो प्रवचनान्तर्गता इति प्रतिपादितम्। द्वितीयप्रस्थानस्य ब्रह्मसत्रस्य प्रणेता भगवान् बादरायणो व्यास

---

[१] *भ.गी., १.२-३*

[२] *भ.गी.मा., ४*

[३] *"वेदं विव्यास आसत इति वेदव्यासः" इति वेदव्यासपदोत्पत्याऽपि व्यासस्य वेदविभाजकत्वं सिद्ध्यति।*

एव।[१] तृतीयप्रस्थानरूपाया भगवद्गीतायाश्च व्यासविरचितमहाभारतस्य भीष्मपर्वान्तर्गतत्वात् तस्या अपि व्यासप्रणीतत्वं सुविदितमेव। एवमियं प्रस्थानत्रयी वस्तुतो भगवतो बादरायणस्य व्यासस्यावदानमत्यन्तं महत्त्वपूर्णमविस्मरणीयं चास्ते।

अस्यां प्रस्थानत्रय्यामुपनिषदः प्रधानभूताः, ब्रह्मसूत्रभगवद्गीतयोराधारभूतत्वात्, "शास्त्रयोनित्वात्"[२] इत्यादिसूत्रेषु, "तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।"[३] इत्यादिगीतोक्तिषु चोपनिषच्छास्त्रस्य नामोल्लेखाच्च। द्वितीयं च स्थानं ब्रह्मसूत्रस्य यतो हि–

ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक्।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः।।[४]

इति गीतायां ब्रह्मसूत्रपदोल्लेख उपलभ्यते। यद्यपि बलदेवोपाध्यायप्रभृत्यालोचकैः "भारतीयदार्शनिकां गीतां द्वितीयप्रस्थानत्वेनोपस्थाप्य तद्गरिमाणमुद्गीतवन्तः" इति गीता एव द्वितीयं प्रस्थानमिति समर्थितम्। तन्नोचितम् "ब्रह्मसूत्रपदैश्चैव"[५] इत्यत्र गीतायां ब्रह्मसूत्राणां स्पष्टं निर्देशात्। तस्माद् गीतायाः प्रस्थानत्रय्यां तृतीयं स्थानमित्येवोचितम्, इदृश्या एव व्यवस्थायाः कालक्रमोचितत्वात्। अत्रैवोपनिषद्-ब्रह्मसूत्रयोराशयः परिपूर्णतां गत इत्यत्र अनेकशास्त्रवैखरीणामाधारभूतत्वाच्च विचारिता प्रस्थानत्रयी। भगवद्गीता अस्य महाप्रबन्धस्य मुख्यो विषय इति विहायोपनिषदो ब्रह्मसूत्राणि चाधुना तृतीयाया गीताया भारतीये वाङ्मये किं स्थानम्? किं वा महत्त्वमिति यथामतिरालोच्यते।

---

[१] *"शङ्कराचार्यादारभ्य बादरायण एव वेदान्तसूत्राणां रचयितेति परम्परा वर्तते। किन्तु अनेकेषु स्थानेषु अपरं पुरुषं प्रति एतन्नामोल्लेख उपलभ्यते, अनेन स्वाभाविकीयं शङ्का यदयं बादरायणोऽस्य सूत्रस्य रचयिताऽस्ति अथवा अन्य इति। किन्तु प्राचीनभारतीयसाहित्ये एतादृशापरबादरायणसम्बन्धो नास्ति। अतः सूत्ररचयिताऽपरो बादरायण आसीदित्युक्तिर्नैव समीचीना। भारतीयपरम्परानुसारेण वेदान्तसूत्ररचयिता बादरायणो, वेदविभाजको व्यासश्चैक एवास्ति। शङ्करानुयायी गोविन्दानन्दो वाचस्पतिमिश्र-आनन्दगिरीश्चैनमेवाभि-प्रायमनुसरन्ति।" –(भारतीय दर्शन, भा.२, पृ.३७० डॉ. राधाकृष्णन्)*

[२] *ब्रह्मसूत्र, १.१.३*

[३] *भ.गी., १६.२४*

[४] *तत्रैव, १३.४*

[५] *तत्रैव, १३.४*

प्रस्थानत्रय्यां गीतायाः स्थानं महत्त्वं च

अस्ति किल भगवद्गीता भारतवर्षे सर्वविद्वन्मान्या, जनमानसप्रिया, सर्वजनहितैकसाधिका, भारतीयाध्यात्मिकतत्त्वरसधारा संसारपारावारा। अयमेक एवैतादृशो ग्रन्थः यत्र धर्म-दर्शन-नीतिशास्त्राणां समन्वयो वर्तते। अत एव मानवानां ज्ञातभाषासु प्रायः सर्वास्वनूदितोऽयम्।[१] अनेनैव दृष्ट्या प्रस्थानत्रय्यामुपनिषद् ब्रह्मसूत्रं च भवतां पण्डितानां मानभूते, किन्तु न ते भगवद्गीतावल्लोकप्रियतां प्राप्ते, तत्रापि तावत् सामान्यजनानामनुरागं नोपलभामहे। उपनिषदि ब्रह्मसूत्रे च प्रतिपादितः क्लिष्टोऽस्पष्टश्च यो विषय सोऽपि गीतायां सरलत्वं स्पष्टत्वं च भजते। मनुष्याणामशान्तिः कुत्रास्तीति तन्मूलं संशोध्य तत्समूलमुच्छिनत्ति परमशान्तिमादधाति चेत्ययं न केवलमाध्यात्मिको ग्रन्थः, अपितु मानसशास्त्रग्रन्थोऽपि विद्यते। सर्वेषामपि मानवानां श्रद्धावतां भक्तिमतामत्रास्याध्ययनेऽधिकारोऽस्ति इत्याद्यनेकहेतुभिर्भगवद्गीता प्रस्थानत्रय्यामत्युन्नतं महत्त्वपूर्णं च स्थानमालभते।

अवगतमेवेदं यद् ब्रह्मसूत्रं, भगवद्गीता, चोपनिषदुक्तार्थमेवोपायान्तरैर्दृढयतः। तत्र समस्तवेदवेदाङ्गानामन्तःसारसत्त्वासूपनिषत्सु प्रतिपादितनानाशास्त्रविषयावगमो धीमतामेव साध्यः, अल्पमतयस्तु नावगन्तुं समर्थाः। विषयदृष्ट्याप्यस्त्येव कठिना, भाषादृष्ट्याऽपि लौकिकसंस्कृताद्वैदिकसंस्कृतस्य क्लिष्टत्वात् संस्कृतविदामप्यल्पानामुपनिषद्विज्ञानं कष्टतरमेव प्रतीयते। ब्रह्मसूत्रमप्यस्मिन् विषये नोपनिषद्भ्यो भिन्नम्, अपि तूपनिषद्भ्योऽत्यधिकक्लिष्टत्वात् तदर्थविज्ञानं शङ्कर-रामानुज-वल्लभ-श्रीपतिपण्डिताराध्यादिसदृशानामुन्नतप्रतिभान्वितानां समस्तोपनिषदर्थविदामनुभविनामाचार्याणामेवाधीनम्। सूत्रार्थावगमनजिज्ञासवः केचनाल्पप्रतिभान्विता अपि विद्वांसो तत्तद्भाष्यावलोकनान्तरेण तदर्थं वेत्तुं न शक्नुवन्ति। यदि विदुषामेतादृशी गतिश्चेत्यल्पज्ञा. जनसामान्यास्तु तत्पठितुमप्यसमर्थाः भवन्ति, तदर्थविज्ञानं तु सुदूरमेव तेषाम्।

न तत्रोपनिषद्ब्रह्मसूत्रयोः कठिनत्वे कारणाभावः। यदि निगूढमात्मज्ञानं तत्साधनानि च सर्वसामान्यानि सर्वसुलभानि च भवेयुः तर्हि तेऽपि तद्विज्ञानायैव चेष्टारता भवन्ति, ये तु तज्ज्ञानस्य पात्रत्वमेव नाधिगताः। तेनायोग्यास्तज्ज्ञानं

---

[१] *भारतीय दर्शन, भा. १, पृ. ४२५, डॉ. राधाकृष्णन्।*

तु न प्राप्नुवन्ति, अपि तु प्राप्तमिव मन्यमानास्तस्य सदुपयोगमकुर्वन्तो दुरुपयोगमेव साधयन्तोऽहङ्कारिणः स्वयं यत्कुर्वन्ति, तस्यैव श्रेष्ठत्वं मन्यमानाः शास्त्रहानिं, स्वहानिं, समाजहानिं च विदधति। तस्मादेव तत्पूर्वाचार्यैस्तज्ज्ञानस्य सूत्रादिरूपेण क्लिष्टत्वमुपस्थाप्य तत्परिरक्षणं कृतम्। उक्तं चारविन्दघोषमहाभागैः– "आत्मज्ञानस्य देवताविषयकसत्यज्ञानस्य च रहस्यसंरक्षणवेदरहस्यरक्षणत्वादीनामुद्देशो युक्त एव। यद् एंवविधस्य पवित्ररहस्यविचारस्यानधिकारिभिर्दुरुपयोगो मा भूत्"[1] इति।

अत्रावधेयं यद्–अनेन क्लिष्टत्वेनैकत्र लाभोऽन्यत्र हानिश्च भवति। तथा हि तज्ज्ञानस्य क्लिष्टत्वे दुर्बुद्धीनामल्पमतीनां तस्य प्राप्तिर्गगनकुसुमसदृशत्वात्तन्मुखेन शास्त्रस्य दुरुपयोगप्रसङ्गात् परिक्षणरूपो लाभो भवत्येव, किन्तु ये सुबुद्धयो विकसितान्तःकरणाः शास्त्राध्ययनपात्राः श्रद्धान्विताः सन्तोऽपि येषां क्लिष्टनानाशास्त्रविषयाध्ययनार्हा धीर्नास्तिः, ते तदवगन्तुसमर्था भूत्वा तज्ज्ञानवञ्चिता भवन्तीतीयं महती हानिरेव।

वस्तुतस्तु शास्त्रस्य क्लिष्टत्वे लाभादधिका हानिरेव जायते। यतो हि बौद्धिकदृष्ट्या शास्त्राध्ययनसमर्थाः सर्वेऽपि हृदयदृष्ट्या तज्ज्ञानयोग्या इति न वक्तुं शक्यते, केषाञ्चन बुद्धिमतामपि दुष्प्रवृत्तिस्वभावस्य लोके दृष्टत्वात्। एतद्विपरितं बौद्धिकदृष्ट्या शास्त्राध्ययनासमर्थाः सर्वे हृदयदृष्ट्या तज्ज्ञानापात्राणीत्यपि न कथयितुं शक्यते, केषाञ्चन अज्ञानिनामपि सदाचारप्रवृत्तेर्लोकि दृष्टत्वात्। तस्मात् सदाचारप्रवृत्ता अल्पमतयस्तच्छास्त्राध्ययनवञ्चिता भवन्ति, इतीदृशीं हानिं परिहर्तुमक्लिष्टरूपस्यैकस्य शास्त्रग्रन्थस्यावश्यकतासीत्, येन जनसामान्या अपि लाभान्विता भवेयुः। तदावश्यकशास्त्रमेवात्यन्तसरलरूपेण लौकिकसंस्कृतभाषायां श्रीकृष्णेनोपदिष्टं भगवद्गीतारूपेणोपस्थितम्, यत् सर्वजनसुलभमक्लिष्टं च विद्यते। एवं गीतायां गुह्याद् गुह्यतरं ज्ञानमपि विमृश्य सरलरूपेण भगवता श्रीकृष्णेनोपदिष्टम्। तुदक्तं च गीतायाम्–

इति ते ज्ञानमाख्यातं गुह्याद् गुह्यतरं मया।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु।।[2] इति।

---

[1] वेदरहस्य. भा.१, पृ. ८

[2] भ.गी., १८.६३

तस्मात् प्रस्थानमत्रय्यामुपनिषद्ब्रह्मसूत्रयोः क्लिष्टत्वात्, गीतायाश्च सरलत्वात् सुलभत्वाच्च ताभ्यामुभाभ्यामप्यास्या वैशिष्ट्यं दृश्यते।

किञ्च, "तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः"[१] इत्यादिश्रुतिषु शूद्राणां वेदाध्ययनानधिकारत्वप्रतिपादनाद्वेदान्ताध्ययने तेषां नाधिकारः, ब्रह्मसूत्रे "शुगस्य तदनादरश्रवणात्सूच्यते हि"[२] इत्याद्यपशूद्राधिकरणे शूद्राणां तदध्ययनानर्हत्वोपपादनाद् ब्रह्मसूत्राध्ययनेऽपि तेषां नाधिकार इति च ज्ञायते। न केवलं शूद्राणाम्, अपि तु मन्वादिस्मृतिषु "स्त्रीशूद्रौ नाधीयाताम्" इत्यादिना स्त्रीणामपि तदध्ययनानधिकारित्वं स्मृतम्। एतादृशी व्यवस्थापि तच्छास्त्ररहस्यपरिक्षणाय तद्दुरुपयोगप्रसङ्गनिवारणायैव विहिता। अत्रापि पूर्वोक्ता हानिरापतति यत्– न सर्वे शूद्रा अधोमार्गपथिका, दुर्बुद्धिग्रस्ता, दुराचारिणश्च प्रभवितुं शक्नुवन्ति ये च शूद्रा अपि धर्मपथारूढा, सुगुणसुशोभिताः, सुकर्मरताः, सदाचारिणश्च विद्यन्ते, तेषां शास्त्राध्ययनाधिकारविरोधोऽयं नैव सम्मत आगमानाम्।

वस्तुतस्तु शूद्रत्वं गुणावगुणाभ्यां सुकर्मदुष्कर्मभ्यां निश्चीयमानं स्यात् न केवलं जन्मना। उक्तं च शरणैः–

य एव जीवान् विनिहन्ति नित्यं
स एव भाव्योऽन्त्यज इत्यजस्त्रम्।
तथैव योऽश्नाति परान्नमेव
स एव भाव्योऽन्त्यज इत्यजस्त्रम्।।

यैरेव सर्वत्र हितं विचिन्त्यते
तेषां कुलं नैव विचारणीयम्।
सर्वेषु जीवेषु हिताभिशंसका सङ्गार्य-
भक्ताः कुलजाः प्रकीर्तिताः।।[३] इति।

अत्र दुराचारस्यैवान्त्यजप्रयोजनत्वम्, सदाचारस्य च सुकुलजत्वमुक्त्वा तन्मुखेन गुणकर्मणी एव जातिनिर्णायके इति तेषामाशयः। एवं गुणकर्मभ्यां तस्य

---

[१] तै.सं., ७.१.१.६

[२] ब्र.सू., १.३.३४

[३] भ.गी., २.२७, वीरशैवभाष्ये, पृ. ६२

निर्णयेनैवोपनिषद्ब्रह्मसूत्रयोः पक्षपातित्वपरिहारसम्भवः। अन्यथा तयोः पक्षपातित्वापत्तिर्दुर्निवार्या भवेत्।

ननु पूर्वजन्मकृतकर्मफलानुरूपतत्तद्वर्णजन्मप्राप्तिप्रतिपादनान्न पक्षपात इति चेन्न, हीनकुलोत्पन्नस्तत्कुलपरम्परानुसारेण मांसभक्षणहिंसादिहीनकार्याणि कृत्वा, तत्कर्मजन्यफलानुरूपं हीनकुलजन्म प्राप्नोतीत्येवं पुनः पुनर्हीनकार्यं, पुनः पुनश्च हीनकुलजन्म जायत इति दुष्परम्परायां तेषामुद्धारस्यैवानवस्थाप्रसङ्गवदपरिहार्यत्वप्रसङ्गात्।

अत एव गीतायां तादृशपक्षपातपरिहाराय गुणकर्मभ्यामेव सा सा जातिर्विनिर्णीयते न तु जन्मना। यथा– "चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः"[1] इति भगवता तत्तद्गुणान् तत्तत्कर्माणि चावलोक्य तदनुसारमेव तत्तद्वर्णस्त्रष्टृत्वमुक्तम्। तस्मादेव गीतायां तदध्ययनस्य कोऽधिकारीति जिज्ञासायाम्–

इदं ते नातपस्काय नाभक्ताय कदाचन।
न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति।।[2]

इति वर्णचतुष्टयेषु यः कोऽपि भवतु, स यदि तपो-भक्ति-सुश्रुषा-अनसूयाद्युत्कृष्टगुणरहितो भवेत् चेत्, तर्हि तेभ्य इदं गुह्यतमं शास्त्रं नोपदिष्टमित्यनधिकारिणां निराकरणं कृत्वा–

य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयम्।।
न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः।
भविता न च तस्मादन्यः प्रियतरो भुवि।।[3]

इति श्रद्धान्वितैर्भक्तैस्तपोभक्त्यादिसुकर्मपथगामिभिरेवेदं शास्त्रमध्येतव्यमिति भक्तानां सुकर्मरतानामधिकारत्वं विहितम्। अत एवोक्तम्–

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनः।
स्त्रियो वैश्यास्तथा शूद्राः तेऽपि यान्ति परां गतिम्।।[4]

एतदनुसारेण प्रस्थानत्रय्यामुपनिषत्सु ब्रह्मसूत्रे चाधिकारिनिर्णये प्रतीयमानस्या-नवधानस्य परिहारो गीतायां जायते। तस्मादस्मिन् विषये प्रस्थान–

---

[1] *भ.गी., ९.३२*

[2] *भ.गी., १८.६७*

[3] *भ.गी., १८.६८-६९*

[4] *भ.गी., ४.१३*

त्रय्यामितरप्रस्थानापेक्षया गीताप्रस्थानस्य विशालभावं वस्तुनिष्ठत्वं च सुसाधु शोभते।

डॉ. श्रीसर्वपल्लीराधाकृष्णन् महाभागैरपि– "न हीयं भगवद्गीता दीक्षितविशेषव्यक्त्यर्थमेव लिखितो गुह्यग्रन्थः न वा तादृशविशेषजना एव तज्ज्ञानावगाहनसमर्थाः; अपि तु ये परिवर्तनशीले प्रपञ्चे आगत्य पतिता भ्रमिताश्च सन्ति तेषामपि जनसामान्यानामभ्युदये सहायकं सकललोकप्रियं च काव्यमियं गीता"[१] इति कथितम्।

किञ्च, प्रसिद्धाः किलोपनिषदो ज्ञानप्रतिपदिका इति। उपनिषदो ज्ञानकाण्डत्वेन प्रसिद्धाः, तथापि तत्र कर्म-भक्ति-उपासनादिविषया अपि क्वचिदुपपादिताः, किन्तु तेषां तङ्क्षेपेणैवोपपादितत्वात् तत्तद्विषये उत्पन्नानां केषाञ्चन सन्देहानां समाधानं न तत्र जायते। तत्तद्विषयाणां विशिष्टार्थाः शङ्कायाः समाधानं गीतायामेव दृश्यते। तथा हि, ईशावास्ये–

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।।[२]

इत्यत्र कर्मण आजीवनं कर्तव्यतामुपदिश्य, तत्कर्मकर्तव्यतैव कर्मलेपविमुक्तये मार्ग इति विरोधाभासं प्रकटयति।कथं वात्र कर्मनिर्वाह एव तत्कर्मनिवृत्तिमार्गः? यद्यस्ति कर्मनिर्वाह एव कर्मनिवृत्तिमार्गस्तर्हि, कीदृशं तत्कर्म यत् कर्मलेपनिवारकम्? इत्याद्याङ्क्षाणां परिहारो न तत्रोपनिषदि लभ्यते। तज्जिज्ञासाशान्तये गीतैव शरणम्। गीता उपनिषत्सु कुत्रचिदुपलभ्यमानं कर्मविषयमेव स्वसिद्धान्तत्वेन स्वीकृत्य तत्रोत्पन्नानां सहजानां सन्देहानां समाधानमाददाति। तथा हि– "न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्"[३] इति कर्मकर्तव्यत्वे मनुष्याणामनिवार्यतामुक्त्वा, कीदृशं कर्म कुर्वन्नेव जीवस्तत्कर्मबन्धनान्मुच्यत इत्याकाङ्क्षायाम्–

असक्तो ह्याचरन् कर्म परमाप्नोति पुरुषः।[४]
त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः।
कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः।।[५]

---

[१] भ. गी., राधाकृष्णन्, परिचय, पृ. १४, हिन्द पाकेट बुक्स प्राइवेट लिमिटेड, दिल्ली।
[२] ई.उ., २
[३] भ.गी., ३.५
[४] भ.गी., ३.१९
[५] भ.गी., ४.२०

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा।।[१]

इत्यादिषु सर्वकर्मफलानि ब्रह्मणि समर्प्य कर्मफलापेक्षारहितेन क्रियमाणं कर्म एव तत्कर्मलेपविमुक्तये मार्ग इति समादधाति भागवती गीता। तस्माज्जीवास्तादशं कर्म कुर्वन् कर्मबन्धनान्मुच्यते इति तस्याभिप्रायः। सन्दर्भेऽस्मिन्नपि गीतायाः विवरणमावश्यकं सुशोभनं च प्रतीयते प्रस्थानत्रय्याम्।

किञ्च मुण्डकोपनिषदि भगवतः परमात्मनः स्वरूपनिरूपणसन्दर्भे–

अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ
दिशः श्रोत्रे वाग्विवृत्ताश्च वेदाः।
वायुः प्राणो हृदयं विश्वमस्य
पद्भ्यां पृथ्वी ह्येषसर्वभूतान्तरात्मा।।[२]

इति तस्य प्राकृतिकं विशालं रूपं निर्दिष्टम्। एवमुपनिषदि श्लोकैकेन दृश्यमानं भगवत भौतिकं रूपं भगवद्गीतायां सम्पूर्णेऽप्यध्याये विस्तरतां गतम्। यथा ह्यर्जुनेन प्रार्थितो भगवान् श्रीकृष्णोऽस्मिन्नेव तद्विशालं रूपं तस्मै दर्शयामास। तद् रूपं कीदृशमित्यादिविषयो गीतायाः विश्वरूपदर्शनाख्ये एकादशाध्याये सम्पूर्णे–

अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम्।।[३]

इत्यादिभिरुक्तिभिर्निरूपितोऽस्ति विस्तरेण। एवं मुण्डकोपनिषद्युपपादितो विचारो भगवद्गीतायां न केवलं विचाररूपेणोपदिष्टः, अपि तु स विचार एव मूर्तिमान् सन् तद् द्वारा तादृशं विशालं भौतिकं रूपमस्ति वा न वा? यद्यस्ति चेत् कीदृशम्? को वा तद्रूपमद्यावधि साक्षात्कृतवान्? इत्याद्यनेकसन्देहान् परिहरतीत्यनया दृष्ट्याऽपि गीताया वैशिष्ट्यं दरीदृश्यते।

एवं भगवद्गीता परम्परागतं क्लिष्टत्वं विहाय सरलत्वेन सुलभत्वेन चात्मविद्यां प्रतिपादयन्ती सर्वजनानामात्मसाधनमुकुरीभूता स्वीयाध्ययनस्याधिकारिविषये वैशिष्ट्यपूर्णं निर्णयं निर्दिश्येदानीन्तनानामाधुनिकविचारकाणामपि

---

[१] भ.गी., ५.१०

[२] मुण्डको., २.१.४

[३] भ.गी., ११.१०

परममान्या जाता, उपनिषद्ब्रह्मसूत्रादिग्रन्थेषु दृश्यमानां कश्चिद्विकलतां निवार्य, तत्रोत्पन्नाः शङ्काः परिहृत्य तन्मुखेन प्रस्थानत्रय्यामत्यन्तं महत्त्वपूर्णं स्थानमलङ्कुरुत इत्यत्र न सन्देहः।

वस्तुतस्तु गीतायामनेके महत्त्वपूर्णा विचारा उपलभन्ते। तेष्वत्र केचन एव निदर्शनाय निवेदिताः। मन्येऽत्र निवेदिता विचारा अलमस्या महत्त्वमवगन्तुमिति विस्तराद् विरम्य साम्प्रतं प्रस्थानत्रय्यामुपगतमहत्त्वपूर्णस्थानाया भगवद्गीतागङ्गायाः किं मूलस्रोत इति विषय उपस्थाप्यते।

गीताया उपनिषन्मूलकता शिवोपदेशमूलकता च

प्रायो भारतीया दार्शनिका धार्मिकाश्च ग्रन्था येन केनापि प्रकारेण वा निगमागमाभ्यां प्रभाविताः, साक्षात् परम्परया वा ताभ्यां सम्बद्धाश्च वर्तन्त एव। श्रीमद्भगवद्गीतापि निगमेषु ज्ञानकाण्डत्वेन ख्याताभिः उपनिषद्भिः प्रभाविता सम्बद्धाः चास्ते। भगवत्पादैः शङ्कराचार्यैरपि– "तदिदं गीताशास्त्रं समस्तवेदार्थसारसङ्ग्रहभूतम्"[१] इति तस्या गीताया उपनिषन्मूलकत्वं समर्थितम्। पूर्वप्रकरणे यदुक्तमस्माभिः उपनिषदोऽत्युत्कृष्टतां याति गीता इति तत्तु तस्या उन्नतविचारानवलोक्यैव। वस्तुतो गीतोन्नतविचारवती; तथापि तस्याः प्रतिपाद्यविषयाणां मूलस्रोतस्तूपनिषच्छास्त्रमेवेत्यपि सत्यमेव। तस्माद् भगवद्गीता उपनिषद्गङ्गाया विनिःसृता, श्रीगृष्णस्यानुभवेन मथिता सर्वोपनिषत्सारभूता मधुरा नवनीतप्राया। गीतामहात्म्ये–

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्।।[२]

इति गीताया उपनिषत्सारसर्वस्वत्वं तन्मूलकत्वं चोपस्थापितम्। तत्र गीतायाः प्रत्येकमध्यायोऽप्युपनिषत्सदृश इत्येवं मत्वा प्रत्येकाध्यायस्य परिसमाप्त्यवसरे– "इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे" इति पुष्पिकावाक्यमुपलभ्यते। अनेन गीता स्वयमेव स्वस्या उपनिषन्मूलकत्वं स्वीकरोतीति ज्ञायते। श्रीरानाडेमहाभागाः– "प्रायश्चतुर्विंशतिशताब्दपूर्वमेव

---

[१] *भ.गी.,शा.भा.उपो.।*

[२] *भ.गी.मा.,* ६

भगवद्गीताकृद्भिः प्रथमवारमुपनिषदीयतत्त्वसिद्धान्तानमरकाव्यरूपायां भगवद्गीतायां समन्वयं कर्तुं सफलप्रयासः कृतः।"[1] इति कथयन्ति।

किञ्चोपनिषत्सु विद्यमाना नैके मन्त्रा यादृशास्तत्र सन्ति अक्षरशस्तादृशा एव गीतायामपि दरीदृश्यन्ते। केचन च अक्षरशस्तद्वत्तां न यान्त्यपि तत्रोक्तभावोऽभिव्यज्यते। तथा ह्यत्र निदर्शनाय केचन श्लोका उपस्थाप्यन्ते–

उपनिषत्सु	भगवद्गीतायाम्
१. इन्द्रियेभ्यः परा ह्यर्थाः अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धि- र्बुद्धेरात्मा महान् परः।। –कठ. १.३.१०	१. इन्द्रियाणि पराण्याहु- रिन्द्रियेभ्यः परं मनः। मनसस्तु परा बुद्धि- र्यो बुद्धेः परतस्तु सः।। –भ.गी. ३.४२
२. ऊर्ध्वमूलमवाक् शाख एषोऽश्वत्थः सनातनः।। तदेव शुक्रं तद् ब्रह्म तदेवामृतमुच्यते ।। –कठ. २.६.१	२. ऊर्ध्वमूलमधः शाखम् अश्वत्थं प्राहुरव्ययम्। छन्दासि यस्य पर्णानि यस्तं वेद स वेदवित्।। –भ.गी.१५.१
३. न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्। अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे।। –कठ. १.२.१८	३. न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः। अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे।। –भ.गी. २.२०
४. श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विदुः।।	४. आश्चर्यवत् पश्यति कश्चिदेनम् आश्चर्यवद् वदति तथैव चान्यः।

---

[1] उपनिषदों का रचनात्मक सर्वेक्षण, पृ. १

आश्चर्यो वक्ता कुशलोऽस्य लब्धाश्चर्यो ज्ञाता कुशलानुशिष्टः।। —कठ. १.२.७	आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित्।। —भ.गी. २.२९
५. सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति।। यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीम्योमित्येतत्।। —कठ. १.२.५	५. यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः।। यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्तेपदं सङ्ग्रहेण प्रवक्ष्ये।। ओमित्येकाक्षरं ब्रह्म.......... —भ.गी. ८.११,१३
६. हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्। उभौ तौ न विजानीतो नायं हन्ति न हन्यते।। —कठ. १.२.१९	६. य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्। उभौ तौ न विजानीतो नायं हन्ति न हन्यते।। —भ.गी. २.१९

इत्येतेषां श्लोकानामवलोकनेन भगवद्गीतागत-उपनिषत्प्रभावो स्पष्टतया अवगम्यत एव। तत्राप्युपनिषत्सु कठोपनिषन्मन्त्रान् भगवद्गीता विशेषतया स्वीकृतवतीति ज्ञायते। किञ्चात्र निरूपिताः क्षेत्रक्षेत्रज्ञविषयिण्यः, क्षराक्षरविषयिण्यश्च विवेचना उपनिषदाधारभूताः। अत्रोपपादितभक्तिसिद्धान्तोऽप्युपनिषदुक्तोपासनाया विकासरूप इति डॉ. राधाकृष्णन्महोदयाः प्रतिपादयन्ति।[1] एवं गीतावटवृक्षस्योपनिषदेव बीजम्। ततो विनिःसृतायां गीतायां कर्म-ज्ञान-भक्ति-उपासनादिविविधयोगरूपाणि मधुरफलानि सुशोभन्ते। तस्माद् भगवद्गीताप्रतिपाद्यविषयाणां मूलं स्रोत उपनिषदेवेति निश्चीयते।

विदितमेव विदुषां यदुपनिषदो वेदानामन्तभागनिहिता इति, अत एवासां वेदान्तेत्यत्परं नाम। ते च वेदाः शिवनिःश्वासोत्पादिताः। अत एव भगवता श्रीपतिपण्डिताराध्येन "शास्त्रयोनित्वात्" इत्यस्य सूत्रस्य भाष्ये—

---

[1] *भा.द., भा. २, पृ. ४२९, (डॉ. राधाकृष्णन्)।*

सद्योजातेन ऋग्वेदं वामदेवेन याजुषम्।
अघोरेण तथा साम पुरुषेण त्वथर्वणम्।।

ईशानेन मुखेनैव कामिकाद्यागमांस्तथा।
जनयामास विश्वेशः सर्वसिद्धिप्रदायकः।।

इति स्मृत्याधारेण शिवस्य वेदागमानामुत्पादकत्वमुपस्थापितम्।[1] अनेनोपनिषदामपि शिवमुखोद्भूतत्वमिति, तदाधारभूताया गीताया अपि परम्परया शिवोपदेशमूलकत्वं च ज्ञायते।

किञ्च, भगवान् श्रीकृष्णो भगवन्तं शिवमाराधयन् तेन शिवज्ञानमधिगम्य तं ज्ञानमेव पार्थाय तद्व्यामोहनिवृत्तये समुपदिदेशेति हेतोर्गीतायाः शिवोपदेशमूलकत्वं ज्ञायते। श्रीपतिपण्डिताराध्यभगवत्पादैः श्रीकरभाष्ये– "गीताशास्त्रमपीश्वराल्लब्ध्वा तदाज्ञावशादेव कृष्णेनार्जुनायोपदिष्टम्। तत्रैव शिवः–

मयैतद् भाषितं ज्ञानं हितार्थं ब्रह्मवादिनाम्।
दातव्यं शान्तचित्तेभ्यः शिष्येभ्यो भवता सदा।।

नारायणोऽपि भगवान् देवकीतनयो हरिः।
अर्जुनाय स्वयं साक्षाद्दत्तवानिदमुत्तमम्।।[2]

इति कूर्मपुराणवचनस्योदाहरणपूर्वकं गीतायाः शिवोपदेशमूलकत्वं समर्थितम्।

अत्रेदमवधेयम्– श्रीकृष्णः परमशिवभक्तस्य मुनेरुपमन्योः शिष्यत्वमङ्गीकृत्य तं शिवसाक्षात्कारोपायोपदेशार्थं प्रार्थयामास। उपमन्युमुनिस्तत्प्रार्थनानुसारं मधुसूदनाय पाशुपतदीक्षां प्रदाय तदनुष्ठानविधिमुपदिदेश। एवं मुनिवर्योपदिष्टो मध्वरिस्तेन व्रतेन परमश्रद्धया शिवमाराधयामास। तदाराधनसन्तुष्टो भगवान् शिवस्तस्मै शिवज्ञानं तदिष्टवरांश्च प्रददौ। तदुक्तं तत्रैव कूर्मपुराणे–

तस्मादिहैव देवेश तपस्तप्त्वा सुदुश्चरम्।
द्रष्टुमर्हसि विश्वेशमुग्रं भीमं कपर्दिनम्।।

एवमुक्त्वा ददौ ज्ञानमुपमन्युर्महामुनिः।
व्रतं पाशुपतं योगं कृष्णायाक्लिष्टकर्मणे।।

---

१. ब्र.सू. श्रीकर, १.१.३

२. ब्र.सू., श्रीकर, १.३.६.२३

स तेन मुनिवर्येण व्याहृतो मधुसूदनः।।
तत्रैव तपसा देवं रुद्रमाराधयत् प्रभुः।।[१] इति।

तच्छिवोपदिष्टं ज्ञानमेव भगवान् वासुदेवोऽर्जुनायोपदिदेशेति गीतायाः शिवोपदेशमूलकत्वमवगम्यते।

अपरञ्च, डॉ. आर. सि. हिरेमठमहाभागाः महायात्रे इत्याख्ये कन्नडभाषामये संशोधनग्रन्थे– गीतायाः पञ्चसप्ततिं (७५) यावत् श्लोकानां शिवागमोक्तिभिरक्षरशः साम्यं प्रदर्शयन्तः, शिवागमनां गीताया अपि प्राचीनत्वप्रतिपादनपुरःसरं गीतावचनेषु शिवागमप्रभावमुपस्थापितवन्तः।[२] शिवागमाश्च शिवमुखोद्भूता इति कारणादपि गीतायाः शिवोपदेशमूलकत्वं ज्ञायते। महार्थमञ्जर्यां श्रीमहेश्वरानन्देनापि–

एवमेव महार्थं युद्धारम्भे पाण्डुपुत्रस्य।
षोडशसहस्रशक्तिर्देव उपदिशति माधव इति शिवम्।।[३]

इत्यागमनिरूपिततत्त्वस्यैव गीतोपदेशकत्वं समर्थितम्। तत्रैव परिमलव्याख्यायाम्–

इमामेव च सङ्ग्रामे बन्धुहत्यापराङ्मुखम्।
मुकुन्दो बोधयामास स्यन्दनस्थं धनञ्जयम्।।[४]

इति पूर्वोक्तमेव दृढीकृतम्।

ननु गीतायां भगवता श्रीकृष्णेन– "अहं क्रतुरहं यज्ञः"[५], "अहं सर्वस्य प्रभवो..."[६] इत्यादिषु अस्मच्छब्दस्य प्रयुक्तत्वाद् गीतायाः श्रीकृष्णजनितत्त्वमेव सिद्ध्यतीति कथं शिवोपदेशमूलकत्वम्? इति चेत्, न तत्र निर्दिष्टास्मच्छब्दस्य ब्रह्मापरपर्यायेश्वरवाचकत्वात्। तथा हि– "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति"[७], "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः"[८] इत्यादिषु परब्रह्मापरपर्यायस्य शिवस्या-

---

१. कूर्म. पु., २५.४६-४७
२. महायात्रे, पृ. ५५-५६, कन्नड, वि.वि. प्रकाशन, हम्पी. (कर्नाटक) १९९७ ई.।
३. महार्थमञ्जरी, ७०, पृ. १७६
४. तत्रैव, ७०, परिमलव्याख्या, पृ. १९२
५. भ.गी., ९.१६
६. भ.गी., १०.८
७. भ.गी., १८.६१
८. भ.गी., १५.१७

परत्वमुक्त्वा "तमेव शरणं गच्छ सर्वभावेन भारत"[१] इत्यादिषु तच्छब्देनेश्वरोनिर्देशः कृतः। तस्माद् गीतायां यदस्मच्छब्दः तन्नैकदेशीयस्य वसुदेवदेवकीसुतस्य वासुदेवस्य वाचकः, अपि तु सर्वान्तर्यामिण ईश्वरस्यैव वाचकः, तथापि युक्तमेव गीतायां श्रीकृष्णस्यास्मच्छब्दप्रयोगः, "ब्रह्मविद् ब्रह्मैव भवति"[२] इति श्रुतेः। परशिवब्रह्मभावापन्नस्य श्रीकृष्णस्य परशिवब्रह्मणश्चाभेदप्रतिपत्तय एवात्र भगवता कृतोऽस्मच्छब्दप्रयोगः। भगवद्गीतेति ग्रन्थनाम्नाऽपि पूर्वोक्तमेवाभिव्यज्यते। शङ्कराचार्यभगवत्पादैरपि– "मय्येव मन आधत्स्व...."[३] इत्यस्य गीताश्लोकस्य व्याख्यानावसरे मयि शब्दस्य "विश्वरूपे ईश्वरे" इत्येवार्थो निगदितः।[४] तस्माद् गीतोक्ततत्त्वस्य यथोपनिषन्मूलकत्वम्, तथा परम्पराया परशिवब्रह्मविनिःसृतत्वं तदुपदेशमूलकत्वं च सुतरामवगम्यते।

श्रीकृष्णार्जुनयोश्चारित्रिकमैतिह्यम्

गीताचार्यस्य कृष्णस्य तच्छिष्यस्यार्जुनस्य च महिमाभिव्यञ्जका विषया महाभारत–हरिवंश–भागवतादिग्रन्थेषु समवलोक्यन्ते। तत्र महाभारते भरत–वंशानुगतयोः कौरवपाण्डवयोश्चरित्रेन साकं तत्र भवतोऽर्जुनस्य भगवतः श्रीकृष्णस्य च चरितमुपस्थापितम्। महाभारतस्य परिशिष्टभागत्वेन प्रथिते 'हरिवंशे' श्रीकृष्णस्य कुलपरम्पराया आपाततो वर्णनमस्ति, प्रसङ्गवशादर्जुनस्यापि। वेदव्यासविरचितेष्वष्टादशपुराणेष्वन्यतमीये 'भागवते' श्रीविष्णोर्नानाऽवतार–परीक्षितमहाराजचरित–समुद्रमन्थनादिविविधविषयाणां वर्णनपुरःसरं श्रीकृष्णस्य चरितमप्याकलितम्। एतदतिरिक्तमनेकेषु पुराणादिग्रन्थेषु श्रीकृष्णार्जुनयोश्चरितं तत्र तत्र दरीदृश्यते, अथापि तत्र पूर्वोक्तग्रन्था एवानुसृताः।

तदनुसारं भगवान् विष्णुर्भूदेवीप्रार्थनानुसारं भूभारमवतारयितुं लोककण्टकभूतानां कंसादीनां निग्रहार्थं, भक्तानामनुग्रहाय च वसुदेवेन देवक्यामष्टमपुत्ररूपेण श्रीकृष्णेति नाम्ना प्रादुर्बभूव। स वृन्दावने बाललीलारूपेण नवनीतचौर्यम्, शकटतृणावर्तादि–राक्षससंहारम्, कालिङ्गमर्दनम्, देवराजस्य गर्वभङ्गम्, राधादिगोपिकाभी रासलीलां

---

[१] भ.गी., १८.६२

[२] मुण्डको., ३.२.९

[३] भ.गी., १२.८

[४] भ.गी., शाङ्कर, १२.८

च चकार। तदनु कंसशिशुपालदन्तवक्त्रादीनां वधं कृत्वा कुरुक्षेत्रयुद्धे रणविमुखमर्जुनं प्रति गीतामुपदिश्य, तन्मुखेन कौरवान् निहत्य, बाणासुरादीनां गर्वभङ्गं च विधाय तत्पश्चात् पारस्परिककलहेन यादवानां विनाशानन्तरं स स्वयमपि स्वासवतारं समापितवानिति श्रीकृष्णस्य सङ्क्षिप्तं चरित्रम्।

अर्जुनश्च पाण्डुराजपत्न्यां कुन्त्यामिन्द्रमन्त्रप्रभावेणोत्पन्नो मध्यमपाण्डवेति प्रसिद्धः। स द्रोणाचार्यात् शस्त्रास्त्रविद्यामधिगम्य तस्यां पारङ्गतो जातः। दुर्योधनादिकौरवाणां मात्सर्येण स्वसहोदरैः साकं वनवासादिनानाकष्टपरम्परामनुबभूव। तदनु कुरुक्षेत्रे श्रीकृष्णेन गीतोपदेशमाकर्ण्य भ्रान्त्योत्पन्नं बन्धुव्यामोहं दूरीकृत्य, श्रीकृष्णस्य सहाय्येनानेकवीरयोधान् निहत्य, युद्धं विजित्य 'अजेयोऽर्जन' इति ख्यातिं सम्पादितवान्। तत्पश्चात् स्वसहोदरैः साकं राज्यमुपभुज्य, अश्वमेधादियज्ञाननुष्ठाय स्वर्गस्थो जात इत्यर्जुनस्य सङ्क्षिप्तं चरितम्।

अत्रेदं विवेचनीयं यदिमौ कृष्णार्जुनावैतिहासिकौ उत वा पौराणिकी कल्पना? इति सन्देहे ऐतिहासिकाविमाविति वयं साधयामः। तथा हि– पुरा श्रीकृष्णाभिधेय ऐतिहासिकः पुरुषो बभूवेत्यत्र ख्रिस्ताब्दपूर्वकालिकानि विपुलानि प्रमाणनि समपुलभ्यन्ते। उपनिषत्सु प्राचीनतमायां छान्दोग्योपनिषदि– "तद्धैतद् घोर अङ्गीरसः कृष्णाय देवकीपुत्रायोक्त्वोवाचापिपास एव स बभूव सोऽन्तवेलायामेतत्त्रयं प्रतिपद्येताक्षितमस्यच्युतमसि प्राणसंशितमसीति तत्रैते द्वे ऋचौ भवतः"[1] इत्यत्र आङ्गीरसगोत्रीयस्य घोरनामकस्य ऋषेः शिष्यत्वेन श्रीकृष्णस्योल्लेख उपलभ्यते। अयं कृष्ण एव गीताचार्यः कृष्ण इति देवकीति मातृनामोल्लेखेन ज्ञायते। डॉ. राधाकृष्णन् महाभागैरपीदमेव समर्थितम्।[2] व्याकरणकर्ता भगवान् पाणिनिः "वासुदेवार्जुनाभ्यां वुन्" (४.३.९८) इत्यस्मिन् सूत्रे कृष्णार्जुनयोर्नामनी उल्लिखितवान्। पाणिनेः कालो बुद्धपूर्व इत्यनुमन्यते विद्वद्भिः। क्रि. पू. चतुर्थशताब्दीये "निद्दीश" इत्याख्ये बौद्धग्रन्थे वासुदेवबलदेवयोर्भक्तानां विषयः प्रस्थापितोऽस्ति। भारतमागतः ग्रीकदेशीयः श्री मेगस्थनीस् (क्रि. पू. ३२०) कथयति यत् "सौरसेनीय इत्याख्यो जनाङ्गः श्रीकृष्णमादरपूर्वकं पूजयति स्म इति। क्रि. पू. १८० शताब्दीये बेसनगरस्य शासने 'तक्षशिला' निवासिना हीलियोडोरस इत्याख्येन यूनानीभागवतेन वासुदेवो देवदेवेति सम्बोधितः।

---

[1] छा.उ., ३.१७.६

[2] भगवद्गीता (राधाकृष्णन्) भूमिका, पृ. ३०, हिन्द पाकेट बुक्स, दिल्ली, १९९६ ई.।

नानाघाटस्य क्रि. पू. प्रथमशताब्दीये शिलालेखे प्रारम्भिकेषु श्लोकेष्वितरदेवताभिः साकं वासुदेवोऽपि स्तुतः। एतदतिरिक्तं श्रीकृष्णचरितस्याङ्गभूतानां राधा-यशोदा-नन्दादिव्यक्तीनां नाम्न उल्लेखा बौद्धगाथास्वप्युपलभ्यन्ते"[१] इति।

कृष्णार्जुनयोश्चारित्रिके (ऐतिहासिके) विषये एतादृशानि विपुलानि प्रमाणान्यवलोकयन्त आधुनिका विद्वांसोऽपि तयोरैतिहासिकत्वमङ्गीकृतवन्तः। श्रीमद्भिररविन्दघोषमहाभागैः[२] "चारित्रिकः कृष्ण आसीदित्यत्र न संशयः। छान्दोग्योपनिषदि तस्य नाम सर्वप्रथमं दृश्यते। तत्र सः ख्यातो ब्रह्मज्ञानीति ज्ञायते। स स्वव्यक्तित्वेनैतावान् प्रसिद्ध आसीत्, यत् केवलं देवकीपुत्रेति कथनमात्रेण तस्य परिचयो भवति स्म। तत्रैव छान्दोग्ये धृतराष्ट्रस्य नामापि दृश्यते। तस्माद् महाभारतकाव्ये प्रतिपादितानि पात्राणि चारित्रिकव्यक्तिसम्बद्धानीति वक्तुं शक्यते" इत्युक्तम्।

स्वामिशुद्धानन्दमहोदयाः[३] "श्रीकृष्णाभिधेयो महापुरुष आसीत्, स क्षत्रियराजा गृहस्थश्चासीदित्यत्र किञ्चिदपि सन्देहस्य नावकाश इति ज्ञायते। किन्तु तस्य जीवनस्य काश्चन घटना इदानीं पौराणिककथारूपेणैवावशिष्टाः। स संसारे विद्यमानोऽप्यप्रापञ्चिकः सन्, उत्कृष्टसिद्धिमधिगम्य तत्कालीनजनेभ्योऽध्यात्म-ज्ञानमवबोधितुं प्रयतितवान्। "एकं सद् विप्रा बहुधा वदन्ति" इति ऋग्वेदेन प्रतिपादितं सत्यं स्वयं साक्षात्कृत्य जनेषु विद्यमानां तात्त्विकीं धार्मिकीं च विमतिं दूरीकृत्य समन्वयमार्गमुपस्थापयितुं यत्नं चकार" इति कथयन्ति।

श्री आर. एन्. दाण्डेकरमहाभागः[४]– "वृष्णीनां तदवलम्बितेतरजनानां च नायको वासुदेवः श्रीकृष्णो जनसामान्येषु प्राचीनवैदिकपरम्परां प्रति श्रद्धा यथा भवेत् तथा धार्मिकविचाराणां तत्पद्धतीनां च सुव्यवस्थामुपस्थापितवानिति विचार ऐतिहासिकं तथ्यम्" इति प्रतिपादयति। श्रीमद्भिः डॉ. सर्वपल्लिराधाकृष्णन् महोदयैरपि[५] "महाभारते श्रीकृष्णस्यैतिहासिकव्यक्तिरूपेण भगवतोऽवताररूपेण च व्यक्तित्वद्वयं दरीदृश्यते" इति श्रीकृष्णस्यैतिहासिकत्वं समर्थितम्।

---

[१] *भगवद्गीता (राधाकृष्णन्) भूमिका, पृ. ३१, हिन्द पाकेट बुक्स, दिल्ली, १९९६ ई.।*

[२] *Essay on the Gita (First Series) pp. 19-20.*

[३] *युगयात्री भारतीय संस्कृति (कन्नड) भा. २, पृ. ११८*

[४] *तत्रैव, पृ.११८*

[५] *भगवद्गीता (राधाकृष्णन्) भूमिका, पृ. ३१, हिन्द पाकेट बुक्स, दिल्ली, १९९६ ई.।*

तदेवमेतावतोपस्थापितैः प्राचीनैः क्रिस्तपूर्वैरुपनिषदादिग्रन्थप्रमाणैः शिलालेखादिप्रमाणैराधुनिकसंशोधकानां कथनैश्चेदमेवावगम्यते यत् कृष्णार्जुनावैतिहासिकौ पुरुषाविति। अत्रेदमपि सत्यमेव यदितिहासभूते तयोर्मूलचरिते तस्य रोचकार्थं कविभिः साहितिभिश्चासाधारणभूताः केचन विषया मिश्रीकृताः, येन तदनैतिहासिकमिति भ्रम उत्पन्न इति।

श्रीकृष्णस्यावतारवादः

अवतारो नाम स्वमूलावस्थाया किञ्चिदधोऽवतरणमथवा तद्वत्तयावतरणम्। यथा सद्गुरुः स्वयमुन्नतज्ञानवानपि शिष्यस्य बुद्धेरवस्थां विज्ञाय तदौन्नत्यं विहाय शिष्यावगाहनस्थितिपर्यन्तमवतीर्य तमुपदिशति; यथा वा स्वयं सर्वशक्तिमानपि महाराजः स्वसुतरोदननिरोधनाय तस्य स्पृहानुसारेण स्वयं बालकवन्नटनं करोति; तथैव स्वयं भगवान् सच्चिदानन्दरूपोऽपि भक्तानां भक्तिसिध्यर्थमुपासकानामुपासनासाफल्याय च स्वमूलस्थितिं परित्यज्य महीतलेऽवतीर्यानन्तलीलाभाग् भवति। एवमवतीर्णोऽपारकरुणासागरो भगवान् अधर्मप्रवर्धनमरुध्य अधर्मनिरतानां दुष्कृतां वधं साधूनां च संरक्षणं विदधाति, तन्मुखेन धर्मस्थापनं च करोतीतीदृशं दुष्टशिक्षणशिष्टरक्षणमेवावतारस्य प्रयोजनम्। एवमेव गीतायाम्–

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।
परित्राणाय साधूनां विनाशाय च दृष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।।[1]

इत्यवतारकारणमुपस्थापितम्।

अवतारवादे तात्त्विकी दृष्टिः

सामान्यतो जीवानां जन्मनः कारणं पूर्वजन्मनि तत्कृतशुभाशुभकर्मैव। न चेश्वरस्य पूर्वजन्म न वा तस्य शुभाशुभरूपप्रारब्धकर्माणि; कथं स अवताररूपेणापि शरीरं लभते? धर्माधर्माभावे शरीरप्राप्तेरसम्भवत्वादिति चेन्न, ईश्वरस्य दिव्यदेहधारित्वात्, प्राकृतिकसामान्यनियमानामप्राकृते ईश्वरीयविषयेऽनुपपन्नत्वाच्च। तथा हि सामान्यं दिव्यं चेति जन्मनो द्वैविध्यम्। तत्र पूर्वकृतप्रारब्धादिकर्मानुसृत्य

---

[1] *भ.गी. ४.७-८*

लभ्यमानं जन्म सामान्यमिति। पूर्वकृतप्रारब्धाभावेऽपि लोककल्याणरूपविशेषकार्यमुद्दिश्य स्वीकृतं च दिव्यमिति कथ्यते। इमे एव जन्मनि प्राकृतमप्राकृतमिति च व्यवह्रियेते। तत्र सामान्यजीवाः प्राकृतजन्मबद्धाः प्रकृतिवशीभूताः स्वरचितकर्मपराधीनाश्च सन्तो नेच्छन्तोऽपि प्रपञ्चे उत्पद्य तत्कर्मानुसारेण सुखदुःखभागिनो भवन्ति, अवतारिणस्तु स्वयं प्रकृतिं वशीकृत्य स्वकृतकर्मलवलेशाभावेऽपि स्वसङ्कल्पानुसारेणैव जन्म प्राप्नुवन्ति। उक्तं च गीतायाम्–

> अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्।
> प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया।।[1]
>
> अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम्।
> परं भावमजानन्तो मम भूतमहेश्वरम्।।[2]

श्रीमद्भागवतेऽपि भगवतो श्रीकृष्णस्य स्तुत्यवसरे ब्रह्मणा–

> अस्यापि देव वपुषो मदनुग्रहस्य
> स्वेच्छामयस्य न तु भूतमयस्य कोऽपि।
>
> नेशे महि त्ववसितुं मनसाऽऽन्तरेण
> साक्षात्तवैव किमुतात्मसुखानुभूतेः।।[3]

इति भगवतो श्रीकृष्णस्यावतारदेहस्य स्वेच्छामयत्वमप्राकृतत्वं चोपपादितम्। एवमवतारदेहस्याप्राकृतत्वान्न तस्य जन्मनि प्रारब्धस्यापेक्षा; न वेह जन्मनि कृतानां कर्मणामग्रिमजन्महेतुत्वम्। अत एव भगवता श्रीकृष्णेन– "जन्म कर्म च मे दिव्यम्"[4] इत्यवतारदेहयुक्तस्य स्वस्य जन्मकर्मणोर्दिव्यत्मुक्तम्। अत्र प्रारब्धरहितत्वं प्रकृतेरवशत्वं च जन्मनो दिव्यत्वम्, अभिमानरहितत्वमत एवाग्रिमजन्माहेतुकत्वं च कर्मणो दिव्यत्वमित्यवधेयम्। एवमेव भगवता श्रीकृष्णेन– "प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया"[5], "न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन"[6],

---

१. भ.गी., ४.६
२. भ.गी., ९.११
३. श्रीमद्भा., १०.१४.२
४. भ.गी., ४.९
५. भ.गी., ४.६
६. भ.गी., ३.२२

न च मां तानि कर्माणि निबध्नन्ति धनञ्जय।
उदासीनवदासीनमसक्तं तेषु कर्मषु।।[१]
न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते।।[२]

इत्यादिभिः कर्मणो दिव्यत्वं च स्पष्टीकृतम्।

किञ्चेश्वरस्य सर्वशक्तिविशिष्टत्वात् कर्तुमकर्तुमन्यथाकर्तुं च शक्तत्वात् प्रकृतिसहजनियमानि न तमनुबध्नातुं शक्नुवन्ति। स चदेच्छेद् यदिच्छेच्च तदानीमेव तत्सर्वं सङ्कल्पमात्रेण विदधातुमर्हति। तस्मादस्मिन् ईश्वरीये विषये न किमप्यसम्भवो नाम।

तदेतावता तात्त्विक्या दृष्ट्या शुद्धबुद्धमुक्तस्वरूपो अजोऽव्ययोऽकर्ताऽपि भगवान् अनन्तशक्तिसमर्थां मायां वशीकृत्य दिव्यदेहं धृत्वा श्रीकृष्णरूपेण भूमाववतीर्य भक्तानुग्रहाद्यनन्तलीलाः विरचितवानिति विवेचितम्। तदुक्तं भगवत्पादैः शङ्कराचार्यैः– स च भगवान् ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः सदा सम्पन्नः त्रिगुणात्मिकां वैष्णवीं स्वां मायां मूलप्रकृतिं वशीकृत्याजोऽव्ययो भूतानामीश्वरो नित्यशुद्धबुद्धमुक्तस्वभावोऽपि सन् स्वमायया देहवानिव, जात इव, लोकानुग्रहं कुर्वन्निव लक्ष्यते"[१] इति।

उक्तं च श्रीमद्भगवतेऽपि–

कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्।
जगद्धिताय सोऽप्यत्र देहीवाभाति मायया।।[२] इति।

अवतारवादे पौराणिकी दृष्टिः

जगत् संरक्षणकर्ता भगवान् विष्णुः क्रूरकर्मनिरतान् साधुयज्ञदेवताविरोधिनो राक्षसान् संहरन् तन्मुखेन प्रपञ्चं सज्जनान् च संरक्षन् विहरति; तदर्थमेवानेकानवतारानपि गृहीतवानिति च सर्वत्र पुराणेषु प्रपञ्चितमेव। तादृशानेकभगवदवतारेषु मत्स्य-कूर्म-वराह-नृसिंह-वामन-परशुराम-राम-बलराम-कृष्ण-कल्कीति दशावताराः प्रसिद्धाः। भारतीयवाङ्मयपितामहो महर्षिर्व्यासो प्रत्येकं भगवदतारस्य

---

[१] भ.गी., शां.भा., उपो.
[२] श्रीमद्भा. १०.१४.५५

प्रयोजनं तत्तदवतारकृता लीलाश्च वर्णयितुमेकैकं पुराणमेव विरचयामास। तत्र मत्स्यपुराणं कूर्मपुराणं वराहपुराणं वामंनपुराणं चेत्यवतारनाम्नैव पुराणानि विरचय्य तेषां महिमानं प्रयोजनं च तत्रोपपादितवान्। नृसिंहाद्यवतारनाम्ना पुराणानामभावेऽपि व्यासप्रणीतेष्वेव पुराणेषु सन्दर्भानुसारेणोपपादितस्तत्तदवतारममिमा। किन्तु रामावतारमहिमविवरणाय श्री वाल्मीकिना रामायणम्, बलराम-कृष्णावतारयोर्महिमविवरणाय श्रीव्यासेनैव महाभारत-भागवतमहापुराणं चेति त्रयो ग्रन्थाः विरचिताः।[1]

गीतायां भगवता श्रीकृष्णेन-

> **बहूनि मे व्यतीतानि जन्मानि तव चार्जुन।**
> **तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप।।**[2]

इति स्वस्यानेकव्यतीतजन्मानि तत्तज्जन्मवेद्यत्वं च स्मृतत्वात् स अवतारूपेण जन्म प्राप्तवानासीदिति ज्ञायते।

देवासुरङ्ग्रामसमये राक्षससंहारनिरतं श्रीविष्णुमवलोक्य तद्भीत्या असुरा आत्मसंरक्षणाय भृगुमहर्षेराश्रमं शरणं प्रापुः। पहर्षेरनुपस्थितौ ऋषिपत्नी ख्यातिस्तेभ्य शरणं प्रदत्तवती। असुरसंहारकामो भगवान् विष्णुस्तदाश्रममुपागत्य तत्राप्यसुरसंहारायोद्युक्तः। तदा ऋषिपत्नी ख्यातिर्मुनेरसन्निधावाश्रमे भवता न प्रवेष्टव्यः ऋष्याश्रमशरणागता राक्षसा मा हन्तव्या, नात्र हिंसा कर्तव्येत्यवरोधितवती। क्रोधाविष्टो भगवान् विष्णुस्तदा दैत्यसंहारमार्गावरोधिकां ख्यातिमपि राक्षसैः सह संहत्य ततो निर्जगाम। महर्षिर्भृगुराश्रममुपागत्य गतप्राणां निजां पत्नीं संवीक्ष्य दिव्यदृष्ट्या श्रीहरिरेवैतादृशक्रूरकर्मकर्तेति मत्वा तस्य श्रीविष्णोरवनौ कोटिसंख्यकानि जन्मानि भवन्तु, प्रत्येकस्मिन् पत्नीवियोगश्च भवत्वित्यशपत्। तदाकर्ण्य श्रीविष्णुः काञ्चीमभ्येत्य भगवन्तं महादेवं शिवं प्रार्थयामास भृगुशापविमोचनाय। भगवान् शिवः तच्छापसङ्कोचनार्थं भृगुमहर्षिमादिष्टवान्। तदनुसारं स दश जन्मनि; एकस्मिन्नेव च जन्मनि पत्नीवियोगश्च भवत्विति स्वशापसङ्कोचः कृतः। तानि जन्मान्येव दशावताररूपेण विख्यातानि।[3]

---

[1] *द्र., सि.शि. प्रवचन प्रभे, संसार हेयस्थल, प्र. ४, पृ. ३५*

[2] *भ.गी., ४.५*

[3] *द्र. क्रियासार, भा. २, उपेदश १४, पृ. ३९७*

लोकैकहितनिरतेन भगवता विष्णुना महर्षिशाप एव लोककण्टकराक्षससंहाराय धर्मसंरक्षणाय च विभिन्नेषु समयेषु अवतारधारणमुखेन विनियुक्तः। तथा हि, मत्स्यावतारे सोमकदैत्यसंहारो वेदसंरक्षणं च, कूर्मावतारे समुद्रमन्थनसहयोगः, वराहावतारे हिरण्याक्षसंहारो भूदेव्या रक्षणं च, नृसिंहावतारे हिरण्यकशिपुवधः प्रह्लादोद्धारश्च, वामनावतारे बलेर्निग्रहो मोक्षश्च, परशुरामावतारे कार्तवीर्यहननं दुष्प्रवृत्तक्षत्रियनिग्रहश्च, रामावतारे लोककण्टकरावणादिराक्षससंहारो यागादिसत्कर्मनिरतमहर्षिणां संरक्षणं च, बलरामावतारे[1] धेनुकप्रलम्बादिराक्षसानां संहारः, कृष्णावतारे कंसशिशुपालादीनां वधः, क्रूरकर्मापन्नकौरवादीनां संहारः, तन्मुखेन भूभारावतरणम्, अर्जुनाय गीतोपदेशश्च, कल्क्यवतारे दुर्मार्गरतानां निग्रहः, धर्माश्रितानामनुग्रहश्चैवं दशस्वप्यवतारेषु लोकहितमेव साधितम्।[2]

तदेवमत्रोपपादितदशावतारेषु श्रीकृष्णावतार एवं पूर्णावतार इति विख्यातः। यतो हि मत्स्यावतारः केवलं जले एव जीवितुमर्हति, कूर्मावतारः स्थलेऽपि जीवितुं शक्नोति, वराहावतारः पूर्णरूपेण स्थलमाश्रितोऽपि पशुरेव सः, नृसिंहावतारोऽर्धमनुष्यत्वयुक्तः, वामनावतारः पूर्णमनुष्यरूपोऽपि वामन एव, परशुराम-बलराम-रामावताराः प्रवृद्धमानवरूपा अपि देवांशस्याल्पत्वयुताः, अत एव तेषु प्रसङ्गवशाद् मानवसहजकोपतापसुखदुःखाद्यनुभवो दृश्यते। कृष्णावतारस्तु भगवत्तत्त्वस्य पूर्णपरिचायकः; न तदवतारे सुखदुःखादिसमुत्पादवेलायां मनुष्यवद्विचलनं किञ्चिदपि दृश्यते। अत एव कार्णाटकीयाधुनिक-विचारकेषु ख्यातिनामा श्री ए एन् मूर्तिराव[3] दशावतारा मूलतो मानवीय-विकमासमेवाधिसूचयन्तीति श्रीकृष्णस्य पूर्णावतारत्वं समर्थयति। अत एव कलापरिणतिर्लोकानुभवो व्यवहारचातुर्यं राजनीतिनैपुण्यं कूटनीतिकौशल्यं सकलचेतोहारि वाग्वैभवमाकर्षकव्यक्तित्वं दैवीशक्तियुक्तत्वमित्यादिसमस्तसद्गुणसम्मेलनं यावत् श्रीकृष्णावतारे, न तावदितरेषु।

स च श्रीकृष्णो भगवतो विष्णोरपरावतार इति सर्वप्रतिपन्नोऽयं विषयः। भूदेव्याः प्रार्थनानुसारं भूभारमवतारयितुं कंसशिशुपालादिक्रौर्यसन्त्रस्तसमस्तलोक-

---

[1] *केषुचिद् ग्रन्थेषु बलरामावतारस्य स्थाने बुद्धावतारो दशावतारेषु विगणितः। किन्तु स्कन्दपुराणस्य शङ्करसंहितायां क्रियासारस्य चतुर्दशोपदेशे च बलरामावतार एव तत्र निर्दिष्ट इति तदेवात्रानुसृतम्।*

[2] *द्र. क्रियासार, भा. २, उपदेश १४, पृ. ३१७*

[3] *द्र. देवरु (लेखक ए. एन्. मूर्तिराव) पृ. ३३-३४*

परित्राणाय च भगवान् विष्णुर्वसुदेवगृहे देवक्यामष्टमे गर्भे श्रीकृष्णरूपेणावततार। बालावस्थायामेव कलिङ्गमर्दन-पूतनासंहापराद्यगणितलीलां विरचय्य, प्रबुद्धावस्थायां कंसादीन् निहत्य दुष्प्रवृत्तदुर्योधनादिकौरवनिग्रहं धर्मपरायणयुधिष्ठिरादिपाण्डवानुग्रहं युद्धविमुखस्यार्जुनस्य व्याजेन मानवकुलस्यैव कल्याणाय गीतोपदेशं च विधाय यादवसैन्यमरणहेतुकयादवीयकलहानन्तरं स्वयं तदवतारं समापितवानिति भागवत-महाभारतादिग्रन्थेषु सम्यग् वर्णितमिति सत्रसुविदितमेव।

तदेतावता पौराणिक्या दृष्ट्या भगवान् विष्णुः धर्मपरिरक्षणाय मत्स्याद्यवतारान् गृह्णन् पुनश्च वर्धितेऽधर्मे बाधिते च धर्मे तदधर्मेणावृतं धर्मं प्रकटयितुं तदधर्मावरणं वारयितुं चाधर्मरूपिणा कंसेन पीडितयोर्धर्मरूपिणोर्वसुदेव-देवक्योर्गर्भाम्बुधौ रात्रावज्ञाननरूपान्धकारे विवेक इव श्रीकृष्णरूपेणावततारेति विवेचितम्। इदमेवोक्तं शङ्कराचार्यभगवत्पादैरपि- "दीर्घेण कालेन अनुष्ठातॄणां कामोद्भवाद् हीयमानविवेक-विज्ञानहेतुकेनाधर्मेणाभिभूयमाने धर्मे प्रवर्धमाने चाधर्मे जगतः स्थितिं परिपिपालयिषुः स आदिकर्ता नारायणाख्यो विष्णुर्भौमस्य ब्रह्मणो ब्रह्मणत्वस्य रक्षणार्थं देवक्यां वसुदेवादंशेन कृष्णः किल सम्बभूव"[1] इति।

गीतायाः कालः

भगवद्गीतायाः कालनिर्णयो न सुलभसाध्यः। सामान्यतया गीताया महाभारतभागत्वाद्यो महाभारतकालः स एव तस्या अपि काल इति वक्तुं शक्यते। किन्तु महाभारतस्य कालविषये विदुषां नैकमत्यं वर्तते। तथापि व्यासविरचितो 'जय' इत्याख्यो ग्रन्थ एव वृद्धिं गमितो वैशम्पयनस्य 'भारतः' जातः, स एवानेकधार्मिकाख्यानोपाख्यानैः कथोपकथाभिश्च सम्मिलितो सौतिविरचितो 'महाभारतः' इति समाख्यया युतोऽसीतिसहस्रा (८०,०००) दधिकश्लोकसंख्यायुक्तो जातः (अनुबन्धं, हरिवंशं च विहाय) इति विषयं प्रायोऽनेके विद्वांसः स्वीकुर्वन्ति।[2]

तदन्तर्गता भगवद्गीता कालक्रमेणाभिवृद्धिं गमितेदानीन्तनीमवस्थां प्राप्तेति केचन विमर्शकाः केचन च कालान्तरोत्पन्ना पश्चात् सा महाभारते सन्निवेशितेत्यभिप्रयन्ति। तत्र तेलंगटालब्वाएज्- ह्वीलरादिमहाभागाः स्वमभिप्राय-मुपस्थापयन्तस्तत्र कारणं प्रतिपादयन्ति यद् अर्जुनो भीष्मद्रोणादिभिः साकं

---

[1] *भ.गी., शा.भा.उपो.।*

[2] *युगयात्री भारतीय संस्कृति, भा. २, (कन्नडभाषामय) पृ. ५५*

योद्धव्यमिति पूर्वमेव जानाति स्म। नायमर्जुनो युद्धक्षेत्रे बलादानीतः, अपि तु स्वयमेव कौरवान् तत्समर्थकाँश्च निहत्य भ्रातुर्युधिष्ठिरस्य राज्याभिषेकं करोमीति प्रतिज्ञां कृत्वागतवानासीत्। नाटकीयरीत्याकस्मिकतया तस्मिन्नर्जुने कथं परिवर्तनमागतमिति,

कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन।
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन।।[1]

इत्यादियुद्धनिराकरणकथनं किञ्चिदसामञ्जस्यमेतीति। किञ्च, येन केनापि प्रकारेणार्जुनविरागस्य सामञ्जस्यस्वीकारेऽपि प्रथमदिन एव प्रातःकाले यदोभयपक्षयोर्योधाः परस्परं सम्मुखा हन्तुकामा उपस्थिताः, क्षणमनु युद्धारम्भो भविष्यति, एतादृशे समये आत्म-परमात्म-भक्ति-योग-ज्ञान-कर्म-ध्यानादिविषयकः सप्तशतश्लोकात्मकः सुदीर्घो वादविवादस्त्वसङ्गततामेत्येवेत्यतोऽयं गीताभागो न महाभारतभाग इति प्रतीयत इति।

स्थूलदृष्ट्यायं पक्षः सम्यगेव प्रतीयते, तथापि सूक्ष्मविवेचनेन तन्निरस्यते। तथा हि– युद्धक्षेत्रादिभीकरसङ्कटसमय एव मनुष्याणां मनसि सामाजिकमौल्याधारितविचाराः प्रस्फुटीभवन्ति यथाऽशोकः कलिङ्गराज्यस्योपरि आक्रमणं विधाय तत्र युद्धक्षेत्रे हतानाहतांश्च लक्षाधिकजनानवलोक्य युद्धानन्तरं तन्मनसि विराग उत्पन्नः, अद्यारभ्य युद्धं न करोमीति प्रतिज्ञां च चकार यथा वा बाहुबलिर्युद्धे भ्रातरं भरतं जित्वाऽपि ततो विरागवशात् संन्यासं स्वीकृत्य तप आचरितुं वनं जगाम, तथैव विवेकशीलस्यार्जुनस्य मनसि युद्धानन्तरं सम्भूयमानां दुरवस्थां विचार्य युद्धात् पूर्वमेव विराग उत्पन्न इति युद्धनिराकरणकथनेऽस्वाभाविकस्यासाङ्गत्यस्य वा नास्त्यवसरः। किञ्च, गुरुबन्धुवृद्धैः साकं योद्धव्यमिति पूर्वं ज्ञातेऽर्जुने यदा ते सन्निकटा भवन्ति, तदा स निर्धारो नावशिष्यते; मोहवशादन्य एव निर्धार उत्पद्यते च। आत्महत्याविचारेण कूपनदीतडागादीनामन्तिके गता अनेके जनाः पुनः स्वशरीरमोहेन भयेन वा पूर्वनिर्धारं परित्यज्य स्वं भवनं प्रत्यागच्छन्ति। विविधसिद्धिकामास्तपोरता विश्वामित्रादिमहर्षयोऽपि मेनकादिदिव्याप्सराणामागमने मोहेनाविष्टाः, तत्सिद्धिकामत्वं विहाय तन्निमग्ना भवन्ति। एभिरुदाहरणैरवगम्यते यद् वस्तूनां व्यक्तिनां वाऽसन्निधाने विद्यमानः तत्सम्बद्धपूर्वनिर्धारस्तेषामुपागमने नावशिष्यत इति। एवमेव भीष्मद्रोणादिभिर्योद्धव्यमिति पूर्वमभिज्ञातेऽप्यर्जुने, युद्धे तेषा सम्मुखे मोहेनादरेण वा जनितो युद्धविरागभावः कथमसङ्गतिपूर्णः?

---

[1] भ.गी., २.४

तस्यार्जुनस्य मोहनिवारणाय श्रीकृष्णो भगवद्गीतामुपदिष्टवान्। तत्रैतादृशसुदीर्घोपदेशायावकाशः कुत्र आसीदिति सन्देहे उच्यते– इदानीं गीतायां यदुलपलभ्यते तत्सर्वं श्रीकृष्णोक्तमेवेति, अथवा तादृशः सम्पूर्णो वादविवादस्तत्र युद्धे घटितो वेति निर्णेतुमशक्यत्वेऽपि भगवता श्रीकृष्णेन कैश्चन वचनैरेवार्जुनशङ्का निवारिताः। पश्चाद् व्यासस्तदुपदेशलेखनसमये आत्यन्तिकया करुणया समस्तमानवावगमनसुलभो भवेदित्यपेक्षया विस्तृतं रूपं प्रदत्तवानिति निश्चयेन वक्तुं शक्यते। भगवत्पादैः श्रीधराचार्यैः– "तमेव भगवन्तमुपदिष्टमर्थं कृष्णद्वैपायनः सप्तभिः श्लोकशतैरुपनिबन्ध। तत्र च प्रायशः श्रीकृष्णमुखनिःसृतानेव श्लोकानलिखत्। कांश्चित् तत्सङ्गतये स्वयं व्यरचयत्"[१] इति गीतायाः श्रीकृष्णोपदिष्टत्वव्यासविरचितत्वप्रतिपादनव्याजेन महाभारतसम्बद्धत्वं समर्थितम्।

आचार्य-[२]श्रीरजनीशस्तु भगवता श्रीकृष्णेन टेलिपथिक (Telepathic) विधानेनार्जुन उपदिष्ट इति प्रतिपादयति। 'टेलिपथिक'शब्दो भावनात्मकप्रभावेणैकस्य मनोऽन्यस्मिन्मनसि क्रियमाणे प्रभावे प्रयुज्यते। एतादृशविधानेन क्रियमाण उपदेश एव शास्त्रेषु "गुरोस्तु मौनव्याख्यानम्" इत्येव निर्दिष्टः। एवंविध उपदेशे वैखरीवाण्याः प्रयोगो नैव भवति, न वा तद्वाणीप्रयोगे तावत्समयाधिक्यमेपिक्षतं यावदत्र। यथा स्वप्ने क्षण एव कालेऽनेका घटना घटन्ते, तथैवास्मिन् मौनव्याख्याने किञ्चिदिव समये तत्सर्वमुपदेष्टुं शक्यते यद् वैखरीवाण्योपदेष्टुमनेकदिनान्यावश्यकानि भवन्ति। एवं सूक्ष्ममनस्तरङ्गेन स्वल्पीयसा कालेन सम्प्रति गीतायां विद्यमानं सर्वमपि श्रीकृष्णोऽर्जुनमुपदिदेश। इत्येवमपरैरपि दृष्टान्तैस्तत्र सम्यगुपपादितस्तत्रत्यो विषय एवात्रांशतो निरूपितः। तदेवं युद्धसमयघटितगीतोपदेशस्य टेलिपथिकविधानेन अल्पीयसैव कालेन उपदिष्टत्वादीदृशसुदीर्घगीताया उपदेशाय युद्धे कुत्रावकाश इति शङ्काया अपि नास्त्यवसरः।

किञ्च, महाभारतभगवद्गीतयोर्निरूपणशैली समानैवेति बालगङ्गाधरतिलकमहाभागा अभिप्रयन्ति।[३] महाभारतेऽनेकत्र भगवद्गीताया उल्लेख उपलभ्यते[४] तेनेदं स्पष्टीभवति यद् महाभारतस्य निर्माणकालादारभ्यैव गीता तस्याभिन्नमङ्ग-

---

[१] भ.गी., श्रीधरी उपो.।

[२] गीतादर्शन, ओशो, भा .१, पृ. ६०-६४

[३] गीतारहस्य-लितक, परिशिष्ट, सेक्रेड बुक्स आफ द ईस्ट, खण्ड ८, भूमिका।

[४] द्र., म.भा., आदिपर्व, २.६९, १.१७९, २.२४७

मित्यङ्गीकृताऽऽसीदिति। महाभारतो भगवद्गीतयैवार्थपूर्णो जातः। महाभारतपात्राणि भगवद्गीताप्रतिपादिततत्त्वमेव व्यक्तिरूपेणाभिव्यक्तये चित्रितानीव दृश्यन्ते।[१] अत एव भगवद्गीताध्यानश्लोके "भारततैलपूर्णः प्रज्वालितो ज्ञानमयप्रदीपः"[२] इति महाभारतो भगवद्गीतारूपदीपं प्रज्वालयितुं तैलसदृश इति वर्णितम्।

व्यासविरचितेष्वनेकग्रन्थेष्वष्टादशसंख्या संयोजनमनेकत्र दृश्यते। यथा अष्टादशपुराणानि, महाभारतेऽष्टादशपर्वाणि, तत्राष्टादशदिनयुद्धश्चेत्यादयः। एवमेव गीतायामप्यध्यायरूपेणाष्टादशसंख्यायाः प्रयुक्तत्वादियं गीता व्यासविरचितेति महाभारतसम्बद्धेति च प्रतीयते।

किञ्चानेकेषु धार्मिकेषु दार्शनिकेषु च विचारेषु महाभारतस्य गीतायाश्च समाना दृष्टिरस्ति। कर्मणोऽकर्मण उत्कृष्टत्वविचारे[३] सृष्टेर्व्यवस्थाविषये[४], गुणविषयक-सांख्यसम्मतविचारे[५], योगविषयकविचारे[६] चोभयोर्न्यूनाधिकरूपेणैकाभिप्रायमेव प्रपश्यामो वयम्। एवमुपरि निरूपितयुक्तिभिर्भगवद्गीता महाभारतस्यैव वास्तविको भाग इत्यत्र न संशीतिलेशोऽप्यवशिष्येत। तस्मात्तस्य काल एवास्या अपि भवितुमर्हति।

किञ्च, क्रि. पू. प्रथमशताब्दे विद्यमानस्य कालिदासस्य रघुवंशमहाकाव्ये गीतायाः श्लोकसमान एवैकः श्लोक उपलभ्यते। अनेन कालिदासो भगवद्गीतां जानाति स्म इति प्रतीयते। भासकवेः 'कर्णभारे' गीताया 'हतो वा प्राप्स्यसे स्वर्गं जित्वा वा भोक्ष्यसे महीम्'[७] इति श्लोकार्धः पूर्णतयानुसरद् वाक्यमुपलभ्यते।[८]

भासकवेः कालं केचन द्वितीयक्रिस्तपूर्वशताब्दोऽथवा चतुर्थशताब्द इति चाङ्गीकुर्वन्ति। प्रथम पक्षस्वीकारेऽपि गीतायास्ततोऽपि प्राचीनत्वं सिद्ध्यति।

---

[१] द्र. गीताभावधारे (कन्नडभाषामय) सोमनाथानन्द, ध्या. श्लो. २, पृ. ४

[२] भ.गी., ध्या. श्लो. २

[३] द्र. भ.गी., अध्याय ३; म. भा., वनपर्व, अध्याय ३२

[४] द्र. भ.गी., अध्याय ७ तथा ८; म. भा., शान्तिपर्व, २३१

[५] द्र. भ.गी., अध्याय १४ तथा १५; म. भा., अश्वमेधपर्व, ३६-३९

[६] द्र. भ.गी., अध्याय ६; म. भा., शान्तिपर्व, २३९ तथा ३००

[७] भ.गी., २.३७

[८] "हतोऽपि लभते स्वर्गं जित्वा तु लभते यशः।"

बोधायनगृह्यसूत्रे हरिहरयोः पूजायास्तत्फलस्य च प्रतिपादनावसरे– "प्रतिमाद्युद्देशाऽभावे, द्रव्याभावे, साधारणे कुर्यात्, मनसा वाऽर्चयेदिति, तदाह भगवान्–

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः।।[1]

इति भगवद्गीतायाः (९.२९) श्लोकमेव तत्रोद्धृतोऽस्ति। बोधायनस्य कालः क्रि. पू. प्रथमशताब्दो द्वितीयशताब्दो वेति इतिहासज्ञैः स्वीकृतः।

एभिः प्रमाणैर्भवद्गीता क्रि. पू. तृतीयशताब्दात्पूर्वमेवासीदित्यवगम्यते। इममेवाभिप्रायमङ्गीकुर्वाणाः श्रीतिलक–श्रीवैद्य इत्यादयो विद्वांसः साम्प्रतमुपलभ्यमानभगवद्गीतापाठयुक्ता महाभारतमूलमातृका क्रि. पू. पञ्चमशताब्दात् क्रि. पू. तृतीयशताब्दपर्यन्तं यावद् रचितेत्यभिप्रयन्ति।[2]

भगवद्गीता तत्पूर्वं विद्यमानान् प्रायः समस्तान् तत्कालीनधार्मिकान् दार्शनिकांश्च विचारान् स्वस्यां गर्भीकृत्यवती। तथा हि प्राचीनयज्ञादिकर्मैव सर्वस्वमिति मीमांसकविचारः, संन्यासस्यैव प्रामुख्यमङ्गीकुर्वाण उपनिषत्कालानन्तरीयः सांख्यविचारः आत्मव्यवसायाय ध्यानधारणसमाध्याद्यान्तरिकसाधनप्रतिपादकः पतञ्जलिपूर्वो योगविचारः, भगवच्छरणागतिमेव सर्वस्वमिति स्वीकुर्वाणा विविधा भक्तिपन्थानः कर्मयोगभक्त्यादिसमस्तास्तिकविचारविरोधमेव सर्वस्वं मन्यमानश्चार्वाकविचार इत्यादिकास्तत्काले प्रचलिताः परस्परविरुद्धप्रतीयमाना अपि सर्वे विचारास्तत्र समुपलभ्यन्ते। किन्तु तत्र बौद्धसम्मततत्त्वविचाराणां किञ्चिदपि सूचना नोपलभ्यते।[3] अनेन बौद्धधर्मप्रादुर्भावात्पूर्वमेव भगवद्गीतायाः प्रादुर्भावकालोऽवगम्यते। भगवान् बुद्धस्तु, क्रि.पू. ५६० तमाब्दे सम्बभूव; बौद्धधर्मोऽपि तस्मिन्नेव शताब्दे उदित इति ज्ञायत एव।

तदेवमेतावता विवेचितप्रमाणैर्महाभारतकाल एवं (श्रीवैद्यो महाभारतस्य प्रथमसंस्करणसमयं क्रि. पू. ३१०० तमाब्द इत्यभिप्रैति) भगवद्गीताया अपि काल इति वक्तुं शक्यते। तथापि साम्प्रतमुपलब्धप्रमाणैः क्रि. पू. सप्तमशताब्दात् पूर्वमेव भवद्गीता प्रादुर्भूतेति निश्चये न कोऽपि विवादो भवेतेंति मन्यामहे।

---

[1] *बोधायनगृह्यसूत्रम्, २.१९.६०.१६*

[2] *द्र. युगयात्री भारतीय संस्कृति (कन्नड़भाषामय) पृ. १५०*

[3] *युगयात्री भारतीय संस्कृति (कन्नड़भाषामय) पृ. ११२*

उपदेशविधानं निरूपणशैली च

विषयप्रतिपादनपद्धतिरेवालङ्कारशास्त्रे शैलीत्यभिधीयते। कविः प्रकृतिप्राप्ताननुभवानेव नवनवोन्मेषशालिन्यां स्वप्रतिभायां निक्षिप्य स्वानुभवरसेन सुन्दरशब्दैर्ललितैर्वाक्यैश्च विशिष्टामाकृतिं प्रदाय ग्रन्थरूपेण प्रकटयति। कवेरयं विशिष्टोऽनुभवो यदाकृतिं धत्ते तद् भाषाया वैशिष्ट्यमेव शैलीत्याख्यायते। भिन्नभिन्नकवीनां शैल्योऽपि विभिन्नाः।

श्रीकृष्णार्जुनयोः संवादरूपेण विकसितायां गीतायां भगवान् श्रीकृष्णः स्वानुभूतसत्यं तदनुभवमार्गांश्च विशिष्टया भाषया पद्धत्या चोपदिष्टवान्। तमुपदेशमेव भगवत्पादो व्यासः स्वशैल्या संयोज्य निगदति। सुकुमारादिशैलीसम्बद्धविषयप्रतिपादका विमर्शका भगवद्गीतायाः शैलीमादर्शपूर्णां सरलां स्वतन्त्रामिति च प्रतिपादयन्ति।

भगवद्गीतायां समन्वयात्मिका शैली समवलिम्बता, न तु निराकरणात्मिका। अत एव तत्र द्वैत-अद्वैत-विशिष्टाद्वैत-द्वैताद्वैताद्यनेकदार्शनिकविचाराणां समन्वयोऽवलोक्यते। तत्तन्मतभाष्यकारा अपि निजविचारान् तत्र संशोद्ध्य स्वसम्मतं भाष्यं विरचयामासुः। वस्तुतः समस्तदार्शनिकविचारविमतिं दूरीकृत्य तेषां वमन्वयार्थं समुत्पन्नां तां गीतामेव प्रमाणीकृत्य भाष्यकृद्भिः स्वाभिप्रायस्य श्रेष्ठत्वमितरेषां कनिष्ठत्वं निराकरणं चोपस्थाप्यत इत्यहो विचित्रम्। नेयं गीता कस्यापि मतस्याभिप्रायस्य साक्षान्निरासाय प्रयुक्ता, अपि त्वत्र स्वाभिमतमण्डनमात्रं विधीयते। यदि तेनेतरमतनिरासो जायेत, तर्हि साऽपरैव वार्ता। तथा हि तत्र संन्यासस्य त्यागस्य वा निरूपणावसरे–

> काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः।
> सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः।।
> त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः।
> यज्ञदानतपःकर्म नं त्याज्यमिति चापरे।।[1]

इति काम्यकर्मणां त्यागः, सर्वकर्मफलत्यागः, सदोषकर्मत्यागो यज्ञ-दान-तप आदि कर्मणामत्यागश्चेति मतचतुष्टयं निर्दिश्य तेषु स्वसम्मतिं प्रकटयन् पुनर्भगवान् श्रीकृष्णः–

---

[1] भ.गी., १८.२-३

यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत्।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्।।

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्।।[१]

इत्युपर्युक्तानभिप्रायाननिराकृत्यैव यज्ञदानतप-आदिनामाचरणेऽपि तेषां सङ्गस्य फलस्य च परित्याग एव संन्यासस्त्यागो वेति स्वाभिप्रायं प्रतिपादितवान्, न तु तेनेतरेषां निराकरणं कृतम्।

तत्र भगवान् श्रीकृष्णः कस्यचिद्विषयस्योपस्थापनसमये पूर्वं तल्लाभं, मध्ये तदकरणे उत्पद्यमानां हानिं, अन्ते तल्लाभप्राप्तिं प्रेरणां तस्य श्रेष्ठत्वं च प्रतिपाद्य विषयोपसंहारं करोति। तथा हि– युद्धविमुखमर्जुनं युद्धाय प्रेरयितुं भगवता श्रीकृष्णेन–

धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते।।
यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम्।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम्।।[२]

इत्यादौ युद्धलाभं प्रस्तूय,

अथ चेत्त्वमिमं धर्म्यं सङ्ग्रामं न करिष्यसि।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि।।

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम्।
सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते।।

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः।
येषां च त्वं महाबाहो भूत्वा यास्यसि-लाघवम्।।

अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिताः।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम्।।[३]

इत्यादिभिरनेकयुक्तिभिर्युद्धविमुखत्वे जायमानां हानिं विवर्ण्य,

---

[१] भ.गी., १८.५–६

[२] भ.गी., २.३१–३२

[३] भ.गी., २.३३–३६

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः।।
सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि।।[1]

इत्यन्ते च युद्धप्रोत्साहनं तत्र कीदृशेन युद्धेन लाभप्राप्तिरित्यादिविषयोऽवबोधितः।

तत्र गीतायां विषयस्य श्रेष्ठाश्रेष्ठत्वलाभालाभत्वादिमनेकाभिर्युक्तिभिरुपस्थाप्य तन्मुखेन तस्य योग्यायोग्यत्वं निरूप्यते न तत्रोपदेशविधाने इदमाचरितव्यमेवेति बलान्नियोगः क्रियते, अपि तु विषयस्य सम्यग्विवेचनं विधायान्तिमनिर्णयाधिकारस्त्वर्जुनाय तद्व्याजेन गीतापाठकेभ्यः प्रदीयते। अत एव गीतायां समस्तविषयप्रतिपादनानन्तरं भगवान् श्रीकृष्णोऽर्जुनमाह–

इति ते ज्ञानमाख्यातं गुह्याद् गुह्यतरं मया।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु।।[2] इति।

भगवद्गीतायां वैज्ञानिकप्रयोगवत् क्रमशो विषयप्रतिपादनं विद्यते। यथा वैद्यो व्याधिग्रस्तमनुष्येभ्य एकस्यौषधस्य व्यर्थत्वेऽन्यमौषधम्, तस्यापि व्यर्थत्वे पुनरन्यमौषं प्रयोग इव क्रमशो प्रददाति, तथैवात्र मोहव्याधिपीडितस्यार्जुनस्योपरि क्रमशो ज्ञानौषधप्रयोगः क्रियते। अर्जुनमोहव्याधिनिरासाय प्राक् सांख्ययोगाख्यं दिव्यं ज्ञानौषधं प्रदत्तम्, तद्यदार्जुनाय व्यर्थतां गच्छति तदा कर्मयोगाख्यमौषधम्, तस्यापि व्यर्थत्वे ज्ञानयोगश्चेत्येवं क्रमेण प्रयोगात्मकशैल्योपदिष्टम्। अत्र व्यर्थत्वं नाम तस्यायोग्यत्वमिति न, अपि त्वर्जुनस्तदधिकारी नासीदेवेत्यर्थः। श्रेष्ठातिश्रेष्ठविषयोऽप्यनधिकार्युपदेशेन व्यर्थतामेति। तदेवमत्र सांख्य-कर्म-ज्ञान-संन्यास-ध्यान-ज्ञानविज्ञान-भक्त्यादयो योगा अर्जुनमोहविनाशाय प्रयोगरूपेणोपपादिताः। अत एव तत्तद्विषयप्रतिपादनावसरे तस्यैव श्रेष्ठत्वमुक्तम्। ज्ञानस्योपपादनावसरे "सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते"[3] "सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि"[4] "न हि ज्ञानेन सदृशं पवित्रमिह विद्यते"[5] इत्यादिभिर्ज्ञानस्यैवोत्कृष्टत्वं प्रपञ्चितम्।

---

[1] भ.गी., २.३७-३८

[2] भ.गी., १८.६३

[3] भ.गी., ४.३३

[4] भ.गी., ४.३६

[5] भ.गी., ४.३८

कर्मण उपदेशसमये– "कर्म ब्रह्मोद्भवं विद्धि"[१] "असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः"[२] "कर्मणैव हि संसिद्धिमास्थिता जनकादयः"[३] "कर्मसंन्यासात् कर्मयोगो विशिष्यते"[४] इत्यादिभिः कर्मण उत्कृष्टत्वं साधितम्। एवमेव योग-भक्ति-उपासनादिविषयाणामपि श्रेष्ठत्वं तत्र तत्रावबोधितम्।

एतादृशपरस्परविरुद्धप्रतीयमानानां विषयाणामुत्कृष्टत्वप्रतिपादनादयं ग्रन्थो विरोधाभासपूर्ण इति सन्देहः सहजरूपेणोद्भवति। अत एव श्री जि. एस. खैरमहाभागैः– "समग्रग्रन्थ एकसूत्रतामुपगत इव प्रतीयमानोऽपि विमर्शात्मक-दृष्ट्यावलोकेन विरोधाभासयुक्त एव स इति ज्ञायते"[५] इत्याशङ्क्यते।

वस्तुतस्त्वेतादृशसन्देहो न युक्तियुक्तः तत्तदाधिकारिभेदेन विभिन्नानामपि विषयाणां श्रेष्ठत्वप्रतिपादनात्। लोकेऽपि जननी शिशुबालकतरुणप्रबुद्धरूपेण विभिन्न-वयस्कानामात्मजानां कृते तत्तद्वयोमितिमनुसृत्य सुयोग्यं भिन्नं भिन्नमाहारं प्रददाति, तत्तद्वयसि तत्तदाहारस्यैव श्रेष्ठत्वात्। समस्तसुतहितदात्र्या मातुर्न कोऽपि पक्षपातभावः, न वा दीयमानेष्वाहारेषु श्रेष्ठाश्रेष्ठभावो विद्यते, अपि तु विभिन्नाहार-प्रदाने तेषां हितसाधनभाव एव विद्यते। एवमेवात्रापि समस्तमानवहितसाधन-तत्परगीता माता विभिन्नानामधिकारिणां कृते विभिन्नानां मार्गाणां प्रतिपादनं विधाय तेषु तत्तत्साधकानां श्रद्धादार्ढ्याय तेषामुत्कृष्टत्वावबोधनं प्रपञ्चितवतीति सर्वं समञ्जसम् ।

अत्र श्रीकृष्णार्जुनयोः परस्परसम्बोधनशैली अपि गमनार्हा। उपदेशारम्भे मित्रवन्मत्वा पार्थः श्रीकृष्णं केशव-गोविन्द-माधव-जनार्दनाभिधानैः सम्बोधयति। श्रीकृष्णोऽप्यर्जुनं तथैव मत्वा धनञ्जय-पार्थ-परन्तप-पाण्डवाद्यभिधानैः सम्बोधयति। पश्चाद्यदोपदेशो गहनतामुपैति तदोभावप्यसमानतां प्राप्य तत्रैको भक्तोऽपरो भगवान् भवति। अर्जुनो भक्तः सन् श्रीकृष्णमादिदेव-जगत्पति-जगन्निवास-परमेश्वर-महायोगेश्वर-देवदेवेत्यादिनामभिः सम्बोधयति। श्रीकृष्णश्चार्जुनं कुरुश्रेष्ठ-कुरुप्रवीरादिविशेषणैः स्तुत्यमानैः सम्बोधयति।

---

१. *भ.गी., ३.१५*

२. *तत्रैव, ३.१९*

३. *तत्रैव, ३.२०*

४. *तत्रैव, ५.२*

५. *The Quest of the Original Gita, P.1-3.*

किञ्च श्रीकृष्णः ईश्वरविषयप्रतिपादनावसरे प्रारम्भे स्वभिन्नमीश्वरं सूचयन्निव प्रथमपुरुषे ईश्वरपदप्रयोगं कुर्वन् तत्–स–यत्–येन–ब्रह्मन्–पुरुष–परमात्मेत्यादिपदानि प्रयुनक्ति। अन्ते च स्वस्यैव भगवत्त्वमुपस्थापयन् स्वं परमात्मा–अविनाशि–निर्विकल्प–अमृतात्माद्यभिधानैरुद्घोषयति। अनेनात्रत्य उपदेशो भेदे प्रारभ्याभेदे परिसमाप्य पूर्णतां गमयतीतीव प्रतीयते।

गीतायाः प्रमुखा भाष्यकाराष्टीकाकाराश्च

“रुचीणां वैचित्र्यादृजुकुटिलनानापथजुषाम्” इति पुष्पदन्तवचनानुसरं विविधविचारमनुसरन्तो बहवो दार्शनिका अस्माकं भारतवर्षे सञ्जाताः। तत्राऽऽस्तिका नास्तिकाश्चेति भेदः। ‘नास्तिको वेदनिन्दकः’ इति मनुस्मृतिवचनानुसारं सकलजनानामभ्युदयनिःश्रेयसार्थं प्रवृत्तस्य शास्त्रस्य प्रामाण्यमभ्युपगन्तार आस्तिकाः, तद्विरोधिनो नास्तिकाश्चेति पूर्वं विवेचितम्। तत्रास्तिका द्वैत–अद्वैत–विशिष्टाद्वैतादि–सिद्धान्तानामुपस्थापका आचार्या ईशाद्युपनिषदः, शारीरकसूत्राणि, भगवद्गीतां चाधिकृत्य भाष्याणि विरचितवन्तः। अनेन कालान्तरे स्वसिद्धान्तस्य प्रामाणिकत्वप्रति–पादनायेशाद्युपनिषत्–ब्रह्मसूत्र–भगवद्गीताख्यप्रस्थानत्रयीमधिकृत्य भाष्यसंरच–नाऽऽवश्यकी जाता। तस्मात् प्रायः सर्वे आचार्या नूतनसिद्धान्तप्रतिपादकाः स्वमतप्रामाण्याधिस्थापनाय प्रस्थानत्रयीं तद्गतां भगवद्गीतां चाधिकृत्य भाष्याणि विरचयामासुः।

साम्प्रतमुपलभ्यमानेषु भाष्येषु भगवत्पादैः शङ्कराचार्यैर्विरचितं शाङ्करभाष्यं प्राचीनतममास्ते। उपलब्धभाष्येष्वस्य प्राचीनतमत्वेऽपि ततः पूर्वमप्यनेकैराचर्यैर्गीतार्थप्रतिपादनाय बहु प्रयतितमिति श्रूयते। शङ्करभगवत्पादैः स्वीये भाष्ये–“तदर्थाविष्करणायानेकैर्विवृतपदपदार्थवाक्यार्थन्यायमप्यत्यन्तविरुद्धानेकार्थत्वेन लौकिकैर्गृह्यमाणमुपलभ्याहं विवेकतोऽर्थनिर्धारणार्थं सङ्क्षेपतो विवरणं करिष्यामि”[१] इति भाष्यरचनाहेतूपस्थापनसमये पूर्वमपि गीतार्थाविष्काराय बहुभिर्व्याख्या कृतेति प्रतिपादितम्। अनेन शाङ्करभाष्यात् पूर्वमपि गीतामधिकृत्य टीका विरचिता आसन् इति ज्ञायते। किन्तु ता इदानीमनुपलब्धा इति विद्यमानटीकासु शाङ्करभाष्यमेव प्राचीनतमम्। भाष्येऽस्मिन्नाचार्या अद्वैतसिद्धिमुपस्थापितवन्तः। अस्मिन् सिद्धान्ते “ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः” इत्युक्त्या ब्रह्मण एव पारमार्थिक–

---

[१] *भ.गी., शां.भा., उपो.।*

सत्यत्वम्, तद्भिन्नं सर्वं प्रातिभासिकम्; जीवोऽपि वस्तुतो ब्रह्मैव, तस्माज्जीवभावं तज्जन्यमनन्तदुःखं चाविद्याकल्पितमात्रमवास्तविकम्। दृश्यमानं सर्वं जगत् ब्रह्मविवर्तम्, अज्ञानवशात् सत्यमिव दृश्यते। अज्ञानेनैव (अविद्यया) जीवाः सांसारिकबन्धनमधिगताः। तादृशस्य संसारबन्धनस्यात्यन्तोपरमलक्षणं निःश्रेयसमस्य गीताशास्त्रस्य परमं प्रयोजनम्। "तस्माद् गीतासु केवलादेव तत्त्वज्ञानान्मोक्षप्राप्तिर्न कर्मसमुच्चितात्"[१] इत्याचार्योक्त्याऽऽत्यन्तिकदुःखनिवृत्तिपरमानन्दप्राप्तिरूपं निःश्रेयसं जीवब्रह्मणोरभेदज्ञानमात्रजन्यम्। कर्मादीनि त्वन्तःकरणशुद्धिद्वारा ज्ञानसाधनमात्राणि, ज्ञानानन्तरं तेषां न किञ्चिदप्युपयोगित्वम्।[२] तस्मादत्र ज्ञानमेव परं साधनं मोक्षस्य।

शङ्कराचार्यभगवत्पादानामिममद्वैतवादं समर्थयन्त आनन्दगिरि (प्रायः खि. १३००) श्रीधर(खि. १४००)मधुसूदना(१६००)द्याचार्याः शङ्करसम्प्रदायमनुसृत्य व्याख्यां चक्रुः। एतदतिरिक्तं महाराष्ट्रस्य तुकारामो ज्ञानेश्वरश्च शङ्कराचार्याणामद्वैतवादमनुसृत्य गीताया व्याख्यां विरचितवन्तौ।

रामानुजाचार्या (११००) भगवद्गीतामधिकृत्य विशिष्टाद्वैतपरं भाष्यं विरचयामासुः। अत्राचार्या अद्वैतमतेऽङ्गीकृतं जगन्मिथ्यावादं बिम्बवादं च निराकृत्य[३], यामुनमुनिप्रणीतस्य[४] 'गीतार्थसङ्ग्रहः' इत्याख्यस्य विशिष्टाद्वैतपरस्य गीताभाष्यस्यानुकरणं कृतवन्तः। अस्मिन् सिद्धान्ते भगवान् वासुदेव एव परमं तत्त्वम्। स चानन्तकल्याणगुणगणपरिपूर्णः। तद्भिन्ना सर्वे देवा तस्य भृत्याः। जीवास्तस्यांशाः परमाणुरूपाः चेतनाचेतनात्मकं सर्वं जगद् भगवतः शरीरम्। सर्वशरीरी भगवान् वासुदेवः। शरीरस्य विशेषणत्वेन भगवतः शरीरिणो विशेष्यत्वेन विशेषणविशेष्ययोरेकत्वस्य घटघटत्वादिषु दृष्टत्वेन जगतः परमात्मनो वासुदेवस्य च भेदोऽपि वक्तुं शक्यते, अभेदोऽपि पारमार्थिकत्वेन वक्तुं शक्यते।

---

[१] *भ.गी.शां.भा., २.१०*

[२] *'अज्ञानमेव हि कर्मयोगो न ज्ञानिनाम्। ज्ञानिनां तु गुणैरचाल्यमानानां स्वतश्चलनाभावात् कर्मयोगो नोपपद्यते' (भ.गी., शां.भा., ३.५)।*

[३] *द्र., भ.गी., रा.भा., २.१२*

[४] *यामुनाचार्य इत्यभिधानेन प्रसिद्धौ द्वौ भाष्यकारावास्ताम्। तत्रैकेन गद्यात्मकं भाष्यं विरचितम्, अपरेण च पद्यात्मकम्। गद्यात्मकभाष्यरचयिता यामुनाचार्यो यद्यपि विशिष्टाद्वैतवादी अपि, न स रामानुजाचार्याणां गुरुः। पद्यात्मकभाष्यरचयिता यामुनाचार्यस्तेषां गुरुः। स च खि० ९०६ तमाब्दे प्रादुरासीदिति श्रूयते। (भारतीय दर्शन का इतिहास – एस्. एन्. दासगुप्त, भा. २, पृ. ३८२–३८३)*

अत्र मुक्तिरप्राकृतवैकुण्ठे भगवत्सारूप्यं प्राप्तस्य नित्यशेषस्य नित्यदासस्याप्राकृतसकलभोगप्राप्तिः। तत्प्राप्तये कर्मयोगो भक्तियोगो ज्ञानयोगश्चेति त्रिविधा योगा हेतवः। इतीदृशं सिद्धान्तं स्वकीये विशिष्टाद्वैतपरे गीताभाष्ये रामानुजाचार्या निरूपितवन्तः। श्रीमद्भिर्वेदान्तदेशिकाचार्यवेङ्कटनाथै रामानुजभाष्यस्य तात्पर्यविवरणाय 'तात्पर्यचन्द्रिका'ख्या व्याख्या विरचितास्ति।

मध्वाचार्यैः[१] (ख्रि ११९९-१२७६) भगवद्गीतामधिकृत्य द्वैतपरं भाष्यं विरचितम्। अत्र जीवपरमात्मनोर्भेदाभेदयोः पारस्परिकविरोधत्वादसमीचीनस्तादृशो वाद इत्येभिर्द्वैतसिद्धान्तप्रतिपादनाय यत्नः कृतः। सिद्धान्तेऽस्मिन् भगवान् विष्णुरेव सर्वोत्कृष्टं तत्त्वम्। स च स्वतन्त्रः स्वाभिन्नानन्तकल्याणगुणगणपरिपूर्णः प्राकृतहेयगुणविरहितो लक्ष्मीसमेतः। जगदिदं सत्यम्। जीवाः सर्वे नारायणाद्भिन्नाः परस्परं च भिन्नाः। अजीवा अपि परस्परं भिन्ना नारायणादपि भिन्नाः, जीवेभ्योऽपि भिन्नाः। मुक्तिश्चानेकजन्मार्जितसद्धर्मानुष्ठानेन विशुद्धचित्ततया लब्धहरिप्रसादानां स्वस्वरूपानतिक्रमेण परमपदवैकुण्ठे निजसुखानुभवेन पुनरावृत्तिरहितमवस्थानम्। इतीदृशं द्वैतसिद्धान्तं मध्वाचार्याः स्वीये गीताभाष्ये उपपादितवन्तः। भाष्यस्यास्य विवरणाय जयतीर्थेन माध्वभाष्यव्याख्यात्मिका 'प्रमेयदीपिकाख्या' टीका विरचिता। अनेन गीतामधिकृत्य 'भगवद्गीतातात्पर्यनिर्णय' इत्याख्यः स्वतन्त्रग्रन्थोऽपि विरचितोऽस्ति।

निम्बार्काचार्योपपादितद्वैताद्वैतपरसिद्धान्तनिरूपणाय श्रीकेशवकश्मीरिमहाभागैः 'तत्त्वप्रकाशिका' इत्याख्या टीका भगवद्गीतामधिकृत्य विरचिता। अत्र जीवस्य जगतः परमात्मनश्च बद्धावस्थायां परस्परभिन्नत्वाङ्गीकारेऽपि, मुक्तावस्थायामभिन्नत्वमद्वैतं वा व्यवस्थापितम्। अत्र जीवजगतोरस्तित्वं सर्वमीश्वराधीनम्। भगवद्भक्तिरस्य सिद्धान्तस्य प्रधानो विषयः।

वल्लभाचार्यैः (ख्रि० १४७९) 'तत्त्वप्रदीपिका' इत्याख्यं शुद्धाद्वैतपरं गीताभाष्यं विरचितम्। अस्मिन् मते जीवाः सर्वे ईश्वरस्यांशाः, अशुद्धावस्थायां बद्धाः, विशुद्धावस्थायां च मुक्ता भवन्ति। मोक्षोपायभूतज्ञानोपलब्धिरीश्वरानुग्रहेणैव। तस्मान् मुक्तये ईश्वरभक्तिरावश्यकी अत्र।[२]

---

[१] मध्वाचार्याणामानन्दतीर्थ इत्यप्यपरं नाम श्रूयते।

[२] द्र. भगवद्गीता– डॉ. राधाकृष्णन्, परिचय, पृ. १७-२१, हिन्द पाकेट बुक्स, दिल्ली, १९९६

श्रीमद्भिर्भास्कराचार्यैरपि भगवद्गीतामधिकृत्य भाष्यं विरचितम्। भास्कराचार्याः स्वीये गीताभाष्ये न केवलं ज्ञानस्य, न वा केवलं कर्मणो निःश्रेयसहेतुत्वमनङ्गीकृत्य, ज्ञानकर्मोभयोरपि मोक्षसाधनत्वं प्रतिपादयन्ति। तस्माद् भास्कराचार्याणामिदं भाष्यं ज्ञानकर्मसमुच्चयवादपरमिति प्रसिद्धिरस्ति।

एतदतिरिक्तमनेकैर्विद्वद्भिः गीतामधिकृत्य स्वीयानि भाष्याणि विरचितानि। तथा हि– तत्र रामकण्ठाचार्याः 'सर्वतोभद्रविवरणम्', इत्याख्यया अभिनवगुप्ताचार्या 'भगवद्गीतार्थसङ्ग्रहः' इत्याख्यां च शैवसिद्धान्तपरं भाष्यं विरचितवन्तः। एवमेव वसुगुप्ताचार्या अपि शैवसिद्धान्तपरं भाष्यं लिखितवन्तः। श्रीमता टी. जि. सिद्धप्पाराध्यमहाभागेन वीरशैवसिद्धान्तमनुसृत्य 'भगवद्गीता वीरशैवभाष्यम्' इत्याख्यया भाष्यं विरचितम्। सुधीन्द्रयतिशिष्येण श्रीराघवेन्द्रस्वामिना गीतामधिकृत्य 'गीताविवृतिः' गीतार्थसङ्ग्रहः' 'गीताविवरणम्' इति त्रयो ग्रन्था विरचिताः। विज्ञानभिक्षुणा गीतातत्त्वप्रकाशिका, आञ्जनेयेन हनुमद्भाष्यम्, कल्याणभट्टेन रसिकरञ्जिनी, जगद्धरेण भगवद्गीताप्रदीपः, जयराजेन गीतासारार्थसङ्ग्रहः, बलदेवविद्याभूषणेन गीताभूषणभाष्यम्, मथुरानाथेन भगवद्गीताप्रकाशः, दत्तात्रयेण प्रबोधचन्द्रिका, रामकृष्णेन, मुकुन्ददासेन, रामनारायणेन, विश्वेश्वरेण, शङ्करानन्देन, शिवदयालुना च सुबोधिनीत्याख्यया, सदानन्दव्यासेन भावप्रकाशः, सूर्यपण्डितेन परमार्थप्रभा, नीलकण्ठेन भावदीपिका, गोलकचन्द्रेण भगवद्गीतार्थसारः, वादिराजेन भगवद्गीतालक्ष्याभरणम्, कैवल्यानन्दसरस्वतिना नरहरिणा च भगवद्गीतासारसङ्ग्रहः, विठ्ठलदीक्षितेन भगवद्गीताहेतुनिर्णयः इत्यभिधानेन गीतामधिकृत्य टीका विरचिताः।[1]

साम्प्रतमाधुनिकसमयेऽपि बालगङ्गाधरतिलकमहाभागैः 'गीतारहस्य' इत्याख्यया कर्मयोगस्य प्रधानत्वप्रतिपादिका टीका विरचिता। राष्ट्रपिता महात्मा गान्धीमहाभागः 'गीतामाता' इत्याख्यां टीकां विरचितवान्। अरविन्दघोषमहोदयैरपि गीतामधिकृत्य ग्रन्थो विरचितोऽस्ति। एवमेव डॉ. सर्वपल्लि-राधाकृष्णन् महाभागा अपि गीतापरिचयात्मकभूमिकालेखनपूर्वकं गीताव्याख्यां विरचितवन्तः। एतदतिरिक्तमन्यान्यप्रान्तीयभाषास्वांग्लभाषायां चानेकैर्मनीषिभिर्भगवद्गीतामधिकृत्य बह्व्यो व्याख्या विरचिताः सन्ति। विश्वस्य सर्वासु भाषास्वियं भगवद्गीताऽनूदिता चास्ति। किन्त्वस्मिन् महाप्रबन्धे सर्वेषां व्याख्याकर्तॄणां व्याख्यानां वा नाममात्रस्याप्युल्लेखो

---

१. भारतीय दर्शन का इतिहास – एस्. एन्. दासगुप्त, भा. २, पृ. ३८३ – राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर, १९८९

महानायासकर इति ग्रन्थगौरवभच्चात्र प्रमुखानामेव व्याख्यानां व्याख्याकर्तॄणां च परिचयः यथाशक्ति समुपस्थापितः।

श्रीमद्भगवद्गीतानन्तरीयगीतावाङ्मयम्

श्रीमद्भगवद्गीताप्रभावेण तदर्वाचीनसमयेऽपि 'गीता' इत्यभिधानेन विपुलं साहित्यमभ्यवर्धत। तत्र काश्चन महाभारतात्, काश्चन पुराणादिभ्यश्च सङ्गृहीताः; काश्चन स्वतन्त्राश्च सन्ति।

महाभातरस्य गीताः

महाभारतात् प्रायो विभिन्नाः षोडश गीताः[१] सङ्गृहीताः सन्ति। तथा हि– उतथ्यगीता, वामदेवगीता, ऋषभगीता, षड्जगीता, सम्पाकगीता, मङ्किगीता, बोध्यगीता, विचख्नुगीता, हारीतगीता, वृत्रगीता, पराशरगीता, हंसगीता, ब्रह्मगीता, अनुगीता, ब्राह्मणगीता सनत्सुजातीयगीता चेति तासां नामानि।

तत्र तावदुतथ्यगीता[२]–वामदेवगीतयो[३] राजधर्मविचाराः समुपदिष्टाः "शौर्यं तेजो धृतिर्दाक्ष्यं"[४] इति गीतोक्तक्षत्रियस्वभावास्तत्र विस्तरतां गता इति प्रतीयते। ऋभषगीतायां[५] लोभमोहादिदुर्भावपरित्यागपूर्वकं लोकहितार्थमनासक्तभावप्रयुक्त-स्वसम्पद्विनियोगेन राज्ञः, तदधीनदेशस्य चोत्कर्षो भवतीति नीतिः प्रतिपादिता। षड्जगीतायां[६] युधिष्ठिर–भीम–अर्जुन–नकुल–सहदेवेति पञ्चपाण्डवानां विदुरस्य चेति षड्जनोपदिष्टतत्त्वोपदेशानां सङ्ग्रहः समुपलभ्यते। मनुष्याय किं सर्वोत्तममिति जिज्ञासाया उपशान्तये उत्तररूपेण युधिष्ठिरादयस्तत्र स्वीयमनुभवं निरूपितवन्तः। सम्पाकगीतायां[७] धनसञ्चयेन विपुला दोषा इति त्यागस्य महत्त्वमुपस्थापितम्। मङ्किगीतायां[८] संसारे सन्नपि परममङ्गलसम्पादनार्थं किमाचरितव्यम्? इति

---

[१] *भगवद्गीतायाः परिचयः प्रागुपस्थापित इति, अत्र सा न सम्मेल्लिता।*

[२] *म. भा., १२.९०-९१*

[३] *तत्रैव, १२.९२-९४*

[४] *भ.गी., १८.४३*

[५] *म. भा., १२.१२५-१२८*

[६] *तत्रैव, १२.१६७*

[७] *तत्रैव, १२.१७६*

[८] *तत्रैव, १२.१७७*

प्रश्नस्योत्तरत्वेन लौकिकविषयचिन्तापरित्यागपुरःसरं परब्रह्मणि मनःसंयोग उपादिश्यते। बोध्यगीतायां[१] सुखदुःखादिद्वन्द्वविमुक्तानां स्थितप्रज्ञानामवस्थितिर्दृष्टान्त-पुरःसरं निरूपिता। विचख्नुगीतायां[२] प्राणिवध-मांसमत्स्यभोजनमधुमद्यपानादिदोषाणां निराकरणं सुचारुरूपेण कृतम्। हारीतगीतायां[३] संन्यासधर्माः, वृत्रगीतायां[४] तत्त्वज्ञानं श्रीविष्णुभक्तिश्च, पराशरगीतायां[५] धर्मस्य कैवल्योपायत्वम्, हंसगीतायां[६] सत्य-स्वात्मसंयम-क्षमादिसद्गुणानां महत्त्वं च समुपलभ्यन्ते। ब्रह्मगीतायां[७] मानव-जीवने आवश्यकभूता विविधविषयाः प्रतिपादिताः सन्ति। अनुगीता[८]-ब्राह्मणगीत[९]-योरर्जुनप्रार्थनया भगवान् श्रीकृष्णो भगवद्गीतोपदिष्टं तत्त्वमेव सदृष्टान्तं पुनरर्जुनाय समुपदिष्टवानितीमे भगवद्गीतामनुसृते स्तः। सनत्सुजातीयगीतायां[१०] धृतराष्ट्रं प्रति सनत्सुजातस्य राजनीतिपरो धर्मोपदेशो वर्तते।

पुराणादिग्रन्थगतगीताः

भागवतमहापुराणादिग्रन्थेभ्योऽपि विविधा गीताः सङ्गृहीताः सन्ति। तथा हि— द्वे कपिलगीते, हंसगीता, रुद्रगीता, भिक्षुगीता, देवीगीता, गणेशगीता, शिवगीता, ईश्वरगीता, द्वे ब्रह्मगीते, तिस्रो यमगीताः, सूतगीता, द्वे रामगीते, सूर्यगीता, वसिष्ठगीता, गुरुगीता चेति तासां नामानि।

तत्र तावत् कपिलगीताद्वये एका भागवतमहापुराणा[११]न्तर्गता, अपरा च पद्मपुराणस्था। गीताद्वयमपि कपिलाचार्यस्योपदेशरूपम्। हंसगीता भागवत-महापुराणा[१२]न्तर्गता; तत्र वासुदेवेन सनकादिभ्य उपदिष्टं सोऽहं तत्त्वमेव

---

[१] म. भा., १२.१७८
[२] तत्रैव, १२.१६४
[३] तत्रैव, १२.२२७
[४] तत्रैव, १२.२७८–२७९
[५] तत्रैव, १२.२९०–२९८
[६] तत्रैव, १२.२९९
[७] तत्रैव, १३.३५
[८] तत्रैव, १४.१६–५१
[९] तत्रैव, १४.२०–३४
[१०] तत्रैव, उद्योगपर्व।
[११] भाग. पु., ३.२५–३३
[१२] भाग. पु., ११.१३

श्रीकृष्ण-उद्धवयोः संवादरूपेण समुपस्थापितम्। रुद्रगीता भिक्षुगीता चापि भागवतमहापुराणे[१] उपलभ्येते। रुद्रगीतायां भगवान् रुद्रः प्रचेतेभ्यो वासुदेवपरां प्रेमदीक्षां प्रदाय 'तत्त्वमसि' इति महावाक्यज्ञानमुपदिशतीतीयं रुद्र-प्रचेतसोः संवादात्मिका। भिक्षुगीताऽपि हंसगीतावत् श्रीकृष्ण-उद्धवयोः संवादरूपा, अर्थमनर्थम् इति तत्त्वोपदेशपरा।

देवीगीता, गणेशगीता, शिवगीता च विषय-वस्तु-भाषा-शैल्यादिसर्वविषयेषु भगवद्गीतामनुसृताः सन्ति। भगवद्गीतावदत्र विश्वरूपदर्शनवर्णनमुलभ्यते। शिव-जीव-जगत्-बन्धमोक्षादिदार्शनिकविचारास्तत्र सुचारुरूपेण विमृष्टाः। आसु देवीगीता देवीभागवतमहापुराणा[२]न्तर्गता पार्वती-हिमवतोः संवादरूपा, गणेशगीता गणेशपुराण[३]स्था गणेशवरेण्याख्यराजयोः संवादरूपा। शिवगीता च पद्मपुराणनिहिता शिव-रामयोः संवादरूपा। ईश्वरगीता महादेवस्य सनकादिब्रह्ममानसपुत्राणां च संवादत्वेन कूर्मपुराणस्योत्तरभागे समुपलभ्यते।

ब्रह्मगीताद्वयम्, तयोरेका स्कन्दपुराणे[४], अपरा योगवासिष्ठे[५] वर्तेते। तत्र भगवतः शिवस्य परमसत्यत्वं निरूपितमस्ति। यमगीतात्रयम्, तास्वेका विष्णुपुराणे[६], अपराऽग्निपुराणे[७], अन्या च नृसिंहपुराणे[८] समुपलभ्यन्ते। सूतगीता स्कन्दपुराणान्तर्गता। रामगीताद्वयम्, तयोरेका अध्यात्मरामायणे[९] विद्यमाना राम-लक्ष्मणयोः संवादरूपा, अपरा च गुरुज्ञानवसिष्ठतत्त्वपुराणनिहिता राम-हनूमतोः संवादरूपा। सूर्यगीताऽपि सूर्य-महर्षिगणयोः संवादत्वेनाध्यात्मरामायणे वर्तते। वसिष्ठगीता योगवासिष्ठे[१०] वसिष्ठ-रामयोः संवादत्वेन, गुरुगीता च स्कन्दपुराणे शिव-पार्वतीसंवादत्वेन समपुलभ्येते।

---

१. *भाग. पु., ११.२३*
२. *देवीभाग. पु., ६.३२-४०*
३. *गणे. पु., कृदखण्ड, १३८-१४८*
४. *स्कन्द. पु., यज्ञवैभवखण्ड, उत्तरभाग, १-१२*
५. *योगवा., निर्वाणप्रकरण, १७३-१७६*
६. *विष्णु. पु., ३.७*
७. *अग्नि पु., ३.३८१*
८. *नृसिंह पु., ३*
९. *अध्यात्मरामायण, ७.५*
१०. *योगवा., निर्वाणप्रकरणे, उत्तरखण्डे, ३९-४०*

स्वतन्त्रगीताः

अष्टावक्रगीता, अवधूतगीता, उत्तरगीता, पाण्डवगीता चेत्याख्या गीता न महाभारते न वा पुराणादिष्ववलोक्यन्त हतीमाः स्वतन्त्रा गीता इति वक्तुं शक्यते।

तत्राष्टावक्रगीताऽष्टावक्रस्य जनकस्य च संवादरूपा, अष्टावक्रविरचितेति प्रसिद्धा। अष्टाविंशतिप्रकरणात्मकेऽस्मिन् ग्रन्थे ज्ञान-वैराग्य-मोक्षाणां कथमवाप्तिरिति जिज्ञासाया उत्तरं सविस्तरं निरूपितम्। अवधूतगीता अत्रि-अनसूयापुत्रेण भगवता दत्तात्रयेण विरचितेति प्रतीतिः। तत्र साक्षात्कृतपरमसत्यस्यावधूतस्यास्य समाध्यनुभववर्णनम्, अवधूतशब्दार्थविवेचनं चोपस्थापितम्। उत्तरगीता श्रीकृष्णार्जुनयोः संवादरूपा। तत्र ब्रह्मज्ञानोपलब्धिः तत्साक्षात्कारश्च कथं भवतीत्यर्जुनो भगवता श्रीकृष्णेनोपदिष्टः। तत्र भक्तिवैराग्यसहकृतध्यानज्ञानाभ्यां तत्साक्षात्कार इति विषयः समुपलभ्यते। पाण्डवगीता पाण्डवैर्विरचितेति प्रतीतिः। अस्यां भक्तिप्रपत्त्यादिविषयप्रशंसा दरीदृश्यते।[1] अस्या एव प्रपन्नगीतेत्यपरं नाम।

अपरञ्च, विष्णुगीता-शक्तिगीता-शम्भुगीतादयो वाराणस्याः श्रीभारतधर्म-महामण्डलेन (ग्रन्थप्रकाशन विभागे) प्रकाशिताः। इमाः पौराणिक्यो महाभारतस्था वेति तु नैवावगम्यते। अत इमा अपि स्वतन्त्रा एव भवितुमर्हन्ति।

तदेतावतोपपादिता गीताः सर्वाः प्रत्यक्षतया परोक्षतया वा विषयवस्तु-भाषा-शैल्यादि-विषयेषु भगवद्गीतामनुसरन्ति। अनेनानन्तरीयगीतासाहित्ये भगवद्गीता-प्रभावोऽस्तीति परिज्ञायते।

तदेवमेतावता गीतावाङ्मयपरिचयाख्ये प्रथमपरिच्छेदे श्रीमद्भगवद्गीतासाहित्य-सम्बद्धा विषयाः समुपस्थापिताः। मन्येऽनेन गीतावाङ्मयविषयकाः प्रायः सर्वा जिज्ञासाः समाहिता भवेयुरिति।

* * *

---

[1] *अत्रोपस्थापितो भगवद्गीतानन्तरीयगीतावाङ्मयविचारः 'युगयात्री भारतीयसंस्कृति' इति ग्रन्थात् सङ्गृहीतः। विभिन्नलेखकानां लेखसङ्ग्रहात्मकेऽस्मिन् ग्रन्थे श्रीपरमेश्वर-अय्यर-महोदयः स्वीये लेखे गीतानन्तरगीतासाहित्यपरिचयं लिखितवान्। तस्यैवांशोऽत्र सङ्क्षेपतो दर्शितः एतद्विषयकविशेषावगमजिज्ञासुभिस्तत्रैव द्रष्टव्यम्।*

द्र. – 'युगयात्री भारतीय संस्कृति', पृ. १५०-१६१, मैसूर वि.वि., १९७१ ई.।

द्वितीयोऽध्यायः

निगमागमविभागः सिद्धान्तशिखामणिवाङ्मयपरिचयश्च

निगमा आगमाश्च

सन्ति किल निगमागमा एव भारतीयसनातनधर्मदर्शसौधाधाराः निखिलप्रपञ्चहेतुना भगवता परशिवेन प्रणीता इति स्वयं प्रमाणपूर्णाः। भरतखण्डस्येतिहासे दर्शन-साहित्य-कला-शास्त्राणां समाजशास्त्रादिनिखिलशास्त्राणां च मूलं निगमागमवाङ्मयमेव। भरतखण्डस्य संस्कृतेः संस्काररस्य च प्राणभूता इमे।

अत्र निगमशब्दो वैदिकं वाङ्मयमागमशब्दश्च तन्त्रागमशास्त्रं सूचयति। निगमो वेद इत्येव प्रपञ्चे प्रथितः। विद्- ज्ञाने (अदादि ५७), विद्-सत्तायां (दिवादि. ६०), विद्-विचारणे (रुधादि १३), विद्-चेतनाख्याननिवासेषु (चुरादि १७७) विद्लृ-लाभे (तुदादि १४१) इत्यादिपाणिनीयधातुपाठमनुरुध्य करण-अधिकरण-कारकार्थेषु 'घञ्'प्रत्यये वेदशब्दो निष्पद्यते। अनेन परमसत्यलाभविचार-विषयकज्ञानाभिव्यञ्जको वेद इत्यवगम्यते, यमध्यस्य जिज्ञासवो जनाः परमं सत्यं विज्ञाय तदनुष्ठानेनैहिकामुष्मिकसुखादिकमाप्नुवन्ति। ज्ञानस्वरूपस्यास्य वेदस्य 'निश्चयेन तत्त्वं गमयतीति' निगम इति, कर्णोपकर्णिकया श्रवणव्याजेनागतत्वाद्, गुरुमुखश्रवणद्वारागतत्वाद्वा श्रुतिरिति च पर्यायनामनी वर्तेते।

विभिन्नपर्यायाभिधेयवानयं वेदो यद्यप्येक एव; तथापि विनियोगदृष्ट्या स ऋग्-यजु-साम-अथर्वात्मना चतुर्धा भिद्यते। उक्तं च वेदभाष्ये- "ऋग्भिस्तुवन्ति, यजुभिर्यजते, सामभिर्गायन्ति, अथर्वणाद्या फलविचारो विहितः" इति संहितारूपमेतच्चतुष्टयमपि वेद इत्यभिधीयते।

आगमशब्दस्तु "आ गम्लृ-गतौ" (भ्वादि-७०९) इति धातोर्निष्पन्न आगमनमित्यर्थमभिव्यनक्ति। अर्थात् परम्परयागतोऽयमागम इत्यवगम्यते। किञ्च 'आङ्'पूर्वकस्य 'गम्लृ' धातुनिष्पन्नस्यागमनार्थकस्यागमशब्दस्य 'ये च गत्यर्थकाः ते ज्ञानार्थकाः' इति नियमेन 'आ-समन्तात्, गमनं-ज्ञानम्' इति व्युत्पत्या पूर्णज्ञानमित्यर्थो लभ्यत आगमशब्दस्य। श्रीमद्भिर्वाचस्पतिमिश्रमहाभागैः-"आगच्छन्ति

बुद्धिमारोहन्ति यस्माद् अभ्युदयनिःश्रेयसोपायाः स आगमः"[1] इत्यागमस्य व्युत्पत्तिरुपपादिता।

अत्रेदमवधेयम्– "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गीरसः"[2] इति श्रुत्युक्त्यनुसारेण परशिवश्वासरूपेणोत्पन्नस्यागाधज्ञानभण्डारस्य निगमस्य विरुद्धनानावादिसंशयास्पदत्वादनेन सामान्यजनानामुपयोगो न भवेदिति निश्चित्य लोकरक्षणबद्धपरिकरः श्रीशङ्करः सर्वजनोपयोगिवेदार्थविवरणरूपानागमान् देव्यै पार्वत्यै समुपदिदेश, लोकेऽपि श्वासरूपध्वन्योक्तस्यार्थाभिव्यञ्जकसामर्थ्याभावाद् वाण्योक्तस्य तदपेक्षया बहुस्पष्टत्वं पूर्णत्वं बहुजनोपयोगित्वं चानुभवसिद्धम्। तथा चोक्तमागमानां शिववैखरीवाण्योत्पन्नत्वम्–

आगतं शिववक्त्रात्तु गतं च गिरिजामुखे।
मतं श्रीवासुदेवस्य आगमस्तेन कीर्तितः।।[3] इति।

तत्र तावदागमशास्त्रज्ञाः पं. श्रीव्रजवल्लभद्विवेदमहाभागाः "पुराणानां नूनमागममूलकत्वम्" इति निबन्धे निगमागमशब्दयोः स्वरूपमनेकप्रमाणपुरःसरमुपवर्णयन्तः– "शब्दयोरनयोः प्रवृत्तिविषये वर्तते मतानैक्यं शास्त्रकाराणाम्। "इतरेष्वागमाद्धर्मः"[4] इति मनुस्मृतिश्लोके आगमपदेन वेदो गृह्यत इति तद्भाष्यकारो मेधातिथिराह। निगमपदेन च वेदस्य ग्रहणं भवतीति निरुक्ते बहुषु स्थलेषु समुट्टङ्क्यते–इत्यपि निगमो भवति" इति वाक्यपुरस्सरम्। आगमः खल्वपि–ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति च पस्पशाह्निके महाभाष्यकारः पतञ्जलिः। भर्तृहरिरपि– "शिष्टेभ्य आगमात् सिद्धाः"[5], "न चागमादृते धर्मः"[6], "आगमस्तमुपासीनः"[7], "न जात्वकर्तुकं कश्चिदागमं प्रतिपद्यते"[8], "प्रणीतो

---

[1] यो. सू. १.२५ तत्त्ववैशारदी।
[2] बृ. उ. २.४.१०
[3] भास्करी, द्वि भागः पृ. ८५
[4] मनुस्मृतिः १.८२
[5] वाक्यपदीयम्– भतृहरिः १.२७
[6] तत्रैव १.३०
[7] तत्रैव १.४१
[8] तत्रैव १.१३३

गुरुणाऽस्माकमयमागमसङ्ग्रहः"[१], "भिन्नैरागमदर्शनैः"[२], "पुराणैरागमैर्विना"[३] इत्येवं बहुषु स्थलेषु प्रयुक्ते तदागमपदम्। अत्र टीकाकारा आगमपदेन ऋषिप्रणीतानां शास्त्राणाम्, निगमपदेन चापौरुषेयाणां वेदानां ग्रहणं कुर्वन्ति। अमुमर्थमेवागमाचार्यः तान्त्रिकप्रवरः काश्मीरकः श्रीमदभिनवगुप्तोऽप्युररीकरोतीव। स हि- "वेद्यं धर्माद्युपाय निश्चितं गमयतीति निगमो वेदः"[४] इति निगमपदस्य व्युत्पत्तिमाचष्टे। आगमपदस्य तु तेन किञ्चिद् भिन्नं व्याख्यानं प्रस्तुतम्। तद्यथा तन्त्रालोके-

> **इह तावत् समस्तोऽयं व्यवहारः पुरातनः।**
> **प्रसिद्धिमनुसन्धाय सैव चागम उच्यते।।[५] इति।**

"प्रसिद्धिश्चाविगानोत्था प्रतीतिः शब्दनात्मिका"[६] इति च। अपि च-"आगमो हि नामायं शब्दनसङ्क्रान्तिशरीरः। यथाह भगवाननन्तः"[७] "परत्र स्वबोधसङ्क्रान्तये शब्देनोपदिश्यते"[८] स च यो यस्य हृदये निरूढिमागतः स एव"[९], न हि बुद्धो नाम नियतः कश्चित्, अपि तु भावनाबलप्रतिलब्धक्षणिकादिदृढविमर्शः। तस्य क्षणिकादिभावनोपदेशी गुरुः पूर्वबद्धः, तस्याप्यन्य इति क्रमेणानियतवक्तृत्वात् पारमेश्वरविमर्शैनियतैव वस्तुतः। एवं चतुर्विंशतितत्त्वभावनाभावितः कपिलो मन्तव्यः। अत एवागमा अनादंय एव"[१०] इति च स एवागमपदं विवृणोति। एवं च सांख्य-योग-पाञ्चरात्र-पाशुपतशास्त्राणामागमपदाभिलप्यत्वमिति बाढमत्र साधयितुं शक्यते"[११] इति विवेचितवन्तः। अपरं च-

> **निर्गतं गिरिजावक्त्राद् गतं च गिरिशश्रुतौ।**
> **मतं च वासुदेवस्य तस्मान्निगममुचयते।।**

इति निगमपदस्य व्युत्पत्त्यात्मकः श्लोको बहुषु ग्रन्थेषूद्धृतो दृश्यते। किन्तु

---

१. वाक्यपदीयम्, भर्तृहरिः २.४९०
२. तत्रैव २.४९२
३. तत्रैव २.४९३
४. द्र. ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनी- भा. १, पृ. १५
५. तन्त्रालोके ३५.१-२
६. तन्त्रालोके ३५.१९
७. अभिनवगुप्तेन तन्त्रालोके (२८/३१३) अनन्तकारिका स्मर्यते।
८. अनन्तकारिका. पृ. ८९
९. अनन्तकारिका. पृ. ९६
१०. तत्रैव पृ. ९७-९८
११. निगमागमीयं संस्कृतिदर्शनम्- पृ. १०७-१०८

नैतल्लक्षणं निगमस्य प्राचीनाचार्यसम्मतमिति पं. श्रीव्रजवल्लभद्विवेदमहाभागास्तं निराकुर्वन्। तद्यथा– "लक्षणमिदमङ्गीकृत्यैव कुलचूडामणिग्रन्थस्य कुलचूडामणिनिगम इति नाम ख्याप्यते। परन्तु नैतत् प्राचीनाचार्यसम्मतम्। न च दृश्यते तादृशो विभागः प्राचीनेषु क्रमसम्प्रदायग्रन्थेषु, येषां किल उपदेष्ट्री भवति काली कालसङ्कर्षिणी। नात्र कुत्रापि निगमपदप्रयोगो लब्धप्रसरः, किन्तु सर्वेऽपीमे ग्रन्था आगमाख्यमेव धारयन्ति। तस्मात् सम्पूर्णं तान्त्रिकं वाङ्मयमागमपदेन, वैदिकं च निगमपदेन बोध्यते"[1] इति।

निगमागमोत्पत्तिविचारः

निगमागमोत्पत्तिविषये तद्रचनाविषये वा पाश्चात्त्यविदुषां भारतीयपण्डितानां च कल्पना विभिन्नैव। तत्र पाश्चात्यदृष्टिः– आधुनिकविज्ञानस्य तुलनात्मकभाषाशास्त्रस्य च नियमानुगुण्येन वेदोत्पत्तिं तदर्थाभिव्यक्तिं च गृह्णीयादिति। वेदस्तु नैको ग्रन्थः, किन्तु ग्रन्थराशिरिति नैकयैव व्यक्त्या नैकस्मिन्नेव काले लिखितः, किन्तु बह्वीभिर्व्यक्तिभिर्भौतिकवस्तून्यधिकृत्याभिव्यक्तानामुद्गरणानां सङ्ग्रहरूपा एव निगमागमा इति तेषामभिप्रायः। तेषां कथनानुसारमार्याभिधानः कश्चन जनः प्राकृतं वैभवं संवीक्ष्य भौतिकेष्वग्नि-वरुण-वाय्वादिषु पदार्थेषु देवत्वमारोप्य तेभ्यः क्रियमाणानां भोगभाग्यानां याचनैव प्रायस्तत्र बहुधाभिवर्ण्यते।

निराधारोऽयमाकाशः कस्माद् परितिष्ठति।
कृष्णा गावः कथं ह्येताः शुभ्रं क्षीरं दुहन्ति वै।।

इतीदृशा बालिशा अप्रबुद्धाश्च विषयास्तत्र दृश्यन्त इति तेऽभिदधति।

किन्त्वस्मिन् विषये भारतीयानां धारणा त्वन्यैव। तत्र तावत् 'अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदस्सामवेद[2]...", "शास्त्रयोनित्वात्"[3] इत्यादिश्रुति-सूत्रप्रामाण्येन,

अष्टादशानामेतेषां विद्यानां ब्रह्मवर्त्मनाम्।
आदिकर्ता शिवः साक्षाच्छूलपाणिरिति श्रुतिः।।

सद्योजातेन ऋग्वेदं वामदेवेन याजुषम्।
अघोरेण तथा सामं पुरुषेण त्वथर्वणम्।।

---

[1] *निगमागमीयं संस्कृतिदर्शनम्. पृ. १०८*

[2] *बृ. उ. २.४.१०*

[3] *ब्र. सू. १.१.३*

SRI JAGADGURU VISHWARADHYA
LIBRARY
Jangamwadi Math, Varanasi
Acc. No. 8369

ईशानेन मुखेनैव कामिकाद्यागमांस्तथा।
जनयामास विश्वेशः सर्वसिद्धिप्रदायकः।।[१]

इति स्मृतिप्रामाण्येन च निगमागमानामीश्वरजन्यत्वम्; "अस्य श्रीरुद्रस्य प्रश्नस्य अनुष्टुप् छन्दः, अघोर ऋर्षिः...."[२] इत्यादिप्रामाण्येन तपोमग्ना महर्षयस्तन्मन्त्रद्रष्टार इति महर्षीणां मन्त्रद्रष्टृत्वं च साधयन्ति प्रायः सर्वे भारतीया विचारकाः।

अत्रेदं विचारणीयं यत् पाश्चात्त्यानां भारतीयानां चाभिप्राये वास्तविकं किमन्तरमिति। पाश्चात्त्या विद्वांस आधुनिकया दृष्ट्या वैज्ञानिकपृष्ठभूमौ विचारयन्ति यत् केनचित् कर्त्रा विनैव न किञ्चित् शास्त्रं प्रादुर्भवितुमर्हति। यथा वैज्ञानिक-संशोधनानां संशोधकः कश्चिद् वैज्ञानिको विद्यत एव, तथैवात्राऽपि तदनन्तविस्तार-विषयप्रतिपादकानां निगमागमानां कश्चित् स्रष्टाऽवश्यमेव स्यात्। नो चेत् "मम माता नास्ति" इति कथनवदस्वाभाविकमनुचितं च भवेत्। तस्माद् भारतीयानामियं निगमागमानामीश्वरजन्यत्वकल्पनाऽपौरुषेवादो वाऽवैज्ञानिकोऽनुचितश्चेति प्रतीयत इति।

तमेनं प्रवादमेवं समादधति भारतीया विद्वांसः– इन्द्रियागोचरविविधविषय-कोषस्य निगमागमस्य कर्तृत्वे निःसीमज्ञानस्यावश्यकतास्ते। तादृशं ज्ञानं तु सर्वज्ञत्वादिविशिष्टस्य परमसत्तारूपस्येश्वरस्यैव साध्यं, न त्वल्पज्ञानयुक्तस्य जीवस्य। मनुष्याणां ज्ञानस्य सीमितत्वात् सदोषत्वाच्च न तेषां निगमागमकर्तृत्वं युक्तम्। तन्निगमागमोपदिष्टज्ञानस्यावगाहने एव मानवास्तीक्ष्णमतयोऽप्यतुलपरिश्रमेणापि कदाचिन्न समर्था भवन्ति, कथं तत् स्रष्टुमर्हन्ति? किन्तु ये तु तपोमग्नाश्चिन्तनशीलाः सदा संशोधननिरता महर्षयो निगमागममन्त्रद्रष्टारो भवितुमर्हन्ति न तु तत्कर्तारः।

यदाऽनवरतचिन्तननिरता महर्षय एकं विषयमादृत्याध्ययननिरताः सन्तस्तद्विषयमेव पौनःपुन्येनानुचिन्तयन्तस्तद्ध्यानमग्नास्तत्रैव समाधिमवाप्य स्वकीयं सर्वमहंममादिकं विस्मृत्य परमात्माभिधेये परमास्तित्वरूपे चेतने विलीना भवन्ति स्म, तदा तद्विषयसम्बद्धा मन्त्राः परमशून्यरूपात् तस्मात्परमात्मनः प्रसाद-रूपेणावतीर्य महर्षीणामवगाहनपरिधौ आगच्छन्ति स्म। महर्षयस्तान् साक्षात्कृत्य मन्त्रोऽयं परशिवाभिधेयस्य परमास्तित्वस्य प्रसाद इति विज्ञाय तमेव स्वशिष्येभ्य उपदिश्य मन्त्रोऽयमीश्वरप्रदत्त इति कथयन्ति स्म।

---

१. ब्र. सू. श्रीकर १.१.३

२. श्रीरुद्र[illegible]

LIBRARY

उक्तं च श्रीमद्भिररविन्दघोषमहाभागैः– "भारतीयपरम्परा वेदोत्पत्ते रहस्यं प्रामाणिकतयाङ्गीकरोति। ऋषिस्तत्र वेदानां न निर्माता, स च केवलं मन्त्राणां द्रष्टा, सनातनस्य सत्यस्यापौरुषेयस्य वा ज्ञानस्य उपदेष्टा। वेदभाषा तावत् स्वयं श्रुतिः। न चेयं भौतिकी छन्दोमयी विनिर्मितिः। सनातनानां महर्षीणां तपोमग्नानां सत्त्वोद्रेकावस्थायां श्रुतिगोचरोऽयं दिव्या ध्वनिस्तरङ्गरूपेणासीम्न उद्भूय तेषामन्तःश्रवणं प्रविष्टस्सन् स्वयमपौरुषेयोऽभवत्। तेषामन्तर्दर्शनेनान्तःश्रवणगोचरा चेयं वैदिकी वाङ्निर्झरी"[1] इति।

अत्रेदमवधेयम्– मन्त्रद्रष्टारो महर्षयो यदा व्यक्त्यवस्थामतीत्यैकान्ते समाधौ देवावस्थां प्राप्तवन्तः, तदा शून्यात् परमसत्यात् तन्मन्त्राणां प्राकट्यं जातम्। तैस्तदा तथैव ज्ञातं तथैवोक्तं चेत्यत्रावैज्ञानिकमनुचितं वा वचनं कुत्र? वस्तुतः कस्यचिन्नूतनस्य ज्ञानस्यागमनं प्राकट्यं वा परमसत्तारूपाच्चेतनादेव। यदा व्यक्तिर्व्यक्त्यवस्थायामिव वर्तते तदा न सः किञ्चिन्नावीन्यमवाप्तुमर्हति, यदा चित्तैकाग्र्यं साधयित्वा तत्रैव विलीनो भूत्वाहंममादिकं परित्यज्य परमसत्तारूपे शून्ये विलीनो भवति तदैव तज्ज्ञानमवाप्तुमर्हति।

साम्प्रतं मान्यताप्राप्ता अनेके वैज्ञानिकाः, परमोत्कृष्टस्य ज्ञानस्य मूलस्रोतं परमसत्तैवेत्यस्मिन् विषये विवशीभूताः सन्ति, केषाञ्चन वैज्ञानिकानां जीवने ईदृशीनां घटनानामुपलभ्यमानत्वात्। तथा हि– 'पोलण्ड' देशे द्विवारं प्राप्तनोबेलपुरस्कारा, 'रेडियम्' संशोधिका 'मेडम क्यूरी' इत्यभिधेया (१८६७-१९३४) वैज्ञानिकप्रवरा आसीत्। तस्या जीवने एका घटना घटिता, या स्वयं तयैवोल्लेखिता। वैज्ञानिकसंशोधनसमये विज्ञानसम्बद्धा काचन समस्या उत्पन्ना, तस्याः परिहाराय तया बहु चिन्तितम्, अथापि तत्र साफल्यं नैव प्राप्तम्। पौनःपुन्येन कृतः प्रयासोऽपि व्यर्थत्वं गतः। एकदा रात्रौ तत्समस्यापरिहाराय किञ्चिच्चिन्तयन्ती यदा पूर्णपरिहारो नोपलब्धस्तदा तदर्धं लिखितं पत्रं तत्रैव निक्षिप्य निद्रामग्ना सञ्जाता। प्रातरुत्थाय सा तत् पत्रमवलोक्यात्यन्तं चकिताऽभवत् यतो हि तदर्धलिखितपत्रस्यावशिष्टे भागे तत्समस्यायाः अत्यन्तं योग्यं समाधानं लिखितमासीत्। इतोऽप्याश्चर्यकरमेतद्, यदनयैव सुप्तावस्थायां लिखितं तत्। तदारभ्य कस्यचित् प्रश्नस्य परिहारो यदि नैव जायते, तर्हि तं प्रश्नं शयनसमये लिखित्वा तत्रैव निक्षिप्य सुप्तावस्थायां तस्य परिहारमुपलभते स्म[2]।

---

[1] *वेदरहस्यम् – महर्षि अरविन्दघोष, भा. १, पृ. ११.*

[2] *द्र. गीतादर्शन; ओशो, भा. १, पृ. ८*

अत्रेदं रहस्यम्– सा यदा सुप्ता भवति तदा तदवस्थायां तस्याः सर्वमहंममादिकं परमसत्तायां विलीनं भवति स्म। सा तत्रैकीभूता परमास्तित्वादवतरितं तज्ज्ञानमवाप्नोति स्म। क्रमेणेयमेव तस्या जीवने संशोधनपद्धतिरभवत्।

एवमेव संयुक्तराज्यस्य (अमेरिका) 'केण्टकीय हापकिन्स विल्' नामके प्रान्ते प्राप्तजन्मा एड्गर केसीत्यभिधेयो (जन्म १८७७) यद्यप्यानवमकक्षामात्रपठितः सामान्यमनुष्य एव, तथापि स यदा निद्रां गतः सुप्तावस्थायां चिकित्साशास्त्रनैपुण्यमवाप्तवान्। स नैकव्याधीनामौषधान्यत्यन्तं प्रभावकारीणि वदति स्म। एम. बी. बी. एस. (M.B.B.S.) एम. डी. (M.D.) इति लब्धोपाधिका जगति ख्यातनामानो वैद्या अपि तस्य समीपमागत्य सुप्तावस्थायां तस्मात् नवीनव्याधीनामौषधज्ञानं प्राप्य तेषां प्रयोगं कृत्वा सफला भवन्ति स्मेति तस्य जीवन्यामुल्लिखितमस्ति। सुप्तावस्थायामेव तादृशीं शक्तिमुपलभमानोऽयं केसी शयनाद्यदा जागर्ति स्म तदा सः पुनः सामान्यमनुष्य एव भवति स्म। सुप्तावस्थायामनेनाऽनेके व्याधिपीडताः स्वरोगस्यौषधं श्रुत्वा तत् स्वीकृत्य च व्याधिमुक्ता जाताः[1]। अत्राऽप्युपर्युक्तप्रकारेण परमास्तित्वादेव तादृशं ज्ञानं लभते स्म इति पुनः कथनस्य नावश्यकता।

किञ्च ग्रीसदेशस्य "सिसिलिद्वीपस्य सिराक्यूस् नामके प्रान्ते क्रि. पू. २८७ शताब्दे लब्धजन्मा 'आर्किमिडीस्' इत्यभिधेयो वैज्ञानिक आसीत्। तत्प्रान्तस्य नृपतिः 'हिरान्' सुवर्णमुकुटं कारितवान्। तन्मुकुटं ताम्रमिश्रितमिति सन्दिह्य, तत् शुद्धमशुद्धं वेति संशोधयितुं 'आर्किमीडिस', वैज्ञानिकमादिष्टवान्। नृपतेरादेशानुसारं तत्सन्देहस्योत्तरं लब्धकामोऽहोरात्रं तस्यैव विचारे मग्नः सन् एकदा स्नानार्थं स्नानगृहे गत्वा जलपात्रे यदाऽवतरितवान्, तदा स झटिति तस्य प्रश्नस्योउत्तरं ज्ञातवान्। तत्क्षणं स नग्नावस्थायामेव स्नानगृहात् बहिर्निर्गत्य यूरेका, यूरेका (संशोधितं मया, संशोधितम्) इति उद्घोषयन् ग्राममटितवान् इति तस्य जीवनघटनायामुपलभ्यते[2]। तदुत्तरविज्ञानसमये स केवलं व्यक्तिर्नासीत् व्यक्तिचेतने एव तदुत्तरं न लब्धम्; अपि तु तस्य सम्पूर्णमहं शून्ये विलीय यदा सः

---

[1] द्र.,'बदुकलु कलियिरि' नामके कन्नडभाषामये ग्रन्थे भा. २, पृ. २३२-२३३

[2] द्र., 'प्रपंञ्चद प्रसिद्ध विज्ञानिगलु' नामके कन्नडभाषामये ग्रन्थे, पृ. २५

निर्व्यक्तिरूप आसीत्। नो चेत् सः निर्वस्त्रोऽहमिति न विस्मरेत्, न वा नग्नावस्थायामेव स्नानगृहाद् बहिर्धावेत्।

एभिः सर्वैर्दृष्टान्तैर्वैज्ञानिकदृष्ट्याऽपि परमास्तित्वरूपाच्चेतनादेव नूतनज्ञान-मुत्पद्यते, तदस्तु तात्त्विकं ज्ञानमुत वा विज्ञानसम्बद्धं ज्ञानम्; तत्र मनुष्याणां प्रयत्नस्तु तत्प्राप्तिपात्रत्वसम्पादनायैवेति सिद्ध्यति। किन्तु पाश्चात्या विज्ञानिनः तज्ज्ञानप्राप्तिसमये तत्संशोधका 'अहं' विरहिता सन्तो निर्व्यक्तिकचेतनरूपा भवन्ति, तस्मिन् समये परमास्तित्वस्य प्रसादरूपेण तज्ज्ञानमवतरतीति च न जानन्ति। अत एव ते कथयन्ति इदमनेन संशोधितम्, तत् तेन संशोधितम्, एतच्च मया संशोधितमिति। भारतीयास्तु जानन्ति। तस्मात्ते "स यथार्द्रैधाग्नेरभ्य-हितात्पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निःश्वसितानि"[1] इति सर्वज्ञानानां मूलस्रोतः परमचेतन एवेत्यभिप्रयन्ति। पाश्चात्या अपि यदा तादृशीं स्थितिमवजानन्ति तदा तेऽपि– अस्य महतो भूतस्य निश्वसितमेतत् परमाणुबाम्ब-गणकयन्त्र-सापेक्षसिद्धान्त-क्लोनिङ्गपद्धतयश्चेत्यादिरूपेण निगमागमभाषया वक्तुं शक्नुवन्ति। तस्मादत्र भारतीयानां निगमागमोत्पत्तिविषये यः पक्षो न स अवैज्ञानिको न वानुचितः, अपि तु परमवैज्ञानिकः परमोचितश्चेत्यत्र न संशितिलवलेशोऽपि।

तथा चोक्तमरविन्दघोषमहाभागैः– "वेदस्त्वैश्वरं ज्ञानम्। स्वतोऽभिव्यक्तं परिज्ञानमिति कल्पनायां न कोऽपि चमत्कारोऽलौकिकता वा परिदृश्यते। यश्च ऋषिः स शक्तिरिमा असाधयत्, याभिः सः प्रवृद्धेनात्मसाधनेन मन्त्रान् ददर्श। तच्चैकमन्वेषणं विजयश्च। स्वतः प्रकाशस्येयमवस्था केवलमन्तरङ्गेऽङ्कुरिता सती लक्ष्यं प्राप। सैवास्य प्रकाशस्यात्यन्तिको विषयः। "वेदविषयिणी यात्रा" इत्यालङ्कारिकी उक्तिरत्र समञ्जसैव। यत इदं सत्यस्य वर्त्मनि प्रचलितस्यात्मनः प्रयाणम्। सततं प्रस्थिता प्रगतिः तत्र गन्तार उपर्युपरि एधन्ते यदा तदा शक्तिप्रकाशयोर्नूतनः, स्तरो दोहदार्थमुद्घाट्यते"[2] इति।

तदेवं परमशून्यादभिव्यक्तेषु निगमागमेष्वत्यन्तनिगूढविषयप्रतिपादकत्वान्निगमानां श्वासरूपत्वम्, निगूढानामपि विषयाणां सुस्पष्टरूपेणोपपादकत्वादागमानां

---

[1] बृ. उ. २.४.१०

[2] *वेदरहस्य – अरविन्दघोषविरचितम्, भा. १, पृ. १२*

वैखरीवाणीरूपत्वं कल्पितम्। तत्र स्पष्टरूपाणामागमानामेव तन्त्रमित्यपरं नामधेयं विद्यते। तन्त्रविशारदास्तन्त्रशब्दस्य यौगिकार्थमुपपादयन्तः– "तन्यते विस्तार्यते ज्ञानमनेन" इति व्युत्पत्तिं प्रतिपादयन्ति। उक्तं च कामिकागमे–

> तनोति विपुलानर्थान् तन्त्रमन्त्रसमन्वितान्।
> त्राणं च कुरुते यस्मात् तन्त्रमित्यभिधीयते।।इति।

तन्त्राणां प्रभेदाः

तत्र तावत् तन्त्राणां वैदिकतन्त्रम्, बौद्धतन्त्रम्, जैनतन्त्रं चेति त्रयः प्रभेदाः भवन्ति। पुनर्वैदिकतन्त्रमुपास्यभेदेन शैव-वैष्णवशाक्तभेदेन त्रिधा विभज्यते। तत्र वैष्णवागमा विशिष्टाद्वैतप्रतिपादकाः, शाक्तागमा अद्वैतप्रतिपादकाः, शैवागमाश्च द्वैत-अद्वैत-द्वैताद्वैत-विशिष्टाद्वैत-विशेषाद्वैताभिधशक्तिविशिष्टाद्वैतप्रतिपादका भवन्ति। तत्र पाशुपतं सिद्धान्तशैवं च द्वैतम्, श्रीकण्ठदर्शनं च शैवविशिष्टाद्वैतम्, वीरशैवदर्शनं च विशेषाद्वैताभिधशक्तिविशिष्टाद्वैतसिद्धान्तप्रतिपादकमिति तन्त्रशास्त्रे प्रसिद्धम्[१]।

अपरं च शिववक्त्रभेदमनुसृत्य तद्विनिर्गतानां तन्त्राणां प्रभेदा अपि तन्त्रशास्त्रग्रन्थेषु प्रदर्शिताः। तथा हि तत्र दश शिवागमाः, अष्टादश रुद्रागमाश्चेत्याहत्य २८ सिद्धान्तागमाः शिवस्योर्ध्ववक्त्रादीशानाद्विनिर्गताः। पूर्ववक्त्रात् तत्पुरुषात् समुद्भूताः २८ संख्याकाः गारुडागमाः। दक्षिणास्यादघोरादुद्भूताः ६४ भैरवागमाः। पश्चिमास्यात् सद्योजाताद् विनिर्गतानि भूततन्त्राणि। उत्तरवक्त्राद् वामदेवाद् २४ वामतन्त्राणि विनिर्गतानि। एवमाहत्य १६४ तन्त्राणि भवन्ति। किन्तु प्रतिष्ठालक्षणसारसमुच्चये वैरोचनीये दक्षिणास्यविनिर्गतानि भैरवतन्त्राणि ३२ एव परिगणितानीति कृत्वा तत्र १३२ तन्त्रनामानि वर्तन्ते। तानि व्रजवल्लभद्विवेदमहाभागैर्लुप्तागमसङ्ग्रहाख्यग्रन्थस्य प्रस्तावनायां सङ्गृहीतानि।[२]

वैष्णवागमाः

"पाञ्चरात्रं भागवतं तथा वैखानसाभिधम्"[३] इत्यत्र वैष्णवागमानां भेदत्रयं निर्दिष्टम्। तत्र वैखानसागमः प्रसिद्धचरः, दक्षिणभारते तिरुपतिक्षेत्रे भगवतः

---

[१] सिद्धान्तशिखामणिसमीक्षा, (पृ. ८) ग्रन्थानुसारमत्रोपपादिताः तन्त्रप्रभेदाः।

[२] लुप्तागमसङ्ग्रह भा. २, उपो. पृ. ११-१३ सं. सं. वि. वि. वाराणसी १९८३ ई.।

[३] नित्याषोडशिकार्णवसेतुबन्धे भास्कररायविरचिते उद्धृतम्। (द्रष्टव्यम् पृ. ५)

श्रीनिवासस्य पूजोत्सवादिकं वैखानसागमप्रक्रिययैव भवति। तत्रत्यवेङ्कटेश्वरशोध-संस्थानतश्चानेके ग्रन्थास्तदागमप्रतिपादकाः प्रकाशिताः। तत्र दक्षिणे भारतेऽन्येषु स्थलेषु च तदागमीया नैका मातृका अद्यावध्यप्रकाशिताः सन्ति। पाञ्चरात्रागमस्य भागवतस्य च मतस्य पृथक्त्वेनोल्लेखो हर्षचरिते[1] बाणभट्टरचिते[2] दृश्यते। हयशीर्षपञ्चरात्रे पाञ्चरात्रसंहितानां भागवतसंहितानां च पृथक् पृथगुल्लेखो विद्यते। अत्रत्यं भागवततन्त्रं मध्वाचार्येण भागवततात्पर्यप्रकाशे जीवगोस्वामिना च षट्सन्दर्भे[3] उद्धृतम्। एवं सत्यपि साम्प्रतं भागवतागमस्य कापि संहिता सम्प्रदायो वा नोपलभ्यत इव।

तत्र तावद्वैष्णवागमेषु त्रिविधेषु पाञ्चरात्रसाहित्यमेव प्रमुखतया विस्तरेण चोपलभ्यते। अस्यागमस्य सिद्धान्तानां साहित्यस्य च विशिष्टं परिचयमुपस्थापयन् डॉ. श्रादरमहोदयः "अहिर्बुध्न्यसंहिताभूमिकायां हयशीर्षपञ्चरात्र-अग्निपुराण-कपिञ्जलसंहिता-विष्णुतन्त्र-पाद्मतन्त्राख्येषु ग्रन्थेषु सङ्कलितानां संहितानाम्नामन्येषां च कतिपयग्रन्थानां साहाय्येन[4] २१५ संख्याकानां संहितानाम्नां सङ्कलनं कृतवानस्ति। मार्कण्डेयसंहितायां भारद्वाजसंहितायां च संहितानामानि निर्दिष्टानि सन्ति। तानि च नामानि लक्ष्मीतन्त्रभूमिकायां[5] द्रष्टव्यानि[6]। अनिरुद्धसंहिताभूमिकायामध्यावधि २७५ संख्याकाः पाञ्चरात्रसाहित्यग्रन्था विस्तृते संस्कृतवाङ्मये उद्धृता उपलभ्यन्त इति संसूचितम्।

शाक्तागमाः

शाक्तागमा गुण-देश-काल-आम्नायभेदेनानेकधा विभज्यन्ते। तत्र सात्त्विकागमानां तन्त्रमिति, राजसानां यामलमिति, तामसानां च डामर इति च

---

[1] *......भागवतैः......पाञ्चरात्रिकैः......पृ. २३६-२३७ निर्णयसागरसंस्करणम्।*

[2] *द्रष्टव्याः, हयशीर्षचरितम्- २.२-९; अत्र प्रथमं पाञ्चरात्रसंहितानां २५ संख्याकानामुल्लेखः (इमानि च नामानि पाठभेदेन सहाऽग्निपुराणेऽपि ३९ अध्यायारम्भे दृश्यन्ते) तदनन्तरं भागवतसंहितानामथ च सामान्यसंहितानां नामानि सन्ति। अत्र डॉ. श्रादरमहोदयेन अहिर्बुध्न्यसंहिताभूमिकायां सर्वा एताः संहिताः पाञ्चरात्रस्यैवेत्युक्तम्।*

[3] *द्रष्टव्यम्. पृ. १. सर्वमूल- निर्णयसागरसंस्करणम्।*

[4] *द्रष्टव्यम् तत्रैव. पृ. ६-१२*

[5] *द्रष्टव्यम् तत्रैव. पृ. १०-१३*

[6] *द्रष्टव्यम् तत्रैव. पृ. ३*

नाम व्यवह्रियते। भगवतः शिस्य पञ्चमुखोद्भूतत्वादेतेषामागमानां पूर्वाम्नाय-दक्षिणाम्नाय-पश्चिमाम्नाय-उत्तराम्नाय-ऊर्ध्वाम्नायेति भेदेन पञ्चविधत्वं शास्त्रेषु[1] निबद्धम्। पुनश्चैतः षष्ठ आम्नायः शिवस्य निम्नाद् गुप्तमुखादुत्पन्नोऽध आम्नायाभिधेयो विद्यत इति कथ्यते। कुलार्णवतन्त्रस्य तृतीयोल्लासे एतेषामाम्नायानां वर्णनमुपलभ्यते। देशभेदेनाऽपि विष्णुक्रान्ता[2] रथक्रान्ता[3] अश्वक्रान्तेति[4] भेदत्रयं प्रतिपाद्य तेषु ६४ विधा आगमा (तन्त्राणि) प्रचलिताः। वस्तुतस्तन्त्राणां विपुलत्वेऽपि शाक्तपूजाविधानस्य गोपनीयत्वाद् गुरुमुखैकगम्यत्वाच्च केचन एवागामा अद्यावधि प्रकाशिताः।

शैवागमाः

ताल्वोष्ठपुटनिष्पन्दपूर्वकं शिवभाषिताः ।
अष्टाविंशति संख्याकाः शिवोक्तास्ते शिवागमाः।।[5]

इति श्रीनीलकण्ठशिवाचार्याणामुक्त्यनुसारं शिवोक्ताः कामिकादिवातुलान्ता अष्टाविंशत्यागमा शैवागमाः सिद्धान्तागमाश्चेति कथ्यन्ते। ते चागमाः–

कामिकं योगजं चिन्त्यं कारणं त्वजितं तथा।
दीप्तं सूक्ष्मं सहस्रं च अंशुमत् सुप्रभेदकम्।।
विजयं चैव निश्वासं स्वायम्भुवमथानिलम्।
वीरं च भैरवं चैव मुकुटं विमलं तथा।।
चन्द्रज्ञानं च बिम्बं च प्रोद्गीतं ललितं तथा।
सिद्धं सन्तानशर्वोक्तं पारमेश्वरमेव च।।
किरणं वातुलं चैव अष्टाविंशतिसंख्यया।।[6]

---

[1] परशुरामकल्पसूत्रम् १.२

[2] विन्ध्यतश्चित्तलपर्यन्तम्।

[3] उत्तरपश्चिमीयो भागः।

[4] अस्य स्थानविषये वैमत्यं वर्तते। शाक्तमङ्गलतन्त्रानुसारेण विन्ध्यात् दक्षिणसमुद्रपर्यन्तमिति, महासिद्धिसारानुसारेण करतोयानदीतो जावापर्यन्तमिति निर्दिश्यते।

[5] क्रि. सा. भा. १, पृ. ९

[6] क्रि. सा. भा. १, पृ. ९.

इत्यष्टाविंशतिसंख्याकाः सन्ति। (काञ्चीवरं नगरस्य कैलासनाथमन्दिरे एतेषामष्टाविंशतिशैवागमानामत्यन्तं प्राचीनः शिलालेख उपलभ्यते, तत्र पल्लवराजो राजसिंहवर्मनो निजां धार्मिकीं श्रद्धामुपवर्णितवान्। शिलालेखोऽयं पञ्चमशताब्दीय इति कथ्यते।) तत्र प्राथमिका दशागमा शिवागमा इति, अवशिष्टा रुद्रागमा इति चाख्यायन्ते। तदुक्तमागमे–

तेषु पूर्वे दश प्रोक्तं शिवभेदेति संज्ञितम्।
दशापराष्टकं तत्र रुद्रभेदमिति स्मृतम्।।[1]इति।

तत्र प्रथमं भगवान् परशिवः प्रणवादीन् दश शिवात्मानो विसृज्य तेभ्य उपदिष्टवानित्यतः कामिकादीनां प्राथमिकानां दशागमानां शिवागम इति, पुनश्च स अनाद्यादीनष्टादशरुद्रान् श्रोतृरूपान् सृष्ट्वा तेभ्य उपदिष्टवानित्यतो विजयादीनामष्टादशागमानां रुद्रागम इति संज्ञा। तदुक्तं किरणागमे–

सृष्ट्यनन्तरमेवेशः शिवान् सृष्ट्वा शिवात्मजान्।
ज्ञानमेकं विभज्याशु तेषां तत्संख्ययाऽवदत्।।[2]

दशाष्टसंख्ययाऽप्यन्यो रुद्रभेदोऽपरो मतः।
दशाष्टसंख्यया रुद्रान् पूर्वमुत्पाद्य बुद्धिमान्।।
शिवस्तत्संख्ययैवेह पुनस्तान् बोधयेत् खग।।[3]इति।

एतेषामष्टाविंशति शैवागमानामेव सिद्धान्तागमशब्देनाऽपि व्यवहारो दरीदृश्यते। तथा हि– 'आप्तोक्तिरत्र सिद्धान्तः शिव एवाप्तिमान् यतः" इत्यस्य रत्नत्रयकारस्य श्रीकण्ठसूरेर्वचनस्य व्याख्यानावसरे तत्रभवता श्रीमता अघोरशिवाचार्येण "सिद्धान्त–शब्दः पङ्कजादिशब्दवद्योगरूढ्या शिवप्रणीतेषु कामिकादिषु दशाष्टादशतन्त्रेषु प्रसिद्धः"[4] इत्येवं कामिकाद्यष्टाविंशत्यागमानां सिद्धान्तागमत्वं स्पष्टं दर्शितम्। पण्डितवरोऽभिनवगुप्तशिष्यः क्षेमराजश्च "प्रायश्च सिद्धान्तप्रियो लोकः सिद्धान्त–क्रममास्थितः"[5] इति सिद्धान्तागमानां लोकानुरागित्वम्, "शैव शब्देनानुत्तीर्णपदप्रापक–

---

[1] कारणागमे।
[2] किरणागम वि. १०.३
[3] तत्रैव वि. १०.१२–१३
[4] र. त्र. पृ. ५
[5] स्वच्छन्दोद्योत २.२५

कैरणादिसिद्धान्तशास्त्रमुच्यते"[१] इति तेषां स्वरूपं चोपपादितवान्। शिवपुराणस्य वायवीयसंहितायामपि–

स्वतन्त्रो दशधा पूर्वं दशाष्टादशधा पुनः।
कामिकादिसमाख्याभिः सिद्धः सिद्धान्तसंज्ञितः।।[२]

इति कामिकाद्यागमानां सिद्धान्ताभिधेयत्वमुद्घोष्यते।

पाण्डीचेरीतः साम्प्रतं प्रकाशिते भैरवागमे शैवागमानामुपागमानां च २०७ संख्याकानां नामावली सङ्गृहिता। तत्रत्या स्वल्पा एवागमग्रन्था इदानीमुपलभ्यन्ते। तदेवं शिवागमाः १०, रुद्रागमाः १८, उपागमाश्च २०७ इत्याहत्य शैवसिद्धान्तागमाः २३५ सन्ति। तत्र पं. श्रीव्रजवल्लभद्विवेदमहाभागैः लुप्तागमसङ्ग्रहे २३२ शैवसिद्धान्तागमानां नामावलिरक्षरक्रमेण सन्निविष्टा[३]। तत्र सूक्ष्मस्य, सुप्रभेदस्य, अनलस्य चोपागमा न सन्तीति नामत्रयन्यूनता दृश्यते।

वस्तुतस्तु तन्त्रसाहित्यमस्त्यत्यन्तं विपुलम्। तद्ग्रन्थाः, ग्रन्थकाराश्च सन्ति बहवः। पं. व्रजवल्लभद्विवेदमहाभागाः लुप्तागमसङ्ग्रहे चत्वारि शतानि (४००) ग्रन्थग्रन्थकाराणां सुसम्यक् परिचयमुपस्थापितवन्तः[४]। अनेन तन्त्रवाङ्मयवैशाल्यं ज्ञायते। ग्रन्थविस्तरभयादत्र तद्वाङ्मयस्य सम्पूर्णतन्त्रवाङ्मयपरिचयो नोपपादितः। अथापि प्रकृते प्रसङ्गे शैवागमविषयोपस्थापनमावश्यकमिति, तदर्थमथ प्रयत्यते।

निगमागमेषु शैवागमानां स्थानं महत्वं च

परस्पराविरुद्धार्थाः शिवोक्ता निगमागमाः।
अल्पबुद्धिभिरन्योन्यं विरोधः परिकल्प्यते।।[५]

इति श्रीनीलकण्ठशिवाचार्यमहाभागाः शिवोपदिष्टानां निगमागमानां परस्पराविरोधार्थप्रकाशकत्वमुपस्थापितवन्तः। श्रीपतिपण्डिताराध्यभगवत्पादैरपि-

तस्माद्वेदागमार्थेषु यः कुर्याद् भेदभावनाम्।

---

[१] स्वच्छन्दोद्योत ११.७४
[२] शि. पु. वा. सं. १.३२.१२
[३] लुप्तागमसङ्ग्रहः. भाग २. उपो. पृ. ८६-९०. सम्पूर्णानन्द संस्कृत वि. वि. १९८३ ई.।
[४] लुप्तागमसङ्ग्रहः. भाग २. उपो. पृ. १-८४
[५] क्रियासारः, भा. १, पृ. ४

स सहस्रकुलं घोरे नरके पतति ध्रुवम्।।[१]

इति निगमागमेषु भेदमवलोकयतां नरकभागित्वप्रतिपादकस्मृतिमुद्धृत्य, तद्व्याजेन तेषामविरोधत्वं समर्थितम्। अनेन निगमागमयोः सम्प्रामाण्यमवगम्यते।

तत्रापीतरागमापेक्षया शैवागमानामेव सर्वश्रुतिसमप्रामाण्यम्। तथा हि-सांख्ययोगपाञ्चरात्रागमा वेदप्रतिपादितविषयेष्वेकैकविषयमेव स्वसिद्धान्तरूपेण स्वीकृतवन्तः। तस्मात्तेषां वेदैकदेशवर्तित्वमेकदेशप्रामाण्यं च शैवागमानां तु वेदोक्तसमस्तविषयोपपादकत्वात् तेषां वेदवत् सर्वदा प्रामाण्यम्। तदुक्तं सिद्धान्तशिखामणौ-

पाञ्चरात्रस्य सांख्यस्य योगस्य च तथा मुने।
वेदैकदेशवर्तित्वं शैवं वेदमयं मतम्।।

वेदैकदेशवर्तिभ्यः सांख्यादिभ्यो महामुने।
सर्ववेदानुसारित्वाच्छैवतन्त्रं विशिष्यते।।

शैवतन्त्रमिति प्रोक्तं सिद्धान्ताख्यं शिवोदितम्।
सर्ववेदार्थरूपत्वात् प्रमाणं वेदवत्सदा।।[२]

अत एव मोहशूरोत्तरे-

श्रुतिस्मृतिपुराणाद्या आगमा धर्मदेशकाः।
सामान्यं च विशेषं च शैवं वैशेषिकं वचः।।[३]

इति शैवागमानां विशेषत्वं निर्दिष्टम्। मृगेन्द्रागमेऽपि-

वेदान्तसांख्यसदसत्पादार्थिकमतादिषु ।
ससाधना मुक्तिरस्ति को विशेषः शिवागमे।।

प्रणेतुः सर्वादर्शित्वान्न स्फुटो वस्तुसङ्ग्रहः।
उपायाः सफलास्तद्वत् शैवे सर्वमिदं परम्।।[४]

---

[१] ब्र. सू. श्रीकर. १.१.३.३

[२] सि. शि. ५.६-८

[३] द्र. सिद्धान्तसारावलिः. पृ. ७८

[४] मृगेन्द्रागम. वि. २.१०-११

इति वेदान्तसांख्यादिदर्शनेभ्यः शैवागमानां विशेषत्वमुपदिष्टम्। तदेवं पूर्वाचार्योक्तिभिः शैवागमानां महत्त्वं निगमसमप्रामाण्यं च स्पष्टमवगम्यते। अत एव शैवागमोपदिष्टकर्माण्येवाचरितव्यानि। तत्रापि शैवागमविरुद्धकर्माणि निगमोपपादितान्यपि नाचरितव्यानि, वेदोक्तानि शैवकर्माविरोधान्येवाचरणीयानि। तदुक्तं कामिकागमे–

वेदाध्ययनकादौ च द्विजानां विहितं तु यत्।
तत्सर्वं चैव कर्तव्यं न वाऽवश्यं तु शैवकम्।।
कर्तव्यं चेदनुष्ठेयं शैवकर्माविरोधि यत्।
विरुद्धं चेत् परित्याज्यं न तु शैवं परित्यजेत्।।
सङ्ग्राह्यं वैदिकं सर्वं शैवाक्याविरोधि यत्।।[1]इति।

अत एव शिवपुराणस्य वायवीयसंहितायाम्–

शिवागमोक्तं यज्ज्ञानं तदेव ज्ञानमुत्तमम्।
श्रीकंण्ठेन शिवेनोक्तः शिवायै च शिवागमः।।
शिवाश्रितानां कारुण्याच्छ्रेयसामेकसाधनम्।।[2]

इति करुणारसपारावारेण परशिवेनोपदिष्टानां शिवभक्तानां शिवाश्रितानां ज्ञानस्योत्तमस्यैव मोक्षसाधनत्वं स्पष्टमुक्तम्।

किञ्च, निगमागमेषु निगमोपदिष्टनानाशास्त्रविषयावगमो धीमतामेव साध्यः, अल्पमतयस्तु नावगमनसमर्थाः। विषयदृष्ट्या तु तत्रास्ति काठिन्यम्, भाषादृष्ट्यापि लौकिकसंस्कृताद्वैदिकसंस्कृतस्य क्लिष्टत्वात् सुरगीर्विदामप्यल्पानां निगमविज्ञानं कष्टतरमेव प्रतीयते, न तत्र वेदानां कठिनत्वे कारणाभावः। यदि निगूढं धर्मकर्मात्मादिविज्ञानं तत्साधनानि च सर्वसामान्यानि सर्वसुलभानि च भवेयुः, तर्हि ये तद्विज्ञानपात्रत्वं नाधिगतास्तेऽपि तद्विज्ञातुमुद्यता अविज्ञातेऽपि विज्ञातमिव मन्यमानस्तस्य दुरुपयोगमेव कुर्वाणाः स्वयंकृतस्यैवोत्कृष्टत्वं मन्यमाना शास्त्रहानिमात्महानिं समाजहानिं चादधति। अत एव पूर्वाचार्यैस्तज्ज्ञानस्य क्लिष्टत्वमुपस्थाप्य तत्परिरक्षणं कृतम्। उक्तं चारविन्दघोषमहोदयैः– "आत्मज्ञानस्य देवताविषयकसत्यज्ञानस्य च रहस्यसंरक्षणवेदरहस्यरक्षणत्वादीनामुद्देशो

---

[1] *द्र. सिद्धान्तसारावलिः, पृ. ७८*

[2] *शिवपुराणे वायवीयसंहिता. ७*

युक्त एव। यत एवंविधस्य पवित्ररहस्यविचारस्यानधिकारिभिर्दुरुपयोगो मा भूत्"[१] इति।

अत्रेदमवधेयम्– अनेन क्लिष्टत्वेन शास्त्रस्यैकत्र लाभोऽप्यन्यत्र हानिर्भवति। तथा हि– तज्ज्ञानस्य क्लिष्टत्वे दुर्बुद्धीनामल्पमतीनां तस्य प्राप्तिरसम्भवेति। तन्मुखेन शास्त्रस्य दुरुपयोगप्रसङ्गात् परिरक्षणरूपो लाभो भवत्येव, किन्तु ये सुबुद्धयो विकसितान्तःकरणाः श्रद्धान्विताः सन्तोऽपि येषां क्लिष्टनानाशास्त्रविषयाध्ययनानर्हा धीर्वर्तते, ते तदवगमनासमर्थास्तज्ज्ञानवञ्चिता भवन्तीतीयं महती हानिरेव।

वस्तुतस्तु शास्त्रस्य क्लिष्टत्वे लाभादधिका हानिरेव जायते। यतो हि बौद्धिकदृष्ट्या शास्त्राध्ययनसमर्थाः सर्वेऽपि हृदयदृष्ट्या तज्ज्ञानयोग्या इति वक्तुं न शक्यते, केषाञ्चन बुद्धिमतामपि दुष्प्रवृत्तिस्वभावस्य लोके दृष्टत्वात्। एतद्विपरीतं बौद्धिकदृष्ट्या शास्त्राध्ययनासमर्थाः सर्वे हृदयदृष्ट्या तज्ज्ञानपात्राणीत्यपि न कथयितुं शक्यते, केषाञ्चन अज्ञानिनामपि सदाचारप्रवृत्तिर्लोके दृष्टत्वात्। तस्मात् सदाचारप्रवृत्ता अल्पमतयस्तच्छास्त्राध्ययनवञ्चिता भवन्तीतीदृशी परिहर्तुमक्लिष्टरूपस्य शास्त्रस्यावश्यकतासीत्, येन जनसामान्या अपि लाभान्विता भवेयुः। तदावश्यकशास्त्रमेवात्यन्तसरललौकिकसंस्कृतभाषायां भगवता परशिवेनोपदिष्टं शैवागमशास्त्रम्। अत एव वेदानां शिवनिःश्वासोत्पन्नत्वमागमानां शिववाण्युपगमत्वं च तयोः क्लिष्टत्वं सरलत्वं च सूचयति। इदं सर्वविदितमेव यन्निगमापेक्षयागमानां सरलत्वं तज्ज्ञानस्य सर्वसुलभत्वं च। तत्कारणादेव केचन आगमानामत्यन्तमर्वाचीनत्वशङ्कामुपस्थापयन्तीत्यपरैव वार्ता। तदेवं शैवागमानां सरलत्वमपि तेषां वैशिष्ट्यं ख्यापयति।

किञ्च, "तस्माच्छूद्रोऽनवक्लृप्तः"[२] इत्यादिश्रुतिषु शूद्राणां वेदाध्ययनानधिकारप्रतिपादनाद्वेदाध्ययने तेषां नाधिकारः, न केवलं शूद्राणाम्, अपि तु "स्त्रीशूद्रौ नाधीयाताम्" इत्यादिना स्त्रीणामपि तदध्ययनाधिकारविरोधः स्मृतः। एतादृशी व्यवस्थाऽपि तच्छास्त्ररहस्यपरिरक्षणायैव तद्दुरुपयोगप्रसङ्गनिवारणायैव च विहिता। अत्रापि पूर्वोक्ता हानिरापतति यद्वे शूद्रा अपि धर्मपथारूढाः सुगुणसुशोभिताः सुकर्मरताः सदाचारिणश्च, तेषां शास्त्राध्ययनाधिकारविरोधोऽयं नैव सम्मत आगमानाम्। अत एवोक्तम्–

---

[१] *वेदरहस्य, भा १., पृ. ७८*

[२] *तै. सं. ७.१.१.६*

सर्वेषामधिकारोऽस्ति तान्त्रिकेषु वरानने।
वैदिकानां तथान्येषां स्त्रीणां पुंसां च सुव्रते।।[१] इति।

स्वच्छन्दतन्त्रेऽपि–

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्येऽथवा प्रिये।
सर्वे ते शिवधर्माणः शिवधर्मे नियोजिताः।।

……………………………………………

प्राग्जात्युदीरणाद्देवि प्रायश्चित्ती भवेन्नरः।।[२] इति।

तदेवं शैवागमा बहुजनहितं बहुजनसुखं च लक्ष्यं निर्धार्य भाषाप्रयोगविषयेऽत्यन्तं सरलत्वमनेकजनसुलभत्वमङ्गीकृत्य, तदध्ययनाधिकारविषये च श्रुत्यध्ययनप्रतिबन्धकजातिव्यवस्थामुच्छिद्य सर्वेभ्योऽप्यधिकारं प्रदाय समस्तजनकल्याणमेव साधयन्तीत्यागमाः श्रुतिभिरप्युत्कृष्टतां भजन्तेऽस्मिन् विषये। उक्तं च श्रीनीलकण्ठशिवाचार्यभगवत्पादैः–

अथवा शिवनिश्वासश्रुतिभ्यस्ते शिवागमाः।
अधिका शिववक्त्रेभ्यः साक्षादेव विनिर्गताः।।[३] इति।

एवमागमानां शैवानां निगमापेक्षया वैशिष्ट्येऽपि प्रतिपाद्यविषये उभयोः समानत्वाद् अर्थात् एकार्थप्रतिपादकत्वादुभयोरपि समप्रामाण्यम्। अत एवोक्तं रेणुकभगवत्पादैः–

वेदसिद्धान्तयोरैक्यमेकार्थप्रतिपादनात् ।
प्रामाण्यं सदृशं ज्ञेयं पण्डितैरेतयोः सदा।।[४] इति।

ननु निगमागमयोरेकार्थप्रतिपादकत्वे, निगमे विद्यमानेऽपि भगवता शिवेनागमाः किमर्थमुत्पादिताः? इति चेद्, अत्र रहस्यमिदम्– वेदोचितानामुपनयनवेदाध्ययनादीनामधिकारः त्रैवर्णिकेभ्य एव सीमित आसीत्। वस्तुतो विचारेण शिवप्राप्त्यर्थं वर्णव्यवस्थैव प्रमुखो नाधारः; अपि तु योग्यतैवाधारो भवेत्। तस्माद् योग्यताया आधारेण मानवसमाजस्योत्थानार्थं भगवान् शिव आगमानुपादिशत्। आगमसिद्धान्तानुसारं साधनमार्गे प्रवृत्यर्थं दीक्षासंस्कारो नितान्तमावश्यकः। अयं संस्कारो

---

१. *कारणागम. ८.१०*

२. *स्वच्छन्दतन्त्र. ४.५४०–५४६*

३. *क्रियासार. भा. १, पृ. ४*

४. *सि. शि. ५.१३*

वर्णव्यवस्थाया आधारेण न प्रदीयते, किन्तु शक्तिपातमवलोक्य प्रदीयते। अत एव रेणुकभगवत्पादाः– "शक्तिपातं समालोक्य दीक्षया योजयेदमुम्"[१] इत्युपदिष्टवन्तः। शक्तिपातं नाम शिवपूजा–शिवकथाश्रवण–शिवशास्त्राध्ययनादि–प्रसङ्गेषु नेत्राभ्यामानन्दाश्रुनिर्गमनम्, रोमाञ्चनम्, अङ्गकम्पनमित्यादिलक्षणमित्यर्थः[२]। यस्मिन् एतादृशानि चिह्नानि सम्भवन्ति स शक्तिपातविशिष्ट इति विज्ञेयम्। एतादृशः शक्तिपात एव शैवागमदीक्षाया प्रमुख आधारः।

शक्तिपातविशिष्टो नरो ब्राह्मण–क्षत्रिय–वैश्य–शूद्र–स्त्रीत्यादिषु यः कोऽपि भवतु स शिवागमसम्मतदीक्षार्ह एव। यदि यः कोऽपि उच्चवर्णे लब्धजन्माऽपि शक्तिपातविशिष्टो न स्यात्, तर्हि सः दीक्षासंस्कारयोग्यो भवितुं नार्हति[३]। तदेवं भगवान् शिवः केषाञ्चन त्रैवर्णिकाधारेणोपनयनाद्यधिकारम्, केषाञ्चन योग्यताधारेण च दीक्षाद्यधिकारं प्रदाय, सर्वेषां हितं साधयितुमेव निगमागमानामुपदेशमकरोदिति सर्वं समञ्जसम्।

शैवागमेषु वीरशैवागमानां स्थानं महत्त्वं च

सिद्धान्ताख्ये महातन्त्रे कामिकाद्ये शिवोदिते।
निर्दिष्टमुत्तरे भागे वीरशैवमतं परम्।।[४]

इति श्रीरेणुकभगवत्पादाचार्योक्त्या शिवोपदिष्टानां सिद्धान्तापरपर्यायाणां कामिकादिशिवागमानामुत्तरभागे वीरशैवमतमुपदिष्टमिति शैवागमानामुत्तरभागस्य वीरशैवागमत्वं निर्दिश्यते। चन्द्रज्ञानागमेऽपि शैवागमान् पूर्वकाण्ड–उत्तरकाण्डभेदेन द्विधा विभज्य तत्र पूर्वकाण्डस्यालिङ्गित्वं प्रतिपाद्य, उत्तरकाण्डस्य लिङ्ग–धारणपरकत्वं प्रतिपाद्य तन्मुखेन तेषामुत्तरकाण्डागमानां वीरशैवागमत्वं च निर्दिश्यते, तथा हि तत्र पूर्वशैवलक्षणकथनावसरे–

---

[१] सिं. शि. ६.१०

[२] लक्षणं शक्तिपातस्य प्रबोधानन्दसम्भवः।
सा यस्मात् परमा शक्तिः प्रबोधानन्दरूपिणी।।
आनन्दबोधयोर्लिङ्गमन्तःकरणविक्रियाः।
यथा स्यात् कम्परोमाञ्चस्वरनेत्राङ्गविक्रियाः।। (क्रि. सा. भा. २, पृ. ८५)

[३] द्र. तन्त्रागमीयधर्म दर्शन, काशीपीठाधीश्वराणां श्री १००८ जगद्गुरुणां डॉ. चन्द्रशेखर–शिवाचार्याणामाशीर्वचने।

[४] सि. शि. ५.१४

दीक्षाणामिह शैवीनां पूर्वभागोदितात्मनाम्।
ग्रहाणाग्रहणाभ्यां च द्विविधास्ते शिवद्विजः।।

पूर्वकाण्डोक्तदीक्षाभिः संस्कृतास्ते ह्यलिङ्गिन।
स्वार्थे परार्थे यजनेऽधिकृतास्ते भवन्ति हि।।[1]

इत्यादिषु शैवागमानां पूर्वकाण्डं पूर्वभागं वा विनिर्दिश्य, पुनश्च वीरशैव-लक्षणकथनावसरे-

आगमोत्तरकाण्डोक्तदीक्षाणां यः परिग्रहः।
समान आदिशैवेन विशेषमिह संश्रृणु।।

इष्टलिङ्गवियोगे वा व्रतानां च परिच्युतौ।
तृणवत् प्राणसन्त्याग इति वीरव्रतं मतम्।।

भक्त्युत्साहविशेषोऽपि वीरत्वमिति कथ्यते।
वीरव्रतसमायोगाद्वीरशैवं प्रकीर्तितम्।।[2]

इत्यादिषु शैवागमानामुत्तरभागे वीरशैवतत्त्वप्रतिपादननिर्देश उपलभ्यत इति संसूचितम्।

वस्तुत आगमानामुत्तरभागेऽप्यनेकविधाः शैवप्रभेदा[3] उपदिष्टाः सन्ति। तत्र येऽनादिशैव-आदिशैव-अनुशैव-महाशैव-योगशैव-ज्ञानशैवादिविविधशैवाः प्रतिपादिताः, तेषु वीरशैवस्यैव श्रेष्ठत्वमभ्युपगम्यते।

वेदानामन्तभागे प्रतिपादिता वेदान्तापरपर्याया उपनिषदो यथा वेदार्थनिर्णये मूलाङ्गभूताः समस्तवेदानां साररूपाश्च भूता निगमेषु प्रमुखं स्थानमधिगच्छन्ति तथा कामिकादिवातुलान्तानां शैवागमानामुत्तरभागोपदिष्टा वीरशैवागमाः शैवागमानामर्थनिर्णये प्रमुखाङ्गभूताः शैवागमानां साररूपाश्च भूताः शैवागमेषु विशिष्टं स्थानमुपलभन्ते। अत एवोपनिषदुक्ततत्त्वावगमनेन समस्तवेदाध्ययनफलरूप-

---

[1] चन्द्रज्ञानागम. क्रि. पा. १०.१२-१३

[2] चन्द्रज्ञानागम. क्रि. पा. १०.३२-३४

[3] वस्तुतः शैवप्रभेदविषये नास्त्यागमानामेकमत्यम्। पारमेश्वरागमे (१.१४-१७) अनादि-आदि-अनु-महा-योग-ज्ञान-वीराभिधेयाः सप्त शैवाः, चन्द्रज्ञानागमे (क्रि. पा. १०.६-३४) अनादि-आदि-पूर्व-मिश्र-शुद्ध-मार्ग-सामान्य-वीरभेदेन अष्टविधाः शैवाः, सूक्ष्मागमे (क्रि. पा. ७.४-३०) अनादि-आदि-महा-अनु-प्रवर-अन्त्य-सामान्य-मिश्र-शुद्ध-वीरादयो दशविधाः शैवप्रभेदाश्च प्रतिपादिताः। वीरागमे एषां संख्या इतोऽपि वर्धयित्वा अष्टाविंशति (२८) भवंति (द्र. वीरागम-उत्तरभागे शैवपटले)।

कैवल्याधिगमस्तथैव शैवागमान्तभागोपदिष्टवीरशैवतत्त्वविज्ञानमात्रेण सकलशरीरिणां शिवस्वरूपावाप्तिर्जायते। वीरशैवमते यावान् विशेषः, न तावान् इतरशैवेषु। तदुक्तं पारमेश्वरागमे–

यदुक्तमादिशैवादिवीरशैवान्तमीश्वरि।
न तत्तथा विशेषोऽत्र भेदषट्केऽपि पूर्वके।।

वीरशैवे विशेषोऽस्ति सावधानमतिः शृणु।
यस्य विज्ञानमात्रेण जायतेऽयं सदाशिवः।।[1]

श्रुतिप्रतिपादितद्वैतमन्त्राणामद्वैतमन्त्राणां च, कर्मपरकश्रुतीनां ज्ञानपरकश्रुतीनां च, पराशिवब्रह्मणः स्वरूपविषये श्रुतिप्रतिपादितसगुणपरकवाक्यानां निर्गुणपरकवाक्यानां चात्र समानरूपेण तथा व्यवस्थोपस्थापिता तथा नान्यत्र। तत्रापि कापालादिमते वेदविरुद्धकर्मविहितत्वं दृश्यते। तस्माद्वीरशैवागमा–नामितरागमेभ्योऽप्यधिकं वेदसमप्रामाण्यं सिद्ध्यति। उक्तं च श्रीनीलकण्ठशिवाचार्यभगवत्पादैः–

कापालादिमतान्याहुः शैवान्यन्यानि यानि च।
अवैदिकानि सर्वाणि नाचरेत्तानि वैदिकः।।[2]

इति कापालादिशैवानामवैदिकत्वमुपपाद्य,

कर्षणादिप्रतिष्ठान्ता वैदिकानुष्ठिता यथा।
तथैव वीरशैवानामागमा वैदिका मताः।।[3] इत्युक्तम्।

श्रीपतिपण्डिताराध्यभगवत्पादैरपि–

श्रुत्यैकदेशप्रामाण्यं द्वैताद्वैतमतादिषु।
द्वैताद्वैतमते शुद्धे विशेषाद्वैतसंज्ञिते।।
वीरशैवैकसिद्धान्ते सर्वश्रुतिसमन्वयः।।[4]

इति वीरशैवस्य सर्वश्रुतिसमन्वयप्रतिपादकत्वम्, अन्यमतानां च श्रुत्यैकदेशनिरूपकत्वं विहितम्। सिद्धान्तशिखामणौ श्रीरेणुकभगवत्पादाः शैवागमानां वाम–

---

[1] पारमेश्वरागम. १५.२९–३०
[2] क्रि. सा., भा. १, पृ. ३
[3] तत्रैव, भा. १, पृ. ३
[4] ब्र. सू. श्रीकर. मङ्गलश्लो. १५

दक्षिण-मिश्र-सिद्धान्तभेदेन चतुर्विध्यं प्रतिपाद्य, सिद्धान्तापरपर्यायवीरशैवागमेषु भस्म-रुद्राक्ष-लिङ्गधारणादिवेदोक्तधर्मप्रतिपादकत्वात्, वेदविरुद्धचार्वाकादिमतविरोधात्वाच्च वीरशैवागमा वेदसम्मता इत्युपदिशन्ति। तथा हि–

तेषु शैवं चतुर्भेदं तन्त्रं सर्वविनिश्चितम्।
वामं दक्षिणं चैव मिश्रं सिद्धान्तसंज्ञकम्।।

शक्तिप्रधानं वामाख्यं दक्षिणं भैरवात्मकम्।
सप्तमातृपरं मिश्रं सिद्धान्तं वेदसम्मतम्।।

वेदधर्माभिधायित्वात् सिद्धान्ताख्यः शिवागमः।
वेदबाह्यविरोधित्वाद्वेदसम्मत उच्यते।।[१] इति।

किञ्च, शैवागमेष्विव वीरशैवागमेषु ब्रह्मविद्यायाः शिवदीक्षायाः कैवल्यस्य वाधिकारविषये स्त्रीपुरुषभेदं बालवृद्धभेदं द्विजशूद्रादिवर्णभेदं यतिगृहस्थाद्याश्रमभेदं च निराकृत्य समस्तेभ्यः समानाधिकारं प्रदातुमुपदिष्टम्। तथा हि–

पारतन्त्र्यं हि नारीणामुक्तं स्वर्ग्येषु कर्मसु।
ऐहिकेष्वपि मोक्षार्थे न स्वातन्त्र्यं विहन्यते।
तस्मादवश्यं नारीणां दीक्षा देया बुधोत्तमैः।।[२]

इति कारणागमे ऐहिकेषु स्वर्गीयकर्मसु वानधिकृतानां नारीणामपि मोक्षसाधकेष्टलिङ्गदीक्षायामधिकारत्वनिर्देशनपुरःसरं दीक्षाविषये स्त्रीपुरुषभेदं निराकृत्य स्त्रीणामपि मोक्षाधिकारित्वमुपस्थापितम्। पारमरेश्वरागमे–

न बालवृद्धभेदोऽस्ति नमस्कारादिपूजने।
सर्वेऽपि वन्दनीया हि विधवा पुष्पिणीमुखाः।।[३]

इति तदिष्टलिङ्गपूजानमस्कारादिधार्मिककर्मसु बालवृद्धभेदं विधवापुष्पिणीभेदं च निराकृत्य वृद्धवद्बालानामपि पुष्पिणीवद्विधवानामप्यर्चनाधिकारित्वमुक्तम्। तत्रैव-

ब्राह्मणाः क्षत्रिया वैश्या शूद्रा ये चान्यजातयः।
लिङ्गधारणमात्रेण शिवा एव न संशयः।।[४]

---

[१] सि. शि. ५.१०-१२

[२] कारणागम., क्रि. पा. २.७०

[३] पारमे. आ. १.६१

[४] तत्रैव १.५८

इति लिङ्गधारणपरके शिवदीक्षासंस्कारविषये ब्राह्मण-क्षत्रिय-वैश्य-शूद्रादिजातिभेदं निराकृत्य ब्राह्मणवदेव सद्गुणसम्पन्नानां सुसंस्कृतानां शूद्राणामपि लिङ्गधारणार्हत्वं तन्मुखेन तेषां मोक्षार्हत्वं चोपदिष्टम्। कारणागमे-

ब्रह्मचारी गृहस्थो वा वानप्रस्थो यतिस्तु वा।
योषिद्वा परिगृह्णीयात् सद्योमुक्तिं यदीच्छति।।[१]

इति मोक्षप्राप्तिविषये ब्रह्मचारि-गृहस्थ-वानप्रस्थ-यत्याख्यं आश्रमभेदं निराकृत्य यतेरिव गृहस्थादीनामपि मोक्षाधिकारित्वं विहितम्।

तदेवं दीक्षाविषये मोक्षविषये वा ब्राह्मणादिवर्णानां ब्रह्मचर्याद्याश्रमाणामतिक्रमणपुरःसरमधिकारनिर्णयं करोतीत्यस्य वीरशैवस्यातिवर्णाश्रमी इत्यपरं नामधेयं विद्यते। कारणागमे-

अत्याश्रमं पाशुपतं शाम्भवं तच्छिरोव्रतम्।
इत्येव नामाभिः पुण्यैर्निगमान्तेषु गीयते।।[२]

इति वीरशैवपर्यायनामस्वत्याश्रमोऽपि परिगणितोऽस्ति।

अत्र बालवृद्धादिविविधभेदनिराकरणं नाम सम्पूर्णं तद्भेदविरोध इति नार्थः, अपि तु तद्भेदानां पृष्ठभूमौ तद्भेदानधिकृत्य विधीयमानोच्चनीचत्वनिर्णयविरोधः, तद्व्याजेनैव दीक्षायां मोक्षे च क्रियमाणार्हत्वानर्हत्वनिर्णयविरोध इति विज्ञेयम्। वस्तुतस्तु स्त्री-पुरुष-नपुंस्त्वादिजैविको भेदो बाल-तरुण-वृद्धादिवयोभेदश्च सामाजिकव्यवस्थायां दुर्निवार्य एव। न कस्यचिन्निराकरणेनापि जैविक आवस्थिको वा भेदो विनश्येत, किन्त्वेतद्भेदमूलकं क्रियमाणाया उच्चनीचभावनाया निराकरणं सम्भवति। एवमेव ब्राह्मणादिमनोवैज्ञानिकः कार्मिकश्च भेदो मनोविज्ञानदृष्ट्या कर्मदृष्ट्या वा दुर्निवार्य एव। यतो हि मनोदशा केषाञ्चन विद्याध्ययन-शास्त्रचर्चा-नूतनसंशोधनादिबौद्धिककर्मस्वेव प्रवृत्ता, केषाञ्चन बलवर्धनादिदैहिककर्मस्वेव प्रवृत्ता, केषाञ्चन अर्थसञ्चय-तद्वर्धनाद्यार्थिककर्मस्वेव प्रवृत्ता, केषाञ्चन च सेवाशुचित्वादिशौचकर्मसु प्रवृत्ता विद्यते। यस्य यत्र मानसिकी अपेक्षा तत्रैव प्रवृत्ते सति स विपुलं साफल्यं सम्प्राप्नोति। तस्मादत्र तत्तन्मानसिकीष्वपेक्षासु तत्तत्प्रवृत्तिषु वा विद्यमानस्य भेदस्य निराकरणमसम्भवमेव, किन्तु तानेवाधृत्योच्चनीचनिर्णयः स्पृश्यास्पृश्यनिर्णयस्तत्तत्कृतकर्मणां श्रेष्ठत्वाश्रेष्ठत्वनिश्चयो मोक्षाधिकारनिर्णयो वा

---

[१] कारणा. क्रि. पा. १.५

[२] तत्रैव. क्रि. पा. १.९

न युक्तियुक्तो न च शास्त्रसम्मत इति वीरशैवागमानामभिप्रायः। अत एवोक्तं कारणागमे–

मोक्षायाधिकृतो लोके यतिरेव कथं भवेत्।
ब्रह्मचारी गृहस्थो वा वानप्रस्थो यतिस्तु वा।।

ब्राह्मणः क्षत्रियो वाऽथ वैश्यः शूद्रोऽन्त्यजोऽपि वा।
पुमान् नार्यथवा क्लीबः सर्वे मोक्षाधिकारिणः।।[1] इति।

एवं वीरशैवागमा एकत्र वेदविहितधर्ममनुपालयन्तस्तान्येवात्यन्तसरलसंस्कृभाषायामुपदिश्य वेदसमप्रामाण्यमधिगताः श्रुतिसम्मतत्वमाप्नुवन्ति, अन्यत्र च मोक्षदीक्षादिषु द्विजशूद्रादिनानाभेदनिराकरणपूर्वकमाधुनिकविचाराणामपि प्रमाणभूताः सामाजिकसकलजनहितमेव साधयन्तो लोकमान्यतामधिगच्छन्ति। अनेन साम्प्रतं भारतीयसंस्कृतिमनुलक्ष्योत्पद्यमानजातीयनानाऽऽशङ्कानां सूक्तः परिहारश्चैतेष्वागमेषूपलभ्यन्ते।

इदृशीं व्यवस्थां श्लाघयन्तो राष्ट्रीयविद्वांसः श्रीव्रजवल्लभद्विवेदमहाभागः- "बुद्धेः श्रेष्ठत्वं श्रमस्य कनिष्ठत्वं च नाङ्गीकर्तव्यम्। आगमैस्तन्त्रशास्त्रैश्चेदं कार्यं कृतमस्ति। स्त्री-पुरुषयोर्ब्राह्मण-चण्डालयोश्च भेदं निवारयितुं बहु प्रयतितं तैः। धर्मविद्याजातिलिङ्गानामन्तरेणापि समाजे सज्जना उत्कृष्टं स्थानमधिगताः। मोहनदासकरमचन्दगान्धीमहाभागानां महात्मेति, डॉ. भीमराव-अम्बेडकरमहोदयानां 'बाबासाहेब' इत्याद्युपाधयस्तेषां नामभिः साकं संलग्नाः"[2] इति सोदाहरणमागमशास्त्रमहत्त्वमुक्त्वा पुनश्च- "साम्प्रतिको भारतीयसमाजो वैदिकतान्त्रिकधर्मद्वयस्य विद्रूपताभिरेव ग्रस्तः, तयोः सौशील्यं विस्मृतश्च वर्तते। तत्र सौभाग्यस्य विषयोऽयं यद्वीरशैवागमा उभयविधदोषमुक्तास्तिष्ठन्ति। अयमेकप्रकारकोऽत्याश्रमी धर्मः। एवमेवात्र निगमागमोक्तवर्णाश्रमधर्मपालनेऽपि तत्परताऽवलोक्यते"[3] इति वीरशैवागमानां तदुपदिष्टधर्मस्य च वैशिष्ट्यमुत्कृष्टतां च प्रतिपादितवन्तः।

समाजस्य हितमेव साधयतां वीरशैवागमानामीदृशीं सर्वसमानताप्रतिपादिकां जात्यादिनानाभेदगतोच्चनीचभावविरोधिनीं व्यवस्थामवलोक्यैव, दक्षिणभारतस्य

---

[1] *कारणा. क्रि. पा. १.३१-३२*

[2] *मुकुटागम, प्रस्तावना, पृ. २८*

[3] *तत्रैव प्रास्तावना, पृ. २७*

कर्णाटकप्रान्ते ख्रि. द्वादशशताब्दौ श्रीबसवेश्वरादिशिवभक्ताः स्वपूर्वकुलं परित्यज्य वीरशैवानुयायिनो भूता तन्मतस्य प्राचारप्रसाराय भूरि परिश्रमं कृतवन्तः। इतः पूर्वमेव भारतीय-ऋषिपरम्परायां प्रविख्याता अगस्त्य-जैमिनि-विश्वामित्र-काश्यप-भारद्वाज-अङ्गिरस्-अत्रि-वसिष्ठ-रोमहर्षणादयो महर्षयः कृतभूरितपःपूता अतिवर्णाश्रमेऽनुरक्ता वीरशैवा जीवन्मुक्ताः सञ्जाता इति ज्ञायते। तदुक्तं श्रीनीलकण्ठशिवाचार्यभगवत्पादैः-

अगस्त्यो जैमिनिश्चैव विश्वामित्रोऽथ काश्यपः।
भारद्वाजोऽङ्गीरा अत्रिर्वसिष्ठो रोमहर्षणः।।

एते सर्वे महाभागा अतिवर्णाश्रमे रताः।
वीरशैवाः समाख्याता जीवन्मुक्ता न संशयः।।[1] इति।

अत एव पारमेश्वरागमे च भगवान् शिवः-

न वीरशैवसदृशं मतमस्ति जगत्त्रये।
सर्वभोगप्रदं पुण्यं शिवसायुज्यदायकम्।।[2]

इति लौकिकपारलौकिकादिभोगमोक्षप्रदायकस्य वीरशैवागमोक्तवीरशैवमतस्यानन्यसदृशत्वोपपादनपुरःसरमस्योत्कृष्टत्वमुपदिशति।

वीरशैवप्रभेदाः

तत्र तावदागमेषु वीरशैवस्य सामान्य-विशेष-निराभारीति त्रिविधाः प्रभेदाः प्रतिपादिताः। तदुक्तं सूक्ष्मागमे-

वीतरागादिदोषत्वादात्मतत्त्वविचारणात् ।
विकल्पाकल्पशून्यत्वाद्वीरशैवमिति स्मृतम्।।
सामान्यं प्रथमं प्रोक्तं विशेषं च द्वितीयकम्।
निराभारं तृतीयं स्यात् क्रमाल्लक्षणमुच्यते।।[3] इति।

तत्र गुरुप्रदत्तेष्टलिङ्गे निष्ठावान् भूत्वा गुरुलिङ्गजङ्गमानां सेवारूपवीरशैवीय-सामान्यनियमान् यः परिपालयति, स 'सामान्यवीरशैव'[4] इति कथ्यते।

---

[1] क्रियासार. भा. १., पृ. १२ (१.१४-१५)
[2] पारमे. आ. १.४२
[3] सूक्ष्मा. क्रि. ७.२९-३०
[4] द्र. तत्रैव. ७.३१-३८; द्र. पारमे. १५.३४-४२

वीरशैवागमोक्तेष्टलिङ्गपूजादिरूपकर्मानुष्ठानेन परिपक्वान्तःकरणो भूत्वा 'विशिष्टधर्मानुष्ठानाद्विशेष इति कथ्यते' इत्यागमोक्त्यनुसारेण लिङ्गाङ्गानुसन्धानात्मकैकोत्तरशतस्थलप्रभेदभिन्नषट्स्थलरहस्यं गुरुमुखाद् यो विशेषेण जानाति, अनुतिष्ठति च स 'विशेषवीरशैव'[१] इत्यभिधीयते।

अयं विशेष वीरशैव एव यदा 'निवृत्तकर्मभारत्वान्निराभार इति स्मृतः' इत्यागमोक्त्या कृतकृत्यः सन् सर्वाभिमानपरित्यागेन निःस्पृहवृत्त्या च जीवन्मुक्तवज्जीवनं यापयति, तदा 'निराभारवीरशैव'[२] इत्याख्यायते। अयमेव जङ्गमशब्देनापि व्यवह्रियते। जङ्गमस्य लक्षणं स्वरूपं प्रभेदांश्च पञ्चमेऽध्यायेऽनुपदमेव वक्ष्यामः।

केषाञ्चन वीरशैवागमानां परिचयः

उक्तमेवैतच्छैवागमाः प्रमुखा अष्टाविंशति संख्याका उपागमाश्चाष्टोत्तरद्विशतसंख्याका इति। एतेषु केचन मूलागमाः केचन एवोपागमाश्चोपलभ्यन्ते। तेऽपि समग्ररूपेण नोपलभ्यन्ते। मूलागमेषूपागमेषु वा प्रत्येकस्मिन् क्रियापाद-चर्यापाद-योगपाद-ज्ञानपादभेदेन चतुर्विधपादा वर्तन्ते। उपलब्धेषु केषुचिदागमेषु सर्वे पादा न प्राप्यन्ते। एतेषु पूर्वभागोत्तरभागभेदेनास्ति भागद्वयम्। तत्रोत्तरभागे वीरशैवधर्मतत्त्व-आचार-विचार-नियमादिकमुपपादितमित्युक्तमेव पूर्वम्। अत्रापि केषाञ्चन आगमानां पूर्वभागमात्रं केषाञ्चन चोत्तरभागमात्रमुपलभ्यते। उपलब्धेष्वपि केचन एव प्रकटिताः। अपरेषामप्रकटितानां हस्तलेखाः प्राच्यहस्तलेखसङ्ग्रहालयेषूपलभ्यन्ते। साम्प्रतं प्रकटितानामागमानां परिचयोऽत्रोपस्थाप्यते।

कामिकागमः

शैवागमेषु दशसु प्रथमोऽयं कामिकागमः। अस्यागमस्योत्तरभागः ख्रि. १९०९ तमाब्दे श्री के. षण्मुखसुन्दर मुदलियारमहोदयेन ग्रन्थलिप्यां प्रकटितः। पुनः ख्रि. १९७५ तमाब्दे पूर्वोत्तरभागद्वयमपि दक्षिणभारतीयार्चकसंघस्याध्यक्षेन श्रीमता स्वामिनाथशिवाचार्येण प्रकटितम्। कामिकागमस्य पूर्वभागे ७५ पटलाः, उत्तरभागे ९८ पटलाश्च सन्ति। भागद्वयस्याप्येते पटलाः क्रियापादगताः सन्ति। अवशिष्टपादाः

---

[१] द्र. सूक्ष्मा. क्रि. पा. ७.३९-६३; द्र. पारमे. १५.४२-५३

[२] द्र. तत्रैव. ७.६४-९१; द्र. पारमे. १५.५४-६९

तद्गतपटला वीरशैवपटलाश्च नोपलब्धाः; किन्त्वन्यग्रन्थेषूद्धृतैरुल्लेखैस्तेषामस्तित्वस्य सूचना प्राप्यते।

कारणागमः

शैवागमेषु चतुर्थोऽयं कारणागमः। श्री के. षण्मुखसुन्दरमुदलियारमहोदयेन सम्पादितोऽस्ति कारणागमः। ख्रि. १९२० तमाब्दे अलगप्पमुदलियारमहोदयेनास्यागमस्य पूर्वभागः, ख्रि. १९२७ तमाब्दे उत्तरभागश्च ग्रन्थलिप्यां प्रकाशितः। पुनः १९४० तमाब्दे पं. श्रीकाशीनाथशास्त्रिणोऽस्यागमस्योत्तरभागमात्रं सम्पाद्य मैसूरस्य पञ्चाचार्यप्राकशनेन प्रकटितवन्तः। स पुनः १९५६ तमाब्दे श्री पं. काशीनाथशास्त्रिभिरेव शिवागमसङ्ग्रहाख्यस्य ग्रन्थस्य भागरूपेण प्रकाशितः। पुनः श्रीशैलदेवस्थानसंस्थया कारणागमस्य पूर्वोत्तरभागद्वयमपि चतुर्षु भागेषु क्रमशः ख्रि. १९७९, १९८०, १९८२, १९८५ तमाब्देषु मुद्रितम्। तेलगुलिप्यात्मकेऽस्मिन् ग्रन्थे पादानां विभागो न दर्शितः। ख्रि. १९७४ तमाब्दे श्रीमता डब्ल्यू. वि. कर्टिस् (वाषिंगटन् विश्वविद्यालय) महोदयेन कारणागमस्य पूर्वभागस्थो नित्यपूजाविधि(नित्यार्चन)नामकः ३१ तमः पटल आंग्लभाषानुवादेन साकं प्रकाशितः[1]। पुनश्च ख्रि. १९९४ तमाब्दे पं. श्रीरामचन्द्रपाण्डेयमहोदया हिन्दीभाषानुवादेन साकं सम्पादितवन्तः। सोऽयं ग्रन्थः शैवभारतीशोधप्रतिष्ठान-जङ्गमवाडीमठ-वाराणसी-प्रकाशनेन ख्रि. १९९४ तमाब्दे मुद्रितः। ग्रन्थेऽस्मिन्नुत्तरभागीयक्रियापादगता दशपटलाः सन्ति। श्रीशैलदेवस्थानसंस्थया प्रकटितस्य कारणागमस्य पूर्वभागे १४७ पटलाः, उत्तरभागे च १०५ पटलाः सन्ति। किन्तु मद्रासतो ग्रन्थलिप्यां प्रकटिस्य तदागमस्य पूर्वभागे १५८ पटलाः, उत्तरभागे च १०७ पटलाः सन्ति। काशीनाथशास्त्रिभिः प्रकाशितं कारणागमस्योत्तरभागे वीरशैवपराः क्रियापादस्य दश पटलाः विद्यन्ते।

अजितागमः

अजितागमोऽयं श्री एन. आर. भट्टमहोदयेन सम्पादितः इन्स्टीट्यूट आफ फ्रेञ्च इण्डालजी (पाण्डीचेरी) इत्याख्यया संस्थया ख्रि. १९६४ तथा १९६७

---

[1] द्र. मोटिवेन्स आफ टेम्पल् आर्किटेक्टर इन् शैवसिद्धान्त हो ऑड को मदरास् इत्यस्मिन् ग्रन्थे।

तमाब्दे भागद्वयात्मकः प्रकाशितोऽस्ति। तस्य प्रथमभागे क्रियापदस्य १-३५ पटलाः, द्वितीयभागे च तस्यैव पादस्य ३६-५४ पटलाः सन्ति। एते अजितागमस्य पूर्वभागेन सम्बद्धाः।

सूक्ष्मागमः

शैवागमेषु सूक्ष्मागमस्य सप्तमं स्थानम्। प्रथमं सोलापुरस्य वारदप्रकाशनेन मणूरग्रामस्य मलिकार्जुनशास्त्रिभिर्विरचितेन मराठीसङ्ग्रहानुवादेन सहितोऽयं सूक्ष्मागमः ख्रि. १९०२ तमाब्दे प्रकाशितः। देवनागरीलिप्यां मुद्रितेऽस्मिन् ग्रन्थे क्रियापादस्य दश पटलाः सन्ति। पुनः स एव १९१४ तमाब्दे शङ्करप्प-अच्चप्प टोपिगीमहोदयेन मैसूरस्य 'क्रौन्स' मुद्रणालयतः प्रकाशितः। पुनश्च तमागमं पं. श्रीकाशीनाथशास्त्रिणा ख्रि. १९४१ तमाब्दे स्वतन्त्ररूपेण, ख्रि. १९४२ तमाब्दे च शिवागमसङ्ग्रहस्य भागरूपेण च कन्नडलिप्यां पञ्चाचार्यप्रकाशनेन (मैसूर) मुद्रितवन्तः। दशपटलयुक्तोऽयमेवागमस्तन्त्रशास्त्रविद्वद्धी राष्ट्रीयपण्डितैः श्रीव्रजवल्लभद्विवेदमहाभागैः लिखितेन हिन्दीभाषानुवादेन समलङ्कृतः, सुललितटिप्पणीपरिशिष्टादिभिर्युक्तश्च तैरेव सम्पादितः, शैवभारतीशोधप्रतिष्ठान-जङ्गमवाडीमठ-वाराणसी-प्रकाशनेन १९९४ तमाब्दे देवनागरीलिप्यां प्रकाशितोऽस्ति।

सहस्रागमः

शैवागमेषु सहस्रागमस्याष्टमं स्थानम्। अस्यागमस्याष्टबन्धनाख्य एक एव पटलो देवनागरीलिप्यां धर्मपुरस्य स्वामिनाथगुरुकुलमहोदयेन 'ज्ञानसम्बन्धम्' इत्याख्ये नियतकालिके (१९७०-१९७१ तमाब्दे) मुद्रितोऽस्ति।

सुप्रभेदागमः

शैवगमेष्वन्तिमो दशमोऽयं सुप्रभेदागमः। सोऽयं प्रथमं ख्रि. १९०५ तमाब्दे सोलापुरस्य वारदप्रकाशनेन वीरशैवसदाचारसङ्ग्राख्यस्य ग्रन्थस्य भागरूपेण भागशः प्रकटितः। तत्र १-५ पटलाः, ७-८ पटलौ च सन्ति। वीरशैवपरा उत्तरभागगता इमे पटला एव ख्रि. १९६० तमाब्दे वीरशैवसदाचारसङ्ग्रहस्य भागरूपेणैव श्री एम्. जी. नञ्जुण्डाराध्यमहाभागैरागमछात्राणामध्ययनार्थं प्रकाशिताः पुनः। एवमेव मूरुसाविरमठ-हुबली-प्रकाशनेन ख्रि. १९६४ तमाब्दे पगडदिन्नि-वसवराजशास्त्रिणा विरचितया कन्नडव्याख्यया साकं ते एव पटला तद्भागरूपेण

पूर्ववदेव पुनर्मुद्रिताः। अस्यागमस्य पूर्वभागं ख्रि. १९०७ तमाब्दे १९२८ तमाब्दे च श्रीअगलप्पमुदलियारमहोदया मद्रासतः (मैलापूर चिन्ताद्रिपेटे) प्रकटितवन्तः। ग्रन्थेऽस्मिन् क्रियापादस्य ५६, चर्यापादस्य १२, योगपादस्य ३, ज्ञानपादस्य च ३ पटलाः सन्ति।

निःश्वासागमः

निःश्वासागमो रुद्रागमेष्वष्टादशसु द्वितीयः। पं. श्रीव्रजवल्लभद्विवेदमहाभागानामुल्लेखेन[1] ज्ञायते यत्, डॉ. श्रीतूनगांड्रीयन् इत्याख्येन हालैण्डदेशीयेन विदुषा निःश्वासागमस्य विमर्शिताऽऽवृत्तिरेका विलिख्यत इति। ख्रि. १९०६ तमाब्दे इमे त्रय एव पटला दोड्डबल्लापुरस्य श्रीमता शिवप्पशास्त्रिणा परिष्कृताः श्रीनन्दीशभारतीविलासमुद्राक्षरशालायां प्रकाशिताः।

स्वायम्भुवागमः

स्वायम्भुवागमस्य रुद्रागमेषु तृतीयं स्थानम्। अस्यागमस्य केवलं वीरशैवपरास्त्रयः पटलाः (८-१०) श्री एम्. जी. नञ्जुण्डाराध्यैः शिवागमसङ्ग्रहाख्ये ग्रन्थेऽनुबन्धरूपेण सम्पादिताः कन्नडलिप्यां मुद्रिताः सन्ति।

वीरागमः

रुद्रागमेषु पञ्चमोऽयं वीरागमः। आगममेनं मैसूरस्य प्राच्यसंशोधनसंस्था भागद्वये प्रकटयितुं संङ्कल्पितवती। तयोः प्रथमो भागः ख्रि. १९८८ तमाब्दे मुद्रितः। द्वितीयो भागो नाद्यावधि प्रकाशितः। वीरागमस्योपलब्धस्योत्तरभागस्य सप्तसु (७) पटलेषु चत्वारः (४) प्रथमभागे प्रकाशिताः। पटलचतुष्टययुक्तोऽयं ग्रन्थः देवनागरीलिप्यां मुद्रितः। ख्रि. १९९२ तमाब्दे डॉ. श्री ज. च. नि. महाभागा अस्यागमस्योत्तरभागं केलदीमहाराजस्याऽऽस्थानविदुषा श्रीमता काशीखण्डचेन्नवीरदेवेन विरचितेन कन्नडानुवादेन संयुतं परिष्कृतवन्तः। तैरेव विलिखितया सुदीर्घप्रस्तवनया समलङ्कृतोऽयं शैवादिसप्तपटलयुतो ग्रन्थः श्रीजगद्गुरुपञ्चाचार्यसेवासङ्घेन (गदग-बेटगेरी) ख्रि. १९९८ तमाब्दे प्रकाशितः। श्री वीरगुरुलिङ्गाराध्यः श्रीकाशीखण्डचेन्नवीरदेव इत्याख्यावुभयविद्वांसौ वीरागमोत्तरस्य (वीरमाहेश्वरतन्त्र) कन्नडभाषायां टीकां विरचितवन्तौ। किन्तु नाद्यावधीमे सम्पूर्णरूपेण टीके प्रकटिते। वीरागमस्योत्तरभागे

---

[1] *लुप्तागमसङ्ग्रहः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयप्रकाशन, द्वितीयभागभूमिका, १९७३ ई.।*

द्वादशसहस्रश्लोकाः सन्तीत्यस्य कन्नडटीकाकारः कथयति; किन्तु श्री ज. च. नि. महाभागैः सम्पादिते आगमे केवलं ३१७५ श्लोकाः सन्ति।[1]

रौरवागमः

रुद्रागमेषु षष्ठोऽयं रौरवागमः। आगमोऽयं श्री एन्. आर्. भट्टमहोदयेन सम्पादितः, पाण्डीचेरी इन्स्टीट्यूट प्रकाशनेन ख्रि. १९६१, (पुनर्मुद्रणं १९८५) १९७२, १९८८ तमाब्देषु त्रिषु भागेषु मुद्रितः। रौरवागमस्यास्य प्रथमभागे विद्यापादस्य ३ पटलाः, क्रियापादस्य २६ पटलाः सन्ति। एतदतिरिक्तं तत्रैव विद्यापादस्य १० पटलाः सौरपूजाविधिश्चानुबन्धरूपेण मुद्रिताः। द्वितीयभागे क्रियापादस्य २७-४६ पटलाः, अनुबन्धरूपेण पञ्चसादाख्यविधिनामकः पटलश्च सन्ति। तृतीयभागे च क्रियापादस्य ४७-६५ पटलाः, अनुबन्धरूपेण शौचाचमनस्नानमन्त्रोद्धारार्चनविधिपटलश्च सन्ति। ख्रि. १९८८ तमाब्दे फ्रेञ्चइन्स्टीट्यूटप्रकाशनेनैव रौरवागमस्योत्तरभागोऽपि मुद्रितः। उत्तरभागेऽस्मिन् २० पटलाः सन्ति।

मुकुटागमः

रुद्रागमेषु मुकुटागमस्य सप्तमं स्थानम्। अस्यागमस्योत्तरभागः प्रथमं ख्रि. १९४१ तमाब्दे पञ्चाचार्यप्रकाशनेन (मैसूर) स्वतन्त्ररूपेण, ख्रि. १९५६ तमाब्दे च शिवागमसङ्ग्रहस्य भागरूपेण कन्नडलिप्यां मुद्रितः। ग्रन्थेऽस्मिन् क्रियापादस्य ५ पटलाश्चर्यापादस्य १० पटलाश्च सन्ति। पं. श्रीव्रजवल्लभद्विवेदमोहदयैर्लिखितेन हिन्दीभाषानुवादेन साकं तैरेव सम्पादितः, प्रस्तावनाटिप्पण्यादिभिः समलङ्कृतोऽयमेव मुकुटागमस्योत्तरभागः ख्रि. १९९४ तमाब्दे शैवभारतीशोधप्रतिष्ठान-जङ्गमवाडीमठ-वाराणसी-प्रकाशनेन प्रकटितः। अस्यागमस्य पूर्वभागः ख्रि. १९७७ तमाब्दे दक्षिणभारतस्यार्चकसङ्घेन ग्रन्थलिप्यां मुद्रितः।

चन्द्रज्ञानागमः

चन्द्रज्ञानागमस्य रुद्रागमेष्वष्टमं स्थानम्। अस्यागमस्य केवलमुत्तरभागः ख्रि. १९४० तमाब्दे स्वतन्त्ररूपेण ख्रि. १९४३, १९५६ तमाब्दे च शिवागमसङ्ग्रहस्य भागरूपेण च पञ्चाचार्यप्रकाशनेन मुद्रितः। ग्रन्थेऽस्मिन् क्रियापादस्य १२ पटलाश्चर्यापादस्य ८ पटलाश्च सन्ति। अस्यागमस्यायमेवोत्तरभागः ख्रि. १९९४ तमाब्दे शैवभारतीशोधप्रतिष्ठान-जङ्गमवाडीमठ-वाराणसी प्रकाशनेन पं. श्रीव्रजवल्लभ-

---

[1] *द्र. वीरागमप्रस्तावना ज. च. नि महाभागविरचिता, पृ. १४, ई. १९९२*

द्विवेदमहाभागैर्विरचितहिन्दीभाषानुवादेन साकं एभिरेव सम्पादितः प्रस्तावना–परिशिष्टादिभिः समलङ्कृतश्च मुद्रितोऽस्ति।

पारमेश्वरागमः

रुद्रागमेषु षोडशोऽयं पारमेश्वरागमः। केवलमस्योत्तरभागः श्रीशङ्करप्प–अच्चप्प–टोपिगीमहोदयेन मैसूरु क्रौन् प्रेस् प्रकाशनेन ख्रि. १९१४ तमाब्दे प्रकटितस्य तन्त्रसङ्ग्रहाख्यस्य ग्रन्थस्य भागरूपेण प्रकटितः। भागेऽस्मिन् क्रियापादस्य २२ पटलाः सन्ति। ख्रि. १९९५ तमाब्दे शैवभारतीशोधप्रतिष्ठान जङ्गमवाडीमठ–वाराणसी–प्रकाशनेन पं. श्रीव्रजवल्लभद्विवेदमहाभागैर्विरचितहिन्दी–भाषानुवादेन साकं तैरेव सम्पादितः सुललितटिप्पणीपरिशिष्टादिविशिष्टश्च प्रकाशितोऽस्ति। ग्रन्थेऽस्मिन् २३ पटलाः सन्ति।

किरणागमः

किरणागमस्य रुद्रागमेषु सप्तदशीयं स्थानम्। आगमोऽयं ख्रि. १९३२ तमाब्दे शिवागमसिद्धान्तपरिपालनसङ्घस्याध्यक्षेन श्रीदेवकोटैमहोदयेन ग्रन्थलिप्यां प्रकटितः।

मृगेन्द्रागमः

मृगेन्द्रागमः कामिकागमस्योपागमः। अस्यैव नृसिंहागम इत्यप्यपरं नामधेयमस्ति। ख्रि. १९२८ तमाब्दे देवकोटैसङ्घप्रकाशनेनैवाऽयमागमो नगरीलिप्यां, श्रीमतो भट्टनारायणकण्ठस्य श्रीमतोऽघोरशिवाचार्यस्य च व्याख्यानाभ्यां साकं प्रकाशितः। ख्रि. १९३० तमाब्दे पं. श्रीमधुसूदनकौलशास्त्रिमहोदयेन सम्पादितोऽयमेव ग्रन्थः पुनर्भट्टनारायणकण्ठस्य व्याख्यानेन साकं प्रकाशितः। ख्रि. १९७२ तमाब्दे श्रीमेहरचन्दलच्छणदास (देहलि) प्रकाशनमस्य पुनर्मुद्रणं विहितम्। अस्मिन् ग्रन्थे विद्यापादस्य १३ पटला योगपादस्य ३ पटलाश्च सन्ति।

कुमारतन्त्रम्

कुमारतन्त्रं ललितागमस्योपागमः। ख्रि. १९८४ तमाब्दे दक्षिणाभारतस्यार्चक–संघ एनं ग्रन्थं नागरीलिप्यां मुद्रितवान्। तन्त्रेऽस्मिन् क्रियापादस्य ५२ पटलाः सन्ति।

मातङ्गपारमेश्वरागमः

पारमेश्वरागमस्योपागमेषु सप्तष्वन्यतमोऽयं मातङ्गपारमेश्वरागमः। साम्प्रतमस्य चतुष्पादा अप्युपलब्धाः प्रकाशिताश्च। प्रथमं ख्रि. १९२८ तमाब्दे देवकोटै–

शिवागमपरिपालनसङ्घेनास्य केवलं विद्यापादो देवनागरीलिप्यां मुद्रितः। ख्रि. १९७७ तमाब्देऽयमेव पुनः पाण्डीचेरी फ्रेञ्च इन्स्टीट्यूट् प्रकाशनेन भट्टरामकण्ठस्य व्याख्यानेन साकं प्रकाशितः। अनेनैव प्रकाशनेनास्य मातङ्गपारमेश्वरागमस्यावशिष्टाः क्रिया-योग-चर्यापादा भट्टरामकण्ठस्य व्याख्यानेन साकं १९८२ तमाब्दे मुद्रिताः।

पौष्करागमः

पौष्करागमोऽपि पारमेश्वरागमस्योपागमेष्वेकः। ख्रि. १८८१ तमाब्दे एवास्यागमस्य ज्ञानपादं षण्मुखसुन्दरमुदलियारमहोदयाः सम्पाद्य तमिलभाषानुवादेन साकं प्रकाशितवन्तः। पादेऽस्मिन् ९ पटलाः सन्ति। ख्रि. १९२५ तमाब्देऽयमेव पटलः श्रीमताऽम्बलवन-नवलर् महोदयेन ग्रन्थलिप्यां मुद्रितः। श्रीषण्मुखसुन्दरमुदलियारमहोदयेनास्यागमस्य विद्यापादः ख्रि. १९१८ तमाब्दे ग्रन्थलिप्यां प्रकटितः। अयं विद्यापाद एव कलकत्ता आर्थर् एवलोन् तान्त्रिकग्रन्थमालायां पुनर्मुद्रितः।

वातुलशुद्धागमः

वातुलागमस्योपागमोऽयं वातुलशुद्धागमः। ख्रि. १९१२ तमाब्दे शिवज्ञानबोधमुद्रणालयेन ग्रन्थलिप्यामयं मुद्रितः। अलगप्पमुदलियारमहोदयेन सम्पादितेऽस्मिन् ग्रन्थे १० पटलाः, अनुबन्धरूपेण मन्त्रकीलकपटलश्च सन्ति। ख्रि. १९१४ तमाब्दे कन्नडलिप्यां शङ्करप्प-अच्चप्प-टोपिगीमहोदयेन मैसूरु क्रौन प्रेस्-प्रकाशनतोऽयं मुद्रितः। अयमेव ख्रि. १९५८ तमाब्दे तलकाडु-कृष्णशास्त्रिमहोदयेन (बैंगलूर) नागरीलिप्यां प्रकटितः। मैसूरुप्राच्यसंशोधनसंस्थया वातुलशुद्धागमो भागद्वयेन प्रकटयितुं सङ्कल्प्य तयोर्द्वितीयो भागः ख्रि. १९८३ तमाब्दे मुद्रितः। वातुलशुद्धागमस्य दशपटलेषु द्वितीयभागेऽस्मिन् ४ पटलाः अन्तिमाः सन्ति। ख्रि. १९८८ तमाब्देऽनयैव संस्थया कन्नडलिप्यां कन्नडभाषानुवादेन साकमस्यागमस्य सर्वे १० पटलाः मुद्रिताः।

सार्ध-त्रिशति-कालोत्तरागमः

[1]कालोत्तरागमोऽयं वातुलागमस्य कालज्ञानरूप उपागमः। अस्यानेका आवृत्तयः सन्ति। तेषु ३५० श्लोकयुता आवृत्तिरेका ख्रि. १९७९ तमाब्दे पाण्डीचेरीय

---

[1] *कालोत्तराख्यस्योपागमस्य सन्ति बहवो भेदा इति तादृशमातृकाणामुपलम्भात्, तथा तत्र तत्रोदाहरणात्, अथवा तादृशनाम्नां निर्देशाद्वा ज्ञायते। तत्रोपलब्धानां नामान्येवं सन्ति- १. कालोत्तरम् २. बृहत्कालोत्तरम्, ३. अयुतत्रयसंहिताकालोत्तरम् (अथवा त्र्ययुतग्रन्थसंहिताकालोत्तरम्), ४. देवीकालोत्तरम् (चतुर्विंशतिसहस्रकालोत्तरम्), ५. द्वादशसहस्र-*

फ्रेञ्च इन्स्टीट्यूट प्रकाशनसंस्थया भट्टरामकण्ठविरचितव्याख्यानेन साकं मुद्रिता। ग्रन्थेऽस्मिन् २७ पटलाः सन्ति।

देवीकालोत्तरागमः

देवीकालोत्तरागमोऽपि वातुलागमस्योपागमः। अस्यागमस्य ज्ञानाचारबोधकाख्य एक एव पटलः ख्रि. १९११ तमाब्दे श्रीमता एन्. आर्. करिबसवशास्त्रिमहोदयेन एलन्दूरसुब्बणशास्त्रिणोपलब्धहस्तलेखस्याधारेण श्रीपर्वतेशमहोदयेन विरचितया कन्नडटीकया साकं प्रकाशितः ख्रि. १९१४ तमाब्दे शङ्करप्पअच्चप्पटोपिगीमहोदयोऽमुमेव ग्रन्थं तन्त्रसङ्ग्रहस्य भागरूपेण कन्नडलिप्यां प्रकाशितवान्। अयं देवीकालोत्तरागमः साम्प्रतं ख्रि. २००० तमाब्दे काशी-जङ्गमवाडीमठस्य शैवभारती-शोधप्रतिष्ठाने निरञ्जनसिद्धेन विरचितया वृत्त्या साकं प्रकाशितोऽस्ति। अस्य सम्पादनं, वृत्त्या हिन्दीभाषायामनुवादश्च पं. व्रजवल्लभद्विवेदैः कृतोऽस्ति।

पाशुपतागमः

पाशुपतागमो महावीरशैवागम इत्यपि कथ्यते। अस्य पटलद्वयमेव श्रीमता एम. जी. नञ्जुण्डाराध्यमहाभागेन 'शिवागमसौरभ' इत्याख्ये ग्रन्थेऽनुबन्धरूपेण मुद्रितः[२]। अस्यागमस्य द्वितीयपटलस्यान्ते "इति श्रीमन्महापाशुपतवीरशैवागमे एकाशीतिरध्यायः" इति लिखितम्। अनेनास्मिन्नागमे ८१ अध्यायास्ततोऽप्यधिका वा सन्तीति ज्ञायते। किन्त्विदानीमुपलब्धास्त्वल्पा एव।

अपरञ्च, ये तन्त्रागमग्रन्थाः साम्प्रतं मुद्रिता हस्तलिखिता वा पूर्णरूपेण नोपलभ्यन्ते, तेषामागमानां तत्र तत्र ग्रन्थेषूल्लिखितवचनानि सङ्गृह्य "लुप्तागमसङ्ग्रहः" इति नाम्ना ग्रन्थः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन भागद्वयात्मकः प्रकाशितः। तत्र कामिक-किरण-तोतुल-दीक्षोत्तर-देवीकालोत्तर-निःश्वास-पारमेश्वर-पौष्कर-मायावैभव-रौरव-सुप्रभेद-सौरभेय-स्वायम्भुवप्रभृत्यागमानां वचनानि सङ्गृहीतानि। अस्य च ग्रन्थस्य प्रथमभागो म. म. श्रीगोपीनाथकविराजमहाभागानां

संहिताकालोत्तरम्, ६. षट्सहस्रसंहिताकालोत्तरम्, ७. त्रयोदशशतिककालोत्तरम्, ८. सप्तशतिककालोत्तरम्, ९. चतुःशतिककालोत्तरम्, १०. सार्धत्रिशतिकालोत्तरम्, ११. त्रिशतिकालोत्तरम्, १२. द्विशतिकालोत्तरम्, १३. स्कन्दकालोत्तरम्। एतेषामागमानां पूर्ण परिचयं तद्गतविषयं च श्री एन्. आर. भट्टमहोदयः सविस्तरं प्रतिपादितवानस्ति। (द्र. सार्धत्रिशतिकालोत्तररागम. उपो. Institute Francais D'indologic Pandichery. 1979)

[२] *शिवागमसौरभ, पृ. ३-३७*

सम्पादकत्वे ख्रि. १९७० तमाब्दे द्वितीयभागश्च पं. श्रीव्रजवल्लभद्विवेदमहाभगानां सम्पादकत्वे ख्रि. १९८३ तमाब्दे प्रकाशितः। तत्र प्रथमो भागः ख्रि. १९९८ तमाब्दे पुनर्द्वितीयमुद्रणमलभत।

वीरशैवग्रन्थेषूद्धृता अपरे आगमाः

एतावतोपलब्धानां प्रकटितानां चागमानामुपागमानां विषये विवेचितम्। वीरशैवग्रन्थेषु तत्र तत्रानेकानामागमानामुल्लेख उपलभ्यते। य इदानीमनुपलब्धाः, किन्त्वन्यग्रन्थेषु तेषां नामोलेख उपलभ्यते, तेषामागमानां विषयेऽत्र किञ्चिद्विचार्यते।

श्रीकरभाष्ये श्रीपतिपण्डिताराध्यभगवत्पादविरचिते सिद्धान्तागमस्य "अकरस्पर्शयोग्याऽपि"[१] "आगमं शिवलिङ्गस्य"[२] आत्मलिङ्गायेति वाक्ये"[३] "आत्मशक्तिविकासेन"[४] इत्याद्यनेके श्लोकास्तदागमनामोल्लेखपूर्वकमुद्धृताः सन्ति।

श्रीनीलकण्ठशिवाचार्यविरचिते क्रियासारे वातुलागमस्य, वातुलोत्तरागमस्य, दिव्यागमस्य चोल्लेख उपलभ्यते। तथा हि तत्र वातुलागमस्य "अन्नाद्यमौषधं तोयं"[५] वातुलोत्तरस्य "वेदार्थ एव देवेशि"[६], दिव्यागमस्य "अथ लोकोत्तरं देवि"[७] इत्याद्यागमवचनानि तत्तदागमनामोल्लेखपुरःसरमुद्धृतानि।

वीरशैवाचारप्रदीपिकायां वातुलागमभीमागमयोर्वचनानामुल्लेख उपलभ्यते। तथा हि तत्र वातुलागमस्य "रुद्र एव सदा साक्षात्"[८] भीमागमस्य "सर्वतीर्थेषु यत्पुण्य"[९] इत्याद्यागमोक्तय उद्धृताः।

वीरशैवचिन्तामणौ वातुल-वातुलोत्तर-योगजागमानामुल्लेख उपलभ्यते। तथा हि तत्र वातुलागमस्य "पञ्चमूर्तिमयं देवम्"[१०] वातुलोत्तरस्य "सन्मात्रं भावलिङ्गं स्यात्"[१] योगजस्य "हृदयकमलमध्ये"[२] इत्याद्यागमवचनान्युद्धृतानि। वीरमाहेश्वरा-

---

[१] ब्र. सू. श्रीकर, पृ. २३
[२] तत्रैव, पृ. १९६
[३] तत्रैव, पृ. २११
[४] तत्रैव, पृ. २१२
[५] क्रियासारः, भा. २, पृ. ३३५
[६] तत्रैव भा. ३, पृ. २०
[७] तत्रैव, भा. ३, पृ. १०३
[८] वीरशैवाचारप्रदीपिका, पृ. ८८
[९] तत्रैव, पृ. १३०
[१०] वीरशैवचिन्तामणि, पृ. ८०

चारसङ्ग्रहे वातुलागमस्य "को मन्त्रः सर्वजातीयः"[३], दिव्यागमस्य "साष्टाष्टद्विशतं धीमान्"[४] इत्याद्यागमवचानान्युद्धृतानि।

अनादिवीरशैवसारसङ्ग्रहे वातुल-उत्तरवातुल-विजयभैरव-ललित-शाकट-दौर्ग-वीरभ्रदीयबृहदाद्यागमानामुल्लेख उपलभ्यते। तथा हि तत्र "नमः शब्दः उमा साक्षात्"[५] "एकमेवाद्वितीयं यत्"[६] "लिङ्गप्रसादं सकलं"[७], "अणिमादिगुणं लिङ्ग"[८], विश्वप्राणमयं लिङ्गम्"[९], "आसने शयने याने"[१०], "पतिव्रतास्वभावेन"[११] "संयोगेषु वियोगेषु"[१२] इति क्रमशः पूर्वोक्तागमवचनान्युल्लिखितानि।

धर्मशिरोमणौ योगजागमस्य वातुलागमस्य च "आदिमध्यान्तशून्यत्वम्"[१३] "ब्राह्मणः कथ्यते रुद्रः"[१४] इत्याद्युक्तय उपलभ्यन्ते।

कैवल्यसारे च वातुलागमस्य 'यथा सांसारिको भावो"[१५] योगजागमस्य "यदा शिवाय स्वात्मानं"[१६] रुद्रयामलस्य "दृश्य जातमशेषं च" इत्यादिश्लोकानामुल्लेख उपलभ्यते।

तदेवं वीरशैवग्रन्थेषु सिद्धागम-वातुल-वातुलोत्तर-दिव्य-भीम-योगज-उत्तरवातुल-विजयभैरव-ललित-शाकट-दौर्ग-वीरभद्रीय-बृहताद्यागमानां तद्वचनानां चोल्लेखा उपलभ्यन्ते, किन्तु नैतावतेमे मूलरूपेणोपलब्धाः, उपलब्धेषु प्रकटितेषु

---

१. वीरशैवचिन्तामणि, पृ. ९०
२. तत्रैव, पृ. १८६
३. वी. मा. आ. सं., पृ. ८३
४. तत्रैव, पृ. ५७
५. अ. वी. सा. सं; भा. १ पृ. ६
६. तत्रैव, भा. १, पृ. १५
७. तत्रैव, भा. २, पृ. १६
८. तत्रैव, भा. २, पृ. ६
९. तत्रैव, भा. २, पृ. १०३
१०. तत्रैव, भा. २, पृ. १०५
११. तत्रैव, भा. २, पृ. १२६
१२. तत्रैव, भा. २, पृ. १८९
१३. ध. शि., पृ. २४
१४. तत्रैव, पृ. १४३
१५. कै. सा., पृ. ११
१६. तत्रैव, पृ. ८१

चागमेषूपागमेष्वप्यन्यान्यग्रन्थेषूल्लिखिताः श्लोकाः सर्वे न दृश्यन्ते[१]। तदेवमागमोपागमवाङ्मयं विशालं समग्ररूपेण नोपलभ्यत इति खेदपूर्णो विषयः।

श्रीसिद्धान्तशिखामणेर्वीरशैवागममूलकत्वम्

आलोक्य शैवतन्त्राणि कामिकाद्यानि सादरम्।
वातुलान्तानि शैवानि पुराणान्यखिलानि च।।[२]
तेष्वागमेषु सर्वेषु पुराणेष्वखिलेषु च।
पुरा देवेन कथितं देव्यै तन्नन्दनाय च।।
तत्सम्प्रदायसिद्धेन रेणुकेन महात्मना।
गणेश्वरेण कथितमगस्त्याय पुनः क्षितौ।।
वीरशैवमहातन्त्रमेकोत्तरशतस्थलम् ।
अनुग्रहाय लोकानामभ्यधात् सुधियां वरः ।।[३]

इति ग्रन्थकारेण श्रीशिवयोगिशिवाचार्येण सिद्धान्तशिखामणिग्रन्थरचनायाः प्राक् कामिकादिवातुलान्तान् शिवागमानवलोक्य तेषु शिवोक्तेष्वागमेषु प्रतिपादितं वीरशैवसम्मतं तत्त्वं यद् भगवत्पादै रेणुकाचार्यैरगस्त्यं प्रत्युपदिष्टं तदेवास्मिन् ग्रन्थे सङ्गृहीतमिति प्रतिपादितम्। अनेनास्य सिद्धान्तशिखामणेर्वीरशैवागममूलकत्वं स्वयमेवावगम्यते।

ग्रन्थस्यास्य शीर्षकनाम्नाऽपि वीरशैवागममूलकत्वमवबुध्यते। तथा हि सिद्धान्तो नाम शिवोक्ताः कामिकादिवातुलान्ताः शैवागमाः। तदुक्तमघोरशिवाचार्येण- "सिद्धान्तशब्दः पङ्कजादिशब्दवद्योगरूढ्या शिवप्रणीतेषु कामिकादिषु दशाष्टादशतन्त्रेषु प्रसिद्धः"[४] इति। एतेषां शैवागमानां सिद्धान्तापरपर्यायाणामुत्तरभागनिरूपिता वीरशैवागमाः। तदुक्तं श्रीमद्भी रेणुकभगवत्पादैः-

---

[१] अत्र वीरशैवागमपरिचायकं विषयं पं. श्री. डॉ. एम्. शिवकुमारस्वामिमहाभागाः "शैवागमगलल्लि वीरशैव" (शैवागमेषु वीरशैवः) इत्याख्यस्य कन्नडभाषामयग्रन्थस्य प्रस्तावनायां विशेषरूपेण विवेचितवन्तः। तस्यैवांशो किञ्चिदत्र लिखितः। विशेषावगमनार्थं जिज्ञासुभिस्तत्रैव द्रष्टव्यम्।

[२] सि. शि. १.२५

[३] तत्रैव, १.२८-३०

[४] र. त्र., पृ. ५

सिद्धान्ताख्ये महातन्त्रे कामिकाद्ये शिवोदिते।
निर्दिष्टमुत्तरे भागे वीरशैवमतं परम्।।[१] इति।

सिद्धान्तानां=शैवागमानां शिखा=उत्तरभागः वीरशैवागमा इत्यर्थः, तेषु मणिः= रत्नसदृशः, मणिवदुत्कृष्टरूपेण प्रतिपादितः यः, सः सिद्धान्तशिखामणिरित्यर्थः। अत्रायं भावः–शैवागमानामुत्तरभागस्थितवीरशैवागमानां मणिरूपेण साररूपेण च विरचितोऽयं ग्रन्थः श्रीसिद्धान्तशिखामणिः। तदेवोक्तं श्रीसिद्धिान्तशिखामणौ–

सर्वेषां शैवतन्त्राणामुत्तरत्वान्निरुत्तरम्।
नाम्ना प्रतीयते लोके यत्सिद्धान्तशिखामणिः।।[२]

अनेन श्रीसिद्धान्तशिखामणेर्वीरशैवागममूलकत्वं निर्दिष्टं श्रीमता शिवयोगिशिवाचार्येण। श्रीसिद्धान्तशिखामणेः संस्कृतव्याख्याकारः श्रीमरितोण्टदार्यमहाभागः– "समस्तैर्वीरशैवतन्त्रैरनुगतसमस्तरहस्यार्थे प्रकटितशिवाद्वैतज्ञानसमरसभावप्रसन्नतायुक्ते शिवसिद्धान्तसारे विद्वद्भिः स्तूयमानेऽस्मिन् सिद्धान्तशिखामणौ विशिष्टाः श्रेष्ठा वीरशैवा वीरशैवाचार्या मतिं विदधतु कुर्वन्त्वित्यर्थः"[३] इति सिद्धान्तशिखामणेः समस्तवीरशैवानुगतत्वं समर्थितवान्।

किञ्च, लिङ्गस्वरूपतद्धारणतद्भेद[४]–रुद्राक्षस्वरूपतद्धारण[५]–दीक्षास्वरूपतद्भेद[६]–मन्त्रस्वरूप[७]–लिङ्गार्चनादिधार्मिककर्मापतितसूतकनिराकरणा[८]द्यनेकविषयेषु वीरशैवागमोक्ताभिप्रायमेवायं सिद्धान्तशिखामणिरनुसरति। अत एवं व्याख्याकृद्भिः श्रीमरितोण्टदार्यमहाभागैः सिद्धान्तशिखामणिगतानां श्लोकानां व्याख्यानावसरे तत्तत् श्लोकानां समानार्थकाः वीरशैवागमोक्ताः श्लोकाः प्रामाण्यायानेकत्र निर्दिष्टाः सन्ति। अनेनाप्यस्य ग्रन्थस्य वीरशैवागममूलकत्वं तत्साररूपत्वं च ज्ञायते।

---

[१] सि. शि. १.१४
[२] सि. शि. १.३१
[३] सि. शि. तत्त्वप्रदीपिका व्या., १.३२
[४] द्र. च. ज्ञा. आ., क्रि. पा. ३.३३; सि. शि. ६.३९
सूक्ष्मा. क्रि. पा. ५.४६, ५.४७, ५.४८, ५.५२, ६.६७–७१
सि. शि. ६.२६, ६.५१, ६.२७, ९.५७, ९.३६
[५] द्र. मुकुटा, क्रि. पा. २.१७–२२, कारणा. क्रि. पा. ३.५०–५४, सि. शि. ७५४–५८
[६] द्र. कारणा, क्रि. पा. १.१०–१४; सि. शि. ६.१०–१५
[७] द्र. च. ज्ञा, क्रि. पा. ८.१७, ८.२३; सि. शि. ८.५६–६०, ८.२६–३०
[८] कारणा. क्रि. पा. २.७७; सि. शि. ९.४४–४५

समस्तोपनिषदां विशालवाङ्मयानां सारभूता भगवद्गीता यथा भवति तदध्येतॄणां शास्त्रविषयकनानाजिज्ञासोपशान्तये समर्था, तथैव शैव-वीरशैवाद्यागमानां बृहद्वाङ्मयसाररूपोऽयं सिद्धान्तशिखामणिः षट्स्थलोपासनाविधानेन लिङ्गाङ्गसामरस्यरूपशिवत्वावाप्तये समर्थः।

अनन्तशास्त्रं बहुलाश्च विद्या स्वल्पश्च कालो बहुविघ्नता च।
यत्सारभूतं तदुपासनीयं हंसो यथा क्षीरमिवाम्बुमध्यात्।।[1]

इति चाणक्यनीत्युक्त्या निगमागमसाररूपयोर्भगवद्गीतासिद्धान्तशिखामण्योर्विज्ञानं सुलभतरमल्पीयसि कालेऽनन्तफलप्रापकं च।

यथा वेदान्तप्रस्थानत्रये प्रथिता वेदान्तसारभूता भगवद्गीता भगवता श्रीकृष्णेन कुरुक्षेत्रयुद्धे पार्थायोपदिष्टा, यां च भूयोऽनन्तपुराणादिशास्त्ररचयितेति प्रसिद्धो महर्षिर्व्यासः स्वरचिते महाभारते कृष्णार्जुसंवादरूपेण समावेशयदित्यवगम्यते, तथाऽयं वीरशैवसिद्धान्तप्रतिपादकः सिद्धान्तशिखामणिरनन्तशास्त्रगतपरस्परविरोधादिभिः शङ्काकुलायाऽगस्त्याय रेणुकभगवत्पादाचार्यैरुपदिष्टो ग्रन्थः। सोऽयमुपदेश एवांचार्यवर्येण श्रीमता शिवयोगिशिवाचार्येण रेणुक-अगस्त्ययोः संवादरूपेण ग्रथितः। भगवता श्रीकृष्णेनोपदिष्टोपदेशः पद्यरूपेण सङ्गृहीतत्वात् स यथा भगवद्गी-तेत्याख्यायते, तथाऽयं सिद्धान्तशिखामणिरपि पद्यात्मकत्वात् "रेणुकगीता" इत्याख्ययापि निगद्यते। ग्रन्थेऽस्मिन् एकविंशतिपरिच्छेदाः, तत्राहत्य चाष्टनवत्युत्त-रत्रयोदशशत (१३९८) श्लोकाः सन्ति। ग्रन्थस्य प्रथमतश्चतुर्थपरिच्छे-दपर्यन्ते भागे तथैकविंशतिपरिच्छेदे च एकोनसप्तत्युत्तरद्विशत (२६९) श्लोकेषु चारित्रिको विषयो वर्तते। पुनः पञ्चमपरिच्छेदाद् विंशतिपरिच्छेदं यावत् एकोनत्रिंशदुत्तरैकादशशत (११२९) श्लोकेषु वीरशैवषट्स्थलसिद्धान्तः सम्यक् प्रतिपादितोऽस्ति। ग्रन्थोऽयं रेणुकागस्त्यसंवादः, रेणुकगीता, सिद्धान्तशिखामणिरिति नामत्रयेणापि व्यवह्रियते, अथापि 'सिद्धान्तशिखामणिः' इत्येवास्य प्रसिद्धं नाम। त इमे वीरशैवसिद्धान्तोपदेशका आचार्याः श्रीरेणुकभगवत्पादाः के? तदुपदेशावधारकोऽगस्त्यः कः? ग्रन्थकारस्य शिवयोगिशिवाचार्यस्य तद्ग्रन्थस्येतिहासः कः? तद्ग्रन्थशैली च कीदृशी? इत्यादिजिज्ञासाः सहजरूपेणोत्पद्यन्ते। तदीदृशीनां जिज्ञासानां समाधानायैव किञ्चिदत्रोस्थाप्यते।

---

[1] चाणक्यनीतिः, १५.१०

रेणुकाचार्याणां चारित्रिकैतिह्यम्

वीरशैवाचार्यपरम्परायामनेकेषामाचार्याणामितिहास उपलभ्यते। तत्र रेणुक-रेवण-रेवणसिद्ध-रेवणसिद्धेश्वराभिधा भिन्नकालिका आचार्याः प्रख्याताः। एषु श्रीसिद्धान्तशिखामण्यनुसारं रेणुकाचार्योऽगस्त्याय शक्तिविशिष्टाद्वैतासिद्धान्तमेकोत्तरशतस्थलात्मकमुपदिदेश, दशाननसहोदरविभीषणनिवेदानुगुणं शिवयोगबलेन युगपत् त्रिकोट्याचार्यरूपं परिधार्य त्रिकोटिशिवलिङ्गप्रतिष्ठां चकार चेति ज्ञायते। वीरागमेऽप्यस्य रेणुकाचार्यस्य नाम चारित्र्यं च विपुलमुपलभ्यते। तथा हि तत्र–"गुरुणा योगिराजेन रेणुकेन महात्मना"[1] "रेणुकप्रमुखप्रमथाः[2]....." "रेणुकाद्या रुद्रगणाः[3]...., "मुनिश्रेष्ठो रेणुको[4]" इत्यादिषु वीरागमीयश्लोकेषु रेणुकाचार्यो गुरु–योगिराज–प्रमथ–रुद्रगण–मुनिश्रेष्ठादि–विशेषणैरुपवर्णितोऽस्ति। माहीष्मतीपुराधीशः शतानन्दाख्यो रेणुकाचार्यस्यानुग्रहं प्राप्य तदुपदेशं पादोदकप्रसादं च स्वीकृत्य तस्य कृपापात्रो जात[5] इति, केतुमालाख्यनगराधिपतये मणिभद्राय तद्भार्यायायिन्दुमत्यै तत्प्रजाभ्यश्च शिवदीक्षां प्रदाय तत्पुरं पावयामासायमाचार्य[6] इति, कुकृत्यनिरतं मतङ्गपुत्रं मातङ्गं स्वशिवयोगप्रभावेण वाल्मीकिं नारदो यता तथा तमुद्धार्य पथिकपीडादिदुष्कर्माणि तस्माद्दूरी–कृतान्यनेनाचार्येणेति[7], शिखावतीनगरस्य मोहिलमयमाचार्य[8] उपदिदेशेति चेत्यादिचारित्रिकविषया रेणुकसम्बद्धास्तत्रावलोक्यन्ते। श्रीमता ज.च.नि. महोदयेन विरचितवीरागमोक्तरेणुकाचार्यचरित्रसंशोधनात्मके, "श्रीजगदुरु आदिरेणुकरु" इत्याख्ये कन्नडभाषामये ग्रन्थे रेणुकाचार्यचरित्रसम्बद्धा विपुला विषया समुपलभ्यन्ते। तत्र गौतममहर्षिपुत्रः शतानन्द एव रेणुकाचार्यस्यानुग्रहप्रापकः शतानन्द इति कथयति ज.च.नि. महोदयः[9]। सोऽयं शतानन्दो जनकमहाराजस्य प्रमुखो पुरोहित आसीदिति च श्रूयते[10]। वस्तुतोऽयं शतानन्द

---

[1] *वीरागमः. ६.३९५*

[2] *तत्रैव. ६.६२*

[3] *तत्रैव. ६.२०५*

[4] *तत्रैव. ४.१८२*

[5] *द्र. वीरागमः. १.४२४-४४१*

[6] *द्र. तत्रैव. ४.१८२*

[7] *द्र. तत्रैव. २.३७१*

[8] *द्र. तत्रैव. २.२५१*

[9] *द्र. श्री जगद्गुरु आदिरेणुकरु, पृ. २७ श्रीमति गिरिजादेवी सदाशिवशास्त्री हिरेमठ, गदग, १९८३*

[10] *शब्दार्थकौस्तुभः. भा. ६, पृ. २५५०*

एव रेणुकाचार्यानुग्रहप्राप्तः शतानन्द इति निश्चयेन वक्तुं विपुलानि प्रमाणानि न सन्ति, किन्तु संशोधनायायं विषयो भवितुमर्हत्येका दिक्। विभीषणस्तु रावणसहोदरस्त्रेतायुगीय इति प्रसिद्धतम एव। अगस्त्यविषयक-विचारस्त्वग्रे भविष्यति।

तदेवमयं रेणुकाचार्यः सिद्धान्तशिखामण्युक्तविभीषणागस्त्ययोर्वीराग-मोक्तशतानन्दादीनां च समकालिक इति ज्ञायते। अयमाद्य आचार्यः।

षड्दर्शनसमुच्चयाख्यस्य ग्रन्थस्य हरिभद्रसूरिविरचितस्य व्याख्यायां श्रीमता मणिभद्रसूरिणा–

उत्पलः कारिकां वेत्ति तन्त्रं वेत्ति प्रभाकरः।
वामनस्तूभयं वेत्ति न किञ्चिदपि रेवणः।।[१]

इत्युत्पल-प्रभाकर-वामनादिदार्शनिकानां समूहे रेवणस्यापि नामोल्लिखि-तमित्ययमाचार्यो मणिभद्रसूरेः प्राक्तनः समकालिको वासीदित्यवगम्यते। द्वितीयोऽयमाचार्यः।

तृतीयस्तु रेवणसिद्धनामकः। गुरुवंशकाव्य-शिवतत्त्वरत्नाकरादिग्रन्थैरय-मेवाद्यशङ्कराचार्याय चन्द्रमौलीश्वरलिङ्गं रत्नगर्भगणपतिं च प्रदत्तवानिति ज्ञायते। तत्र श्रीशृङ्गेरीमठस्यास्थानविदुषा काशीलक्ष्मणशास्त्रिणा–

श्रीचन्द्रमौलीश्वरलिङ्गमस्मै सद्रत्नगर्भं गणनायकं च।
स विश्वरूपाय सुसिद्धदत्तं तत्त्वान्यगादीच्चिरमर्चयेति।।[२]

इत्यत्र आदिशङ्कराचार्यो रेवणसिद्धमहायोगिनाऽऽवाप्तं चन्द्रमौलीश्वरलिङ्गं रत्नगर्भगणपतिं चार्चनार्थं स्वप्रथमशिष्याय सुरेश्वराचार्याय प्रददाविति गुरुवंशकाव्याख्ये शङ्करचरिते निरूपितम्। तेनैवोपर्युक्तश्लोकव्याख्यानावसरे श्लोकस्थसुसिद्धपदस्य "सुसिद्धेन रेवणसिद्धमहायोगिना" इति व्याख्या चाकारि।

श्रीमद्भिर्नञ्जणाचार्यैरपि स्वकीये वेदान्तसार-वीरशैवचिन्तामणिनामके ग्रन्थे-(पूर्वकाण्डे)

शङ्कराचार्यसन्नामयोगीन्द्राय महोज्ज्वलम्।
चन्द्रमौलीश्वरं लिङ्गं दत्तवानिति विश्रुतम्।।

---

[१] ष. स., पृ. ४

[२] गुरुवंश. का. ३.३३

श्रीरेणुकगणेशाख्यं रेवणं सिद्धदेशिकम्।
वीरशैवमताचार्यं वन्देऽहं तं जगद्गुरुम्।।

इति रेणुकगणेश्वरो रेवणसिद्ध इत्यभिधानेन भूलोकेऽवतीर्णः शङ्कराचार्याय चन्द्रमौलीश्वरलिङ्गं प्रदत्तवानिति समर्थितम्।

आचार्याः श्रीबलदेवोपाध्यायमहाभागा गुरुवंशकाव्यस्य वैशिष्ट्यनिरूपणावसरे शङ्करदिग्विजयस्य परिशिष्टे रेवणसिद्धमहायोगिना प्राप्तस्य चन्द्रमौलीश्वरलिङ्गस्य रत्नगर्भविनायकस्य च वृत्तान्तं प्रतिपादितवन्तः[१]।

अपि च, केलदीबसवभूपालः स्वकीये शिवतत्त्वरत्नाकराख्ये ग्रन्थे–

ततः स रेवणसिद्धसम्प्रदायप्रवर्तिनाम्।
शङ्कराचार्यवर्याणां पारम्पर्यक्रमागतम्।।

संन्यासिनमुपाश्रित्य विनयावनतोऽधिकम्।
वृत्तान्तमखिलं तस्मै यतये स्वं व्यजिज्ञपत्।।

इत्युक्तेनार्थितस्तेन स संन्यासमुपादिशत्।
विद्यारण्य इति प्रादादाख्यां तस्मै ततः परम्।।

रेवणसिद्धसम्प्राप्तं चन्द्रमौलीश्वरमप्यदात्।
आख्याच्चानेन लिङ्गेन तवाभीष्टाप्तिरित्यपि[२]।।

इत्याद्यशङ्कराचार्यभगवत्पादाय श्रीरेवणसिद्धशिवयोगिना प्रदत्तं चन्द्रमौलीश्वरलिङ्गं पारम्पर्येण श्रीविद्यारण्यस्वामिभिरप्यवाप्तमिति वृत्तान्तमाख्यातवान्।

शिवप्पनायकाख्यः केलदीमहाराजो यदा बिदरूरनामके (कर्नाटक) ग्रामे निवसति स्म, तदा तत्रागतस्य श्रीशृङ्गेरीपीठपरम्परागतस्य श्रीसच्चिदानन्दभारती-स्वामिनोऽन्तिकमागत्य तैः साकं विद्यमानस्य श्रीचन्द्रमौलिश्वरस्य लिङ्गस्य सान्निध्ये शृङ्गेरीमठस्योद्धारार्थं दानं प्रदत्तवानिति शासनेऽपि[३] चन्द्रमौलीश्वरलिङ्गस्य शङ्कराचार्यपीठपरम्पराविद्यमानत्वमुपलभ्यते। लिङ्गमिदमधुनाऽपि तत्पीठपरम्परागतैरा-चार्यैरभ्यर्च्यते। अनेनाचार्यस्य शङ्करस्य समकालीनः कश्चन रेवणसिद्धाख्यो वीरशैवाचार्य आसीदित्यवबुध्यते। सुप्रसिद्धपुरातत्त्वविदुषा स्व. हो. कृष्णशास्त्रि-

---

[१] *'शंङ्करदिग्विजयः' परिशिष्ट (क), पृ. ५८६–५८८ हरिद्वारप्रकाशनम् ।*

[२] *शिव. रत्ना. ४.१२.९–१०, २२–२३*

[३] *द्र. एपिग्राफिया कर्नाटका, सम्पुट ६. शृङ्गेरी १;*

महोदयेन शिवतत्त्वरत्नाकरस्य भूमिकायामांग्लभाषामय्यां रेवणसिद्धोऽयं वीरशैव-सम्प्रदायस्याचार्य इति प्रतिपादितम्[१]।

अपरश्च रेवणसिद्धेश्वराख्यस्तुरीय आचार्यः ख्रि. एकादशतमशताब्देऽवतीर्या-घटितघटनालीला विधायानन्तजनानुद्धरन् सप्तोत्तरशत (१०७) वर्षाण्युषित्वा दिगन्तविश्रान्तकीर्तिरभूत्। अयं सोल्लपुरस्य (महाराष्ट्र) समीपस्थे 'मासनूर' ग्रामे भीमानद्यास्तीरे निवसति स्म। अस्य महानुभावस्याशीर्वादेन षष्टिवर्षीयायाः सुग्गलदेव्याः कुक्षितः सोल्लापुरसिद्धरामेश्वरः प्रादुरभूदिति सिद्धरामचरितेन ज्ञायते[२]। अयमेव मासनूरसमीपस्थे कस्मिंश्चिद् ग्रामे निवासिनोर्जनपीडकयोर्यक्षदम्पत्योः संहारम्, कोल्हापुरनरेशस्य गोरक्षस्य गर्वहरणम्, काञ्चीवरदराजमूर्तेर्वेपमानशिरस्तम्भनं च चकारेति तच्चारित्र्येणावगम्यते[३]।

एनमेवाचार्यं[४] श्रीपतिपण्डिताराध्यः-

सदाशिवं शक्तिधरं सुकेशं चण्डीश्वरं भृङ्गिरिटिं शिलादम्।
कुम्भोद्भवं चिन्मयवामदेवं श्रीरेवणं सिद्धगुरुं प्रपद्ये।।[५]

इत्यादिमङ्गलश्लोकेषु, "रेवणसिद्धमरुलसिद्धादिपूर्वाचार्याणां वैदिकानां[६]...." इति भाष्ये च स्मरति।

तदेवमुपर्युपपादिता रेणुक-रेवण-रेवणसिद्ध-रेवणसिद्धेश्वराभिधा आचार्या वस्तुतो भिन्नभिन्नकालेऽवस्थिताः, तथापि ख्रि. द्वादशशताब्दानन्तरकालीनैः कविभिः साहित्यकैश्च एषां चतुर्णां चारित्र्यं क्रोडीकृत्य लिखितम्। तदेवं लेखने न कारणाभावः, यतो हि रेणुक-रेवणसिद्ध-रेवणसिद्धेश्वराख्या आचार्या प्रायः बालेहोन्नूर (कर्नाटक) रम्भापुरीपीठाधिपा आचार्या आसन्। रेणुकाचार्यस्तत्पीठस्य प्रसिद्धो मूलाचार्यः। यथाधुना शङ्कराचार्यपरम्परागता आचार्या आद्यशङ्कराचार्यस्यैव नाम्ना तत्पीठाधिपा

---

[१] *'रेवणसिद्ध We know, is a well known Saiva teacher, whom the Lingayats still clain as one of their earliest Acharya's" (Sivatattvaratnakara, P. 10; Publishers - B. M. Nath & Co. Vepery Madras, 1927).*

[२] *सिद्धराम शिवयोगि, पृ. ७५*

[३] *शिवाङ्क, पृ. ३५०-३५४ (कल्याण) गोरखपुर, वि. सं. २०५२*

[४] *श्रीकरभाष्यभूमिका पृ. १३२*

[५] *ब्र. सू. श्रीकर भा. मङ्गल श्लो. ७*

[६] *तत्रैव १.१.१, पृ. ३६*

भवन्ति, तथा रम्भापुरीपीठस्य मूलाचार्यस्य रेणुकस्य नाम्नाऽपि ते रेवणसिद्ध-रेवणसिद्धेश्वराद्याचार्याः आहूयन्ते स्म। एतेन भ्रमोऽयं जातो यद्रेणुकाचार्यस्यैकस्यैव रेवण-रेवणसिद्ध-रेवणसिद्धेश्वराख्यानि पर्यायनामानि सन्तीति। किन्तु वस्तुस्थितिस्त्वपरैव। तस्माद्विद्वांसस्तदवास्तविकमिति विदाङ्कुर्वन्तु।

अगस्त्यमुनेश्चारित्रिकैतिह्यम्

म. रा. श्रीनिवास्-अय्यंगार्यमहोदयः ''History of the Tamils'' इत्याख्ये ग्रन्थे भारतवर्षेऽनेकजना अगस्त्यनाम्ना प्रसिद्धाः सन्तीति प्रतिपादयति। तेषु सिद्धान्तशिखामणिनिर्दिष्टोऽगस्त्यः क इति विचारणीयम्। सिद्धान्तशिखामणावगस्त्यमहर्षेश्चारित्र्यविषये-

तमागतं महासिद्धं समीक्ष्य कलशोद्भवः।
लोपामुद्राकरानीतैरुदकैरतिपावनैः ।

विन्ध्यो निरुद्धो भवता विश्वोल्लङ्घनविभ्रमः।
नहुषो रोषलेशात्ते सद्यः सर्पत्वमागतः।।

आचान्ता भवता पूर्वं पङ्कशेषाः पयोधयः।
जीर्णस्ते जाठरे वह्नौ दृप्तो वातापिदानवः।।[1]

इति प्रतिपादितम्। अनेनात्रोपवर्णितोऽगस्त्यः कलशोद्भवो मलयाचलनिवासी लोपामुद्रापतिः विश्वोल्लङ्घनलालसविन्ध्याचलोल्लङ्घी स्वशापान्नहुषसर्पकारी चेति ज्ञायते।

वङ्गदेशीयस्य श्रीमत ओ. सी. गाङ्गुलीमहाशयस्याभिप्रायानुसारमगस्त्यः पूर्वं वाराणस्यामुवास। स च विन्ध्याटवीमुत्तीर्य दक्षिणापथमाजगाम। ततोऽयं नासिकप्रान्ते आश्रमं विनिर्माय तत्र वातापी-इल्वलाख्यावसुरौ[2] सङ्कल्पमात्रेण समहरत्। ततोऽगस्त्यो दक्षिणे पाण्ड्यराज्यं प्रविश्य तत्र राजगुरुपदवीमलञ्चकार, तत्र 'अगति' नामकं तमिलभाषाव्याकरणं व्यरचयच्च। कन्याकुमार्याः समीपस्थे पोधीयनामके पर्वतेऽगस्त्योऽद्याप्यदृश्यरूपेण तपोमग्न इति द्राविडानां दृढो विश्वासः। ततोऽयं

---

[1] सि. शि. ४.३३-३४, ३८-३९

[2] कर्नाटकस्य बागलकोटमण्डलान्तर्गतबदामितालूके विद्यमानस्य शिवयोगमन्दिरस्य समीपस्थस्य नागनाथकुण्डस्यान्तिके वातापी-इल्वलाख्यौ राक्षसावास्ताम्। तत्रागतेनागस्त्येन तौ निहताविति तत्र स्थितानां जनानामभिमतम्। तत्सम्बद्धाः केचन स्मारकाश्च तत्र सन्ति। अस्माभिरवलोकितास्ते।

सागरमुत्तीर्य कम्बोडियाद्वीपमाजगाम। अमुमेवोदन्तं पौराणिकाः सप्तसागरपानत्वादिना सोत्प्रेक्षं वर्णयन्ति। कम्बोडियागते अङ्कोरवाटस्थिते शिलालेखे आर्यदेशीयः कश्चिदगस्त्यो नाम ब्राह्मणः कम्बोडिया द्वीपमागत्य शिवयोगसिद्धो भूत्वाऽलौकिक्या शक्त्या समपूजयदित्युल्लेखो वर्तते।

जावादेशीयपूर्वभागगत- 'दिनमया'ऽऽख्यग्रामसमीपस्थे कस्मिंश्चित् शासने ख्री. पू. ७६० तमाब्देऽगस्त्यनाम्ना काचन मूर्तिः समुत्कीर्णा। तत्रागस्त्यं 'शिवगुरुः' 'भट्टारकगुरुः' इत्याद्यभिधानैः कथयन्ति।

श्री. फ. गु. हलकट्टीमहोदयानामभिप्रायानुसारमगस्त्यस्य जन्मभूमिः कर्नाटकराज्यान्तर्गतः 'कलशा'ख्यो ग्रामः (चिक्कमंगलूर मण्डल) तत्राद्यापि तत्स्मारकाणि विद्यन्ते। इदमेवास्य कुम्भसम्भवत्वादिपौराणिकवर्णनादेर्मूलम्। गाङ्गुलीमहोदयस्तु मलयाद्रिं सुमात्राद्वीपस्थमिति प्रतिपादयति, परन्तु हलकट्टिमहोदयस्तन्निराकृत्य मलयाचलं दक्षिणभारते श्रीरेणुकभगवत्पादाचार्यस्य रम्भापुरीपीठसमीपस्थमिति कथयन्ति। रेणुक-रेवणसिद्धयोरैतिह्याख्ये प्रबन्धेऽपि वि. जि. पाटील (रि. अ. ए. इन्स्पेक्टर-बेलगांव) महोदय उदन्तमिमं सोपपत्तिकं समर्थयति। अगस्त्यमहर्षये आदिरेणुकेनैव तत्त्वोपदेशः कृत इति निश्चित्य अगस्त्यस्य कालः ख्रि. पू. ७८० शताब्दात् पूर्व इत्यभिप्रैति सः[1]।

किञ्च, व्यासबिरचिताष्टादशपुराणेष्वन्यतमस्य स्कन्दपुराणस्य शाङ्करीसंहितान्तर्गते 'हालास्यमहात्म्य' इत्याख्ये ग्रन्थेऽपि अगस्त्यस्योल्लेख उपलभ्यते। भगवान् शङ्करः शाङ्करीसंहितां शाङ्कर्यै पार्वत्या उपदिशति तत् समये तदुदर उपस्थितः कार्तिकेयः षडाननोऽपि तमुपदेशं श्रुत्वा कालान्तरेऽगस्त्यायोपदिदेश। पुनस्तमेवागस्त्यो इतरमुनिभ्य उपदिष्टवानित्यतोऽस्या अगस्त्यसंहितेत्यपि नाम व्यवह्रियते[2]। सिद्धान्तशिखामणावपि-

पुरा हेमवतीसूनुरवदत्ते षडाननः।
शिवधर्मोत्तरं नाम शास्त्रमीश्वरभाषितम्।।[3]

---

[1] श्री. एम. जी. नञ्जुण्डाराध्यमहाभागाः श्रीकरभाष्यभूमिकायां (पृ. १४४-१४५) अगस्त्यमहर्षिमधिकृत्य वङ्गदेशीयेन ओ. सी. गाङ्गुलीमहाशयेन विरचितं 'पूर्वकालिकद्वीपान्तरसञ्चारी अगस्त्यः' इति लेखं विमृश्य श्री फ. गु. हलकट्टिमहोदयेन लिखितस्य कन्नडलेखस्य सारं सङ्गृहीतवन्तः। तस्यैव भागोऽत्रोपपादितोऽस्ति।

[2] द्र. हालास्यमहात्म्यम् १.४९-५३

[3] सि. शि. ४.४२

इत्यगस्त्यस्य कार्तिकेयेन शिवोपदिष्टतत्त्वप्रापकत्वं निर्दिष्टम्। किञ्च, सिद्धान्तशिखामणिनिर्दिष्टाः कुम्भजत्ववातापी-इल्वलभक्षकत्वादिविषया अपि 'हालास्यमाहात्म्ये'[1] समुपलभ्यन्ते। तस्य द्राविडभाषाव्याकरणरचितत्वमप्युल्लिखितं तत्र[2]। अनेन व्यासविरचितस्कन्दपुराणान्तर्गते 'हालास्यामाहात्म्ये' निर्दिष्टोऽगस्त्यः सिद्धान्तशिखामणिनिर्दिष्टागस्त्यश्चैक एवेति स्पष्टं ज्ञायते। अनेनायमगस्त्यो व्यासस्य समकालीनः प्राक्तनो वासीदित्यवगम्यते। तथापीदानीमुपलब्धप्रमाणैः ख्रि. पू. ७६० तमाब्दात् पूर्वमेवागस्त्य आसीदित्यत्र न संशीतिलवलेशोऽपि।

रेणुकाचार्याणामवतारवादः

यदा यदा हि धर्मस्य ग्लानिर्भवति भूतले।
तदा तदाऽवतारोऽयं गणेशस्य महीतले।।

इति स्कन्दपुराणोक्त्यनुसारं धर्मावनतिसमये शिवः शिवगणान् सम्प्रेष्य धर्माभ्युदयं विदधातीत्यवगम्यते। तथैवात्रापि शिवप्रेषितैः पञ्चभिर्गणैराचार्यरूपेणावतीर्णैर्वीरशैवधर्मस्य संस्थापनमङ्गीक्रियते। इमे शिवगणाः भगवतः शिवस्य सद्योजात-वामदेव-अघोर-तत्पुरुष-ईशानाख्येभ्यः पञ्चवक्त्रेभ्यः प्रादुर्भूय शिवाद्वैतसिद्धान्तमुपदिष्टिवन्त इति निरूप्यतेऽत्र। ते रेणुक-दारुक-घण्टाकर्ण-धेनुकर्ण-विश्वकर्णाख्याः[3] पञ्च महाचार्याः शिवस्य सद्योजातादिमुखोद्भूता अगस्त्य-दधीचि-व्यास-सानन्द-दुर्वासाख्यमहर्षिभ्यो वीरशैवसिद्धान्तोपदेशं चक्रुरित्यागमप्रसिद्धिः।

वीरशैवधर्मस्थापकेष्वाचार्येषु रेणुकाचार्यस्यावतारस्तल्लीलाश्च श्रीसिद्धान्तशिखामणौ श्रीशिवयोगिशिवाचार्येण निरूपिताः सन्ति। तदनुसारं रेणुकदारुकाख्यौ शिवविश्वासपात्रौ गणेश्वरौ शिवस्यान्तःपुरद्वारपालकास्ताम्[4]। कदाचित्कलधौतशिलामये कैलासेऽम्बया सह रत्नमयसिंहासनसमासीनः समस्तदेवताशिवगणैः सेव्यमानः

---

[1] द्र. हालास्यमाहात्म्यम् १.१५५, १६४

[2] द्र. तत्रैव १.१६६, १६८

[3] एतेषामाचार्याणां कार्यं तत्स्थापितपीठानां परम्परा च डॉ. श्री ष. ब्र. चन्द्रशेखरशिवाचार्यस्वामिभिः (इदानीन्तन काशीपीठाधीश्वरैः) विरचिते "वीरशैवपञ्चपीठपरम्परा" इत्याख्ये कन्नडभाषामये ग्रन्थे सविस्तरमुपपादितम्। सोऽयं ग्रन्थो होन्नल्लितः (कर्नाटक) चेन्नचेतनप्रकाशनेन १९८८ तमाब्दे मुद्रितोऽस्ति।

[4] गणेश्वरौ रेणुकदारुकावुभौ विश्वासभूतौ नवचन्द्रमौलेः।
अन्तःपुरद्वारगतौ सदा तौ वितेनतुर्विश्वपतेस्तु सेवाम्।। (सि. शि. २.३५)

परमेश्वरः सभामध्यस्थं मुख्यं प्रसिद्धं परमप्रेमास्पदं च रेणुकगणेश्वरं ताम्बूलप्रसादप्रदानाय शिरश्चालनसङ्केतेन समाह्वयत्। परमेश्वराह्वानपरितुष्टरेणुकगणेश्वरोऽवसरेण जिगमिषया पार्श्वस्थं दारुकं समुदल्लङ्घयत्।[1] भक्तोल्लङ्घनमसहमानो महादेवस्तदा–

अविचारेण मद्भक्तो लङ्घितो दारुकस्त्वया।
एष त्वं रेणुकानेन जन्मवान् भव भूतले।।[2]

इति रेणुकं समादिदेश। तदा मानुषयोनिमहादुःखबन्धनं चिन्तयन् रेणुकः-

यथा मे मानुषो भावो न भवेत् क्षितिमण्डले।
तथा प्रसादं देवेश विधेहि करुणानिधे।।[3]

इति शिवं प्रार्थयामास। एवं सम्प्रार्थितो रेणुकं समाधाय भगवान् शिवः-

श्रीशैलस्योत्तरे भागे त्रिलिङ्गविषये शुभे।
कोल्लिपाक्याभिधानोऽस्ति कोऽपि ग्रामो महत्तरः।।

सोमेश्वराभिधानस्य तत्र वासवतो मम।
अस्पृशन् मानुषं भावं लिङ्गात् प्रादुर्भविष्यसि।।[4]

इत्युक्त्वा लिङ्गात् प्रादुर्भूतत्वात् तव योनिजनितमानवसहजमानुषभावो तज्जनितं सांसारिकं बन्धनं वा न सम्भविष्यतीत्यभयं प्रददौ। लिङ्गात् प्रादुर्भूय क्षितिमण्डले किं करणीयमिति पृष्टे भगवान् शिवः–

मदद्वैतपरं शास्त्रं वेदवेदान्तसम्मतम्।
स्थापयिष्यसि भूलोके सर्वेषां हितकारकम्।।

मम प्रतापमतुलं मद्भक्तानां विशेषतः।
प्रकाशय महीभागे वेदमार्गानुसारतः।।[5]

इति समादिश्य तत्रागतान् ब्रह्मेन्द्रादिदेवान् भ्रूसंज्ञया विसृज्य नन्द्यादिगणैः पार्वत्या च सहितः स्वान्तःपुरं जगाम। शिवाऽऽज्ञानुसारं रेणुकगणेश्वरोऽप्यान्ध्रप्रदेशीयकोल्लिपाकक्षेत्रस्थसोमेश्वरमहालिङ्गादवततार।[6]

---

[1] *शम्भोराह्वानसन्तोषसम्भ्रमेणैव दारुकम्।*
उल्लङ्घ्य पार्श्वमगमल्लोकनाथस्य रेणुकः।। (सि.शि. ३.३८)

[2] *सि. शि. ३.७८*

[3] *सि. शि. ३.८३*

[4] *सि. शि. ३.८५-८६*

[5] *सि. शि. ३.८८-८९*

[6] *सि. शि. ४.१*

ननु पाषाणनिर्मिताज्जडरूपाच्छिवलिङ्गात् कथं चेतनव्यक्तेरुत्पत्तिः स्यादिति चेत्, न लोके जडाज्जडमेव चेतनाच्चेतनमेव प्रादुर्भवेदिति नियमस्याननुगतत्वात्। तथा हि जडरूपपृथिव्यां चेतनरूपवृक्षलतादीनां, जडरूपे पङ्के क्रिमिकीटादि-चेतनजीवानां चोत्पत्तिर्दृश्यते, एतद्विपरीतं पुरुषाच्चेतनाज्जडरूपाणां नखकेशलोमादीनां जननं च लोके दृश्यते। उक्तं चोपनिषदि-

यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति।
यथा सतः पुरुषात् केशलोमानि तथाक्षरात्सम्भवतीह विश्वम्।।[1] इति।

वस्तुतस्तात्त्विकया दृष्ट्या न किमपि वस्तु प्रपञ्चे जडरूपं विद्यते, "सर्वं खल्विदं ब्रह्म"[2] "सर्वो ह्येष रुद्रः"[3], सर्वं लिङ्गमयं जगत्" इत्यादि श्रुत्यागमोक्त्यनुसारं चेतनस्यैव सूक्ष्मरूपेण सर्वत्र विद्यमानत्वात्। नास्मन्मते जडत्वं नाम "स्वपरज्ञत्वशून्यत्वं जडत्वम्" इति लक्षणमभिप्रेतम्, अपि तु "अत्यन्तगूढचैतन्यं जडमव्यक्तमुच्यते"[4] इति रेणुकभगवत्पादाचार्योक्त्यनुसारं यच्चाव्यक्तं निगूढं च चैतन्यं तदेव जडमित्यभिधीयते। तदेवं सर्वत्र सूक्ष्मरूपेण चैतन्यरूपपरशिवस्यैवावस्थितिरवधार्यते। रेणुकभगवत्पादाचार्यैरपि-

पत्रशाखादिरूपेण यथा तिष्ठति पादपः।
तथा भूम्यादिरूपेण शिव एको विराजते।।[5]

इति शिवस्यैव पत्रशाखादिरूपेण विद्यमानत्वमुपदिष्टम्। तस्मात् सर्वत्र चेतनस्यैव विद्यमानत्वाज्जडरूपाच्चेतनरूपव्यक्तेरुद्गमः कीदृश इति प्रश्न एव नोदेति।

तत्रापि सर्वज्ञत्वाद्युत्कृष्टगुणगणसमन्वित ईश्वरो दयासागरो भगवान् शिव एव भक्तानुग्रहाय विश्वेश्वरादिज्योतिर्लिङ्गरूपेण सोमेश्वरादिमहालिङ्गरूपेण च मह्यां प्रादुर्बभूवेति पुराणागमप्रसिद्ध एवार्थः। श्रीमायिदेवेनापि- "लिङ्गमित्युच्यते साक्षाच्छिवः सकलनिष्कलः"[6] इति शिवस्यैव लिङ्गरूपत्वं समर्थितम्। ईशानसंहितायामपि-

---

[1] मुण्डको. १.१.७
[2] छा. उ. ३.१४.१
[3] महाना. १०.११
[4] सि. शि. ५.४५
[5] सि. शि. १०.७०
[6] अ. सू. ३.४

माघकृष्णचतुर्दश्यामादिदेवो महानिशि ।
शिवलिङ्गतयोद्भूतः कोटिसूर्यसमप्रभः ।।[१]

इति भगवान् शिवो महाशिवरात्रिपर्वकाले कोटिसूर्यप्रकाशः शिवलिङ्गरूपेण प्रादुरासीदित्युक्तम्। तदेतादृशाच्छिवापरपर्यायमहालिङ्गादाविर्भावोऽस्मदादीनामसम्भवः, तथाप्यघटितघटनापटीयःशक्तिविशिष्टपरिशिवस्यानुग्रहपात्राणां शिवगणानां शिवादेशेनैव भूलोकमागतानां दिव्यदेहिनां तु सुलभतम एव। तस्माद् रेणुकगणेश्वरः सोमेश्वरलिङ्गादाविर्बभूवेत्यत्र न सन्देहः।

तदेवं शिवादेशानुसारमान्ध्रप्रदेशीयकोल्लिपाकिनामकक्षेत्रस्य सोमेश्वरलिङ्गात् स रेणुकः प्रादुर्बभूव। तदुक्तं श्रीसिद्धान्तशिखामणौ–

अथ त्रिलिङ्गविषये कोल्लिपाक्यभिधे पुरे।
सोमेश्वरमहालिङ्गात् प्रादुरासीत् स रेणुकः ।।[२] इति।

अत्र रेणुकाचार्याणामवतारभूमिर्दक्षिणभारतस्य त्रैलिङ्गदेश इति सुप्रसिद्धलिङ्गत्रयविशिष्टभूमिरिति प्रसिद्धम्। अत्रेदं तात्पर्यं यदस्मिन् स्थाने दक्षिणदिशि काञ्चीकालहस्तिस्थितमीश्वरलिङ्गम्, मध्ये मल्लिकार्जुनलिङ्गम्, उत्तरदिशि सोमेश्वरलिङ्गं च सुशोभन्त इत्यस्य स्थानस्य त्रिलिङ्गदेश इत्याभिधानम्[३]। अस्मिन् स्थाने विद्यमानात् सोमेश्वरलिङ्गात् प्रादुर्भूतमेनमतितेजस्कं रेणुकगणेश्वरमवलोक्य तत्रत्या जना विस्मिता बभूवुः। विस्मितांस्तान् समाश्वास्य स्वपरिचयमवतारप्रयोजनं च तेभ्य आख्याय व्योममार्गेण मलयाचलं प्रति जगाम[४]। तत्रत्योऽगस्त्यमहर्षिः स्वदिव्यचक्षुषाऽऽगतमेनं रेणुकाख्यं गणेश्वरं ज्ञात्वा लोपामुद्राकरानीतैरुदकैस्तस्य शिवयोगिनः पादप्रक्षालनपुरस्सरं तं समभ्यर्च्य, तस्यागमनेन स्वकृतकृत्यतां च सविनयं निरूप्य[५] रेणुकमुखाच्छिवसिद्धान्तं श्रोतुकामः–

त्वन्मुखाच्छ्रोतुमिच्छामि सिद्धान्तं श्रुतिसम्मतम्।
सर्वज्ञ वद मे साक्षाच्छैवं सर्वार्थसाधकम्।।[६]

---

[१] शिवाङ्कः पृ. ४८३ कल्याण कार्यालय, गीता प्रेस, गोरखपुर, सं. २०५२

[२] सि. शि. ४.१

[३] श्रीरेणुकभगवत्पादरवरु, पृ. १४, आर. एच. वीरभद्रस्वामि धर्मतत्त्वप्रचारकरम्भापुरी महासंस्थानमठ बालेहोन्नूर १९७७ ई. ।

[४] सि. शि. ४.९-१३

[५] सि. शि. ४.३४-३६, ४७-५०

[६] सि. शि. ४.५२

इति सम्प्रार्थयामास। तत्प्रार्थनानुसारं भगवान् रेणुकगणेश्वरो नानागमश्रवणवर्तितसंशयिनं तमगस्त्यं कृतार्थयितुं कामिकादिवातुलान्तानामष्टाविंशत्यागमानामुत्तरभागात्मकं सर्वश्रुतिसमन्वितं वीरशैवसिद्धान्तं समुपदिदेश। सोऽयमुपदेश एवाधुना "श्रीसिद्धान्तशिखामणिः" इत्यभिधानेन प्रसिद्धोऽस्ति। ग्रन्थस्यास्य महिमोपवर्णनावसरे श्रीशिवयोगिशिवाचार्येण–

श्रीवेदागमवीरशैवसरणिं श्रीषट्स्थलोद्यन्मणिं
श्रीजीवेश्वरयोगपद्मतरणिं श्रीगोप्यचिन्तामणिम्।

श्रीसिद्धान्तशिखामणिं लिखति यस्तं
ल ा े ख ा ट ा त ट ा ा द र ा त ा ्
श्रोता श्रावयिता स याति विमलां भुक्तिं च मुक्तिं
ट ा र ा म ा ् । ॥[1]

इति सुस्पष्टं जगाद। तदीदृशं सिद्धान्तसङ्ग्रहमनादृतबाह्यतन्त्रं वीरशैवसिद्धान्तमाकर्ण्य स्वकीयां कृतकृत्यतां प्रकटयन् मुनिपुङ्गवोऽगस्त्यः प्राञ्जलिः सन्–

अद्य में सफलं जन्म गतो में चित्तविभ्रमः।
सञ्जाता पाशविच्छित्तिस्तपांसि फलितानि मे।।

शास्त्रं तव मुखोद्गीर्णं शिवाद्वैतपरं वरम्।
मां विना कस्य लोकेषु श्रोतुमस्ति तपः शुभम्।।[2]

इति निवेदयामास। तदाऽगस्त्यं करुणया दृष्ट्या समालोक्य श्रीरेणुकगणेश्वरः–

स्थाप्यतां सर्वलोकेषु तन्त्रमेतत् त्वया मुने।
ईदृशं शिवबोधस्य साधनं नास्ति कुत्रचित्।।

अवतीर्णं मया भूमौ शास्त्रस्यास्य प्रवृत्तये।
प्रवर्तय शिवाद्वैतं त्वमपि ज्ञानमीदृशम्।।[3]

---

[1] *सि. शि.* २१.५४

[2] *सि. शि.* २०.७६, ७८

[3] *सि. शि.* २०.८३, ८७

इति समादिश्यान्तर्दधे। तदन्तर्धानेनाश्चर्यसङ्कुलः शिवसिद्धान्ततत्त्वज्ञोऽयमगस्त्यो रेणुकाचार्यादेशानुसारं स्वश्रुतवीरशैवसिद्धान्तप्रचारार्थं व्याससूत्राण्यधिकृत्य वीरशैवसिद्धान्तपरां वृत्तिं विरचयामासेति, श्रीपतिपण्डिताराध्यभगवत्पादैः श्रीकरभाष्ये-

अगस्त्यमुनिचन्द्रेण कृतां वैयासिकीं शुभाम्।
सूत्रवृत्तिं समालोक्य कृतं भाष्यं शिवङ्करम्।।[1]

इत्युक्तकारिकयाऽवगम्यते। किञ्चोत्तरत्र भाष्येऽपि- "किञ्चास्मिन् सूत्रेऽगस्त्यमुनिसार्वभौमेन कृतलघुसूत्रवृत्तौ "लिङ्गे सुषुप्तिः" इत्यादिबहुश्रुतिषु घट-कुम्भ-शब्दादिवद् ब्रह्म-लिङ्गशब्दयोः पर्यायत्वावगमात् तल्लिङ्गात् पूर्वोक्तदहरादि-सर्वविद्योपास्यपरशिवात् प्रेरिताः सन्त अतिवाहका मर्त्यलोकशिवलोकान्तरालनिवासिनो देवा दहरादिसर्वब्रह्मविद्योपासकं पुरुषं सौधसोपानाऽऽरोहणन्यायेन क्रमक्रमेण निरूपमानन्दनित्यवैभवं महाकैलाससमानयतीति व्याख्यातम्, तदप्यविरुद्धम्"[2] इत्युद्धताऽगस्त्यवृत्तेरुद्धरणेनाप्यगस्त्यमुनिना "व्यासवृत्ति" नामको ग्रन्थो विरचित इति नूनमवगम्यते। अस्य मुनिचन्द्रवृत्तिरित्यपरं नामान्तरं श्रूयते। सा च कुम्भकोण उपलभ्यत इति प्रतीतिः।[3]

तदेवं रेणुकाचार्योपदेशेन वीरशैवतत्त्वप्रचाराय वृत्तिं विरचयन्नगस्त्यमहर्षिः स्वयमपि वीरशैवशास्त्रनिष्ठः वीरशैवो बभूव। तदुक्तं-

अन्तर्हिते तदा तस्मिन् मुनिराश्चर्यसङ्कुलः।
तच्छास्त्रप्रवणो भूत्वा समवर्तत संयमी।।इति।।

अत एव भगवत्पादनीलकण्ठशिवाचार्या अपि-

अगस्त्यो जैमिनिश्चैव विश्वामित्रोऽथ काश्यपः।
भारद्वाजोऽङ्गिरा अत्रिर्वसिष्ठो रोमहर्षणः।।
एते सर्वे महाभागा अतिवर्णाश्रमे रताः।
वीरशैवाः समाख्याता जीवन्मुक्ता न संशयः।।[4]

इति वीरशैवमहर्षिपङ्क्तावगस्त्यमहर्षिं प्रथमत्वेन परिगणितवन्तः।

---

[1] *ब्र. सू. श्रीकर मङ्गल श्लो. १७*

[2] *ब्र. सू. श्रीकर. ४.३.४*

[3] *श्रीकरभाष्यभूमिका, पृ. ११५; मैसूरविश्वविद्यालयप्रकाशनम्।*

[4] *क्रि. सा., भा. १, पृ. १२*

श्रीरेणुकभगवत्पादानां त्रिकोट्याचार्यरूपधारणलीला

अगस्त्याय वीरशैवसिद्धान्तमुपदिश्य, तत्प्रसाराय च तमादिश्य, ततः स्वच्छन्दाचाररसिको रेणुको गगनमार्गेण स्वर्णपुरीं लङ्कामाससाद। तत्रत्यो विभीषण आगतमाचार्यमवलोक्य स्वप्रासादमानिनाय। निजभद्रासने तमुपनिवेश्य, अर्घ्यपाद्याद्युपचारैस्तं सम्पूज्य कृताञ्जलिश्च तस्यागमनेन निजराज्यस्य, राक्षसान्वयस्य, जीवितस्य च कृतार्थत्वं निरूपयामास। विभीषणभक्तिसन्तुष्टो रेणुकगणनायकः-

प्रीतोऽस्मि तव चारित्र्यैः शोभनैर्लोकविश्रुतैः।
दास्यामि ते वरं साक्षात् प्रार्थयस्व यथेप्सितम्।।[1]

इत्येवं वरं प्रार्थयितुमादिदेश। विभीषणस्तदा- हे गणाधीश्वर! मम भ्राता ह्यतुलप्रतापी रावणोऽस्मिन् लङ्कायां नवकोटिलिङ्गानि प्रतिष्ठापनीयानीति सङ्कल्प्य तेषु षट्कोटिलिङ्गानि स्थापयित्वा कालवशात् स्वचारित्र्यविपर्ययाद् विष्ण्ववतारेण रामेण निहतः। रणे कण्ठस्खलितप्राणो रावणो मामवलोक्य-

कोटिषट्कं तु लिङ्गानां मया साधु प्रतिष्ठितम्।
कोटित्रयं तु लिङ्गानां स्थापनीयमतस्त्वया।।[2]

इति निवेद्य पञ्चत्वं गतः। तदा प्रभृत्येतावता तदर्थमहं चिन्तितोऽस्मि। तस्मात् त्रिकोट्याचार्यभावमासाद्य त्रिकोटिलिङ्गानि संस्थाप्य, मम चिन्तां वारयेति न्यवेदयत्। पौलस्त्यप्रार्थनानुसारं तदिष्टसिद्धये युगपत् त्रिकोट्याचार्यरूपं परिधाय यताशास्त्रं यथाविधि कोटित्रयं लिङ्गानां प्रतिष्ठापयामास।[3]

रेणुकाचार्याणामियं लीलाऽस्मदादिसामान्यानां कृतेऽसम्भवमिव प्रतीयमनाऽपि नित्यमुक्तानां शिवगणानां "मुक्तः शिवसमो भवेत्" इत्युक्त्या शिववत् सर्वशक्तिमत्वात्तेषामनायाससाध्यं त्रिकोट्याचार्यरूपधारणादिकम्। श्रीपतिपण्डितारा-ध्यभगवत्पादाः "प्रदीपवदावेशस्तथा हि दर्शयति"[4] इत्यस्य ब्रह्मसूत्रस्य भाष्ये "स एकधा भवति त्रिधा भवति सहस्रधा भवति" इति श्रुतिं प्रमाणयन्तः शिवोपासकानां मुक्तानां सङ्कल्पमात्रेणैवानेकशरीरनिर्माणधारणादिकं सम्भवतीति प्रतिपादयामासुः[5]। तस्माद् रेणुकाचार्याणां त्रिकोट्याचार्यरूपधारणलीलायां नैव शङ्का युक्ता।

---

१. *सि. शि. २०.१६*
२. *सि. शि. २१.२२*
३. *कोटिक्रयं तु लिङ्गानां यथाशास्त्रं यथाविधि।*
त्रिकोट्याचार्यरूपेण स्थापितं तेन तत्क्षणे ।। (सि. शि. २१.३३)
४. *ब्र. सू. ४.४.४.१५*
५. *ब्र. सू. श्रीकर ४.४.४.१५*

श्रीसिद्धान्तशिखामणिनिष्ठेयं रेणुकाचार्यणां त्रिकोट्याचार्यरूपधारणमुखेन कोटित्रयलिङ्गानां स्थापनलीला न हि तस्याचार्यस्य माहात्म्यप्रकाशनार्थं निरूपिता काल्पनिकी कथा। अधुनाऽपि श्रीलङ्कायां 'जाफना'तः पञ्चदश (१५) कि.मी. दूरस्थिते 'किरुमलाय' इत्यभिधेये ग्रामे रेणुकाश्रमं रेणुकवनं स्तः। तत्स्थान एव शताधिका वीरशैवकुटुम्बिनः सन्ति। प्रमाणान्येतान्यस्या लीलाया ऐतिहासिकता-मुद्घोषयन्ति। किञ्च, बेंगलोरनगरस्य 'दारुकाचार्याश्रमस्य श्री वे. मू. वीरय्यास्वा-मिशास्त्रिमठमहोदयः १९६९ तमाब्दस्य जूनमासे श्रीलङ्कां गत्वा तत्रत्यं रेणुकाश्रमं, रेणुकावनं च दृष्ट्वा 'तानकेसन्तुरै' नामके ग्रामे विद्यमानं श्रीगुरुवीरभद्रदेवालयं च संदृश्य तत्रत्यैर्वीरशैवैः साकमपि वार्तालापं कृत्वा तत आगमनसमये श्रीरेणुकाचार्याणां ताम्रपटचित्रिता लिङ्गोद्भवमूर्तिमानीतवान्[1]। अनेन रेणुकाचार्याणां लङ्कापुरागमनमैतिहासिकमित्यवगम्यते।

विभीषणाऽभीष्टानुग्रहानन्तरं श्रीरेणुकगणेश्वरः क्षितिमण्डले प्रच्छन्नरूपेण प्रकाशरूपेण च सञ्चरन्, कांश्चन करुणारसवृष्टिदृष्टिनिपातेन, अपरान् शिवाद्वैतोपदेशेन, अन्यांश्च निजनिर्मलसहवासेन कृतार्थयन् यन्त्रमन्त्रादिचतुःषष्टिकलासिद्धान् कापालिकादिपरमतसिद्धमण्डलान् दुराचारनिरतान् पाषण्डान् स्वप्रभावेण विजित्य च कामिकादिवातुलान्तशिवागमोत्तरभागोक्तवीरशैवसिद्धान्तं सर्वत्रोपदिदेश।

आचार्याणां लिङ्गविलयः

एवं रेणुकभगवत्पादाचार्याः स्वावतारप्रयोजनं सम्पूर्य निजावतारधरणीं कोल्लिपाक्यभिधां पुरीमागत्य, तत्रत्यं स्वावतारकारणं सोमेश्वरशिवलिङ्गं प्रति-

त्वदाज्ञया मयैतावत्कालमात्रं महीतले।
आचारि भवदुक्तानामागमानां प्रसिद्धये।।

अतः परं स्वरूपं ते प्राप्तुकामोऽस्मि शङ्कर।
अन्तरं देहि मे किञ्चिदनुकम्पाविशेषतः ।।[2]

इति सविनयं सम्प्रार्थयामास। तदा तच्छिवलिङ्गात् "वत्सागच्छ महानुभाव भवतो भक्त्या प्रसन्नोऽस्म्यहम्"[3] इति ध्वनिर्निरगात्। तल्लिङ्गादुदितसानुकम्प-

---

[1] 'वीरशैवपञ्चपीठपरम्परा', पृ. २८-२९ चेत्रचेतनप्रकाशन होन्नाल्लि (कर्नाटक) १९८८ई.

[2] सि. शि. २१.४९-५०

[3] सि. शि. २१.५१

शाङ्करवचः श्रुत्वा तत्रत्यैः शिवयोगिभिः स्तूयमानो गणनायको रेणुको महाप्रकाशरूपं ज्योतिर्लिङ्गमनुप्रविवेश।

तदेवं रेणुकाचार्यभगवत्पादाः सोमेश्वरशिवलिङ्गात् प्रादुर्भूय, अगस्त्याय वीरशैवतत्त्वोपदेशं कृत्वा विभीषणस्य प्रार्थनानुसारं त्रिकोट्याचार्यरूपामापद्य त्रिकोटिलिङ्गानि युगपत् प्रतिष्ठाप्य, तत्र तत्र स्थितान् दुष्टपाषण्डसिद्धान् विजित्य शैवागमसिद्धान्तस्य सर्वोत्कृष्टत्वं संस्थाप्य, एवं निजावतारप्रयोजनं परिपूर्य पुनस्तस्मिन्नेव सोमेश्वरलिङ्गे लीना बभूवेति श्रीसिद्धान्तशिखामणौ रेणुकभगवत्पादानामवतारस्तत्कृतलीलास्तद्विलयश्च निरूपिताः सन्ति। एतादृशाऽसामान्यलिङ्गाविर्भावलिङ्गविलयाभ्यामस्याचार्यस्यालौकिकं माहात्म्यं ध्वन्यते। अत एव द्वादशशताब्दकालीनवीरशैवशिवशरणेषु सुप्रसिद्धा 'अक्कमहादेवी' स्वकीये कन्नडभाषामये वचने-

लिङ्गदिन्दुयिसि अङ्गविडिदिप्प पुरातनर

इङ्गितवनेनेन्दु बेसगोम्बिरय्या?

अवर नडेये आगम, अवर नुडिये वेद;

अवर लोकद मानवरेन्नबहुदे अय्या? अदेन्तेन्दडे साक्षि;

"वृक्षाद् भवति बीजं हि तद्वृक्षे लीयते पुनः।
रुद्रलोकं परित्यक्त्वा शिवलोके भविष्यति।।" एन्दुदागि

अङ्कोलेय बीजदिन्दायित्तु वृक्षवु;

आ वृक्ष मरलि बीजदोलडगित्तु

आ प्रकारदल्लि लिङ्गदोलगिन्द पुरातनरुद्भविसि

मरलि आ पुरातनरु लिंङ्गदोलगे बेरसिदरु नोडिरय्या

इन्तप्प पुरातनरिगे नानु शरणेन्दु हुट्टुगेट्टेनय्या

चन्नमल्लिार्जुन[१]।।

इत्येवमाचार्याणां लिङ्गोद्भवत्वं लिङ्गविलयत्वं च सोदाहरणमुपवर्णितवती। वचनस्यास्य, कन्नडभाषामयस्य देववाण्यां तात्पर्यलेखनावसरे श्री १००८ ज. डॉ. चन्द्रशेखरशिवाचार्यमहास्वामिभिः- "यथा बीजं वृक्षादुत्पन्नं सत् पुनर्वृक्षे

---

[१] *अक्कमहादेवी वचनगलु सं. ९३ कर्नाटक वि. प्रकाशनम् १९७३ ई.।*

प्रविलीयते तथाऽऽचार्याः शिवलिङ्गात् प्रादुर्भूय पुनर्लिङ्गैक्यमापन्नाः। एतादृशानामाचार्याणां मुखोद्गतानि वाक्यान्येव वेदाः, तेषामाचरणान्येवागमाः। एतान् प्रणमन्नहं भवरोगमुक्तोऽभवमिति"[1] इति प्रतिपादितम्।

किञ्च, "जन्म कर्म च मे दिव्यम्"[1] इति गीतोक्त्यनुसारमवतारिपुरुषाणामाविर्भावः, कर्मविलयश्चादयो दिव्यमेव वर्तन्ते। अत्र शरीरप्राप्तये पूर्वकृतकर्मण एव कारणत्वादवतारिपुरुषाणां च कृतपूर्वजन्मकर्मणामभावात् ते दिव्यमेव देहं परिधार्य इह कर्मभूमाववतरन्ति। अत्रागतानां तेषां कर्मणामपि लोकहितैकप्रयोजकत्वात्, अनासक्तभावविहितत्वाच्च तदग्रिमजन्महेतुर्न भवतीति तेषां कर्मापि दिव्यम्। धृतदिव्यदेहानां विलयोऽपि दिव्य एव। अन्यथा सामान्यदेहानामिव कालभङ्गप्रसङ्गः। तस्माद् दिव्यदेहस्य जन्मान्तावपि दिव्यावेव भवेताम्। अत एव दिव्यदेहधारिणामवतारपुरुषाणां सोमेश्वरशिवलिङ्गादाविर्भावः, पुनस्तत्रैव विलयश्चेति प्रतिपादनमेतेषां जन्मविलययोर्दिव्यत्वमभिलक्षयति।

ग्रन्थस्य ग्रन्थकर्तुश्चैतिह्यम्

तत्र श्रीसिद्धान्तशिखामणौ ग्रन्थकारेण श्रीशिवयोगिशिवाचार्येण–

कश्चिदाचारसिद्धानामग्रणीः शिवयोगिनाम्।
शिवयोगीति विख्यातः शिवज्ञानमहोदधिः।।

तस्य वंशे समुत्पन्नो मुक्तामणिरिवामलः।
मुद्ददेवाभिधाचार्यो मूर्धन्यः शिवयोगिनाम्।।

तस्यासीन्नन्दनः शान्तः सिद्धनाथाभिधः शुचिः।
शिवसिद्धान्तनिर्णेता शिवाचार्यः शिवात्मकः।।

तस्य वीरशिवाचार्यशिखारत्नस्य नन्दनः।
अभवच्छिवयोगीति सिन्धोरिव सुधाकरः।।[2]

इति स्ववंशवर्णनं कृतम्। एतावताऽयं ग्रन्थकारः शिवयोगिनः प्रपौत्रः, मुद्ददेवस्य पौत्रः, सिद्धनाथस्य च पुत्र इत्यवगम्यते। एतदतिरिक्तं न वा तस्य देशः, नापि कालोऽत्र निर्दिष्टः।

---

[1] *सिद्धान्तशिखामणिसमीक्षा; पृ. ५६, शैवभारती भवन, जङ्गमवाडी प्रकाशन, वाराणसी।*

[2] *सि. शि. १.१३, १५, १७, २०*

ग्रन्थस्यास्य तत्त्वप्रदीपिकाख्यसंस्कृतव्याख्याकारेण श्रीमता मरितोण्टदार्येण (ख्रि. १७००) ग्रन्थारम्भे- "अत्र कलिकालप्रवेशानन्तरं लोकहितार्थं रेणुकगणेश्वर इति प्रसिद्धो रेवणसिद्धेश्वरः कुम्भसम्भवाय वीरशैवशास्त्रमुपदिष्टवान्। तदनन्तरं रेवणसिद्धेश्वरदृष्टिगर्भसम्भूतसिद्धरामेश्वरसम्प्रदायप्रसिद्धः सकलनिगमागमपारगः शिवयोगीश्वर इत्यभिधानवान् कश्चित् माहेश्वरस्तद्रेणुकागस्त्यसंवादं निर्विघ्नेन स्वशिष्यान् बोधयितुं स्वमनसि कृतसकलसिद्धान्त- श्रेष्ठनिगमागमैक्यगर्भीकारलक्षणस्वेष्टदेवता- नमस्काररूपं मङ्गलं शिष्यशिक्षार्थं सप्तभिः श्लोकैर्निबध्नाति"[१] इत्यवतरणिकायां ग्रन्थकारः शिवयोगिशिवाचार्यो रेवणसिद्धेश्वरवरप्रसादेनोत्पन्नस्य सिद्धरामेश्वरस्य वंशज इति प्रतिपादितम्।

अत्रेदमवधेयम्- तत्र तावन्महाराष्ट्रप्रान्ते विद्यमानो 'सोल्लापुरम्' इत्याख्ये पत्तने मुद्दगौड-सुग्गलदेवीत्याख्यौ दम्पती आस्ताम्। षष्टिवर्षे वयसि ताभ्यां श्रीरेवणसिद्धेश्वराख्यस्य वीरशैवाचार्यस्याशीर्वादविशेषेण सिद्धरामेश्वराख्यः पुत्रः सञ्जातः। स च ख्रि. १२०० तमाब्दे सिद्धरामशिवयोगीति नाम्ना प्रसिद्ध आसीत्[२]। स कन्नडभाषायां स्वानुभवपद्यानि लिलेख। तान्यधुना 'सिद्धरामेश्वरवचनगलु' इति नाम्ना प्रथितानि सन्ति। श्रीमरितोण्टदार्यः (ख्रि. १७००) सिद्धान्तशिखामणेर्व्याख्यानावसरे कविवंशे समागतं 'मुद्ददेवः' इति नाम दृष्ट्वा, स च पूर्वोक्तस्य सिद्धरामेश्वरस्य पिता मुदगौड स्यादिति निर्णीय "तस्यासीन्नन्दनः शान्तः सिद्धनाथाभिधः शुचिः"[३] इति श्लोकस्य व्याख्यानावसरे- "तस्य मुद्ददेवस्य....- सिद्धानाथाभिधः सिद्धरामेश्वराभिधासंयुक्तः सिद्धनाथाचार्याख्यो नन्दनः कुमार आसीदभवदित्यर्थः"[४] इति मुद्ददेवस्य पुत्रं सिद्धनाथं सिद्धरामेश्वर इति व्याख्यातवान्। पुनश्च सः-

> तस्य वीरशिवाचार्यशिखारत्नस्य नन्दनः।
> अभवच्छिवयोगीति सिन्धोरिव सुधाकरः।।[५]

---

[१] सि. शि. तत्त्व. अवतरणिका।

[२] 'सिद्धराम शिवयोगि' एम्. जी. कोट्रशेट्टिविरचितः कन्नडशोधप्रबन्धः, पृ. ६९-८५ कर्नाटक वि. वि. प्रकाशनम्, १९७५ ई.।

[३] सि. शि. १.१७

[४] सि. शि. तत्व. १.१७

[५] सि. शि. १.२०

इत्यस्य श्लोकस्य व्याख्याने- "सिद्धनाथाचार्यस्य नन्दनः कुमारः सिन्धोः समुद्रस्य सुधाकर इव शिवयोगीत्यासीत् प्रसिद्धो जात इत्यर्थः"[१] इति सिद्धरामेश्वराभिधस्य सिद्धनाथस्य सुतोऽयं शिवयोगिशिवाचार्य इत्यवधार्य सिद्धरामेश्वरवंशोत्पन्नत्वेन शिवयोगिशिवाचार्यं प्रतिपादितवान्।

अनेन मरितोण्टदार्याभिप्रायेण श्रीसिद्धान्तशिखामणेः ग्रन्थकर्तुश्च कालः द्वादशशताब्दीयेभ्यो सिद्धरामेश्वरबसवेश्वरादिभ्योऽर्वाचीन इति प्रतीयते; किन्तु कविकालवंशविषयकोऽयं मरितोण्टदार्यस्य पक्षो न क्षोदक्षम इति वीरशैवविदुषामाशयः।

तत्र डॉ. ज. च. नि. महाभागाः- "मरितोण्टदार्यवचनानुसारं मुद्ददेवस्य पुत्रः सिद्धनाथ एव सिद्धरामेश्वरः, तत्पुत्रश्च शिवयोगिशिवाचार्य इति निर्णेतुं न शक्यते। यतो हि सोल्लापुरसिद्धरामेश्वरस्त्वविवाहितः, तस्मात् तस्य कथं पुत्रसम्भवः? यदि सिद्धरामेश्वर एव शिवयोगिशिवाचार्यस्य पिता स्यात्, तर्हि शिवयोगिशिवाचार्यः स्वपितुर्नामोल्लेखने 'सिद्धरामः' इत्येव वक्ष्यति स्म, न तु 'सिद्धनाथः' इति। न चैवं करणेन छन्दोभङ्गशङ्कालवलेशोऽपि। तथा हि- "सिद्धनाथाभिधः शुचिः" इति वक्तव्ये 'सिद्धरामाभिधः शुचिः' इति वक्तुमर्हति स्म। किञ्च, सोल्लापुरीयसिद्धरामेश्वरस्य पितुर्नाम मुद्दगौडः, न तु मुद्ददेवः। तस्मात् किञ्चिन्नामसाम्यमवलोक्यैवं प्रतिपादनं नोचितम्।

यदि च शिवयोगीति प्रसिद्ध आचार्य एव सिद्धरामेश्वरः, ग्रन्थकारस्य प्रपितामह इत्युच्यते, तर्हि तदप्ययुक्तम्; यतो हि शिवयोगिशिवाचार्यो ग्रन्थऋणस्योल्लेखनावसरे-

आलोक्य शैवतन्त्राणि कामिकाद्यानि सादरम्।
वातुलान्तानि शैवानि पुराणान्यखिलानि तु।।[२]

इत्यादिश्लोकानां प्रतिपादनप्रसङ्गे स्वप्रपितामहस्य वचनशास्त्रमपि दृष्टवानिति वक्ष्यति स्म; तन्नोक्तम्, तस्मात् शिवयोगीति विख्यातो ग्रन्थकारवंशमूलपुरुषोऽपि न सोल्लापुरसिद्धरामेश्वरः। तदेवं ग्रन्थारम्भे शैवागमानां शैवपुराणानां नामोल्लेखनेन, वचनशास्त्रस्य चानुल्लेखनेनाऽयं सिद्धान्तशिखामणिकारः शिवयोगी शिवाचार्यो वचनशास्त्रकर्तृभ्यः सिद्धरामेश्वर-बसवेश्वरादिभ्योऽपि प्राचीन इत्यवधार्यते।

अपि च, शिवयोगिशिवाचार्यः स्ववंशवर्णने ग्रामस्य मातुर्वा नाम नोक्तवान्। अतोऽस्य वंशक्रमोऽयं न गृहस्थाश्रमिकः अपि त्वौत्तराश्रमिकाचार्यपरम्परानुवर्तीति भवितुमर्हति। किञ्च-

---

[१] *सि. शि. तत्त्व. १.२०*

[२] *सि. शि. १.२५*

येन रक्षावती जाता शिवभक्तिः सनातनी।
बौद्धादिप्रतिसिद्धान्तमहाध्वान्तांशुमालिना।।[१]

इत्यनेन श्लोकेन शिवयोगिशिवाचार्यस्य समये बौद्धादिधर्माणामधिकः प्रसार आसीत्, तान्निरासायाऽयं ग्रन्थमिमं प्रणिनायेति ज्ञायते। द्वादशाब्दीयसिद्धरामेश्वर-बसवेश्वरादिसमये कर्णाटकप्रदेशे बौद्धमतस्य प्राबल्यं नासीदेव। तस्मादयं ग्रन्थकारो बसवेश्वरादिशिवशरणेभ्यः प्राचीन इति निर्णये न किमपि काठिन्यम्।[२]

मैसूरस्याऽऽस्थानविद्वान् पं. एन्. आर्. करिबसवशास्त्री- "ग्रन्थस्यास्य कर्ता शिवयोगिशिवाचार्यः पीठिकायां वंशानुक्रमं प्रतिपादितवान्। तावता तस्य कालो देशो वा क इति न स्पष्टमवगम्यते। सोल्लापुरसिद्धरामेश्वरस्य वंशज इति कथने न किञ्चित् प्रबलं प्रमाणम्। तथाप्ययं ग्रन्थो बसवादिभ्यः प्राचीनः"[३] इत्युक्त्वा पूर्वोक्तस्य मरितोण्टदार्यवचनस्यानौचित्यं सूचयन् स्वीयं सूक्तमभिप्रायं प्रकटितवान्।

अपि च, वीरशैवसाहित्येतिहाससंशोधने विख्यातः श्री आर्. सि. हिरेमठमहोदयः 'महायात्रे' इत्याख्ये ग्रन्थे मुद्दवेव-मुद्दगोडयोः, सिद्धनाथ-सिद्धरामयोश्च चरित्रं पृथक् पृथक् विमृश्य तयोः परस्परभिन्नत्वमुपस्थापितवान्। तथा हि-

तस्य वंशे समुत्पन्नो मुक्तामणिरिवामलः।
मुद्ददेवाभिधाचार्यो मूर्धन्यः शिवयोगिनाम्।।

मुद्दानात् सर्वजन्तूनां प्रणतानां प्रबोधतः।
मुद्ददेवेति विख्याता समाख्या यस्य विश्रुता।।[४]

इति श्रीसिद्धान्तशिखामणिवचनेन मुद्दवेव आचार्यः शिवयोगिनामग्रगण्यः शास्त्रवेत्ता, तदुपदेशकश्चासीदिति ज्ञायते। सिद्धरामेश्वरपिता मुद्दगौड एतादृशविशेष-गुणगणविभूषित आसीदिति तच्चरित्रप्रतिपादके कस्मिंश्चिदपि ग्रन्थे नोक्तम्; स तु कृषिकार्यनिरतः, शास्त्रज्ञानानभिज्ञो मूढाचारविश्वासिक इत्यादिरूपेणोपवर्णितः। सिद्धनाथश्च प्रसिद्धशिवाचार्यवंशसमुत्पन्नः, शिवागमोक्तशिवज्ञानविभूषितः,

---

[१] *सि. शि. १.२३*

[२] *डॉ. ज. च. नि. कृता कन्नडमणिकान्तिपीठिका, पृ. १६-२०; सन्मार्गपुस्तकमाला निडुमामिडि १९५१ ई. ।*

[३] *सि. शि. कन्नडप्रस्तावना, पृ. ५, ग्रन्थप्रसारमण्डली, मैसूर १९२१ ई. ।*

[४] *सि. शि. १.१५-१६*

शिवभक्तिसंरक्षकः, शिवसिद्धान्तनिर्णेता, विद्वदग्रगण्यः, वीरशैवधर्ममार्गप्रबोधक आसीत्। सिद्धरामेश्वरस्तु 'कुडिवक्कलिग' इत्याख्यजातिविशेषसमुत्पन्नः, शिवभक्तिसम्पन्नः, श्रीशैलमल्लिकार्जुनकृपापात्रं, सरोवरनिर्माणादिजनोपकारकार्यनिरतः आसीदिति तच्चरित्रेण ज्ञायते। एवं मुद्ददेवमुद्दगौडयोः, सिद्धनाथ-सिद्धरामयोश्च चरित्रविषयेऽजगजान्तरभेदो दरीदृश्यते। तत्मात् चरित्रविषये विद्यमानमीदृशं भेदमविज्ञाय किञ्चिन्नामसाम्यमात्रेण तयोरेकत्वकल्पना न युक्ता।[1]

एतदतिरिक्तं सिद्धरामेश्वरचरित्रलेखकेषु कविषु न केनापि सिद्धरामेश्वरः सिद्धनाथभिधानेन सम्बोधितः। यदि सिद्धरामेश्वर एव सिद्धनाथः स्यात्, तर्हि-

तस्यासीन्नन्दनः शान्तः सिद्धनाथाभिधः शुचिः।
शिवसिद्धान्तनिर्णेता शिवाचार्यः शिवात्मकः।।

वीरशैवशिखारत्नं विशिष्टाचारसम्पदम्।
शिवज्ञानमहासिन्धुं यं प्रशंसन्ति देशिकाः।।

यस्याचार्यकुलाज्जाता सतामाचारमातृका।
शिवभक्तिः स्थिरा यस्मिन् जज्ञे विगतविप्लवा।।[2]

इत्येवंरूपेण स्वपितुः सिद्धनाथस्योपवर्णनप्रसङ्गे शिवयोगिशिवाचार्यो वचनशास्त्ररचनाविषयमवश्यमेवोल्लिखेत। तस्मादयं सिद्धनाथो न सिद्धरामेश्वरः, न वा शिवयोगिशिवाचार्यवंशस्थः अपि तु तद्भिन्नः ततोऽपि प्राचीनश्च।

ग्रन्थकालनिर्णये श्रीदासगुप्तानामनवधानता

श्रीसिद्धान्तशिखामणेः कालनिरूपणावसरे डॉ. एस. एन. दासगुप्तमहाभागाः 'सिद्धान्तशिखामणौ बसवेश्वरस्योल्लेखो वर्तते, श्रीपतिश्च स्वकीये श्रीकरभाष्ये सिद्धान्तशिखामणिं प्रमाणत्वेनोल्लिखितवान्। अतः सिद्धान्तशिखामणिर्बसवेश्वरादनन्तरं श्रीपतेश्च प्राग् निर्मितः स्यात्''[3] इति तर्कद्वयमुपस्थापितवन्तः। तयोर्मध्ये श्रीपतिः श्रीकरभाष्ये सिद्धान्तशिखामणेः श्लोकान् प्रमाणत्वेनोल्लिखितवानित्ययं ग्रन्थः श्रीपतेरपि प्राक्तन इति तर्कस्य सत्यत्वेऽपि सिद्धान्तशिखामणौ बसवेश्वरस्योल्लेखो वर्तते, अतोऽयं बसरेश्वरादर्वाचीन इति तर्कस्तु प्रमादपूर्ण इति वीरशैवविदुषामाशयः।

---

[1] *'महायात्रे' पृ. १२५-१२८ प्रसारांग कन्नड. वि. वि. हम्पि, १९९७ ई.।*

[2] *सि. शि. १.१७-१८*

[3] *A History of Indian Philosophy, Vol. 5, p. 44.*

तत्र श्री डॉ. चन्द्रशेखरशिवाचार्याः (इदानीन्तनकाशीज्ञानसिंहासनाधिपाः) 'सिद्धान्तशिखामणिसमीक्षायां तन्मतनिराकरणं कृतवन्तः। तथा हि श्रीदासगुप्ताः– "शिवनिन्दाकरस्य वध आवश्यक इति बसवेश्वरविचारः श्रीसिद्धान्तशिखामणावुल्लिखितः"[१] इत्युक्त्वा तत्प्रमाणत्वेन– अथ वीरभद्राचार–बसवेश्वराचारं सूचयन् भक्ताचारभेदं प्रतिपादयति–

> शिवनिन्दाकरं दृष्ट्वा घातयेदथवा शपेत्।
> स्थानं वा तत्परित्यज्य गच्छेद् यद्यक्षमो भवेत्।।[२]

इति सिद्धान्तशिखामणेरंशमुदाहृतवन्तः। उद्धृतांशे बसवेश्वरस्योल्लेखो न मूलग्रन्थेऽस्ति, किन्तु टीकाकारस्य मरितोण्टदार्यस्यावतरणिकायां वर्तते। बसवेश्वरस्य नामोल्लेखः किं मूलग्रन्थेऽस्ति, उत टीकाकारस्यावतरणिकायामिति सम्यगपर्यालोच्यैव डॉ. एस. एन. दासगुप्तमहाभागस्य प्रतिपादनं दृष्ट्वा कथं वा पर्यालोचका न परिहसेयुः। अतः सिद्धान्तशिखामणिर्बसवेश्वरादर्वाचीन इति श्रीदासगुप्तवचनं प्रमाणशून्यं प्रमादपूर्णं चास्ति। तस्मात् सिद्धान्तशिखामणेः कालविषये 'ग्रन्थोऽयं बसवेश्वरादर्वाचीनः' इति दासगुप्तोक्तिर्न स्वीकारार्हा। अपरं च–

> प्रसादाद् देवताभक्तिः प्रसादो भक्तिसम्भवः।
> यथैवाङ्कुरतो बीजं बीजतो वा यथाङ्कुरः।।[३]

----आप जिस पर प्रसन्न हैं, वही धन्य है, जग में पावन है; कूडल संगमदेव[४]।

इत्यस्मिन् श्रीबसवेश्वरवचने प्रमाणत्वेनोदाहृतः संस्कृतश्लोकः सिद्धान्तशिखामणेर्नवमपरिच्छेदस्यैकादशश्लोको वर्तते। तस्मात् सिद्धान्तशिखामणिर्बसवेश्वरात् प्राचीन इत्यत्रोपर्युक्तं श्रीबसवेश्वरस्य वचनमेव प्रबलं प्रमाणम्[५]।

किञ्च, श्रीबसवेश्वरस्य भागिनेयः श्रीचन्नबसवेश्वरोऽपि (खि. १२००)–

---

[१] तत्रैव, *Vol. 5, p. 45*

[२] सि. शि. ९.३६

[३] सि. शि. ९.११, यद्यप्यत्र 'प्रसादादेव सा भक्तिः' इति वर्तते, तथापि स पाठभेदो भवितुमर्हति।

[४] 'बसवेश्वर के वचन' भा. १, पृ. १०७, कर्नाटकविश्वविद्यालयप्रकाशनम् १९७६ ई.।

[५] सि. शि. समीक्षा, पृ. ४१-४२

"साधकदेशेयल्लि जातियनरसलहुदल्लदे....
शिवभक्तिसमावेशे क्व जातिपरिकल्पना।
इन्धनेष्वग्निदग्धेषु को वा भेदः प्रकीर्त्यते।।

एन्दुदागि ज्ञानसिद्धशिवभक्तरल्लि पूर्वकुलवनरसुव अरेमरुळरनेनॆंबे कूडल चन्नसंगमदेव[१]।।

इति वचने सिद्धान्तशिखामणिश्लोकमुद्धृतवान्। अत्रत्योऽयं श्लोकः श्रीसिद्धान्तशिखामणेरेकादशपरिच्छेदस्य पञ्चपञ्चाशत्तमः श्लोकोऽस्ति।

अपि च, श्रीदेवरदासिमय्य-बसवेश्वर-अक्कमहादेवी-अल्लमप्रभुदेव-आदय्यप्रभृतीनां द्वादशशताब्दीयवीरशैववचनकाराणामुपरि श्रीसिद्धान्तशिखामणेः प्रभाव आसीदिति डॉ. ज. च. नि. महाभागाः सोदाहरणं प्रतिपादितवन्तः[२]। तस्मात् सर्वविधपर्यालोचनेनेदं ज्ञायते यत् सिद्धान्तशिखामणिर्बसवेश्वरादिशिवशरणेभ्यः प्रागेव प्रमाणग्रन्थत्वेन प्रसिद्ध आसीदिति।

श्रीकरभाष्यात् सिद्धान्तशिखामणेः प्राचीनत्वम्

श्रीसिद्धान्तशिखामणिर्बसवेश्वरात् प्राचीन इति त्वेतावता पर्यालोचनेन निश्चितम्, किन्तु ततः कियत् प्राचीनमिति जिज्ञासा सहजा। तत्रभवन्तः श्रीपतिपण्डिताराध्य-भगवत्पादाः श्रीकरभाष्ये- "पवित्रं ते"[२] इचि ऋग्वेदमन्त्रस्य-

ऋगित्याह पवित्रं ते विततं ब्रह्मणस्पते।
तस्मात् पवित्रं तल्लिङ्गं धार्यं शैवमनामयम्।।

....

दीक्षया रहितः साक्षान्नाप्नुयाल्लिङ्गमुतमम्।।[३]

इति सिद्धान्तशिखामणौ श्रीरेणुकाचार्येण लिङ्गधारणपरत्वेन निर्देशाद्[४] इत्याद्यनेकस्थलेषु सिद्धान्तशिखामणेः श्लोकान् सादरं प्रमाणत्वेनोपस्थापितवन्तः। एतेन श्रीपतेरपि प्रागयं ग्रन्थः प्रामाणिकत्वेन प्रसिद्ध आसीदिति सुनिश्चितम्।

श्रीपतिपण्डिताराध्यस्य कालविषये कश्चन-विवादो वर्तते। तदत्र प्रस्तूयते

---

[१] चेन्नबसवेश्वर वचनसम्पुट. व. स. १७३३

[२] मणिमुकुरप्रभायाः कन्नडभाषाया अनुबन्धः, पृ. ११७-१२०, सम्पादकः, पञ्चाक्षरी-हिरेमठः, ताराग्रन्थप्रकाशनम्, धारवाड, १९७६ ई.।

[३] सि. शि. ६.३७-३९

[४] ब्र. सू. श्रीकर १.१.१

सङ्क्षेपेण। श्रीकरभाष्ये तत्र तत्र नीलकण्ठ[१]-भट्टभास्कर[२]-श्रीकण्ठ-रामानुजादीनां[३] नामग्रहणपूर्वकं तदीयसिद्धान्तानामभिमतत्वस्यानभिमतत्वस्य च प्रतिपादितत्वादयं श्रीपतिरेतेभ्योऽर्वाचीन इति ज्ञायते।

तत्र श्रीनीलकण्ठस्य समयावधारणे साधनानुपलब्ध्या तस्यातीव प्राचीनत्वमङ्गीक्रियते। श्रीभट्टभास्करस्य सिद्धान्तः कुसुमाञ्जलिकारेण ख्रि. ९८० तमाब्दीयेनोदयनाचार्येण विमर्शित इति श्रीभास्करस्य समयः ख्रि. ९०० तमाब्द इति डॉ. सर्वपल्लिराधाकृष्णन् महोदयाः कथयन्ति[४]। तैरेव श्रीरामानुजस्य समयः ख्रि. १०२७ तमाब्द इति निरूपितम्।[५] चिदिरेमठस्य श्रीवीरभद्रशर्ममहोदयाः श्रीकण्ठाचार्यस्य कालः ख्रि. १०६४ तमाब्द इति समर्थयन्ति।[६]

तदेवं श्रीकण्ठादिभ्योऽर्वाचीनस्य श्रीपतेः समय कः स्यादिति जिज्ञासायां श्री टी. एस. नारायणशास्त्रिमहाभागाः प्राचीनशिलाशासनाधारेण श्रीपतेः कालः ख्रि. १०७२ तमाब्द इति निर्णीतवन्तः।[७] आचार्यबलदेवोपाध्यायमहोदया अपि तस्य कालः ख्रि. १०६० इति निरूपितवन्तः[८]। तदेतावता श्रीकरभाष्यस्य समयः ख्रि. एकादशशततमाब्देति निश्चीयते।

सी. हयवदनरावस्य भ्रमनिरासः

तत्र बेङ्गलोरनिवासिनो मध्वमतानुयायिनः सी. हयवदनरावमहोदयाः

---

[१] *"नीलकण्ठभगवत्पाद-भट्टभास्कर-घण्टानाथ-ज्योतिर्नाथादिपूर्वाचार्यैश्छान्दोग्यभाष्ये.... व्याख्यातम्" । (ब्र. सू. श्रीकर १.१.२१)*

[२] *अत्र शिवाग्रगण्यश्रीकण्ठशिवाराध्यकृतब्रह्मसूत्रमीमांसाभाष्ये विशिष्टद्वैतं स्वाभिप्रेतत्वेन साधितम् । (ब्र. सू. श्रीकर २.१.२२)*

[३] *चिदचिदीश्वरपरिभाषाप्रधानरामानुजशास्त्रं वेदमूलकत्वाभावादवैदिकमिति घण्टाघोषः । (ब्र. सू. श्रीकर २.२.४१)*

[४] *Indian Philosophy, Vol. 2, p. 670 Published by D.R. Bhagi, Bombay 1977.*

[५] *तत्रैव. Vol. 2; p. 665.*

[६] *श्रीकण्ठाचार्यकालोऽपि ख्रि. १०४० तमाब्द इत्यघोरशिवाचार्यकृते महोत्सवविधौ स्वकालस्य ख्रि. श. ११५४ तमाब्दत्वेन निर्देशात् श्रीकण्ठस्य स्वप्रपितामहत्वकथनाच्च निश्चीयते (श्रीकरभाष्यचतुःसूत्रीपीठिका, पृ. ४, जंगमवाडीमठ-प्रकाशनम्-वाराणसी, १९५६ ई. ।*

[७] *The Indian Review vol. 16, May 1915 N.S.*

[८] *भारतीयदर्शनम्, पृ. ४, चौखम्भा ओरियन्टालिया १९७६ ई. ।*

श्रीकरभाष्ये- “मध्वाद्वैतक्षपणकतार्किकादयः[1] (तार्किकादिभिः) जीवानां विभुत्वाङ्गीकारात् तन्निरासार्थमेतदधिकरणप्रारम्भः”[2] इत्यत्र मध्वशब्दं दृष्ट्वा श्रीकरभाष्यं मध्वाचार्यादर्वाचीनमिति साधयन्ति[3]। किन्त्वत्र विद्यमानो मध्वशब्दः प्रक्षिप्तः इति श्री १००८ काशीजगद्गुरु डॉ. चन्द्रशेखरशिवाचार्यमहास्वामिनः सप्रमाणं पर्यालोच्य हयवदनरावस्याभिप्रायं निराकृतवन्तः। तथा हि- “श्रीपतिपण्डिताराध्याः “उत्क्रान्तिगत्यागतीनाम्”[4] इत्यस्य बादरायणसूत्रस्य भाष्यलेखनावसरे जीवात्मनो व्यापकत्वे तस्योत्क्रान्तिगत्यागतीनां सम्भवाभावादात्मनोऽणुत्वमेव स्वीकर्तव्यमिति सिद्धान्तयितुमात्मनो विभुत्ववादिनां मतं निरास्यन्। तत्राद्वैततार्किकादिभिरात्मनो विभुत्वाङ्गीकारेण तेषां निरास्यत्वसम्भवेऽपि मध्वस्य तदसम्भवः तत्राप्यात्मनोऽणुत्व-स्वीकारात्। तदुक्तं मध्वाचार्येण- “हेतुनां सकाशादणुरेव”[5] इति, अणोरपि जीवस्य सर्वशरीरव्याप्तिर्युज्यते, यथा हरिचन्दनविप्लुष एकदेशपतितायाः सर्वशरीरव्याप्तिः”[6] इति च।

तस्मात्- “मध्वाद्वैतक्षपणकतार्किकादयः (तार्किकादिभिः) जीवानां विभुत्वाङ्गीकारात् तन्निरासार्थमेतदधिकरणप्रारम्भः” इत्यस्मिन् श्रीपतिपण्डिताराध्यवचने विद्यमानो मध्वशब्दोऽप्रासङ्गिकोऽसमञ्जसश्चेति तस्य प्रक्षिप्तत्वं सुलभवेद्यमेव। ऐवमेवान्यत्र तत्र तत्र श्रीकरभाष्ये[7] विद्यमानो मध्वशब्दः प्रक्षिप्त इत्येव पर्यवस्यति[8]।

अपरञ्च, श्रीकरभाष्यस्य मातृकारूपेषु लिखितपुस्तकेषु मध्वपदं न कुत्रापि दृश्यत इति श्री एम.जी. नञ्जुण्डाराध्यमहोदयाः प्रतिपादयन्ति[9]। चिदिरेमठस्य श्रीवीरभद्रशर्ममहोदयैश्च- “शङ्कर-रामानुजभाष्यवाक्यानि यथा श्रीकरभाष्ये यथामूलं दृश्यन्ते, न तथा मध्वभाष्यवाक्यमेकमप्युपलभ्यते। अत्र भाष्ये दृश्यमानेऽपि

---

[1] अत्र प्रथमान्त-पाठस्थाने तृतीयान्तः पाठ उचितः प्रतिभाति।

[2] ब्र. सू. श्रीकर. २.३.१८, पृ. २६३

[3] सी. हयवदनरावकृता श्रीकरभाष्यस्याङ्ग्लभाषामयभूमिका, पृ. ९५-९८, बेंगलोर प्रेस बेंगलोर १९३६ ई.।

[4] ब्र. सू. २.३.१८

[5] ब्र. सू. पूर्णप्रज्ञभाष्यम् २.३.२०

[6] तत्रैव २.३.२४

[7] ब्र. सू. श्रीकर २.२.४१ पृ. २२७, २.३.४० पृ. २७३

[8] सि. शि. समीक्षा पृ. ४३-४४

[9] श्रीकरभाष्यभूमिका, पृ. १२१, मैसूरविश्वविद्यालयप्रकाशनम् १९७७ ई.।

द्वैतखण्डने न तन्मध्वाचार्यमतमित्येव परिगण्यते, किन्तु प्राचीनद्वैतमित्येवावगन्तव्यम्"[१] इति श्रीकरभाष्यगतमध्वशब्दस्य प्रक्षिप्तत्वमेव समर्थितम्। श्री डॉ. आर्. सि. हिरेमठमहोदयाः हयवदनरावसम्पादिते श्रीकरभाष्ये विद्यमानस्य मध्वशब्दस्यानावश्यकत्वमसमञ्जसत्वञ्च विमर्शपूर्वकं निरूप्य तस्य प्रक्षिप्तत्वं साधितवन्तः[२]॥

श्रीमध्वाचार्यः ख्रि. १२ तमशताब्दीय इति डॉ. राधाकृष्णन्महोदयाः प्रतिपादयन्ति[३]। श्रीपतेश्च समयः ख्रि. ११ तमशताब्दीति पूर्वमेव प्रतिपादितमिति श्रीपतेर्मध्वादर्वाचीनत्वं न सम्भवति।

तदेवं श्रीकरभाष्यस्य ख्रि. ११ तमशताब्दीभवत्वनिश्चयेन श्रीकरभाष्ये प्रमाणत्वेनोदाहृतः सिद्धान्तशिखामणिस्ततोऽपि प्राचीन इति निर्णीयते।

अपरं च डॉ. ज. च. नि. महाभागाः– "ग्रन्थकाराः शिवयोगिशिवाचार्याः ख्रि. अष्टमशताब्द्यां सालुहट्टि (सालोटगि) विद्यापीठे प्राचार्या आसन्निति श्रूयते। तदिदानीं बीजापुरमण्डलान्तर्गते 'इण्डी' नगरसमीपे विद्यते। तत्र शिवयोगीश्वरस्य समाधिरेको वर्तते" इति प्रतिपादयन्ति[४]। एतेन सिद्धान्तशिखामणे रचनाकालोऽप्यष्टमशताब्दीति निश्चीयते।

किञ्च, गुरुवंशकाव्ये, शिवतत्त्वरत्नाकरे च रेणुकभगवत्पादानामपरावतारिणा रेवणसिद्धाख्येन महायोगिनाऽऽद्यशङ्कराचार्याय चन्द्रमौलीश्वरलिङ्गं रत्नगर्भगणपतिञ्च प्रदत्त इत्यैतिह्यं वर्तते। विषयममुं शिवयोगिशिवाचार्यो न जानाति। अन्यथा ईशानशिवगुरुचतुर्मुखबोम्मरसादयो यथा स्वकीयेषु रेणुकचम्पू–रेवणसिद्धेश्वरपुराणादिषु श्रीरेणेकुभगवत्पादानां लीलानिरूपणावसरे रेवणसिद्धमहायोगिना आद्यशङ्कराचार्याय चन्द्रमौलीश्वरलिङ्गप्रदानघटनां निरूपितवन्तस्तथा शिवयोगिशिवाचार्योऽपि सिद्धान्तशिखामणौ विषयममुं किमर्थं न लिखितवान्। अतः शिवयोगिशिवाचार्य आद्यशङ्कराचार्यादपि प्राचीन इति प्रतीयते। एतेन सिद्धान्तशिखामणेः समयः ख्रि. अष्टमशताब्दात् प्राचीन इति निश्चीयते। किञ्च, काशीनाथशास्त्रिणः–

---

[१] *श्रीकरभाष्यचतुःसूत्री (पीठिका, पृ. १०) जङ्गमवाडीमठ–प्रकाशनम्।*

[२] *'महायात्रे' पृ. १४२–१४४ कन्नड. वि. वि. १९९७ ई.।*

[३] *Indian Philosophy Vol. 2, p. 738.*

[४] *सिद्धान्तशिखामणेः सौन्दर्यदर्शनस्य कन्नडपीठिका, पृ. १०–१२, १९७६ ई.।*

येन रक्षावती जाता शिवभक्तिः सनातनी।
बौद्धादिप्रतिसिद्धान्तमहाध्वान्तांशुमालिना।।[1]

इत्यस्मिन् श्लोके शिवयोगिशिवाचार्यः स्वात्मानं बौद्धादिप्रतिद्वन्द्विभिः सनातनशिवभक्ते रक्षकं प्रतिपादितवान्। भरतखण्डे च द्विसहस्रवर्षपूर्वं बौद्धधर्मस्य प्रबलः प्रचार आसीदिति शिवयोगिशिवाचार्यस्य तत्कृतश्रीसिद्धान्तशिखामणेश्च कालो द्विसहस्रवर्ष प्राचीन इतीमामपि युक्तिं प्रदर्शयन्ति।[2] किन्त्विदं न तदर्थं प्रबलं प्रमाणम्।

तदेवं श्रीसिद्धान्तशिखामणिर्द्विसहस्रवर्षात् प्राचीन इति सम्भाव्यमानत्वेऽपि ख्रि. अष्टमशताब्दात् प्राचीन इति तु निश्चप्रचमेवास्माकं प्रतिभाति।

शिवयोगिशिवाचार्यस्य देशविचारः

शिवयोगिशिवाचार्यः सिद्धान्तशिखामणौ कुत्रापि स्वदेशस्य नाम नोल्लिखितवान्। अथापि स्वपितामहो मुद्ददेव इति कथनेनाऽयं कर्नाटकदेशीय इति पं. श्रीकाशीनाथशास्त्रिणामाशयः। ते कथयन्ति– "मुद्दशब्दः कन्नडभाषाया वर्तते। कन्नडभाषायामस्यार्थः 'प्रीतिः' इति भवति। ईदृशं कन्नडशब्दमेव मुदं ददातीति मुद्दः' इति व्युत्पाद्य–

मुद्दानात् सर्वजन्तूनां प्रणतानां प्रबोधतः।
मुद्ददेवेति विख्यातसमाख्या यस्य विश्रुता।।[3]

इति प्रतिपादितत्वादयं कर्नाटकदेशीय इति ज्ञायते।

उपदेशविधाने गीतायाः प्रभावः

यथा महर्षिर्वेदव्यासो भगवद्गीतायां तत्त्वोपदेशप्रारम्भात् प्राग्धार्तराष्ट्रपाण्डवयोर्युद्धसम्बद्धचारित्रिकविषयं भूमिकारूपेणोपस्थाप्य, अनन्तरमर्जुनव्यामोहोपशान्तये तत्त्वोपदेशारम्भं निरूपयति तथैवात्रापि श्रीसिद्धान्तशिखामणौ श्रीशिवयोगिशिवाचार्यः शिवस्तुतिशक्तिस्तुत्यनन्तरं पञ्चमपरिच्छेदं यावत् कैलासवर्णनम्, शिवशक्तिवर्णनम्, देवताततिकृतसेवावर्णनम्, परमेश्वरस्य राजव्यापारवर्णनम्, श्रीरेणुकं प्रति शिवादेशः, श्रीरेणुकगणेश्वरस्य लिङ्गावतारः, अगस्त्यस्य तदाश्रमस्य च वर्णनम्, रेणुकाचार्य-

---

[1] सि. शि. १ २३

[2] सिद्धान्तशिखामणेः प्रस्तावना, पृ. ७, काशीनाथग्रन्थमाला, मैसूर, १९७२ ई.।

[3] सि. शि. १.१६

स्यागस्त्याश्रमागमनम्, तत्पादपूजादिचारित्रिकविषयं च भूमिकारूपेणोपस्थाप्य, तत्पश्चान्नानागमश्रवणजनितसंशयग्रस्तस्यागस्त्यस्य संशयनिवारणार्थं शिवाद्वैततत्त्वोपदेशारम्भं विदधाति।

श्रीमद्भिः डॉ. चन्द्रशेखरशिवाचार्यभवत्पादैः– "यथा वेदान्तप्रस्थानत्रये प्रसिद्धा सकलोपनिषत्सारभूता गीता भगवता श्रीकृष्णेन महाभारतयुद्धक्षेत्रेऽर्जुनं प्रत्युपदिष्टा या च पुनः कृष्णार्जुनसंवादरूपेण महर्षिणा व्यासेन ग्रथितेति विज्ञायते, तथाऽयं सिद्धान्तशिखामणिरपि कामिकादिवातुलान्तानां शैवागमानां सारभूतो वीरशैवसिद्धान्तप्रतिपादको ग्रन्थो मुनिकुलतिलकाय अगस्त्याय भगवत्पादै रेणुकाचार्यैरुपदिष्टः। सोऽयमुपदेश आचार्यवर्येण श्रीमता शिवयोगिशिवाचार्येण रेणुक-अगस्त्ययोः संवादरूपेण ग्रथितो वर्तते। तदुक्तं श्रीमरितोण्टदार्येण–

> रेणुकागस्त्यसंवादं निगमागमविश्रुतम्।
> प्रदीपयति गुप्तार्थमुद्धृत्य शिवयोगिराट्।।[1] इति।

भगवता श्रीकृष्णेनोपदिष्टोपदेशः पद्यात्मक इति यथा स भगवद्गीतेति कथ्यते, तथाऽयं सिद्धान्तशिखामणिरपि पद्यात्मकत्वात् "रेणुकगीता" इत्याख्ययापि समाख्यायते।

किञ्च, भगवद्गीताया यथैकादशाध्याये भगवता श्रीकृष्णेनार्जुनाय विश्वरूपं प्रदर्शितम्, तथा सिद्धान्तशिखामणेरेकविंशतितमपरिच्छेदेऽपि विभीषणस्य प्रार्थनानुसारं युगपत् त्रिकोटिशिवलिङ्गसंस्थापनार्थं श्रीरेणुकभगवत्पादास्त्रिकोट्याचार्यरूपं परिधाय विभीषणाय विश्वरूपं प्रदर्शितवन्त[2] इतीयं रेणुकगीता श्रीमद्भगवद्गीतायास्तुल्यकोटिकेत्यत्र न कोऽपि सन्देहः"[3] इति प्रतिपादितम्। अनेन श्रीसिद्धान्तशिखामणेरुपदेशविधाने गीतायाः प्रभावो नूनमवगम्यते।

एवमुपदेशविधाने भगवद्गीतया प्रभावितोऽपि गीतायामर्जुनस्य सन्देहः सांसारिकस्वबन्धुमित्रादिमोहजनितः किन्तु श्रीसिद्धान्तशिखामणौ अगस्त्यस्य संशयस्तु नानागमश्रवणजनितः। श्रीसिद्धान्ततशिखामणौ अगस्त्यो रेणुकाचार्यं प्रार्थयन-

---

[1] *सि. शि. तत्व. प्र. व्या. उपो. पृ. १*

[2] *कोटित्रयं तु लिङ्गानां यथाशास्त्रं यथाविधि।*
त्रिकोट्याचार्यरूपेण स्थापितं तेन तत्क्षणे।। (सि. शि. २१.३३)

[3] *सि. शि. समीक्षां, पृ. ३४-३५*

उक्त्वा भवान् सकललोकमहोपकारं
सिद्धान्तसङ्ग्रहमनादृतबाह्यतन्त्रम् ।
सद्यः कृतार्थयितुमर्हति दिव्ययोगिन्
नानागमश्रवणवर्तितसंशयं माम्।।[१]

इति स्वसन्देहस्य शास्त्रसम्बद्धत्वं कथयति। तस्माद् भगवद्गीतागतस्वबन्धुमोहसम्बद्धसन्देहात् श्रीसिद्धान्तशिखामणिगतशास्त्रसम्बद्धसंशयस्य विशिष्टत्वादत्रत्यमुपदेशविधानं गीताप्रभावितमपि ततो विशिष्टत्वं भजते।[२]

प्रतिपादनशैली

विषयोपस्थापनपद्धतिरेवालङ्कारशास्त्रे शैलीत्यभिधीयते। ग्रन्थस्य रचयिता स्वीयाध्ययनेनाधिगतविषयान् नवनवोन्मेषशालिन्यां स्वप्रतिभायां निक्षिप्य, निजानुभवरसेन सुन्दरशब्दैर्ललितैर्वाक्यैश्च विशिष्टामाकृतिं प्रदाय ग्रन्थरूपेण प्रकटयति। ग्रन्थरचयितुरयं विशिष्टोऽनुभवो यदाकृतिं धत्ते, तदा भाषाया वैशिष्ट्यमेव शैलीत्याख्यायते।

रेणुकागस्त्यसंवादरूपेण विकसितं श्रीसिद्धान्तशिखामणिं ग्रन्थकारः श्रीशिवयोगिशिवाचार्यः स्वकीयैरालङ्कारिकपदैः, सुललितैरुदाहरणैः, सुन्दरप्रतिमाभिः, अनुपमोपमाभिः, सरलरूपकैः, हृदयस्पर्शिदृष्टान्तैश्चालङ्कृत्य आदर्शपूर्णया शैल्या तद् ग्रन्थं विरचयामास। विषयस्य सामान्यरूपेण निरूपणात् संवादरूपेण प्रतिपादनमधिकं सकलजनचेतोहारि, क्लिष्टतत्त्वावगमसाधकं च भवतीत्यनेन हेतुनाऽत्र पुराणागमपरम्परागतसंवादशैल्या विषयप्रतिपादनं विहितम्।

अत्र समन्वयात्मिका शैली समवलम्बिता, न तु निराकरणात्मिका। अत एवात्र–

सांख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा।
एतानि मानभूतानि नोपहन्यानि युक्तिभिः।।[३]

इति सांख्यादिदर्शनान्तरनिराकरणं न युक्तियुक्तमिति प्रतिपादितम्। किञ्च निगमागमयोः परस्परविरोधमपि ह्यत्र निराकृत्य तयोः सुन्दरसमन्वयं साधितम्।

---

[१] सि. शि. ४.५४

[२] द्र. सिद्धान्तशिखामणि–विचारदीप्ति; पृ. ९७, वीरशैव–अनुसंधान संस्थान, बैंगलोर १९९८

[३] सि. शि. ५.४

अत एव–

वेदसिद्धान्तयोरैक्यमेकार्थप्रतिपादनात् ।
प्रामाण्यं सदृशं ज्ञेयं पण्डितैरेतयोः सदा।।[1]

इति निगमागमयोः समप्रामाण्यं निगदितम्। एवमेवात्र ज्ञानकर्मणोः द्वैताद्वैतावस्थयोः, सगुणनिर्गुणस्वरूपयोः भेदाभेदपरश्रुतीनां च सुन्दरसमन्वयं विहितम्। तस्मादस्य ग्रन्थस्य समन्वयात्मिका शैली वर्तते।

विदितमेवेदं यत् श्रीसिद्धान्तशिखामणिरागमसम्मतवीरशैवदर्शनस्य सैद्धान्तिकतत्त्वनिरूपणपर इति। तदीदृशी समन्वयदृष्टिरागमतन्त्रशास्त्रैः प्रभावितेति प्रतीयते। आगमतन्त्रशास्त्रेषु स्वपक्षस्थापनमात्रं सुचारूरूपेण विहितम्। परपक्षनिराकरणे नास्तीव प्रवृत्तिर्दृश्यते तत्र। अत एव तन्त्रागमशास्त्रस्य विद्वन्मण्डलमण्डितोऽभिनवगुप्ताचार्यः क्षेमराजश्च शास्त्रविषयकवादविवादान् खण्डनमण्डनान् च न सहेते। तथा हि तत्राभिनवगुप्ताचार्यः "मुग्धमतेर्लोकस्य लौकिकवैदिकप्रभृतिदृष्टादृष्टप्रयोजनकर्तव्यविशेषविषयसन्ततिप्रवृत्तिभाजस्तादृशमृषापाण्डित्यप्रलापैर्भग्नरसा रुचिर्जायते, न च परमार्थतत्त्वे क्वचन अवतार्यते अप्रतिष्ठानात्। तस्मादीदृशेन स्वात्मनि उन्माददायिना परमपकुर्वता च किं पाण्डित्येन'[2] इति, क्षेमराजः "इत्यलं सुकुमारहृदयोपदेश्यजनवैरस्यदायिनीभिराभिः कथाभिः"[3] इति चापरमतखण्डनपुरःसरं स्वमतोत्कृष्टतास्थापनमसहमानौ निखिलजनानुकूलनिजमतप्रतिपादनमात्रस्योत्कृष्टत्वमङ्गीचक्रतुः, इदमेवागमसम्मतत्वात्। तस्मादस्मिन् श्रीसिद्धान्तशिखामणौ शैवागमोत्तरभागस्य वीरशैवसिद्धान्ततत्त्वप्रतिपादके आगमानां तादृशा परमा परम्पराऽपरपक्षानामनिराकरणरूपा समन्वयलक्षणा शैली निरूपिता।

ग्रन्थकारः शिवयोगिशीवाचार्यो निगमागमपुराणानां तत्त्वशास्त्राणां च यावान् विद्वानासीत्, तावानेव संस्कृतसाहित्यस्यापि प्रकाण्डविद्वान् आसीत्। निजसाहित्यज्ञानस्य परिचयं स श्रीसिद्धान्तशिखामणेस्तृतीयपरिच्छदगतकैलासवर्णन शिवशक्तिवर्णन–देवताततिकृतशिवसेवावर्णन–मलयाचलवर्णन–अगस्त्यतदाश्रम–वर्णनाद्यवसरे प्रददाति। निदर्शनाय केचन श्लोका एवात्र निर्दिश्यन्ते–

---

[1] *सि. शि. ५.१३*

[2] *ई. प्र. वि. वि. भा. १, पृ. ११*

[3] *स्पन्दनिर्णयः श्लो. ४, पृ. १६*

अखण्डारातिदोर्दण्डकण्डूखण्डनपण्डितः।
चिन्तामणिः प्रपन्नानां श्रीकण्ठः परमेश्वरः।।[१]

हारनीहारकर्पूरहरहासामलोदकैः ।
नित्यनैमित्तिकस्नाननियमार्थैस्तपस्विनाम् ।।

समुज्ज्वलज्जटाजालैस्तपःपादपल्लवैः ।
स्फुरत्सौदामिनीकल्पैर्ज्वालाजालैरिवानलम्।।[२]

इत्यादिश्लोकानामवलोकनेनात्र विहितस्य शब्दालङ्कारस्य परिज्ञानं भवति। अनेन साहित्यदृष्ट्याप्यस्मिन् ग्रन्थे विद्वन्मनःसम्मोहनकारी साहित्यशैली वर्तत इत्यवगम्यते। एवमस्मिन् ग्रन्थे प्रथमपरिच्छेदात् पञ्चमपरिच्छेदपर्यन्तं देवता-व्यक्ति-वस्तु-स्थानादीनां वर्णनावसरे शब्दालङ्कारपूरितसाहित्यस्य प्रयोगं कृत्वा, पुनस्तत्त्वो-पदेशप्रतिपादनावसरे साहित्यस्य जटिलपदप्रयोगं परित्यज्य, नितान्तं सरलानि सुन्दराणि च पदानि प्रयुक्तानि, येन जिज्ञासवः शिवाद्वैततत्त्वज्ञानं सुलभतयाऽध्ये-तुमवगन्तुं च शक्नुयुः।

यद्विषयमप्यत्रोपस्थाप्यते साधकास्तस्य, सुलभावगमनसमर्था भवेयुरिति, विपुलान्युदाहरणानि प्रदीयन्तेऽत्र। तथा हि-

अर्थहीना यथा वाणी पतिहीना यथा सती।
श्रुतिहीना यथा बुद्धिर्भावहीना तथा क्रिया।।[३]

इत्यत्र भावविरहिता क्रिया व्यर्थतां गच्छतीति विषयं समर्थयितुमर्थहीनवाण्याः, पतिहीनपत्न्याः, श्रुतिहीनबुद्धेश्च व्यर्थत्वमुदाहरणरूपेण प्रदर्शितम्।

लिङ्गाङ्गसामरस्यरूपकैवल्यसाधने ज्ञानकर्मसमसमुच्चयस्य हेतुत्व-प्रतिपादनावसरे-

अन्धपङ्गुवदन्योन्यसापेक्षे ज्ञानकर्मणी।
फलोत्पत्तौ विरक्तस्तु तस्मात्तद्द्वयमाचरेत्।।[४]

इत्यन्धपङ्ग्वोरुपमानेन ज्ञानकर्मणोः परस्परसापेक्षत्वं निर्दिष्टम्।

अत्रेदमाकूतम्- क्वचिज्जिगमिषुरन्धः पादविशिष्टोऽपि नेत्रविहीनत्वाद गन्तव्यस्थानमार्गज्ञानविरहितः लक्ष्यमधिगन्तुं नार्हति, पङ्गुस्तु गन्तव्यस्थानं तन्मार्ग

---

[१] सि. शि. ३.६५
[२] सि. शि. ४.२२,२८
[३] सि. शि. १६.१९
[४] सि. शि. १६.११

वा जानाति; अथापि तस्य पादविहीनत्वात् सोऽपि लक्ष्यमवाप्तुं न शक्नोति। अन्धः पङ्गुश्च परस्परं मिलित्वा यदि गच्छेतां, तर्हि उभावपि गन्तव्यस्थान-मवाप्नुतः, तथैव केवलं ज्ञानं पङ्गुरिव केवला क्रिया चान्ध इव लिङ्गाङ्गसामरस्य-रूपकैवल्याधिगमे न प्रभवतः, किन्तु परस्परं मिलित्वा ते प्रयोजके भवतः। एवमत्र मोक्षसाधने ज्ञानकर्मणोः परस्परसापेक्षत्वमन्धपङ्ग्वोः सुललितयोपमया- वबोधितः। अनेन वस्तुतोऽयं श्रीसिद्धान्तशिखामणिर्दार्शनिको ग्रन्थः, तथाप्यत्र प्रसङ्गानुसारमनेक-त्रोपमाद्यलङ्काराणां प्रयोगः कृत इति ज्ञायतेऽस्य ग्रन्थस्य साहित्यिकी गरिमाऽपि।

तत्र तावत् सिद्धान्तशिखामणावुपपादितसकलविषयनिरूपणमनुष्टुप्छन्दसा उपनिबद्धम्, अथापि परिच्छेदपरिसमाप्त्यादिविशेषस्थानेषु विभिन्नानां छन्दसां विभिन्नवृत्ताः प्रयुक्ताः सन्ति। विषयेऽस्मिन्नत्र वाल्मीकिरामायणमनुकृतम्। काव्यग्रन्थेष्वपीयमेव शैली समाद्रियते। तथा हि- "इत्युक्त्वा परमेश्वरः स भगवान् भद्रासनादुत्थितो....."[१] "नित्यानित्यविवेकिनः सुकृतिनः शुद्धाशयस्यात्मनो....."[२], "नित्ये निर्मलभावने निरूपणे निर्धूतविश्वभ्रमे....."[३], "मुक्तः संशयपाशतः स्थिरमना बोधे च मुक्तिप्रदे....."[४], "नित्ये निर्मलसत्त्वयोगिनि परे निर्वासने निष्कले....."[५], "इन्युक्ते गणनायकेन सहसा लिङ्गात्ततः शङ्करो....."[६], "श्रीवेदागमवीरशैवसरणिं श्रीषट्स्थलोद्यन्मणिं....."[७], इत्येते श्लोकाः शार्दूलविक्रीडितवृत्ते, "अनुगतसकलार्थे शैवतन्त्रैः समस्तैः....."[८], "किमिह बहुभिरुक्तैर्मन्त्रमेनं महात्मा....."[९] इति श्लोकद्वयं मालिनीवृत्ते, "शुद्धाचारः शुद्धभावो विवेकी....."[१०], "लीने तस्मिन् शाङ्करे स्वप्रकाशे....."[११] इति श्लोकद्वयं शालिनीवृत्ते, "एतावदुक्त्वा परमप्रबोध....."[१२]

---

१. सि. शि. ३.८८
२. सि. शि. ५.७७
३. सि. शि. १५.७१
४. सि. शि. १७.८६
५. सि. शि. १९.९७
६. सि. शि. २१.५१
७. सि. शि. २१.५४
८. सि. शि. १.३२
९. सि. शि. ८.४९
१०. सि. शि. १६.८४
११. सि. शि. २१.५३
१२. सि. शि. २०.७१

इति श्लोक इन्द्रवज्रावृत्ते, "यो लिङ्गधारी नियतान्तरात्मा....."[१], "नित्यानि काम्यानि निमित्तजानि....."[२], "सर्वेषु वर्णाश्रमसङ्गतेषु....."[३], "उक्ताखिलाचारपरायणोऽसौ....."[४], "अन्यत्र शम्भोरतिमात्रशून्यो....."[५], "शिवप्रसादे सति योगभाजः....."[६], "यः प्राणलिङ्गार्चनभावपूर्वै....."[७], "भक्तादिधर्मार्पितधर्मयोगात्....."[८], "न कर्मबन्धे न तपोविशेषे....."[९] इत्येते श्लोका उपजातिवृत्ते, "उक्त्वा भवान् सकललोकमहोपकारं....."[१०] इति श्लोको वसन्ततिलकवृत्ते, "श्रुत्वा लिङ्गाद्वचनमुदितशाङ्करं सानुकम्पं....."[११] इति श्लोको मन्दाक्रान्तावृत्ते, "शिवात्म-बोधैकरतः स्थिराशयः....."[१२] इति श्लोको वंशस्थवृत्ते चोपनिबद्धाः।

उपदेशविधानेऽत्र प्रथमं भक्तादिप्रमुखस्थलस्यावान्तरस्थलभेदान् तेषां नामनिर्देशनं च विधाय, तदनु तेषां लक्षणं तत्तन्स्यलगततात्त्विकं विषयं च सविस्तारं वर्ण्यते तथा हि– त्रयोदशपरिच्छेदे शरणस्थलं, तदवान्तरस्थलांश्च प्रतिपादनावसरे प्रथमम्–

स्थलमेतत् समाख्यातं चतुर्धा धर्मभेदतः।
आदौ शरणमाख्यातं ततस्तामसवर्जनम्।।
ततो निर्देशमुद्दिष्टं शीलसम्पादनं ततः।[१३]

इति शरणस्थलान्तर्गतस्य शरण–तामसनिरसन–निर्देश–शीलसम्पादनेत्यवान्तरस्थलचतुष्टयस्य नामानि विनिर्दिश्य, ततः–

सतीव रमणे यस्तु शिवे शक्तिं विभावयन्।
तदन्यविमुखः सोऽयं ज्ञातः शरणनामवान्।।[१४]

---

[१] सि. शि. ६.६३
[२] सि. शि. ७.६६
[३] सि. शि. ७.६७
[४] सि. शि. ९.९४
[५] सि. शि. १०.७७
[६] सि. शि. ११.७७
[७] सि. शि. १२.४८
[८] सि. शि. १४.४४
[९] सि. शि. १८.७६
[१०] सि. शि. ४.५४
[११] सि. शि. २१.५२
[१२] सि. शि. १३.३७
[१३] सि. शि. १३.३–४
[१४] सि. शि. १३.५

इत्यादिभिरष्टश्लोकैः शरणस्थलस्वरूपम्–

शिवासक्तपरानन्दमोदिना गुरुणा यतः।
निरस्यते तमो भावाः स तामसनिरासकः।।[1]

इत्यादिभिः श्लोकनवकैस्तामसनिरसनस्थलस्वरूपम्,

निराकृत्य तमोभागं संसारस्य प्रवर्तकम्।
निर्दिश्यते तु यज्ज्ञानं स निर्देश इति स्मृतः।।[2]

इत्याद्यष्टभिः श्लोकैः निर्देशस्थलस्वरूपम्,

जिज्ञासा शिवतत्त्वस्य शीलमित्युच्यते बुधैः।
निर्देश्ययोगादार्याणां तद्वान् शीलीति कथ्यते।।[3]

इत्यादिभिः सप्तभिः श्लोकैः शीलसम्पादनस्थलस्वरूपं च सविस्तरमाख्यातम्। एवंविधक्रमेणैवेतरस्थलास्तदवान्तरस्थलाश्च निरूपिताः। एवमत्र ग्रन्थकारः शिवयोगिशिवाचार्यः साहित्यिकेन सौन्दर्येण साकं सरलया सुलभया शैल्या श्रीसिद्धान्तशिखामणिं विरचितवानस्ति।

श्रीसिद्धान्तशिखामणेर्व्याख्याकाराः

श्रीसिद्धान्तशिखामणेर्व्याख्याकारेषु पद–वाक्य–प्रमाणपारावारधुरीणाः श्रीमरितोण्टदार्यमहाभागाः सर्वप्रथमाः। एते ख्रि. सप्तदशशततमाब्धामासन्निति ज्ञायते[4]। एतैर्महाभागैर्देववाण्यां तत्त्वप्रदीपिकाख्या व्याख्या विरचिता। अनया व्याख्यया युक्तः श्रीसिद्धान्तशिखामणिः प्रथमतः कन्नडाक्षरेषु मैसूरनगरनिवासिना स्व. वै. वीरसंगप्पमहोदयेन प्रकाशितः। तदनु च सोल्लापुरस्य स्व. वारदमल्लप्पमहाभाग अमुमेव ग्रन्थं भागद्वये देवनागरीलिप्यां ख्रि. १९०५ तमाब्दे प्रकाशितवन्तः। अयमेव ग्रन्थः ख्रि. १९९३ तमाब्दे डॉ. चन्द्रशेखरकपाले, वे. मू. श्रीशरणय्यशास्त्री, डॉ से. दे. पसारकर इत्येतेषां महाभागानां मराठीभाषानुवादेन साकं काशीजङ्गमवाडी मठस्य शैवभारतीभवनेन प्रकाशितः। ग्रन्थोऽयं श्रीमद्भिः काशीजगद्गु डॉ चन्द्रशेखरशिवाचार्यभगवत्पादैः सम्पादितोऽस्ति।

---

[1] सि. शि. १३.१३

[2] सि. शि. १३.२२

[3] सि. शि. १३.३०

[4] वीरशैवानन्दचन्द्रिकाया भूमिका, पृ. ३

श्रीवीरणाराध्यपौत्रः सिद्धय्यस्य च पुत्रः सोसलरेवणाराध्यः ख्रि १७ तमाब्दे सिद्धान्तशिखामणेः “सिद्धार्थबोधिनी” इत्याख्यां कन्नडव्याख्यां विरचयामास।

मैसूरमहाराजस्याऽऽस्थानविद्वांसो लिं. एन्. आर्. करिबसवशास्त्रिणः सिद्धान्तशिखामणेस्तात्पर्यदीपिकाख्यां कन्नडव्याख्यां कृतवन्तः। तट्टीकायुक्तः सिद्धान्तशिखामणिर्मैसूरनगरे ख्रि. १९१९ तमाब्दे प्रथममुद्रणम्, ख्रि. १९२१ तबाब्दे च द्वितीयमुद्रणमवाप्तवान्। तदिदानीं ख्रि. १९९२ तमाब्दे प्रो. सं. शि. भूसनूरमठ, डॉ. जि. एस्. घिवारि इत्येतयोः महाभागयोः सम्पादकत्वे, “वीरशैवसिद्धान्तशिखामणिः” इत्याख्यया श्रीमद्वीरशैवशिवयोगमन्दिरसंस्थया प्रकाशितः।

लिं. पं. श्रीकाशीनाथशास्त्रिमहाभागाः सिद्धान्तशिखामणिं भावप्रकाशाख्यया कन्नडव्याख्यया सनाथीकृत्य मैसूरनगरस्थश्रीपञ्चाचार्यविद्युन्मुद्रणालयतः प्रकटितवन्तः। सोऽयं लोकप्रियतया ख्रि. १९७२ तमाब्दं यावत् षड्वारं पुनर्मुद्रितोऽस्ति।

मैसूरनगरनिवासी श्री एम्. एल्. नागण्णमहोदयो मरितोण्टदार्यविरचिततत्त्वप्रदीपिकाख्याया व्याख्यायाः कन्नडानुवादं कृत्वा सिद्धान्तशिखामणिं कन्नडलिप्यां ख्रि. १९५९ तमाब्दे प्रकाशितवान्, मैसूरस्थात्मविचारमन्दिर इति प्रकाशनेन प्रकटितोऽयं ग्रन्थः प्रथमभागमात्रं वर्तते। अस्मिन् ग्रन्थे केवलं दशपरिच्छेदाः सन्ति।

साहित्यपारावारीणो डॉ. ज. च. नि. महाभागाः सिद्धान्तशिखामणेः सकलश्लोकान् कन्नडभाषायां पद्यरूपेणानुदितवन्तः। सोऽयं ग्रन्थः ‘मणिमुकुर’ इति नाम्ना प्रसिद्धः। एतदतिरिक्तमेभिः ‘जीवनसिद्धान्त’ इति नाम्ना षट्सु सम्पुटेषु सिद्धान्तशिखामणेः प्रतिपाद्यविषयाः कन्नडभाषायां सुदीर्घमालोचिताः। ग्रन्थोऽयं १९६९-१९७० तमाब्दे निडुमामिडिपुस्तकभण्डारतो मुद्रितोऽस्ति। एतेषामेव महाभागानां कन्नडार्थयुक्तोऽपरः सिद्धान्तशिखामणिः ख्रि. १९८७ तमाब्दे महन्तरमठ ट्रस्ट बेंगलोर, इत्यत्र प्रकाशितोऽस्ति।

कर्णाटकप्रदेशस्य बिजापुरनगरनिवासिना ज्ञानयोगाश्रमसंस्थापकेन श्रीमल्लिकार्जुनस्वामिमहोदयेन सिद्धान्तशिखामणेः श्लोकानां कन्नड-मराठिभाषयोः शब्दानुवादो विहितः। तावुभावपि पृथक् पृथक् प्रकाशितौ स्तः। तयोः कन्नडानुवादयुतो ग्रन्थः ख्रि. १९६६ तमाब्दे ‘शिवानन्दमठ गदग’ इत्याख्यया प्रकाशनसंस्थया प्रकाशितोऽस्ति। पुनश्चायमेव ख्रि. १९९९ तमाब्दे श्रीसिद्धेश्वरस्वामिमहाभागानां सम्पादकत्वे श्रीजगद्गुरुशिवरात्रीश्वरग्रन्थमाला-मैसूर इत्याख्यया प्रकाशनसंस्थया मुद्रितोऽस्ति। कर्नाटकप्रदेशीयचित्रदुर्गनिवासी ‘निजगुणसिद्ध’ इति

काव्याभिधानवान् एस. एस. सिद्धय्यमहोदयो ग्रन्थममुं "श्रीरेणुकगीते" इति नाम्ना भामिनिषट्पद्याख्ये कन्नडछन्दसि समनुदितवान्। ग्रन्थोऽयं बेंगलोरस्थ-महान्तमठप्रकाशनेन ख्रि. १९८७ तमाब्दे प्रकटितोऽस्ति।

बेंगलोरविश्वविद्यालयस्य पूर्वसंस्कृतविभागाध्यक्षेण बेंगलोरस्य वीरशैव-अनुसन्धानसंस्थानस्य (ज. विश्वाराध्यजनकल्याणप्रतिष्ठा-काशीजङ्गमवाडी-मठस्यान्तर्गतस्य) निदेशकेन डॉ. एम. शिवकुमारस्वामिमहोदयेन सिद्धान्तशिखा-मणिराङ्ग्लभाषयाऽनूदितः। ग्रन्थोऽयं ख्रि. १९६८ तमाब्दे "श्रीरेणुकगीता" इति नाम्ना प्रकाशितः। अनेनैव महाभागेन श्रीसिद्धान्तशिखामणेः कालसिद्धान्तयोः संशोधनपूर्णः "सिद्धान्तशिखामणिः ओन्दु अध्ययन" इति नामकः कन्नडभाषामयो लघुग्रन्थः ख्रि. १९८७ तमेऽब्दे धारवाडकर्नाटकविश्वविद्यालयतः प्रकाशितः।

श्री १००८ काशीजगद्गुरु डॉ. चन्द्रशेखरशिवाचार्यभगवत्पादा यदा पूर्वाश्रमे गुलेदगुड्डस्यामरेश्वरमठाध्यक्षा आसन् तदा श्रीसिद्धान्तशिखामणेरेकोत्तरस्थलानाधिकृत्य विस्तृतविवेचनपरा एकोत्तरशतकिरणरूपा ग्रन्था विलेख्या इति सङ्कल्प्य ख्रि. १९८९ तमाब्दं यावत् सप्त किरणाः प्रकाशिताः। तदनु ज्ञानसिंहासनारोहणानन्तरं ख्रि. २००० तमाब्दं यावदष्टमकिरणादेकोत्तरशतकिरणपर्यन्तं ग्रन्था गुलेदगुड्डस्य अमरेश्वरप्रकाशनेन प्रकाशिताः सन्ति। तत्र तावदष्टमकिरणादशीतिकिरणपर्यन्तानां ग्रन्थभागानां सङ्कलनसम्पादनयोः कार्यं बबलेश्वरस्य बृहन्मठाध्यक्षैः श्री. ष. ब्र. डॉ. महादेवशिवाचार्यस्वामिभिः, एकाशीतिकिरणादेकोत्तरशतकिरणपर्यन्तानां ग्रन्थभागानां सङ्कलनसम्पादनकार्यं हिप्परगिहिरेमठीयैरस्माभिर्विहितम्। साम्प्रतं सोऽयं सम्पूर्णं ग्रन्थः ख्रि. २००० तमाब्दे पञ्चाचार्यमानवधर्मसंस्थानेन भागद्वयेन प्रकाशितोऽस्ति।

एवमेव श्रीसिद्धान्तशिखामणिमधिकृत्य काशीजगद्गुरुभिः प्रदत्तानां मराठीप्रवचनानां सम्पादनं कृत्वा तान् "जन्म हा आखेरचा" इति नाम्ना डॉ. से. दे. पसारकरमहाभागाः त्रयोदशभागेषु प्रकाशितवन्तः। त इमे ग्रन्थाः काशी-जङ्गमवाडीमठस्य शैवभारतीभवनेन प्रकटीकृताः।

डॉ. चन्द्रशेखरकपालेमहाभागाः श्रीसिद्धान्तशिखामणेर्मराठिभाषायाऽन्वयार्थं भावार्थं च लिखितवन्तः। ग्रन्थोऽयं श्रीकाशीजगद्गुरुणां सम्पादकत्वे ख्रि. १९९१ तमाब्दे शैवभारतीभवनेन प्रकटितः।

मैसूरविश्वविद्यालयस्य प्राच्यविद्यासंशोधनालयस्य पूर्वनिदेशकाः पूर्वसंस्कृतविभागाध्यक्षाश्च लिं. डॉ. एच्. पि. मल्लेदेवरुमहाभागा मरितोण्टदार्यव्याख्यायुतं श्रीसिद्धान्तशिखामणिं प्राच्यविद्यासंशोधनालयग्रन्थमालायां पाठान्तरभेदयुक्तचिकित्सकग्रन्थरूपेण सम्पाद्य प्रकाशितवन्तः।

ख्रि. १९९८ तमाब्दे बेंगलोरस्य कन्नडसाहित्यपरिषदा उज्जयिनीशस्य (१५२३?) कन्नडानुवादेन युक्तः श्रीसिद्धान्तशिखामणिः प्रकटीकृतः। सोऽयं रम्भापुरीपीठस्य 'दत्ति' निधियोजनया प्रकाशितः।

बेंगलोरस्य वीरशैव–अनुसन्धानसंस्थानेन ख्रि. १९८७ तमाब्दस्य 'डिसेंबर' मासे श्रीसिद्धान्तशिखामणिमधिकृत्य कन्नडभाषायां शास्त्रसङ्गोष्ठीमायोज्य, तस्यां गोष्ठ्यां विद्वन्मण्डितप्रबन्धा एव ख्रि. १९९८ तमाब्दे डॉ. एम्. शिवकुमारस्वामिमहाभागानां सम्पादकत्वे ग्रन्थरूपेण प्रकटीकृताः।

श्रीसिद्धान्तशिखामण्युक्तदार्शनिकसिद्धान्तानितरवैदिकदार्शनिकसिद्धान्तैः साकं समीक्ष्य अस्य सिद्धान्तानां वैशिष्ट्यप्रतिपादनपरो संशोधनग्रन्थः श्रीमद्भिः डॉ. चन्द्रशेखरशिवाचार्यमहाभागैः (इदानीन्तनकाशीजगद्गुरुभिः) लिखितोऽस्ति। विद्यावारिध्युपाधये शोधप्रबन्धरूपेण मण्डितोऽयं ग्रन्थः ख्रि. १९८९ तमाब्दे जंगवाडीमठस्य शैवभारतीभवनेन प्रकाशितः।

ख्रि. १९९७ तमाब्दे शैवभारतीभवनेन श्रसिद्धान्तशिखामणिमधिकृत्य शास्त्रसङ्गोष्ठीमायोज्य, तद्गोष्ठ्यां विद्वन्मण्डितप्रबन्धा एव राष्ट्रीयपण्डितानां श्रीव्रजवल्लभद्विवेदमहाभागानां सम्पादकत्वे ख्रि. २००० तमाब्दे 'सिद्धान्तशिखामणि–मीमांसा' इति नाम्ना ग्रन्थरूपेण प्रकटीकृताः।

तत्रास्यां शास्त्रसङ्गोष्ठ्यां डॉ. अत्तलूरि–मृत्युञ्जयशर्ममहाभागैः 'आन्ध्रलिपिमुद्रितसिद्धान्तशिखामणिपरिशीलनम्' इत्याभिधेयात्मकः प्रबन्धो मण्डितः। अनेनान्ध्रलिपिमुद्रितोऽप्येकः सिद्धान्तशिखामणिरस्तीत्यवगम्यते।

तदेतावताऽस्मिन् सिद्धान्तशिखामणिवाङ्मयपरिचयान्मके द्वितीयेऽध्याये श्रीसिद्धान्तशिखामणेराधारभूतानां निगमागमानां परिचयः, श्रीसिद्धान्तशिखामणेश्च परिचयः यथामति समप्राणं प्रपञ्चितः। मन्ये एतदवलोकनेन श्रीसिद्धान्तशिखामणिविषयका जिज्ञासाः सर्वाः समाहिता भवेयुरिति।

●

तृतीयोऽध्यायः

शिवशक्तिविमर्शः

तत्र तावद् भारतीयदार्शनिकग्रन्थेषु केषुचिज्जगदुत्पत्ति-स्थिति-संहार-क्रियाव्यवस्थार्थम्, प्राणिनामदृष्टानुरूपं सुखदुःखादिफलप्रदानार्थम्, वेदानां प्रमाण्योपस्थापनार्थं चास्मद्विलक्षणयोः शिवशक्त्योरावश्यकतेति तावागमानुमानादिप्रमाणैरासाधितौ। केषुचन ग्रन्थेष्वीश्वरं विनैवोपर्युक्तानां समस्यानां समाधानमासाधितम्। तत्र न्याय-वैषेषिक-योग-अद्वैतवेदान्त-वीरशैवादि-दार्शनिकग्रन्थेष्वीश्वरोऽङ्गीकृतः; निरीश्वरसांख्य-मीमांसकादिदार्शनिकग्रन्थेषु च स निराकृतोऽस्ति। एवं भारतीयदार्शनिकग्रन्थेष्वङ्गीकाररूपेण, निराकरणरूपेण वा शिवशक्त्योर्विचार उल्लिखित इत्यत्र न सन्देहः। भारतीयदार्शनिकग्रन्थानां मूलस्रोतोरूपयोर्निगमागमयोः सारसङ्ग्रहरूपयोर्भगवद्गीता-सिद्धान्तशिखामण्योरपीश्वरस्य तच्छक्तेश्च स्वरूपं प्रपञ्चितमेव। तदत्र भगवद्गीताभिमतेश्वरतच्छक्तिस्वरूपं कीदृशम्? श्रीसिद्धान्तशिखामण्यनुसारं च तयोः स्वरूपं कीदृशम्? उभयसम्मतेश्वरशक्तिस्वरूपयोस्तुलना च कीदृशीत्यादिविषया विमृश्यन्ते।

गीतायां प्रकाशविमर्शात्मकब्रह्मविमर्शः

तत्र तावद् भगवद्गीतायां परमतत्त्वं परमात्मा[१]-परब्रह्म[२] ईश्वरे[३]त्याद्यभिधानैर्व्यव-ह्रियते। तस्य ब्रह्मणोऽत्र गीतायां निर्गुणनिराकार-सगुणनिराकार-सगुणसाकारमिति स्वरूपत्रयमुपवर्णितम्।

ब्रह्मणो निर्गुणनिराकारस्वरूपम्

“निष्कलं निष्क्रियं शान्तम्”[४]--- अस्थूलमनण्वह्रस्वमदीर्घमलोहितम्”,[५] “अशब्दमस्पर्शमरूपमव्ययम्”[६] “यतो वाचो निवर्तन्ते अप्राप्य मनसा सह”[७]

---

१. उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । (भ. गी. १६.१७)
२. अनादिमत् परं ब्रह्म न सत्तन्नासदुच्यते । (भ. गी. १६.१२)
३. यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः । (भ. गी. १६.१७)
४. श्वे. उ. ६.१९ .
५. बृ. उ. ३.८.८
६. कठ १.३.१५
१. तै. उ. २.४.९

इत्यादिश्रुतिप्रमाणानुसारं जगदुत्पत्तिपूर्वं स्थितं ब्रह्मणः सकलगुणाकारविरहितं स्वरूपमेव निर्गुणनिराकारस्वरूपमित्यभिधीयते। ब्रह्मणस्तत्स्वरूपमेव भगवान् श्रीकृष्णः–

ज्ञेयं तत् परमं ब्रह्म यज्ज्ञात्वाऽमृतमश्नुते।
अनादिमत् परं ब्रह्म न सत्तन्नासदुच्यते ।।[1]

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ।।[2]

इत्यादिषूपवर्णितवान्।

ब्रह्मणः सगुणनिराकारस्वरूपम्

सर्वज्ञत्वसर्वैश्वर्याद्यनन्तदिव्यगुणगणसमन्वितं प्रकृतितत्कार्यरूपप्रपञ्चयोश्च व्यापकं ब्रह्म सगुणनिराकारं ब्रह्मेत्युच्यते। यथाऽऽकाशो गन्धगुणयुक्तोऽपि निराकारः; यथा च निराकारोऽपि समस्तभुवनब्रह्माण्डव्यापको वर्तते, तथेदं ब्रह्म दिव्यगुणयुक्तं निराकारं च सदपि सकलप्रपञ्चव्यापकं भवति। अत एव श्रुतिषु 'आकाशवत् सर्वगतं सुसूक्ष्मम्"[3] इति महाकाशस्यैव दृष्टान्तेनास्य ब्रह्मणो जगद्व्यापकत्वम्, नित्यत्वं च निर्दिष्टम्। तत्र गीतायाम्–

कविं पुराणमनुशासितारं
अणोरणीयांसमनुस्मरेद्यः।
सर्वस्य धातारमचिन्त्यरूपं
आदित्यवर्णं तमसः परस्तात् ।।

प्रयाणकाले मनसाऽचलेन
भक्त्या युक्तो योगबलेन चैव।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्
स तं परं पुरुषमुपैति दिव्यम् ।।[4]

---

[1] भ. गी. १३.१२

[2] भ. गी. १२.३

[3] शाण्डि. उ. २.१.३

[4] भ. गी. ८.९-१०

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया।
यस्यान्तस्थानि भूतानि येन सर्वमिदं ततम्।।[१]

इत्यादिषु स्थानेषु ब्रह्मणः सगुणनिराकारस्वरूपमाख्यातं भगवता श्रीकृष्णेन।

ब्रह्मणः सगुणसाकारस्वरूपम्

सगुणनिराकारं ब्रह्मैवोपासकानामभीष्टसिद्धये स्वकीयां दिव्यां प्रकृतिमधिष्ठाय स्वीयया योगमाययोपासकानामनुचिन्तनानुरूपं दिव्यं रूपं परिधाय प्रकटीभवति। दिव्यमिदं भक्तानुग्रहकारकं रूपमेव ब्रह्मणः सगुणसाकारस्वरूपमित्याख्यायते। तत्र गीतायां भगवता श्रीकृष्णेन–

अनन्यचेताः सततं यो मां स्मरति नित्यशः।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः।।[२]

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।।

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः।।[३]

भक्त्या त्वनन्यया शक्योऽहमेवंविधोऽर्जुन।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप।।[४]

इत्यादिषु तस्य ब्रह्मणः सगुणसाकारस्वरूपमुपलक्षितमस्ति।

एतावतोपपादितं ब्रह्मस्वरूपत्रयमप्येकस्मिन्नेव ब्रह्मणि कालभेदेनावस्थाभेदेन च पर्यवस्यति; न तु विभिन्ने। अत एव भगवान् श्रीकृष्णः–

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च।।[५]

---

[१] भ. गी. ८.२२

[२] भ. गी. ८.१४

[३] भ. गी. ९.२२,२६

[४] भ. गी. ११.५४

[५] भ. गी. १३.१४

इत्येकस्मिन्नेव श्लोके ब्रह्मणः स्वरूपत्रयस्य विशेषणान्युपपादितवान्। अत्रेदमैदम्पर्यम्– "'सर्वेन्द्रियगुणाभासम्' इत्यनेन सगुणनिराकारस्य, 'सर्वेन्द्रियविवर्जितम्' निर्गुणम्' इत्यनेन निर्गुणनिराकारस्य, "'सर्वभृत्' 'गुणभोक्तृ' इत्यनेन चात्र सगुणसाकारस्य निर्देशः कृतः। किञ्चार्जुनोऽपि भगवतो विराड्रूपवर्णनावसरे-

त्वमक्षरं परमं वेदितव्यो
त्वमस्य विश्वस्य परं निधानम्।
त्वमव्ययः शाश्वतधर्मगोप्ता
सनातनस्त्वं पुरुषो मतो मे।।[१]

इति ब्रह्मस्वरूपत्रयमेकत्र निगदति। अत्र 'त्वमक्षरं परमं वेदितव्यम्' इति निर्गुणनिराकारस्वरूपम्, 'विश्वस्य परं निधानम्' इति सगुणनिराकरस्वरूपम्, 'त्वं शाश्वतधर्मगोप्ता' इति सगुणसाकारस्वरूपं चोपलक्ष्योपवर्णितवान् सः।

ब्रह्मणः सर्वगतत्वम्

तदिदं ब्रह्म "आत्मैवेदं सर्वम्"[२] "ईशावास्यमिदं सर्वम्"[३] "ब्रह्मैवेदं सर्वम्"[४] इत्यादिश्रुत्यनुसारं सर्वत्र विद्यमानं सत् सकलजगद्व्यापकं भवति। तदुक्तं भगवता श्रीकृष्णेन–

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः।।[५] इति।

ननु प्रपञ्चे दृश्यमाना उत्पत्तिविनाशादिविकारा ब्रह्मण्यपि सम्भवेयुः, तस्य सर्वगतत्वादिति चेन्न, तस्य सर्वव्यापकत्वेऽप्याकाशवन्निर्लिप्तत्वात्। यथाऽऽकाशे वाय्वादिभूतानामवस्थितिः सत्यपि तद्गतगमनागमनादिक्रियाभिः शीतोष्णस्पर्शादिगुणैश्च न स लिप्यते, तथा सकलजगद्व्यापके ब्रह्मणि समस्तभूतेषु सत्स्वपि, न तेषां विकारैः स लिप्यते। तदुक्तं गीतायाम्

---

[१] भ. गी. ११.१८

[२] छा. उ. ७.२५.२

[३] ई. उ. १

[४] बृ. उ. २.५.१

[५] भ. गी. ९.४

यथाऽऽकाशस्थितो नित्यं वायुः सर्वत्रगो महान्।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय।।[1] इति।

एवं निखिलजगतो बहिरन्तश्च व्याप्तमपि ब्रह्म किमु न जीवानां दृग्गोचरं भवतीत्याकाङ्क्षायाम्, "सूक्ष्मत्वात्तदविज्ञेयम्"[2] इति भगवतः श्रीकृष्णस्योक्त्यनुसारं परमाणवः सौक्ष्म्याद्यथा न दृश्यन्ते तथेदं ब्रह्माप्यविज्ञेयमिति विज्ञेयम्। "सौक्ष्म्यात् तदनुपलब्धिर्नाऽभावात्"[3] इति सांख्यकारिकायामपि तदनुपलब्धेः कारणं सूक्ष्मत्वमेवोक्तम्।

गीतायां शक्तीनां स्वरूपम्

तत्र तावद् भगवद्गीतायामीश्वरशक्तेः पञ्चविधस्वरूपाण्युपवर्णितानि। तदनुसारं १. मूलप्रकृतिः, २. दिव्यचिन्मयशक्तिः, ३. योगमायाशक्तिः, ४. दैवीप्रकृतिः, ५. त्रिगुणात्मिका माया चेतीमानि पञ्चविधानि[4] शक्तेः स्वरूपाणि।

मूलप्रकृतिः

जगदुत्पत्तेः पूर्वं सकलभूतानामाश्रयीभूता ब्रह्मणि सूक्ष्मरूपेणावस्थिता जगत्सिसृक्षोः परमात्मनः सहकारिणी शक्तिरेव मूलप्रकृतिः। अस्या अपरा प्रकृतिरित्यपरं नाम। प्रकृतिमिमामधिष्ठायैवेश्वरः पूर्वपूर्वकर्मानुगुणतया प्रकृतिपरवशं भूतग्रामं विसृजति। पुनश्चास्यामेव कल्पक्षये स विलीय बीजरूपेण तत्र वर्तते। तदुक्तं भगवता श्रीकृष्णेन–

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्।।

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात्।।[5] इति।

---

[1] भ. गी. ९.६

[2] भ. गी. १३.१५

[3] सां. का. ८

[4] गीतादर्पण पृ. ८६, गीताप्रेस, गोरखपुर, सं. २०५१

[5] भ. गी. ९.७–८

प्रकृतिरेवेयं भगवता श्रीकृष्णेन–"मम योनिर्महद्ब्रह्म तस्मिन् गर्भं ददाम्यहम्"[१] इति, "तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता"[२] इति च जगदुत्पत्तिस्थानत्वाद्योनिशब्देन निर्दिष्टा।

दिव्यचिन्मयशक्तिः

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥[३]

इति गीतोक्तभगवदाश्वासनानुसारेण स परमात्मा यदा धर्मस्याभ्युत्थानार्थम्, उपासकभक्ताननुगृहीतुं वा स्वीयं निर्गुणनिराकारस्वरूपं विहाय, दिव्यमङ्गलविग्रहरूपेणाऽवतरति, तदा तदर्थमिमां दिव्यचिन्मयशक्तिमाश्रयति। अनयैव शक्त्याऽत्रानन्तदिव्यमङ्गललीलाश्च रचयति। अत एव भगवता श्रीकृष्णेन–

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया॥[४]

इत्युक्तम्। एवं भगवदवतारस्य तल्लीलायाश्च कारणीभूता शक्तिरेव दिव्यचिन्मयशक्तिरिति कथ्यते। अवतारदेहस्य दिव्यदेहत्वकथनम्, तत्कृतकर्मणां दिव्यमङ्गललीलात्वकथनं चेदृशदिव्यचिन्मयशक्त्युत्पादकत्वादेव। अत एव भगवान् श्रीकृष्णः "जन्म कर्म च मे दिव्यम्"[५] इति निजजन्मकर्मणोर्दिव्यत्वमुक्तवान्।

योगमायाशक्तिः

नाऽहं प्रकाशः सर्वस्य योगमायासमावृतः।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम्॥[६]

इति भगवदुक्त्यनुसारं तदिच्छानुरूपेण समावृता शक्तिरेव योगमायाशक्तिरित्याख्यायते। योगसिद्धेषु विद्यमाना अणिमादिशक्तयो यथा तेषां सहकारिभूतास्तानलङ्कुर्वन्ति, तथेयं परमात्मनि तदनुगामिनीभूता वर्तते।

---

[१] भ. गी. १४.३
[२] भ. गी. १४.४
[३] भ. गी. ४.७
[४] भ. गी. ४.६
[५] भ. गी. ४.९
[६] भ. गी. ७.२५; तुलना कर्तव्या–
"अप्रत्यक्षो महादेवः सर्वेषामात्ममायया"– (सि.शि. ९.५३)।

दैवीप्रकृतिः

"देवस्येयं प्रकृतिः दैवीप्रकृतिः" इति व्युत्पत्त्या दया-क्षमा-अहिंसा-तेजस्-सत्यादिदैवीगुणगणसमन्वितत्वादियं दैवीप्रकृतिरिति प्रतिपादिता। देवानुग्रहमिच्छन् साधको भक्त इमां प्रकृतिमाश्रित्य, अस्याः शक्तेरनुग्रहेण दैवीगुणयुक्तः स्वसाधनापातितावरोधरहितश्च सन् भगवत्सिद्धिं समाप्नोति। तदुक्तं भगवता श्रीकृष्णेन–

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्।।[1] इति।

अस्या एव दैवीसम्पदित्यपरं नाम[2]। "ममैवांशो जीवलोके जीवभूतः सनातनः"[3] इति भगवदुक्त्यनुसारं जीवस्य देवांशत्वात् स्वभावतस्तेषु दैवीसम्पद्गुणा वर्तन्त एव; अथापि वृक्षस्थाग्निवत् तेषां प्राकट्यार्थं साधनमपेक्षते। ब्रह्मसम्मुखीकृतान् साधनसंल्लग्नान् साधकानेवेयं शक्तिरनुगृह्णातीति भावः।

त्रिगुणात्मिका माया

सत्त्व-रजस्तमोगुणयुक्ता शक्तिरेव त्रिगुणात्मिका मायेत्यभिधीयते। अस्या एव शक्तेर्गुणसम्मोहिता जीवाः "सर्वस्य चाहं हृदि सन्निविष्टः"[4] इति भगवदुक्त्यनुसारमीश्वरं सकलजीवानामन्तिके विद्यमानमपि तमविज्ञायाहङ्कारविमूढात्मानः कर्माभिमानिनः, सुखदुःखभोक्तारश्च भूताः संसारे परिभ्रमन्ति। तदुक्तं भगवता श्रीकृष्णेन–

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम्।।
न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः।
माययापहृतज्ञाना आसुरं भावमाश्रिताः ।।[5] इति।

---

[1] भ. गी. ९:१३

[2] तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।
भवन्ति सम्पदं दैवीमभिजातस्य भारत।।
दैवीसम्पद्विमोक्षाय........................... (भ. गी. १६.३-५)

[3] भ. गी. १५.७

[4] भ. गी. १५.१५

[5] भ. गी. ७.१३,१५

एवं चक्रनेमिक्रमेणेव प्रपञ्चे परिभ्रमतां जीवानामज्ञानावरणरूपेण सम्मोहनकारिणी शक्तिरेव सत्त्वादिगुणत्रयुयता त्रिगुणात्मिका मायेति समाख्यायते। सैवात्र गीतायां प्रकृतिः[1], गुणमयी[2], माया[3] इत्यादिपदैर्व्यवहृताऽस्ति।

वस्तुतो भगवत्स्वरूपेयं शक्तिरेकैव; अथापि कार्यभेदेन कालभेदन चोपर्युक्तपञ्चविधाभिर्व्यवह्रियते; एकस्यैव पुरुषस्य व्यवहारभेदेन कालभेदेन च पितृ-पुत्र-पति-अधिकारी-शिक्षकाद्यभिधानवत्। ईश्वरस्य सृष्ट्यादिलीलाभेदेनापि शक्तिभेदा भवन्तीति विज्ञेयम्।

किञ्च सेयं शक्तिः "ते ध्यानयोगानुगता अपश्यन् देहात्मशक्तिं स्वगुणैर्निगूढाम्"[4] "सच्चिदानन्दलहरी"[5] "चिदाद्यद्वितीयसंवित्तिः"[6] इत्याद्युपनिषदुक्त्यनुसारं निर्गुणेऽपि ब्रह्मणि नामरूपविभागानर्हदशामापन्ना सच्चिदानन्दसंवित्तिरूपेण तिष्ठति। अत एव भगवान् श्रीकृष्णः– "प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि"[7] इतीश्वरशक्त्योरनादित्वमुक्तवान्।

ईश्वरसद्भावे हेतुः प्रयोजनं च

"निष्कलं निष्क्रियं शान्तम्"[8] इत्यादिश्रुतिप्रमाणानुसारं गीतायामक्षरं ब्रह्म परमम्, अचिन्त्यम्, शान्तम्, अनिर्देश्यम्, ध्रुवम्, अचलम्, अव्यक्तमित्याद्यभिधानैर्निर्वर्णितेन निर्गुणब्रह्मणा जगदुत्पत्त्यादिकार्याणामनुपपन्नत्वात् पूर्वोक्तगुणत्रयशक्तिविशिष्टमीश्वसभिधेयं सगुणं ब्रह्माङ्गीकर्तव्यम्। ईश्वरस्यास्तित्वे को हेतुः, किं वा प्रयोजनमित्याकाङ्क्षायाम्

पितासि लोकस्य चराचरस्य
त्वमस्य पूज्यश्च गुरुर्गरीयान्।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो
लोकत्रयेऽप्यप्रतिमप्रभावः ॥

---

१. द्र. भ. गी. ३.२७,२९; १३.१९-२१, २३, २९, ३४; १४.५
२. द्र. भ. गी. ७.१४
३. द्र. भ. गी. १८.६१
४. श्वे. उ. १.३
५. ब्रह्वृचोपनिषत् १ ख
६. ब्रह्वृचोपनिषत् १ ख
७. भ. गी. १३.१९
८. श्वे. उ. ६.१९

तस्मात् प्रणम्य प्रणिधाय कायं
प्रसादये त्वामहमीशमीढ्यम्।।[१]

इत्यर्जुनेन भगवतो विराड्रूपदर्शनावसरेऽर्थान्तरेणेश्वरास्तित्वे कारणान्युपस्थापितानि। अत्रायं भावः– ईश्वरसाधनायात्र लोकस्य पितृत्वेन, उपासकानां पूज्यत्वेन, ज्ञानप्रवाहस्य मूलगुरुरूपेण च कारणान्युपलभ्यन्ते। तथा हि– लोकेऽस्मिन् कार्यं दृष्ट्वा खलु कारणमनुमीयते। घटकार्यस्य यथा चेतनः कुम्भकारो भवेदेव, तथाऽस्य विश्वस्य कार्यत्वात् तस्यापि कर्ता चेतनः पुरुष आवश्यकः। स एवेश्वरः।

न च प्रकृतिरेव स्वयं स्वां प्रपञ्चरूपेण प्रकटयतीति वक्तव्यम्, जडत्वात्। न हि कुलालं विनैव मृत्तिका घटं निर्मातुमर्हति। तस्माद् विश्वस्य कारणत्वेनेश्वरोपपत्तिः। तत्साधनायैवात्रोक्तम्–'पितासि लोकस्य चराचरस्य' इति। प्रपञ्चेऽप्ययमस्य पिता, तस्याप्ययं पितेति सर्वेषामपि पित्रान्तरावस्यकत्वादियं पितृत्वपरम्परा यत्र समाप्ता, स ईश्वरः सर्वेषां पिता। अत एव भगवता श्रीकृष्णेन– "अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा"[२] "अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते"[३], "यच्चापि सर्वभूतानां बीजं तदहमर्जुन"[४] इतीश्वरस्य जगत्कारणत्वमुक्तम्। "यो ब्रह्माणं विदधाति पूर्वम्"[५], "यतो वा इमानि भूतानि जायन्ते"[६] इत्यादिश्रुतयोऽप्यत्र प्रमाणम्। एवं "अहमादिर्हि देवानां महर्षीणां च सर्वशः"[७] इति भगवदुक्त्यनुसारं सकललोकजनकरूपेणेश्वरस्यावश्यकत्वादीश्वरसिद्धिः।

"त्वमस्य पूज्यश्च" इत्यनेनापीश्वरसिद्धिः। तथा हि– जीवविहितविविधकर्मणाम्, उपासनानां चाश्रयरूपेण तत्तत्फलप्रदातृरूपेण च सर्वज्ञः सर्वशक्तिमान् पूज्यश्चेश्वर आवश्यक इतीश्वरोऽङ्गीकर्तव्यः। ननु कर्मादीनां तत्तत्फलप्रदातृत्वोपपत्तिरिति चेन्न, तेषां जडत्वात्। न च प्रकृतिजीवौ उपास्यौ भवेताम्, "नोपास्यौ

---

[१] भ. गी. ११.४३-४४

[२] भ. गी. ७.६

[३] भ. गी. १०.८

[४] भ. गी. १०.३९

[५] श्वे. उ. ६.१८

[६] तै. भृ. १

[७] भ. गी. १०.२

प्रकृतिजीवौ" इति श्रुतौ तयोरुपास्यत्वनिराकरणात्। निर्विशेषब्रह्मणश्चोपासनासम्भवा सगुणरूप ईश्वरोऽङ्गीकर्तव्यः, "शिव एको ध्येयः शिवङ्करः"[1] इत्यादिश्रुतिष्व तदीश्वरस्यैवोपास्यत्वदर्शनात्। उक्तं च भगवता श्रीकृष्णेन–

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्।।

स तया श्रद्धया युक्तस्तस्याराधनमीहते।
लभते च ततः कामान् मयैव विहितान् हि तान्।।[2] इति।

एवं पूज्यत्वेनेश्वरावश्यकत्वादीश्वरसिद्धिः।

"गुरुर्गरीयान्" इत्यनेनापीश्वरसिद्धिः। तथा हि– लोकेऽस्मिन् लौकिकं पारमार्थिकं वा यत्किञ्चिज्ज्ञानम्, तत्सर्वमपि गुरुपरम्पराप्राप्तमित्यत्र न सन्देहः। गुरोरपि गुर्वान्तरावश्यकत्वादियं गुरुपरम्परेश्वरे पर्यवस्यतीतीश्वरो गरीयान् गुरुः। अत एव भगवत्पादैः पतञ्जलिमहर्षिभिः– "स पूर्वेषामपि गुरुः कालेनानवच्छेदात्" इत्युक्तम्। अवगतमेवेदं यत् सकलज्ञानानां मूलभूत आकरा निगमागमा एवेति ते च रागद्वेषादिविरहितसर्वज्ञत्वादिविशिष्टपरमेश्वरनिर्गताः। "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्य उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि निःश्वसितानि" "शास्त्रयोनित्वात्"[5], वेदान्तकृद् वेदविदेव चाहम्"[6]

ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा।।[7] इति।

आगतं शिववक्त्रात्तु गतं च गिरिजामुखे।
मतं श्रीवासुदेवस्य आगमस्तेन कीर्तितः।।[8]

---

[1] अथर्वशिखा ३

[2] भ. गी. ७.२१-२२

[3] यो. सू. १.२६

[4] बृ. उ. २.४.१०

[5] ब्र. सू. १.१.३

[6] भ. गी. १५.१५

[7] भ. गी. १७.२३

[8] भास्करी द्विभागः, पृ. ८५

इति चानेकश्रुति–सूत्र–गीता–वृद्धवचनानि निगमागमानामीश्वरजन्यत्वे प्रमाणानि। अनेन तेषां स्वतः प्रामाण्यमपि सिद्धम्। तस्मात्तावन्निखिलज्ञानप्रवाहस्यादिवक्तृ-मूलगुरोरावश्यकत्वात् तद्गुरुत्वस्येश्वरे विद्यमानत्वादीश्वरसिद्धिः।

नन्वीश्वरस्याप्यन्यः पिता पूज्यो गुरुश्च भवेदिति चेन्न, अनवस्थाप्रसङ्गाद् द्वैतापत्तेश्च। अत एव पुनस्तत्र गीतायाम्– 'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभावः" इत्युक्तम्। तथा चाह श्रुतिः–

न तस्य कश्चित्पतिरस्ति लोके
न चेशिता नैव च तस्य लिङ्गम्।
न कारणं करणाधिपाधिपो
न चास्य कश्चिज्जनिता न चाधिपः।।[1] इति।

एवमत्र जगतः पितृत्वेन, उपासकानां पूज्यत्वेन, ज्ञानस्यादिवक्तृगुरुरूपेण चेश्वरस्यावश्यकत्वादीश्वरोऽङ्गीकर्तव्य इति सिद्धम् ।

ईश्वरस्य विभूतयः

श्रीमद्भगवद्गीतायां विभूतियोगाख्ये दशमेऽध्यायेऽयमीश्वरः कीदृशैरात्म-विभूतिभिरिमान् लोकान् व्याप्य तिष्ठतीति विषयः–

अहमात्मा गुडाकेश सर्वभूताशयस्थितः।
अहमादिश्च मध्यं च भूतानामन्त एव च।।[2]

इत्यादिभिरेकविंशतिश्लोकैः प्रतिपाद्य पुनरन्ते च–

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम्।।[3]

इत्युपपादितम्। अनेनास्येश्वरस्य शक्तेरेकांशेनैव जगद्व्यापारादिलीलाः सम्भवन्तीति ज्ञायते। अंशान्तरेण च स सच्चिदान्दरूपेण परमे व्योम्नि निवसति।

---

[1] श्वे. उ. ६.९

[2] भ. गी. १०.२०

[3] भ. गी. १०.४१

वैषम्यनैर्घृण्यदोषपरिहारः

नन्वेतादृशसृष्टिनिर्माणेनेश्वरस्य किं प्रयोजनम्? किञ्चित् प्रयोजनसत्त्वे तस्य नित्यतृप्तत्वहानिः; प्रयोजनाभावे च "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति वृद्धोक्त्या तस्य जगत्सृष्टिप्रवृत्त्यनुपपत्तिरिति चेन्न, भूतानुग्रहार्थम्' प्रवृत्त्युपपत्तेः। स्वप्रयोजनप्रवृत्त्याऽनाप्तकामत्वापत्तावपि परप्रयोजनप्रवृत्त्या नात्र तद्दोषारोपो युक्तः। आप्तकामत्वादीश्वरस्य स्वतः प्रयोजनाभावेऽपि प्राणिनामनुग्रह एव प्रयोजनम्।

अत एवोक्तं भगवता श्रीकृष्णेन–

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि।।

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः।।
उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम्।।[1] इति।

उक्तं च योगसूत्रभाष्ये– "तस्य आत्मानुग्रहाभावेऽपि भूतानुग्रहः प्रयोजनम्, ज्ञानधर्मोपदेशेन कल्प-प्रलय-महाप्रलयेषु संसारिणः पुरुषानुद्धरिष्यामीति"[2] इति।

नन्वेवं भूतानुग्रहप्रवृत्तेऽस्मिन् जगति सत्त्वादिगुणविषमता, देवतिर्यङ्मनुष्यादिवैषम्यम्, दुःखादिबन्धनं च न भवेत्, येनेश्वरे वैषम्यनैर्घृण्यदोषापत्तिरिति चेन्न, सृज्यमानप्राण्यदृष्टविशिष्टशक्तिसापेक्षत्वेन जगन्निर्माणोपपत्तेः। तथा हि जगदुत्पत्तावीश्वरो निमित्तकारणम्, प्रकृतिश्चोपादानकारणम्। उपादानकारणस्य गुणाः कार्ये समुपलभ्यन्ते, न तु निमित्तकारणस्य। घटे मृत्तिकाया गुणागमनं दरीदृश्यते, न हि कुलालस्य। तस्मात् प्रपञ्चे दृश्यमानवैषम्यं प्राण्यदृष्टविशिष्टप्रकृतिसम्भवम्, न ह्यत्रेश्वरस्य दोषः। उक्तं च भगवता श्रीकृष्णेन–

विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान्।[3]

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम्।।[4]

---

१. भ. गी. ३.२२-२४
२. यो. सू. भा. १.२५
३. भ. गी. १३.१९
४. भ. गी. ७.१३

प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुणकर्मसु ।।[१] इति।

किञ्चात्र भगवान् बादरायणोऽपि– "वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति"[२] इति सूत्रे ईश्वरस्य वैषम्यनैर्घृण्यदोषं निराचकार। शङ्कराचार्यभगवत्पादा अस्य सूत्रस्य व्याख्यानावसरे– "पुण्यः पुण्येन कर्मणा भवति, पापः पापेन"[३] इति श्रुतिं प्रमाणयन्तः "अतः सृज्यमानप्राणिधर्माधर्मापेक्षा विषमा सृष्टिरिति नायमीश्वरस्यापराधः। ईश्वरस्तु पर्जन्यवद् द्रष्टव्यः। तथा हि पर्जन्यो व्रीहियवादिसृष्टौ साधारणं कारणं भवति, व्रीहियवादिवैषम्ये तु तत्तद्बीजगतान्येवासाधारणानि सामर्थ्यानि कारणनि भवन्ति, एवमीश्वरो देवमनुष्यादिसृष्टौ साधारणं कारणं भवति"[४] इति प्रतिपादितवन्तः। अत एव भगवान् श्रीकृष्णोऽपि–

मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते।।[५]

इतीश्वरस्याध्यक्षत्वे प्रकृत्या एव जगद्व्यापारत्वप्रतिपादनव्याजेन तस्य जगत्साधारणकारणत्वमुपस्थापितवान्। अत्र भगवत्पादाः रामानुजाचार्या अपि– "तस्मात् क्षेत्रज्ञकर्मानुगुणं मदीया प्रकृतिः सत्यसङ्कल्पेन मयाऽध्यणेक्षिता सचराचरं जगत् सूयते, अनेन क्षेत्रज्ञकर्मानुगुणमदीक्षणेन हेतुना जगद्विपरिवर्तते; इति मत्स्वाम्यं सत्यसङ्कल्पं नैर्घृण्यादिदोषरहितत्वम्"[६] इत्यर्थं प्रतिपाद्य, अनेन वैषम्यनैर्घृण्यदोषपरिहारो भवतीत्युक्तवन्तः।

नन्वेवं जगत्सृष्टौ प्राण्यदृष्टसापेक्षत्वेनेश्वरस्य पराधीनत्वापत्तिरिति चेन्न, प्राण्यदृष्टविशिष्टप्रकृतेस्तदीयत्वात्। तथा हि "मम माया"[७], "प्रकृतिं स्वाम्"[८], "पराऽस्य शक्तिः"[९] इति गीतायां श्रुतौ च तत्प्रकृतेस्तदीयत्वं श्रूयते। तदीयस्य

---

[१] भ. गी. ३.२९
[२] ब्र. सू. २.१.३४
[३] बृ. उ. ४.४.५
[४] ब्र. सू. शा. भा. २.१.३४
[५] भ. गी. ९.१०
[६] भ. गी. रा. भा. ९.१०
[७] भ. गी. ७.१४
[८] भ. गी. ९.८
[९] श्वे. उ. ६.८

सापेक्षत्वे न पराधीनत्वमिति जगत्सृष्टौ प्राण्यदृष्टविशिष्टतदीयप्रकृतिसापेक्षत्वे नेश्वरस्य पराधीनत्वापत्तिरिति निश्चप्रचम्।

तदेवं श्रीमद्भगवद्गीतायां प्रकाशविमर्शात्मकब्रह्मणो निर्गुणनिराकार-सगुणनिराकार-सगुणसाकारस्वरूपाण्युपपादितानि। तत्र सगुणनिराकारब्रह्मैवात्रेश्वरः। शुद्धसत्त्वादिगुणत्रयमायाविशिष्टत्वादेवायं सर्वज्ञत्वादिगुणगणसमन्वितः सन् जगदुत्पत्त्यादिकं करोति। अस्य शक्तिरेव जगति विभूतिरूपेणावस्थिता। प्राण्यनुग्रहार्थमीमां सृष्टिं रचयतीश्वर इत्यङ्गीक्रियते।

सिद्धान्तशिखामण्यनुसारेण शिवस्वरूपम्

तत्र तावत् [1]श्रीसिद्धान्तशिखामणिनिरूपितवीरशैवदर्शने परमतत्त्वं स्थल[2]-लिङ्ग[3]–परशिवा[4]द्यभिधानैर्व्यवह्रियते। वातुलशुद्धागमे–

शिवं परात्परं सूक्ष्मं नित्यं सर्वगताव्ययम्।
अनिन्दितमनौपम्यमप्रमेयमनामयम् ।।

शुद्धत्वाच्छिवमुद्दिष्टं परादूर्ध्वं परात्परम्।
व्योमातीतं हि सूक्ष्मं च नित्यं कारणशून्यतः।।

व्याप्त्या सर्वगतं प्रोक्तमक्षीणं चाव्ययं भवेत्।
अमलं चानिन्दितमसादृश्यादनौपमम्।।

प्रमाणाद्यतिरिक्तत्वादप्रमेयमिति स्मृतम्।
निर्गुणत्वाद्विशेषेण ह्यनामयमिति स्मृतम्।।[5]

---

[1] श्रीमद्भिः, डा. चन्द्रशेखरशिवाचार्यमहाभागैः (इदानीन्तनकाशीज्ञानसिंहासनाधीश्वरैः) 'सिद्धान्तशिखामणिसमीक्षा' इत्याख्ये शोधप्रबन्धे सिद्धान्तशिखामणीयदार्शनिकतत्त्वानां सप्रमाणं विवेचनं कृतमस्ति। तदाधारेणात्र सिद्धान्तशिखामण्युक्तशिवजीवादिदार्शनिकविषयाणां निरूपणं क्रियते।

[2] यत्रादौ स्थीयते विश्वं प्राकृतं पौरुषं यतः।
लीयते पुनरन्ते च स्थलं तत्प्रोच्यते ततः।। (अनु. सू. २.४)

[3] लयगत्यर्थकयोर्हेतुभूतत्वात् सर्वदेहिनाम् ।
लिङ्गमित्युच्यते साक्षाच्छिवः सकलनिष्कलः।। (अनु. सू. ३.४)

[4] ब्रह्मेति व्यपदेशस्य विषयं यं प्रचक्षते।
वेदान्तिनो जगन्मूलं तं नमामि परं शिवम्।। (सि. शि. १.२)

[5] वातुलशुद्धा. १.२१–२५

इति शिवतत्त्वस्वरूपमुपवर्णितम्। सोऽयं सच्चिदानन्दलक्षणः परशिवः–

शिवस्तु सच्चिदानन्दलक्षणः परमेश्वरः।
पूज्यपूजकभावेन निर्गुणः सगुणोऽभवत्।।[1]

इति सूक्ष्मागमप्रमाणानुसारमत्र दर्शने सगुणनिर्गुणोभयरूपः। सगुणनिर्गुणशब्दयोरत्र सकलनिष्कलशब्दाभ्यामपि व्यवहारो दरीदृश्यते। परशिवः स्वशक्तिसङ्कोचेन निर्गुण इति, तद्विकासेन च सगुण इति कथ्यते। तदुदाहृतं भगवत्पादैः श्रीपतिपण्डिताराध्यैः–

सृष्टेः पूर्वं महादेवः शक्तिसङ्कोचहेतुना।
निर्गुणत्वेन शास्त्रेषु गीयते तत्त्ववेदिभिः।।

सृष्ट्यादौ परमेशस्य शक्तेः प्राचुर्यवैभवात्।
सर्वज्ञत्वादिकल्याणगुणवानिति कीर्तितः।।[2] इति।

तस्माद्वीरशैवदर्शने– "अशब्दमस्पर्शमरूपमव्ययं----"[3], अस्थूलमनण्वह्रस्वमदीर्घमलोहितम्"[4] इत्यादिनिर्गुणश्रुतीनां सृष्ट्युन्मुखपरमेश्वरशक्तिसङ्कोचकालपरत्वम्, "स ईक्षां चक्रे"[5], तदैक्षत बहु स्यां प्रजायेय"[6] इत्यादिसगुणश्रुतीनां सृष्ट्युन्मुखपरमेश्वरशक्तिविकासकालपरत्वं चोपपद्यते। किञ्चेदमत्राऽवधेयम्– अद्वैताभिमतं यन्निर्गुणं ब्रह्म तन्निर्विशेषमपि। न चैवमत्र निर्गुणः परशिवो निर्विशेषोऽपि। स्वस्थावस्थायां परशिवे शक्तेर्ज्ञानादि-गुणानां विकासाभावेन स निर्गुण इत्युच्यमानोऽपि सूक्ष्मरूपेण शक्तेस्तत्र सत्त्वात् स सविशेष इत्येवाङ्गीक्रियत इत्यद्वैतवेदान्तादस्य वैशिष्ट्यम्। अत एव रेणुकभगवत्पादाः–

परिच्छेदकथाशून्यं[7] प्रपञ्चातीतवैभवम्।
प्रत्यक्षादिप्रमाणानामगोचरपदे स्थितम्।।

---

[1] सूक्ष्मा. १.२३
[2] ब्र. सू. श्रीकर. १.३.७
[3] कठ. २.३
[4] बृ. उ. ३.८.८
[5] प्रश्नो. ६.३
[6] छा. उ. ६.२.३
[7] *परिच्छिन्नत्वं हि देशतः कालतो वस्तुतश्चेति त्रिविधम्। तत्रात्यन्ताभावप्रतियोगित्वं देशपरिच्छिन्नत्वम्, न तु देशान्तरेऽसत्त्वं स्वदेशमात्रसत्त्वं वा। ध्वंसप्रागभावयोः प्रतियोगित्वं कालपरिच्छिन्नत्वम्, अन्योन्याभावप्रतियोगित्वं च वस्तुपरिच्छिन्नत्वमिति विज्ञेयम्। ब्रह्मण आकाशवद् व्यापकत्वान्न तस्य देशपरिच्छेदः, नित्यत्वान्न कालपरिच्छेदः, सर्वाऽऽत्मकत्वाच्च न वस्तुपरिच्छेद इति बोध्यम्।*

स्वप्रकाशं पराकाशमनौपम्यमनामयम्।
सर्वज्ञं सर्वगं शान्तं सर्वशक्तिनिरङ्कुशम्।।[१]

इति निर्गुणपरशिवनिरूपणावसरे तस्य शक्तिमत्त्वं सूचितवन्तः।

अत एव भगवत्पादैः श्रीपतिपण्डिताराध्यैः– "निर्विशेषवस्तुवादिभिर्निर्विशेषे वस्तुनि इदं प्रमाणमिति कथं वक्तुं शक्यते? सविशेषवस्तुविषयत्वात् सर्वप्रमाणानाम्। यस्तु स्वानुभवसिद्ध इति स्वगोष्ठीनिष्ठः समयः, सोऽप्यात्मसाक्षिकसविशेषानुभवेन निरस्तः। 'इदमहमदर्शम्' इतिवत् किञ्चिद्विशेषविशिष्टविषयत्वात् सर्वेषामनुभवानाम्। सविशेषानुभूयमानोऽनुभवः केनचिदुक्त्याभासेन निर्विशेष इति निष्कृष्यमाणो निष्कर्षहेतुभूतैः सत्तातिरिक्तैः स्वासाधारणैरस्वभावविशेषैः सविशेष एवावतिष्ठते"[२] इति निर्गुणस्यापि ब्रह्मणः सविशेषत्वमेव युक्तियुक्तमित्युक्तम्।

शक्तिस्वरूपम्

औष्ण्यं हुताश इव शीतलिमानमिन्दौ
शय्यासु मार्दवमिवाश्मसु कर्कशत्वम्।
बाह्येषु मोह इव योगिषु च प्रबोधम्
स्वातन्त्र्यमस्ति हि नियन्त्रायितुर्महन्मे।।

इति महार्थमञ्जरीपरिमलधृतसंविदुल्लासोक्त्या जगति सर्वमपि वस्तुजातं यात्कञ्चिदसाधारणशक्तिविशिष्टमेव दरीदृश्यते। एतादृशशक्तिविशिष्टस्य जगतो निर्माता परशिवोऽप्यद्भुतशक्तिविशिष्ट इत्यत्र न कोऽपि सन्देहः। परशिवस्येयं शक्तिः किं स्वरूपा? इति जिज्ञासायां श्रीशिवयोगिशिवाचार्यैस्तस्या द्विविधं स्वरूपं दर्शितम्। तत्र "तदीया परमा शक्तिः सच्चिदानन्दलक्षणा"[३] इत्यनेन प्रथमं स्वरूपम्, गुणत्रयात्मिका शक्तिर्ब्रह्मनिष्ठा सनातनी"[४] इत्यनेन च द्वितीयं स्वरूपं ज्ञायते।

अत्रेदमवधातव्यम्– यद्यपि शक्तिरेकैव, अथाप्यस्या द्वे अवस्थे; तत्रैकाऽविभागपरामर्शाख्या, अपरा च विभागपरामर्शाभिधेया अविभागपरामर्शदशायामियं शक्तिः परशिववत् सच्चिदानन्दस्वरूपा भवति, अर्थात् सच्चिदानन्दस्वरूपस्य परशिवस

---

[१] सि. शि. २.४

[२] ब्र. सू. श्रीकर. २.१.९.३२

[३] सि. शि. २.१२

[४] सि. शि. ५.३९

अस्मि, प्रकाशे, नन्दामीति योऽनुभवो भवति, स एवास्य विमर्शशक्तिरित्युच्यते। यद्ययमनुभवः परशिवे न भवेत्, तदा स स्वप्रकाशोऽपि स्फटिकमणिमुकुरादिवज्जडः स्यात्। इष्टापत्तौ च स्वीयं सच्चिदानन्दस्वरूपमन्धसौन्दर्यमिव स्वाननुभवाद् व्यर्थतामापद्येत। अतः परशिवे सच्चिदानन्दानुभवरूपा विमर्शशक्तिरवश्यमेवाङ्गीकर्तव्या। अत एव श्रीशिवयोगिशिवाचार्यः– "वन्दे तां परमानन्दप्रबोधलहरीं शिवाम्"[1] इति तां परमानन्दप्रबोधरूपत्वेन, श्रीमायीदेवश्च– "शिवानुभूतिप्रतिभाकलायै"[2] इति शिवानुभूतिप्रतिभारूपत्वेन स्तुतवन्तौ। इयमेव शक्तिर्जगदुत्पत्तिसमये इच्छाज्ञानादिरूपेण विभागपरामर्शदशामापन्ना सती सत्त्वादिगुणत्रयात्मिका माया च भवति।

एवं च शक्तिर्वस्तुतः सच्चिदानन्दरूपिणी, माया तु तत्परिणामभूता। इयमेव विमर्शशक्तिश्चिच्छक्तिरित्यभिधीयते। अस्या एव शक्तेः "सर्वोपेता च तद्दर्शनात्"[3] इति ब्रह्मसूत्रे जगज्जन्मादिसर्वसामर्थ्यवत्त्वमुक्तम्। ब्रह्वृचोपनिषदि च– "तस्या एव ब्रह्मा अजीजनत्। विष्णुरजीजनत्। रुद्रोऽजीजनत्। सर्वे मरुद्गणा अजीजनन्। गन्धर्वाप्सरसः किन्नरा वादित्रवादिनः समन्तादजीजनन्। भोग्यमजीजनत्। सर्वमजीजनत्। सर्वं शाक्तमजीजनत्। अण्डजं स्वेदजमुद्भिजं जरायुजं यत्किञ्चैतत्प्राणिस्थावरजङ्गमं मनुष्यमजीजनत्। सैषा पराशक्तिः" इति तस्याः शक्तेर्जगज्जन्मादिसामर्थ्यवत्त्वं स्पष्टीकृतम्। चन्द्रे चन्द्रिकावत् परशिवनिष्ठेयं पराशक्त्यपरपर्यायविमर्शशक्तिर्विश्ववैचित्र्ये कारणं भवति। एतन्निमित्तेन परशिवब्रह्मविश्वभाजनमित्युच्यते। तदुक्तं रेणुकभगवत्पादैः–

विमर्शाख्या पराशक्तिर्विश्ववैचित्र्यकारिणी।
यस्मिन् प्रतिष्ठिता ब्रह्म तदिदं विश्वभाजनम्।।
यथा चन्द्रे स्थिरा ज्योत्स्ना विश्ववस्तुप्रकाशिनी।
तथा शक्तिर्विमर्शाख्या प्रकाशे ब्रह्मणि स्थिरा।।[4] इति।

---

[1] सि. शि. १.११
[2] अनु. सू. १.४
[3] ब्र. सू. २.१.९.३०
[4] सि. शि. २०.३०–३८

शक्तिसद्भावे मानम्

ननु स्वरूपातिरिक्ता केयं शक्तिर्नाम? किं वाऽत्र मानम्? इति जिज्ञासायां लोकानुभवेन श्रुतिप्रामाण्याच्च साऽङ्गीक्रियते। लोके ह्यग्निः कदाचिद् दह्यमानः, कदाचिन्मणिमन्त्रादिभिः प्रतिबन्धे सत्यदह्यमानश्चावलोक्यते। एवमेव मूषिकाघ्रातं दग्धं वा बीजं बीजान्तरसदृशमपि भूमावुप्तं सन्नाङ्कुरं जनयति। एतेनाऽग्निस्वरूपातिरिक्ता दहनशक्तिः, बीजस्वरूपातिरिक्ताऽङ्कुरजननशक्तिश्चास्तीति युक्तितः सिद्ध्यति। एतादृशशक्तिशक्तिमतोर्नात्यन्तं भेदो नाऽप्यभेदः, किन्तु भेदाभेद एव। एवं सर्ववस्तुषु शक्तिसिद्धौ "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च"[1] "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्"[2], "न शिवेन विना शक्तिर्न शक्तिरहितः शिवः"[3] इत्यादिश्रुतिस्मृतयश्च परशिवस्य शक्तिसद्भावे प्रमाणम्।

शिवशक्त्योः सम्बन्धः

स शिवोऽहमुमा शक्तिस्त्वमेव परमेश्वरि।
त्वया सहाविनाभावात् सोमं मां परिचक्षते।।[4]

इत्यागमप्रमाणानुसारं शिवशक्त्योः सम्बन्धोऽस्मिन् सिद्धान्तेऽविनाभावाख्य इति स्वीक्रियते। तत् स्थित्या तन्निष्ठस्य भावस्तद्विना तन्निष्ठस्याभावोऽविनाभावः अर्थात् सर्वदाऽविभक्तरूपेण परस्परमवस्थितिः, ईदृशः सम्बन्धोऽविनाभावसम्बन्धः। स च शिवशक्त्योर्विद्यते। अत एव श्रीमरितोण्टदार्यैः–

न शिवेन विना शक्तिर्न शक्तिरहितः शिवः।
पुष्पगन्धवदन्योन्यं मारुताम्बरयोरिव।।[5]

इत्युपबृंहणवचनेन शिवशक्त्योरविनाभावसम्बन्धत्वं संसूचितम्। श्रीरेणुकभगवत्पादा अपि–

यथा चन्द्रे स्थिरा ज्योत्स्ना विश्ववस्तुप्रकाशिनी।
तथा शक्तिर्विमर्शाख्या प्रकाशे ब्रह्मणि स्थिरा।।[6]

---

[1] श्वे. उ. ६.८
[2] श्वे. उ. ४.१०
[3] वी. आ. चं., पृ. ७
[4] सूक्ष्मा. क्रि. पा. २.१४
[5] वी. आ. च., पृ. ७
[6] सि. शि. २०.३८

इत्यत्र चन्द्रचन्द्रिकादृष्टान्तेन तयोरविनाभावं सम्बन्धं समर्थितवन्तः। यथा पुष्पगन्धयोः, चन्द्रचन्द्रिकयोश्च परस्परं नात्यन्तं भेदो नाऽप्यभेदः, किन्तु भेदाभेदः, तथैव परशिवस्य केवलावस्थायां स्वस्थाया शक्तिर्विमर्शनाम्नी सा तदभिन्नाऽपि लीलावस्थायां क्षुभिता सती विश्वकारणतां भजत इति शिवशक्त्योरवस्थाभेदेन कालभेदेन च भेदाभेदौ सम्भवत इत्युक्ताऽविनाभावसम्बन्धो भेदाभेदे पर्यवस्यति। तदुक्तं कूर्मपुराणे—

> **एषा शक्तिः शिवा ह्येतत् शक्तिमानुच्यते शिवः।**
> **शक्तिशक्तिमतोर्भेदं वदन्ति परमार्थतः।।**
> **अभेदं चानुपश्यन्ति योगिनस्तत्त्वचिन्तकाः।।** इति।

कविकुलगुरुः कालिदासोऽपि—

> **वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।**
> **जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।**[1]

इति शब्दार्थयोरिव शिवशक्त्योरविनाभावसम्बन्धं कथयामास। एवं शिवशक्त्योरविनाभावसम्बन्धमङ्गीकरणकारणेन श्रीसिद्धान्तशिखामणिग्रन्थनिरूपित-वीरशैवदर्शनस्य शक्तिविशिष्टाद्वैतदर्शनमित्यपरं नाम वर्तते।

शक्तिविशिष्टाद्वैतपदस्यान्वर्थकता

"शक्तिश्च शक्तिश्च शक्ती, ताभ्यां विशिष्टौ जीवेशौ, तयोरद्वैतं शक्तिविशिष्टाद्वैतम्" इति शक्तिविशिष्टाद्वैतपदस्य व्युत्पत्तिः। जीवः स्थूलचिदचिद्रूपशक्तिविशिष्टः, शिवस्तु सूक्ष्मचिदचिद्रूपशक्तिविशिष्टः। अत्र स्थूला चित् किञ्चिज्ज्ञत्वरूपा, स्थूला अचित् किञ्चित्कर्तृत्वरूपा। एवमेव सूक्ष्मा चित् सर्वज्ञत्वरूपा, सूक्ष्मा अचित् सर्वकर्तृत्वरूपा, अर्थाज्जीवः किञ्चिज्ज्ञत्वकिञ्चित्कर्तृत्वशक्तिविशिष्टः, शिवः सर्वज्ञत्वसर्वकर्तृत्वरूपशक्तिविशिष्टः। एवम्भूतयोर्जीवशिवयोः "जले जलमिव न्यस्तं वह्नौ वह्निरिवार्पितम्"[2] इति रेणुकभगवत्पादोक्त्या तयोरद्वैतं प्रतिपाद्यत इतीदं दर्शनं शक्तिविशिष्टाद्वैतदर्शनमित्युच्यते। एवं जीवदशायां शिवदशायां च शक्तिविशिष्टत्वं प्रतिपाद्य तद्द्वाराऽपि शिवशक्त्योरविनाभावसम्बन्धोऽङ्गीकृतोऽत्र दर्शने।

---

[1] रघु. १.१

[2] सि. शि. २०.६१

ननु शक्तिविशिष्टत्वेऽप्यद्वैतं कीदृशमिति चेन्न, तयोः शिवशक्त्योरविनाभावस्वीकारेणैव तत्सम्भवात्। शिवस्यापृथक्सिद्धधर्मभूतशक्तेः शिवाऽभिन्नत्वम्, तथापि शिवस्वरूपातिरिक्तत्वात् तस्याः भिन्नत्वमपि स्वीक्रियत इति शिवशक्त्योर्भेदाभेदावत्रोपपद्येते। तस्मादत्र शक्तिविशिष्टत्वमद्वैतत्वं चोपपद्यत इति शक्तिविशिष्टाद्वैते नास्ति विरोधशङ्कालवलेशोऽपि।

शक्तेर्भेदाः

परशिवनिष्ठेयं शक्तिश्चिच्छक्ति-पराशक्ति-आदिशक्ति-इच्छाशक्ति-ज्ञानशक्ति-क्रियाशक्तिरिति भेदेन षड्रूपाऽङ्गीक्रियते। एतासु षट्शक्तिषु चिच्छक्तिः परशिवस्य सच्चिदानन्दस्वरूपस्य बोधिकेति परशिवेन साकं समरसीभूता वर्तते। सृष्टिसमये चिच्छक्तिविशिष्टपरशिवात् पञ्चशक्तयः क्रमेणैकैकस्य सहस्रांशेन प्रादुर्भवन्ति। तदुक्तं वातुलशुद्धाख्यतन्त्रे–

> योगिनामुपकाराय स्वेच्छया चिन्त्यते शिवः।
> तच्छिवे तु पराशक्तिः सहस्रांशेन जायते।।
>
> तच्छक्तेस्तु सहस्रांशादादिशक्तिसमुद्भवः।
> आदिशक्तिसहस्रांशाद् इच्छाशक्तिसमुद्भवः।।
>
> इच्छाशक्तिसहस्रांशाद् ज्ञानशक्तिसमुद्भवः।
> ज्ञानशक्तिसहस्रांशात् क्रियाशक्तिसमुद्भवः।।
> एता वै शक्तयः पञ्च निष्कलाश्चेति कीर्तिताः।।[1] इति।

इमा एव शक्तयः क्रमेण शान्त्यतीताकला-शान्तिकला-विद्याकला-प्रतिष्ठाकला-निवृत्तिकलेति कलाशब्देनापि व्यवह्रियन्ते[2]।

परशिवस्य महेश्वरशब्दाभिधेयत्वम्

पूर्वोक्तपराशक्त्यादिपञ्चाङ्गविशिष्टा सच्चिदानन्दबोधरूपेण परशिवेन साकं समरसीभूता विमर्शशक्त्यपरपर्याया चिच्छक्तिर्विभागपरामर्शदशायाम्, अर्थात् शिवस्य सृष्ट्यवस्थायां सत्त्वादिगुणत्रयात्मिका भवति, सैवात्र सिद्धान्ते महामाया, परामाया,

---

[1] वा. शु. त. १.२४-२७, तुलना कर्तव्या, सूक्ष्मा. क्रि. पा. १.२०-२२

[2] द्र. अ. सू. ३.२४-२६

ऊर्ध्वमायेत्याद्यभिधानैर्व्यवह्रियते। एतादृशमहामायायुक्तः परशिव एव 'महेश्वरः' इत्यभिधीयते। तदुक्तम्–

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।
तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत्।।[१] इति।

यथा मायासम्बन्धेन परशिवस्य महेश्वर इत्यभिधानमायातम्, तथा परशिवसम्बन्धेन शक्तिरपि मायाशब्देनोच्यते। अत्र मायाशब्देनाद्वैतवेदान्तप्रतिपादिता 'या मा सा माया' इति व्युत्पत्तिसिद्धब्रह्मज्ञानावरोधिका मायेति नैव गृह्यते, अपि तु "मं शिवम्, अयति स्वभावतः प्राप्नोतीति माया" इति व्युत्पत्त्या शिवेऽविनाभावसम्बन्धेन विद्यमाना मायेति गृह्यते। तदुक्तं सिद्धान्तागमे–

मं शिवं परमं ब्रह्म प्राप्नोतीति स्वभावतः।
मायेति प्रोच्यते लोके ब्रह्मनिष्ठा सनातनी।।[२] इति।

एतेन मायाशक्तेर्नित्यसम्बन्धित्वं सूचितम्। अत्रेदमैदम्पर्यम्– मिथ्याभूतमायाविशिष्ट ईश्वरो न महेश्वरपदवाच्यः, अपि तु नित्यं सत्यरूपेण परशिवनिष्ठशक्तिः शिवस्य सृष्ट्युन्मुखावस्थायां यदा विभागपरामर्शदशामापन्ना गुणत्रयात्मिका भवति, तदा तद्विशिष्ट ईश्वरो महेश्वरपदवाच्यः। अत एव उमचगिशङ्करशास्त्रिणा– "न त्वद्वैतिनामिव त्रैकालिकनिषेधप्रतियोगिमायोपाधिकेश्वररूपं ब्रह्म, तस्य सद्भावे प्रमाणाभावात्। वेदान्तादेः प्रमाणत्वे ब्रह्मेतरप्रमाणस्य सत्यत्वे द्विसत्यत्वप्रसङ्गादद्वैतहानिः। न हि यत्प्रमाणं तत्कदाप्यप्रामाण्यं भवितुमर्हति। न हि लोकायतिकं विना देहात्मप्रत्ययस्य प्रामाण्यं मन्यते कोऽप्यास्तिकः। लोकायतिकस्तु तस्य सदैव प्रामाण्यं मन्यत एव। तस्माद्देहात्मप्रत्ययस्य सदैवाप्रामाण्यात् तद्दृष्टान्तानुरोधेन वेदान्तादिशास्त्रस्यापि सदैवाप्रामाण्यप्रसङ्गात्। इष्टापत्तौ नास्तिक्यापत्तेः, तस्मान्न मिथ्यामायाशक्तिविशिष्टेश्वरः साम्बपदेनोक्तः"[३] इति साम्बापरपर्यायमहेश्वरस्य मिथ्याभूतमायाशक्तिविशिष्टत्वं निराकृतम्। तस्मान्नित्यसम्बन्धेन त्रिगुणात्मकमायाविशिष्टत्वं महेश्वरस्य पर्यवस्यति।

तदेवं शक्तेश्चैतन्येन नित्यसम्बन्धात् तस्या मायेति, मायायुक्तत्वेन च चैतन्यस्य महेश्वर इत्युभे अपि नामधेये अन्वर्थके सञ्जाते। एतेनोभयोरनादित्वं

---

[१] श्वे. उ. ४.१०

[२] श. वि. सि., पृ. ३

[३] सि. शिखो. शाङ्करी व्याख्या २

नित्यत्वं च सूचितम्। इयं च परा माया शुद्धसत्त्वगुणप्रधाना भवतीति स्वाश्रयभूतं महेश्वरं न मोहयति, प्रत्युत तस्य सर्वज्ञत्वाद्युत्कृष्टगुणान् सम्पादयति। लोकेऽपि कोऽपि सात्त्विकः स्वाश्रयदातारं प्रति कृतज्ञताभावेन हितमुन्नतिमेव वा साधयति, न कदाऽप्यहितम्। तदुक्तं रेणुकभगवत्पादैः–

उपाधिः पुनराख्यातः शुद्धाऽशुद्धविभेदतः।
शुद्धोपाधिः परामाया स्वाश्रयाऽमोहकारिणी।।

मायाशक्तिवशादीशो नानामूर्तिधरः प्रभुः।
सर्वज्ञः सर्वकर्ता च नित्यमुक्तो महेश्वरः।।[1] इति।

न च यथा जीवगताल्पज्ञत्वाल्पकर्तृत्वादिशक्तयः स्वाश्रयभूतं जीवं बध्नन्ति, तथैवेश्वरस्यापीति वाच्यम्, जीवस्याशुद्धोपाधित्वात्, ईश्वरस्य च शुद्धोपाधित्वात्। किञ्चोक्तं टी. जी. सिद्धप्पाराध्यमहाभागैः– "जीवेश्वरयोरुभयोरपि चेतनत्वं समानं सदपि ईश्वरस्येश्वरत्वादेव नियामकत्वादेव न च बन्धप्रसक्तिः। न हि कारागृहगतयोश्चोरराजभटयोरुभयोरपि बन्धो युज्यते। चोरस्यैव बन्धः, नियाम्यत्वात्, राजभटस्य तु नियामकस्य न बन्धः"[2] इति। तस्माज्जीवस्य बन्धकत्वेऽपीश्वरस्य न बन्धकत्वमिति निश्चप्रचम्।

महेश्वराङ्गीकारे प्रयोजनम्

सृष्ट्यादीनामीश्वरकर्तृकत्वस्थापनार्थं प्रायो नैयायिकादय ईश्वरप्रतिपादका दार्शनिकास्तस्य सगुणरूपत्वमेवाङ्गीचक्रुः। एवमेव सिद्धान्तशिखामणौ प्राणिनामदृष्टानुसारं सृष्ट्यादिव्यवस्थार्थं परशिवब्रह्मणः सगुणरूपोऽयं महेश्वरोऽङ्गीकृतः। तदुक्तं तत्र–

शिवाभिधं परं ब्रह्म जगन्निर्मातुमिच्छया।
स्वरूपमादधे किञ्चित्सुखस्फूर्तिविजृम्भितम्।।

विशुद्धज्ञानकरणं विषयं सर्वयोगिनाम्।
कोटिसूर्यप्रतीकाशं चन्द्रकोटिसमप्रभम्।।
अप्राकृतगुणाधारमनन्तमहिमास्पदम् ।।[3] इति।

---

[1] सि. शि. ५.४४-४६

[2] श्वे. उ. वीरशैवभाष्ये १.९

[3] सि. शि. २.८,११-१२

अस्यायमर्थः– विमर्शशक्तिविशिष्टं शिवाख्यं परं ब्रह्म विश्वसिसृक्षया घृतकाठिण्यन्यायेन, अर्थाद् द्रवीभूतस्याऽपरिमितस्य घृतस्यैकदेशे शैत्याधिक्ये सति यथा घनीभावो जायते, तथाऽपरिमितसुखस्वरूपः स स्वेच्छया सुखबाहुल्योच्छूनं किञ्चित् स्वरूपमङ्गीचकार। एतदेव परशिवस्य महेश्वराभिधेयं सगुणरूपम्। अयमेव सृष्टि-स्थिति-लय-तिरोधान-अनुग्रहात्मकं कृत्यपञ्चकं स्वेच्छामात्रेण निर्वहति।

ननु विश्ववैचित्र्यव्यवस्थार्थं सृज्यमानप्राणिनामदृष्टस्यावश्यमङ्गीकर्तव्यत्वात्, तेनैव सृष्टिः सम्भवतु, किमनयाऽन्तर्गड्डुभूतेश्वरेच्छयेति चेन्न, प्राणिनां कर्माणि तु जडानि, न च तानि स्वतः फलप्रदाने समर्थानि। अतस्तन्नियन्त्रणार्थं तदनुरूपफलप्रदानार्थं च तत्तत्कर्मणां साक्षित्वेन प्रेरकत्वेन चेश्वरोऽङ्गीकृतः। तदुक्तं श्रीरेणुकभगवत्पादैः–

एतेषां देहिनां साक्षी प्रेरकः परमेश्वरः।
एतेषां भ्रमतां नित्यं कर्मयन्त्रनियन्त्रणे।।

देहिनां प्रेरकः शम्भुर्हितमार्गोपदेशकः।
पुनरावृत्तिरहितमोक्षमार्गोपदेशकः ।।[1] इति।

किञ्च, वीरशैवदर्शने "यथोर्णनाभिः सृजते गृह्णते च" इत्यादिश्रुतिप्रमाणेन सृष्टौ मायाशक्तिविशिष्टो महेश्वर एवाभिन्ननिमित्तोपादानकारणमिति स्वीक्रियते। मायायास्त्रिगुणात्मकत्वात् तदुपादानकारणम्, महेश्वरश्च निमित्तकारणम्। अत्र "न शिवेन विना शक्तिर्न शक्तिरहितः शिवः" इति वचनानुसारेण शिवशक्त्योरेकरूपत्वाऽङ्गीकारादभिन्ननिमित्तोपादानकारणवादः सङ्गच्छते[2]। स च–

शक्त्यण्डमृत्पिण्डमुपाददानो
मायाण्डचक्रभ्रमणक्रमेण ।
मूलाण्डदण्डेन मुहुर्विधत्ते
ब्रह्माण्डभाण्डं भगवान् कुलालः।।[3]

---

[1] सि. शि. ५.५०-५१

[2] शक्तिरस्य जगत्कृत्स्नं शक्तिमांस्तु महेश्वरः।
शक्तिस्तु शक्तिमद्रूपाद् व्यतिरिक्ता हि न क्वचित्।।
(ब्र. सू. श्रीकर १.४०.१०)

[3] श. वि. द., पृ. ६६

इत्युक्त्या समर्थितो भवति। भगवान् भाष्यकारोऽपि–

शिव एव हि देवोऽन्तः स्थितमिच्छावशाद् बहिः।
योगीव निरुपादानमर्थजातं प्रकाशयेत्।।[१]

इति ईश्वरप्रत्यभिज्ञावचनं प्रमाणयन् स्वस्माद् बहिर्भूतं किञ्चिदपि वस्तुजातमनपेक्ष्य निर्माणसमर्थो योगिवत् शिवोऽप्यस्तीति प्रतिपाद्य तस्याऽभिन्ननिमित्तोपादानकारणत्वं समर्थयामास।

सृष्टेर्लीलारूपत्वम्

नन्वेतादृशसृष्टिनिर्माणे महेश्वरस्य किं प्रयोजनम्? किञ्चित्प्रयोजनसत्त्वे तस्याऽनाप्तकामत्वापत्तिः, प्रयोजनाऽभावे च तस्योन्मत्तप्रवृत्तिप्रसङ्ग इति चेन्न, लीलार्थं तत्प्रवृत्त्युपपत्तेः। अत्रेदं बोध्यम्– वीरशैवदर्शने परशिवब्रह्मणो लीलावस्था कैवल्यावस्था चेत्यवस्थाद्वयमङ्गीक्रियते। तत्र सर्वव्यापारशून्या कैवल्यावस्था, सृष्टिस्थित्यादिपञ्चकृत्यकर्तृत्वं च लीलावस्था। लोके यथा निपुणो नटः स्वयमेवाऽनेकरूपधारणं कृत्वा नाट्यमभिनयति, तथा परशिवोऽपि स्वस्वातन्त्र्यशक्तिमहिम्ना कदाचित् सृष्ट्या, कदाचित् पालनेन, कदाचित् संहारेण, कदाचित् तिरोधानेन, कदाचिदनुग्रहाख्यव्यापारेण लीलयन् तिष्ठति। यथा वा लोके सर्वैश्वर्य-धैर्य-वीर्य-पराक्रमधुर्यस्य सप्तद्वीपपरिवृतसर्वमण्डलाधीश्वरस्य महाराजस्य विशेषप्रयोजनं विनैव क्रीडाविहारादिषु प्रवृत्तिर्दृश्यते, तथैव परशिवस्य प्रयोजनाऽभावेऽपि लीलार्थं पञ्चकृत्येषु प्रवृत्त्युपपत्तेः[२]। तदुक्तं श्रीमरितोण्टदार्यैः– "स्वेच्छाशक्तिरूपापोहनटङ्कवशाच्छिवादिधरण्यन्तषट्त्रिंशत्तत्त्वात्मना विचित्रीकृत्य सृष्टिस्थितिसंहारबन्धमोक्षलक्षणपञ्चकृत्यमहानाट्यरसिकः सन् क्रीडतीति राद्धान्तः"[३] इति।

वस्तुतस्त्वल्पायाससाध्या विधेयनिष्पत्तिमात्रफलिका कर्तुरुद्देश्यस्याऽऽसाधिका हि क्रिया लीलापदार्थः। प्रकृते च पञ्चकृत्यानां परशिवस्येच्छामात्रेण सम्भवात् तेष्वल्पायाससाध्यत्वम्, तत्करणे च परशिवस्य किमपि प्रयोजनं न सिध्यतीति

---

[१] *ब्र. सू. श्रीकर २.१.२५, श्लोकोऽयमेव ईश्वरप्रत्यभिज्ञायां 'शिव एव' इति स्थाने 'चिदात्मैव' इति वर्तते।*

[२] *ब्र. सू. श्रीकर. २.१.३३*

[३] *वी. आ. च., पृ. २८*

तेषु विधेयनिष्पत्तिमात्रफलकत्वं कर्तुरुद्देश्यस्याऽऽसाधकत्वं च वर्तत इति तेषां लीलावाचकत्वं सम्भवत्येव। अत एव श्रीसिद्धान्तशिखामणौ श्रीशिवयोगिशिवाचार्यः–

स्वेच्छाविग्रहयुक्ताय स्वेच्छावर्तनवर्तिने।
स्वेच्छाकृतत्रिलोकाय नमः साम्बाय शम्भवे।।[१]

इत्यत्रेच्छामात्रेण जगत्कर्तृत्वं प्रतिपाद्य तस्याल्पायाससाध्यत्वम्, अत एव लीलारूपत्वं च सूचितवान्।

ननु महतीयं विश्वरचना कथं लीलेत्युच्यते? इति चेत्, सत्यम्, अल्पज्ञानामल्पशक्तियुक्तानामस्माकं कृते विश्वरचना महतीव प्रतिभाति, किन्तु सर्वज्ञस्य सर्वशक्तिसमन्वितस्येश्वरस्य कृते तु लीलैव केवलम्। अत एव भगवता बादरायणेन– "लोकवत्तु लीलाकैवल्यम्"[२] इत्युक्तम्।

यद्यपि लौकिकलीलासु किञ्चिदपि प्रयोजनमुत्प्रेक्षयितुं शक्यते, अथापि नेश्वरलीलायां तत्सम्भवः, "आप्तकामस्य का स्पृहा" इति तस्य नित्यतृप्तत्वप्रतिपादनात्। न चैवं सत्यप्रवृत्तिरिति वक्तव्यम्, "यतो वा ईमानि भूतानि जायन्ते"[३] इत्यादिश्रुत्या विश्वरचनायामीश्वरप्रवृत्तेः श्रवणात्। नाप्युन्मत्तप्रवृत्तिः, "यः सर्वज्ञः सर्ववित्"[४] इत्यादिना सर्वज्ञत्वप्रतिपादनात्। अत एव विश्वरचना लीलामात्रमित्येव समञ्जसम्।

वैषम्यनैर्घृण्यदोषपरिहारः

ननु निर्लिप्तस्य परशिवस्य जगत्कारणत्वे देवतिर्यङ्मनुष्याद्युत्तममध्यमाधमसृष्ट्या शिवस्य बद्धजीववद् वैषम्यनैर्घृण्यदोषापत्तिः, तद्वारणाय सृज्यमानजीवकर्मसापेक्षत्वे तस्य सर्वशक्तत्वहानिरिति चेन्न, "वैषम्यनैर्घृण्ये न सापेक्षत्वात्, तथा हि दर्शयति"[५] इति सूत्रेण भगवता बादरायणेन निराकृतत्वात्। अत्रायं भावः– "पुण्यः पुण्येन कर्मणा भवति पापः पापेन"[६] इति श्रुतौ प्राणिनां

---

१. सि. शि. १.६
२. ब्र. सू. २.१.३३
३. तै. उ. ३.१
४. मुण्ड. १.१.९
५. ब्र. सू. २.१.३४
६. बृ. उ. ४.४.५

भोगवैषम्ये स्वस्वकर्मणां कारकत्वप्रतिपादनान्नेश्वरे स दोषः सम्भवति। अत एव श्रीरेणुकभगवत्पादाचार्या अपि–

अविद्यामोहिता जीवा ब्रह्मैक्यज्ञानवर्जिताः।
परिभ्रमन्ति संसारे निजकर्मानुसारतः।
देवतिर्यङ्मनुष्यादिनानायोनिविभेदतः ।।

चक्रनेमिक्रमेणैव भ्रमन्ति हि शरीरिणः।
जात्यायुर्भोगवैषम्यकारणं कर्म केवलम्।।[1]

इति प्राणिनां जात्यायुर्भोगवैषम्ये प्राणिनां कर्माण्येव कारणानीत्युक्त्वा,

एतेषां देहिनां साक्षी प्रेरकः परमेश्वरः।
एतेषां भ्रमतां नित्यं कर्मयन्त्रनियन्त्रणे।।[2]

इति परमेश्वरस्य तत्तत्कर्मनियन्तृत्वमात्रं प्रतिपादयामासुः। अत्रायं भावः- "विद्युद्दीपप्रज्वलनव्यजनयन्त्रभ्रमणादयो विद्युता विना न सम्भवन्तीति तत्कारणं विद्युदेव, अथापि तत्र ज्वलन-भ्रमणादिकार्यवैचित्र्ये तत्तद्यन्त्रगतवैचित्र्यमेव कारणम्; विद्युत्तु तत्र प्रेरकमात्रभूता; एवमेव परमेश्वरं विना सृष्टेरनुपपन्नत्वेऽपि तद्वैचित्र्ये तत्तत्कर्मैव कारणम्, परमेश्वरस्तु विद्युद्वत् प्रेरकः साक्षी च केवलमिति विज्ञेयम्। अत एव भगवान् भाष्यकारोऽपि–

निमित्तमात्रमेवासौ सृज्यानां सर्गकर्मणि।
प्रधानकारणीभूता यतो वै सृज्यशक्तयः।।[3]

इति व्यासोक्तिं प्रमाणयन् देवादिवैचित्र्यहेतुभूतसृज्यमानक्षेत्रज्ञप्राचीनकर्मरूप शक्तिरेव कारणमित्यभिमत्य परमेश्वरस्य निमित्तकारणत्वं व्यवस्थाप्य वैषम्यनैर्घृण्यदोषं परिहारयामास। श्रीरेणुकभगवत्पादाचार्या अपि–

यथा व्याप्य जगत्सर्वं स्वभासा भाति भास्करः।
तथा स्वशक्तिभिर्व्याप्य परमात्मा प्रकाशते।।[4]

---

[1] सि. शि. ५.४७-४९

[2] सि. शि. ५.५०

[3] ब्र. सू. श्रीकर २.१.३४

[4] सि. शि. १८.३४

इति दृष्टान्तान्तरेण पूर्वोक्तमेव सिद्धान्तं समर्थितवन्तः। अनेन यथा स्वीयप्रभया प्राणिचेष्टाहेतुभूतोऽपि भास्करस्तत्तत्कार्यवैचित्र्यकारणं न भवति, तथैव जीवसृष्टिविषये परमेश्वरोऽपीति ज्ञायते।

उक्तं च किरणागमे–

यथार्करश्मिसम्पर्कात् पद्मबोधः समो न किम्।
कानिचित् प्रतिबुद्ध्यन्ति तथान्यानि च जातुचित्।।
रागद्वेषौ न चार्कस्य तथेशस्य न तौ यतः।।[१] इति।

नन्ववान्तरसृष्टौ सृज्यमानप्राणिसापेक्षत्वेऽपि प्रथमसृष्टौ तदभावात् सम्भवत्येव स दोष इति चेन्न, जीवानां तत्तकर्मणां चात्र दर्शनेऽनादित्वाङ्गीकारात्, अन्यथा कृतनाशाऽकृताभ्यागमदोषप्रसङ्गः। अत एव "ज्ञाऽज्ञौ द्वावजावीशानीशौ"[२] इति श्रुत्या प्रवाहरूपेण सृष्टेः सत्यत्वम्, क्षेत्रज्ञानां तत्कृतकर्मणां चानादित्वं प्रतिपादितम्।

न च प्राणिकर्मसापेक्षत्वे तस्य सर्वशक्तित्वहानिः; स्वकृतनियमस्य पाल्यमानत्वात्। लोके यथा नृपस्य स्वकृतस्यैव नियमस्य परिपालनेन सर्वशक्तित्वं न हीयते, तथेश्वरस्यापि बोध्यम्। तस्मात् सृष्ट्युत्पत्तावीश्वरस्य साधारणकारणत्वेऽपि सृष्टिवैचित्र्ये तत्तत्प्राणिनामदृष्टमेवाऽसाधारणकारणमिति निष्कर्षः।

एवं सृष्टिस्थितिसंहारनिग्रहानुग्रहात्मकपञ्चकृत्यव्यवस्थार्थं यथेश्वर आवश्यकः, तथा वेदागमादीनां व्यवस्थार्थमपि स आवश्यकः। अत एव भगवान् भाष्यकारः "शास्त्रयोनित्वात्"[३] इत्यस्य सूत्रस्य भाष्ये–

सद्योजातेन ऋग्वेदं वामदेवेन याजुषम्।
अघोरेण तथा सामं पुरुषेण त्वथर्वणम्।।

ईशानेन मुखेनैव कामिकाद्यागमांस्तथा।
जनयामास विश्वेशः सर्वसिद्धिप्रदायकः।।

इति शिवस्य वेदागमोत्पादकस्मृतिमुदाहरन् "शास्त्रस्य ऋग्वेदादेर्योनिः कारणम्" इति व्युत्पत्तिसिद्धशास्त्रयोनित्वं समर्थ्य तदुत्पन्नत्वेन निगमागमानां प्रामाण्यमिति समर्थयामास[४]।

---

१. किरणा., वि.पा., ४.३.४
१. श्वे. उ. १.९
२. ब्र. सू. १.१.३
३. ब्र. सू. श्रीकर १.१.३

तदेतावता पर्यालोचनेन ज्ञायते यत् सिद्धान्तशिखामण्युक्तवीरशैवदर्श मायाशक्तिविशिष्टं परशिवब्रह्मचैतन्यमेव सगुणं सद् महेश्वर इत्यभिधानवान् भवति। अस्य च मायाशक्तिर्न चाद्वैतवेदान्तवन्मिथ्याभूता, किन्तु सत्या। अतो महेश्वरोऽ सत्यः। अस्य चाङ्गीकारस्य जगज्जन्मादिव्यवस्था, वेदागमनिर्माणव्यवस्था च प्रयोजनमिति।

उभयसम्मतेश्वरशक्तिस्वरूपसमीक्षा

तदेतावता भगवद्गीतासिद्धान्तशिखामण्योः प्रतिपादितमीश्वरस्वरूपं तन्निष्ठशक्तिस्वरूपं च तत्तद् ग्रन्थदिशा पार्थक्येनोपस्थापितम्। अधुनोभयसम्मतेश्वरशक्तिस्वरूपयोः समीक्षा प्रस्तूयते।

तत्र तावत् श्रीमद्भगवद्गीतायां श्रीसिद्धान्तशिखामणौ च सृष्ट्यादिव्यवस्था श्रुत्यागमादिशास्त्रव्यवस्थार्थमुपासकेष्टफलप्राप्तिव्यवस्थार्थं चेश्वरोऽङ्गीकृत इतीश्वराङ्गीकारविषये उभयोः समानता दरीदृश्यते।

श्रीमद्भगवद्गीतायामीश्वरस्य निर्गुणनिराकार–सगुणनिराकार–सगुणसाकारेति भेदे स्वरूपत्रयम्, श्रीसिद्धान्तशिखामण्युक्तवीरशैवदर्शने च सगुण–निर्गुणेति तस् स्वरूपद्वयं निरूपितमित्यस्मिन् विषये उभयोः किञ्चिद्वैमत्यमस्तीति प्रतीयते, कि वीरशैवदर्शने ईश्वरस्य सगुणस्वरूपे एव गीतोक्तसगुणनिराकारसगुणसाकाररूपयोरन्तर्भावादत्रापि नैव विरोधं पश्यामः।

अत्रेदमवधेयम्– भगवद्गीतासिद्धान्तशिखामण्योः परशिवस्य निर्गुणविषये किञ्चिद्वैमत्यम्। सगुणविषये गीतायां सगुणनिराकार–सगुणसाकारेति द्वैविध्यमुपपादितमस्ति। अत्र जगज्जन्मादिव्यवस्थार्थं सगुणनिराकारस्य, उपासकानामिष्टफलप्रदानव्यवस्थार्थं च सगुणसाकारस्याङ्गीकारो दृश्यते। वीरशैवदर्शने तु सगु स्वरूपे पुनः साकार- निराकारभेदेन पार्थक्येन द्वैविध्यं नोक्तम्, अथापि सगुणपरशिव एव निराकाररूपेण सृष्टिरचनाम्, आकारं परिधाय भक्तानामनुग्रहप्रद च विदधातीति प्रतिपाद्यते। अत एव श्रीसिद्धान्तशिखामणौ–

चन्द्रार्धशेखरं शुद्धं शुद्धस्फटिकसन्निभम्।
शुद्धमुक्ताफलाभासमुपास्यं गुणमूर्तिभिः।।[1]

---

[1] सि. शि. २.१०

इति सगुणस्याकारत्वमुपास्यत्वं च सूचितम्। तस्मात् परमात्मनः सगुणविषयेऽपि सूक्ष्मावलोकनेन नैव विरोध आभास्यते।

अपरञ्चात्र केचन सगुणस्य मिथ्यात्वं निर्गुणस्यैव सत्यत्वं गीतासम्मतमिति, केचन च सगुणब्रह्मैव गीतासम्मतमिति च वदन्ति। किन्तु नेमावुभावपि विचारौ गीतायाः पूर्णाभिप्रायप्रकटनार्हौ। तथा हि– सर्वश्रुतिसमन्वयार्थं हि खलु गीता प्रवृत्ता। श्रुतिस्तु– "द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं च"[१] "इति ब्रह्मणः सगुणनिर्गुणभेदेन द्वैविध्यमुक्त्वा, "अशब्दमस्पर्शमरूपमव्ययम्"[२], निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्"[३], "अस्थूलमनण्वह्रस्वमदीर्घमलोहितम्"[४] इत्यादिवचनैस्तस्य निर्गुणरूपत्वम्, "तदैक्षत बहु स्यां प्रजायेयेति"[५], "यः सर्वज्ञः सर्ववित्'[६], "सत्यकामः सत्यसङ्कल्पः"[७] इत्यादिवचनैश्च सगुणरूपत्वं प्रतिपादितवती। भगवद्गीतायामपीदमनुसृत्य

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च।।[८]

इति ज्ञेयस्य परब्रह्मणः सगुणनिर्गुणोभयरूपत्वमुक्त्वा, "ये त्वक्षरमनिर्देश्यमव्यक्तं"[९] इत्यादिना तस्य निर्गुणरूपस्य वर्णनम्, "कविं पुराणमनुशासितारं"[१०] इत्यादिना च सगुणरूपस्य वर्णनं कृतम्। तस्माद् ब्रह्मणः सगुणनिर्गुणस्वरूपद्वये एकस्य सत्यत्वम्, अपरस्य मिथ्यात्वं गीतासम्मतमिति प्रतिपादकाः गीताया एकदेशीयतामेव ख्यापयन्ति।

वीरशैवदर्शने परशिवनिष्ठायाः शक्तेरवस्थाभेदेन कालभेदेन च परशिवे निर्गुणत्वं सगुणत्वं च नैजं सम्भवतीति स्वीक्रियते। तथा हि तत्र दर्शने परशिवो

---

[१] बृ. उ. २.३.१
[२] कठ. १.३
[३] श्वे. उ. ६.१९
[४] बृ. उ. ३.८.८
[५] छा. उ. ६.२.३
[६] मुण्ड. १.१.९
[७] छा. उ. ८.१.५
[८] भ. गी. १३.१४
[९] भ. गी. १२.३
[१०] भ. गी. ८.९

विमर्शाख्यशक्तिविशिष्टः। इयं च शक्तिश्चन्द्रचन्द्रिकयोरिवाविनाभावेन परशिवनिष्ठा। अस्या अविभागपरामर्शविभागपरामर्शाख्यभेदेनावस्थाद्वयम्। तत्र प्रथमा सृष्टिपूर्वकालीना, अपरा सृष्टिकालीना। अविभागपरामर्शदशायां सा परशिवं सच्चिदानन्दरूपेण विभागपरामर्शदशायां चेच्छाज्ञानक्रियारूपेण निवसति। इच्छाज्ञानादिरूपेण विभागमप्राप्तया सच्चिदानन्दरूपया शक्त्या विशिष्टः परशिवो निर्गुण इति, इच्छादिरूपेण विभागमधिगतया शक्त्या विशिष्टश्च सगुण इति कथ्यते। तदेवं शक्तिसङ्कोचावस्थायां परशिवस्य निर्गुणत्वम्, तद्विकासावस्थायां च सगुणत्वमिति बोध्यम्।

तदेवं श्रीसिद्धान्तशिखामण्युक्तवीरशैवदर्शने परशिवस्य सृष्टेः पूर्वतनकाले निर्गुणत्वम्, सृष्टिप्रारम्भकाले च सगुणत्वमिति व्यवस्थापितत्वात् श्रीमद्भगवद्गीतायामुक्तः परशिवसगुणनिर्गुणविषयका विचारा वीरशैवदर्शने एव पर्यवस्यन्ति।

अपरञ्च, परशिवस्य सगुणनिर्गुणस्वरूपयोः सगुणरूपस्य मिथ्यात्वाङ्गीकारे उपासकानां भक्तानां श्रद्धाऽनुदयात्,

मय्यावेश्यमनो ये मां नित्ययुक्ता उपासते।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः।।[1]

इत्यादिना गीतोक्तसगुणोपासनात्मकभक्तिसिद्धान्तस्य वैयर्थ्यापत्तिः सगुणस्यैवाङ्गीकारे, "ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते"[2] इत्यादिनोपपादितनिर्गुणोपासनाया वैयर्थ्यापत्तिः। तस्मात् परब्रह्मणः सगुणनिर्गुणोभयरूपमपि गीतायामङ्गीकृतम्, तच्च सिद्धान्तशिखामण्युक्तवीरशैवदर्शने युक्तिपुरःसरमुपपाद्यते इति विषयेऽस्मिन् गीताविचारा वीरशैवदर्शने एव पर्यवस्यन्ति। अतोऽत्र उभयोः समन्वयः।

शक्तिस्वरूपसमीक्षा

"प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि"[3] इत्यादिगीतोक्तिभिः "तदीया परा शक्तिः सच्चिदानन्दलक्षणा"[4] इत्यादिसिद्धान्तशिखामण्युक्तिभिश्चेश्वरे विश्ववैचित्र्यहेतुभूतायाः शक्तेरङ्गीकारदर्शनात् शक्तेरस्तित्वविषये गीतायाः सिद्धान्त

---

[1] भ. गी. १२.२

[2] भ. गी. १२.३

[3] भ. गी. १३.१९

[4] सि. शि. २.१२

शिखामणेश्च वैमत्यं नास्ति। किन्त्वीश्वरे केन सम्बन्धेन सा वर्तत इत्यस्मिन् विषये गीता मौनं साधयति। वीरशैवदर्शने च तयोरविनाभावः सम्बन्धः स्वीक्रियते। अत एव तत्रभवद्भिमरितोण्टदार्यैः–

न शिवेन विना शक्तिर्न शक्तिरहितः शिवः।
पुष्पगन्धवदन्योन्यं मारुताम्बरयोरिव।।[1]

इत्युपबृंहणवचनेन शिवशक्त्योरविनाभावसम्बन्धो न्यरूपि। श्रीसिद्धान्त-शिखामणावपि रेणुकभगवत्पादाः–

यथा चन्द्रे स्थिरा ज्योत्स्ना विश्ववस्तुप्रकाशिनी ।
तथा शक्तिर्विमर्शाख्या प्रकाशे ब्रह्मणि स्थिरा ।।[2]

इत्यत्र चन्द्रचन्द्रिकादृष्टान्तेन शिवशक्त्योरविनाभावसम्बन्धं सूचयामासुः।

परमेश्वरनिष्ठेयं शक्तिर्गीतायां मूलप्रकृति-दिव्यचिन्मयी-योगमाया-दैवीप्रकृति-त्रिगुणात्मिकेति पञ्चविधात्मकतया निरूपिता। सिद्धान्तशिखामणौ तु शक्तेर्विभाग-परामर्श-अविभागपरामर्शेति भेदेनाऽवस्थाद्वयमुक्त्वा, अविभागपरामर्शदशायां सा परशिवस्य सच्चिदानन्दबोधरूपेण परशिवेन साकं समरसीभूता, सैव सृष्टिसमये विभागपरामर्शदशापन्ना पराशक्ति-आदिशक्ति-इच्छाशक्ति-ज्ञानशक्ति-क्रियाशक्तीत्याख्यया पञ्चरूपेण भिद्यत इत्यङ्गीक्रियते।

तत्र गीतायां जगदुत्पत्तेः पूर्वमेव सकलभूतानामाश्रयीभूता ब्रह्मणि सूक्ष्मरूपेण विद्यमाना जगत्सिसृक्षोः परमात्मनः सहकारिणी शक्तिरेव [3]मूलप्रकृतिरिति प्रतिपादनात् सा वीरशैवदर्शनोक्तशक्तेरविभागपरामर्शदशायाः साम्यं गमयति, गीतोक्तत्रिगुणात्मिका शक्तिश्च विभागपरामर्शदशया साम्यं गमयति, "गुणत्रयात्मिका शक्तिर्ब्रह्मनिष्ठा सनातनी"[4] इति श्रीसिद्धान्तशिखामणौ विभागपरामर्शदशापन्नशक्तेस्त्रिगुणात्मकत्व-श्रवणात्। विभागपरामर्शदशापन्नशक्तिविशिष्टपरशिवः कर्तुमकर्तुमन्यथाकर्तुं शक्तो भवतीति तस्य सर्वज्ञत्वसर्वकर्तृत्वाद्यनन्तशक्तिविशिष्टत्वम्। एवमनन्तशक्तिवैशिष्ट्ये हेतुभूतायां विभागपरामर्शदशापन्नशक्तावेव गीतोक्तानां दिव्यचिन्मयी-योगमाया-

---

[1] वी. आ. च., पृ. ७

[2] सि. शि. २०.३८

[3] सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ।। (भ. गी. ९.७)

[4] सि. शि. ५.३८

दैवीप्रकृत्याख्यशक्तीनाम्, तदतिरिक्तानामपि यावत् शक्तीनामन्तर्भावः। तस्माद् भगवद्गीतायाः सिद्धान्तशिखामणेश्च शक्तिस्वरूपविषयकविचारेऽपि समानताऽवलोक्यत इत्युभयोरत्र समन्वयः।

ईश्वराङ्गीकारप्रयोजनसमीक्षा

निर्गुणब्रह्मणा जगदुत्पत्त्यादिकार्याणामनुपपन्नत्वात् सर्वज्ञत्वादिशक्तिविशिष्टमीश्वराभिधं ब्रह्मणः सगुणरूपमङ्गीकर्तव्यमिति प्राय ईश्वरास्तित्ववादिनः सर्वे दार्शनिका ऊचुः। एवमेव भगवद्गीतायां सिद्धान्तशिखामणौ च निखिल-जगन्निर्माणम्, जीवकृतपुण्यापुण्यादिकर्मणां सुखदुःखादिफलप्रदानम्, निगमागमादिनिखिलज्ञानानामादिवक्तृत्वं चेश्वरास्तित्वप्रयोजनमिति स्वीकृतम्। अत एव गीतायामर्जुनो भगवन्तं प्रार्थयन्– "पिताऽसि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान्"[1] इत्युक्तवान्। अनेनार्थान्तरेणेश्वरास्तित्वकारणान्युपस्थापितानीति ज्ञायते। सिद्धान्तशिखामणौ च–

> शिवाभिधं परं ब्रह्म जगन्निर्मातुमिच्छया।
> स्वरूपमादधे किञ्चित् सुखस्फूर्तिविजृम्भितम्।।[2]

इत्यादौ जगन्निर्माणादिकमीश्वरास्तित्वप्रयोजनं प्रतिपादितमित्युभयोरीश्वराङ्गीकारप्रयोजनविषये समन्वयः।

ईश्वरस्य जगत्कारणत्वसमीक्षा

सृष्ट्यादिव्यवहारनिर्वाहार्थमस्मदादिविलक्षणचेतनपुरुषस्येश्वरस्याङ्गीकारे जगन्निर्मातुस्तस्य किमपि प्रयोजनं वक्तव्यम्। यत्किञ्चित्प्रयोजनसत्त्वे च तस्य नित्यतृप्तत्वहानिरित्येवमुभयतः पाशारज्जुप्रसङ्गे गीतायां भूतानुग्रहार्थं तत्प्रवृत्तिरिति तदाक्षेपः परिहृतः। वस्तुत आप्तकामस्येश्वरस्य सृष्ट्यादिप्रवृत्या न किञ्चित्प्राप्तव्यमस्ति, अथापि ज्ञानधर्मोपदेशेन कल्प-प्रलय-महाप्रलयादिषु संसारिणां पुरुषाणामुद्धाररूपभूतानुकम्पया सृष्ट्यादौ तत्प्रवृत्त्युपपत्तिः। अत एवोक्तं गीतायाम्-

> न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन।
> नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि।।[3] इति।

---

[1] भ. गी. ११.४३

[2] सि. शि. २.८

[3] भ. गी. ३.२२

स्वप्रयोजनप्रवृत्त्याऽनाप्तकामत्वापत्तावपि भूतानुकम्पारूपपरप्रयोजनप्रवृत्तौ न तद्दोषापत्तिरितीश्वरस्य सृष्ट्यादिप्रवृत्त्या नाऽनाप्तकामत्वमिति गीताभिप्रायः।

वीरशैवदर्शने च "लोकवत्तु लीलाकैवल्यम्"[१] इति बादरायणसूत्रमनुरुध्येश्वरस्य सृष्ट्यादिव्यवहारे प्रयोजनाभावेऽपि लीलार्थं प्रवृत्तिरुपपद्यत इति समाहितं वर्तते।

अत्रेदमाकूतम्–लीलाभिन्ना याः प्रवृत्तयस्तदर्थमेव प्रयोजनविशेषप्रतिसन्धानस्यावश्यकता, याश्च लीलारूपास्ता प्रयोजनं नापेक्षन्त एव। यथा लोके आप्तकामस्य कस्यचिद् राज्ञः, तदमात्यादेर्वा क्रीडादिषु प्रवृत्तिः प्रयोजनमनुद्दिश्यैव भवति, तद्वदीश्वरस्यापीति विज्ञेयम्।

ननु महतीयं विश्वरचना कथं लीलेत्युच्यते? इति चेत्, सत्यम्; अल्पज्ञानाल्पशक्तियुक्तानामस्माकं कृते विश्वरचनेयं महतीव प्रतिभाति, अथापि सर्वज्ञत्वसर्वकर्तृत्वादिशक्तिसमन्वितस्येश्वरस्य कृते तु लीलैव केवलम्। याऽल्पायाससाध्या, विधेयनिष्पत्तिमात्रफलिका लीलाकर्तुरुद्देश्यसाधिका च, सैव लीला। विश्वरचनेयमीश्वरस्याल्पायाससाध्या। अत एवोक्तं शिवयोगिशिवाचार्येण–

स्वेच्छाविग्रहयुक्ताय स्वेच्छावर्तनवर्तिने।
स्वेच्छाकृतत्रिलोकाय नमः शान्ताय शम्भवे।।[२] इति।

अनेनेश्वरस्यायासेन प्रयोजनविशेषस्य सिद्धेरभावाद्वीरशैवदर्शने सृष्ट्यादिक्रिया ईश्वरस्य लीलारूपा इत्युच्यन्ते। यद्यपि लौकिकलीलासु किञ्चिदपि प्रयोजनमुत्प्रेक्षितुं शक्यते, किन्तु नेश्वरलीलायाम्, आप्तकामस्य का स्पृहा' इति तस्य नित्यतृप्तत्वप्रतिपादनात्। न चैवं सत्यप्रवृत्तिः, "यतो वा इमानि भूतानि जायन्त"[३] इत्यादिश्रुतीनां वैयर्थ्यप्रसङ्गात्। नाऽप्युन्मत्तप्रवृत्तिः, "यः सर्वज्ञः सर्ववित्"[४] इत्यादिषु तस्य सर्वज्ञत्वश्रवणात्। अत एव विश्वरचना लीलामात्रमिति वीरशैवदर्शनाभिमतम्।

एवं गीतायां भूतानुग्रहवादेन वीरशैवदर्शने लीलावादेन च किञ्चित्प्रयोजनाभावेऽपीश्वरस्य जगन्निर्माणादिव्यापारप्रवृत्तिरुपपद्यत इति समाहितं वर्तते। भगवद्गीतायाः सिद्धान्तशिखामणेश्चानेन विचारेणेदमेव ज्ञायते यदीश्वरः

---

[१] ब्र. सू. २.१.३३
[२] सि. शि. १.६
[३] तै. उ. ३.१
[४] मुण्ड. १.१.९

स्वप्रयोजनाभावेऽपि भूतानुग्रहार्थं लीलारूपेषु जगत्सृष्ट्यादिपञ्चकृत्येषु प्रवर्तत इति। अनेन मिथः समन्वयः सम्भवति।

वैषम्यनैर्घृण्यदोषपरिहारसमीक्षा

ईश्वरेण भूतानुग्रहार्थं लीलार्थं वा निर्मितेऽस्मिन् प्रपञ्चे सत्त्वादिगुणविषमतां देवतिर्यङ्मनुष्यादिवैषम्यं चावलोक्याऽऽलोचका ईश्वरे वैषम्यनैर्घृण्यदोषम्, तन्निवारणाय प्राणिनामदृष्टस्य, तद्विशिष्टशक्तेर्वा सापेक्षत्वे ईश्वरस्येश्वरत्वहानिरित्याक्षेपं चारोपयन्ति। एतद्दोषपरिहाराय गीतायाम्–

विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान्।।[1]

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम्।।[2]

मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते।।[3]

इति गुणवैकार्यादिवैषम्यस्य प्राण्यदृष्टविशिष्टप्रकृतिसम्भूतत्वम्, श्रीसिद्धान्तशिखामणौ–

चक्रनेमिक्रमेणैव भ्रमन्ति हि शरीरिणः।
जात्यायुर्भोगवैषम्यकारणं कर्म केवलम्।।

एतेषां देहिनां साक्षी प्रेरकः परमेश्वरः।
एतेषां भ्रमतां नित्यं कर्मयन्त्रनियन्त्रणे।।[4]

इति तद्वैषम्ये कर्मकारणत्वं प्रतिपादितम्।

ननु वैषम्यादिदोषनिराकरणायाङ्गीकृतकर्मणा, तद्विशिष्टप्रकृत्या चैव सर्वव्यवस्थोपपत्तौ किमर्थमीश्वराङ्गीकार इति चेन्न, अदृष्टस्य तद्विशिष्टप्रकृतेश जडत्वात्। जडस्य स्वतः प्रवृत्तिः, प्रवर्तकत्वं वा लोके नाऽनुभूयते। अत एवोक्तं भगवता– "मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्" इति। तस्माद्यथाऽऽपणिक ग्राहकेप्सितानि वस्तूनि तत्प्रदत्तमूल्यानुरूपं प्रददाति, तथा प्रणिनामदृष्टानुरूपफलप्र

---

[1] भ. गी. १३.१९

[2] भ. गी. ७.१३

[3] भ. गी. ९.१०

[4] सि. शि. ५.४९-५०

सर्वज्ञत्वादिसमन्वित ईश्वरोऽङ्गीकर्तव्य एव। एवमदृष्टविशिष्टशक्तिसापेक्षत्वे न तस्य वैषम्यादिदोषः।

"प्रकृतिं स्वाम्"[१] इत्यादिना तत्प्रकृतिस्तदीयत्वश्रवणात् स्वाङ्गं स्वव्याघातकं न भवतीति न्यायेन स्वीयसापेक्षत्वे न तस्य पराधीनतापत्तिरिति गीताभिप्रायः। अदृष्टानुसारं फलं प्रदेयमित्ययमीश्वरकृतो नियमः। स्वकृतनियमपरिपालनेन न तस्य प्रभुत्वहानिः, प्रत्युतोत्कृष्टप्रभुत्वप्राप्तिः। लोकेऽपि स्वकृतनियमपरिपालकं राजानं बहुमानयन्ति प्रजाः, न तु स्वैराचारिणमिति वीरशैवदर्शनाभिप्रायः। तदेवमीश्वरस्तदीयप्रकृतिसापेक्षत्वेन प्राणिनामदृष्टानुसारं जगत्सृष्ट्यादिकं विदधातीति तस्मिन्न न पराधीनत्वम्, नेश्वरत्वहानिः, न वा वैषम्यादि- दोषापत्तिरित्येवमस्मिन् विषये उभयोः समन्वयो दृष्टिपथमायाति।

तदेवमेतावता शिवशक्तिस्वरूपप्रतिपादकेऽस्मिन् प्रकरणे परशिवब्रह्मस्वरूप-तच्छक्तिस्वरूप-तयोर्जगत्कारणत्व-वैषम्यादिदोषपरिहारादिविषयेषु श्रीमद्भगवद्गीतायाः श्रीसिद्धान्तशिखामणेश्चाभिप्रायं प्रथमं पार्थक्येनोपस्थाप्य, पुनरिदानीं तयोः समीक्षात्मकः समन्वयो यथामति निरूपितः। वस्तुतः श्रद्धार्हयोः शिवशक्त्योरतुलितमहिमसम्पन्नत्वात् तयोः स्वरूपवर्णने महान्तः कवयोऽप्यसामर्थ्यमनुभवन्तीत्यस्मदादीनां का गतिः? तस्मादस्मिन् विषयेऽधिकमनुक्त्वा–

तव तत्त्वं न जानामि कीदृशोऽसि महेश्वर।
यादृशोऽसि महादेव तादृशाय नमो नमः।।[२]

इति परशिवविषये पुष्पदन्तोक्तिम्,

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो
न चाऽऽह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः।
न जाने मुद्रास्ते तदपि च न जाने विलपनं
परं जाने मातस्त्वदनुसरणं क्लेशहरणम्।।[३]

इति शक्तिस्वरूपविषये श्रीमच्छङ्करभगवत्पादोक्तिं चैव मुहुर्मुहुरनुस्मरन्तो विरमामः।

* * *

---

[१] भ. गी. ९.८
[२] शिवमहिम्न. ४१
[३] देव्यपराधक्षमापनस्तोत्रम्, श्लो. १

चतुर्थोऽध्यायः

जीव-जगत्स्वरूपविमर्शः

इह खलु पूर्वप्रकरणे प्रतिपादित ईश्वरो जगदुत्पत्ति-स्थिति-संहारादिकं स्वलीलया रचयति। तल्लीला-जन्यजीवजगतोः स्वरूपविचारोऽपि भारतीयदार्शनिकग्रन्थेषु बहु प्रपञ्चितः। ईश्वरास्तित्वविषये दार्शनिकेषु मतानैक्येऽपि जीवजगतोरस्तित्वविषये न कस्यापि विरोधः। अद्वैतवेदान्ते जीवजगतोः कल्पितत्वाङ्गीकारेऽपि व्यावहारिकसत्तात्वेन तयोरस्तित्वं स्वीकृतमेव। परन्त्वनयोः स्वरूपविषये दार्शनिकग्रन्थेषु नैकमत्यमुपपादितमित्यपरैव वार्ता। तदेवमुपनिषत्सारभूतायां श्रीमद्भगवद्गीतायां, शिवागमसारभूते श्रीसिद्धान्तशिखामणावपि जीवजगत्स्वरूपमुपवर्णितम्। तयोरनुसारं कोऽयं जीवो नाम? किं वा तत्स्वरूपम्, ईश्वरेण साकं तस्य कीदृशश्च सम्बन्धः? इत्यादिजीवविषयकजिज्ञासानाम्, किं च जगत्स्वरूपम् कीदृशी तत्सृष्टिः? किं वाऽस्य कारणम्? इत्यादिप्रपञ्चविषयकजिज्ञासानामुपशान्तये, उभयसम्मतजीव-जगत्स्वरूपसमीक्षायै चायं परिच्छेद आरभ्यते।

गीतानुसारं जीवस्वरूपम्

तत्र तावत् श्रीमद्भगवद्गीतायां परा-अपराख्यप्रकृतिद्वयं प्रतिपाद्य, तयोः पराप्रकृतिरेव जीव इति निर्दिष्टम्[1]। स च जीवात्मा शरीरेन्द्रियाद्यतिरिक्तोऽजो नित्यः शाश्वतः शरीरस्थः परमात्मनोंऽश इति स्वीक्रियते। अत एव भगवता श्रीकृष्णेन-

> इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।
> मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः।।
>
> एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना।
> जहि शत्रुं महाबाहो कामरूपं दुरासदम्।।[2]

इति जीवात्मनः शरीरेन्द्रियबुद्धिव्यतिरिक्तत्वमुक्त्वा-

---

[1] *प्रकृतिं विद्धि मे पराम्।*
जीवभूतां महाबाहो ययेदं धार्यते जगत्।। (भ. गी. ७.५)

[2] *भ. गी. ३.४२-४३*

न जायते म्रियते वा कदाचिन्नायं
भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे।।[1]

इति तस्य जननमरणादिरहितत्वं नित्यत्वं चोपदिष्टम्।

ननु जीवात्मनो नित्यत्वे जन्ममृत्वादिकं कस्य सम्भवतीत्याकाङ्क्षायामुक्तम्–

वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णान्य-
न्यानि संयाति नवानि देही।।[2]

देहिनोऽस्मिन् यथा देहे कौमारं योवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति।।[3] इति।

अच्छेद्यत्वादेनं जीवात्मानं शस्त्राणि न छिन्दन्ति, अदाह्यत्वादग्निर्न दहति, अक्लेद्यत्वाज्जलं न क्लेदयति, अशोष्यत्वाद्वायुर्न शोषयतीत्ययमविनाशी। तदुक्तम्–

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः।।
अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।।[4] इति।

विकारशीले शरीरेऽस्मिन् विद्यमानोऽप्ययमस्ति-जायते-विवर्धते-विपरिणमते-अपक्षीयते-विनश्यतीत्याख्यैः षड्भावविकारैर्नाऽऽव्रियते। अत एव भगवता श्रीकृष्णेन "अविकार्योऽयमुच्यते"[5] इत्युक्तम्। ननु घटगतजलमिव देहगतजीवात्मा देहविकारैः कथं न लिप्यत इति जिज्ञासायामुक्तम्–

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते।।[6] इति।

---

[1] भ. गी., २.२०
[2] तत्रैव, २.२२
[3] तत्रैव, २०१३
[4] तत्रैव, २.२३-२४
[5] तत्रैव, २.२५
[6] तत्रैव, १३.३२

अत्रायं भावः– जीवात्मा शरीरे घटे जलमिव न वर्तते, अपि तु घटे आकाश इव। सूक्ष्मत्वादाकाशः सर्वत्र विद्यमानोऽपि प्रपञ्चगतविकारैर्न बाध्यते, तद्वज्जीवात्मा शरीरस्थोऽपि शरीरविकारैर्नाऽऽव्रियते।

ननु जीवात्मनोऽपि 'परमात्मवज्जन्माद्यविकारित्वकथनादेनमेव परमात्मेति मन्यताम्? इति चेत्, सत्यम्, मोक्षावस्थायां जीवात्मा परमात्मैव। किन्तु यावत्संसारबन्धस्तावद्भिन्न एव परमात्मनः। संसारदशायामयं परमात्मनो भिन्नः प्रकृतिस्थः प्रकृतिजन्यगुणभोगी च सन् अनन्तनानाशरीर-तद्गतसुखदुःखभाग् भवति। तदुक्तम्–

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु।।[1] इति।

श्लोकस्यास्य व्याख्यानावसरे श्रीरामानुजभगवत्पादाः– "पूर्वपूर्वप्रकृतिपरिणामरूपदेवमनुष्यादियोनिविशेषेषु स्थितोऽयं पुरुषस्तत्तद्योनिप्रयुक्तसत्त्वादिगुणमयेषु सुखदुःखादिषु सक्तस्तत्साधनहेतुभूतेषु पुण्यपापकर्मसु प्रवर्तते, ततस्तत्पुण्यपापफलानुभवाय सदसद्योनिषु साध्वसाधुयोनिषु जायते, ततश्च कर्म आरभते, ततश्च जायते, यावदमानित्वादिकान् आत्मप्राप्तिसाधनभूतान् गुणान् न सेवते तावदेव संसरति"[2] इति जीवात्मबन्धनहेतुमूचुः।

क्षेत्रक्षेत्रज्ञविचारः

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः।।[3]

इति भगवद्गीतोक्त्यनुसारं देवोऽहम्, मनुष्योऽहम्, स्थूलोऽहम्, कृशोऽहमित्यात्मना सह समानाधिकरण्येन प्रतीयमानमिदं शरीरमेव भोक्तुरात्मनो भिन्नं भोगक्षेत्रत्वात् क्षेत्रमित्याख्यायते। ननु मलिनमिदं शरीरं क्षेत्रशब्देन किमर्थमभिधीयते? इति जिज्ञासायामुच्यते– "क्षतात्-दुःखात् त्रायत इति क्षेत्रम्' इति व्युत्पत्त्येदं शरीरमेव विहितकर्माचरणेन सुकृतफलसम्पादनसाधनं ध्यानार्चनातत्त्वज्ञानसाधनं च

---

१. भ. गी. १३.२१
२. भ. गी. रा. भा. १३.२१
३. भ. गी. १३.१

सत् संसारदुःखनाशहेतुर्भवति। उक्तं च महाकविना कालिदासेन– "शरीरमाद्यं खलु धर्मसाधनम्[1] इति। अथवा क्षेत्रन्यस्तबीजानां फलानीव कर्मफलयोरस्मिन्नेव प्राप्त्या इदं शरीरं क्षेत्रमित्यभिधीयते। उक्तं च भगवत्पादैः शङ्कराचार्यैः– "क्षतत्राणात्, क्षयात्, क्षरणात्, क्षेत्रवद्वाऽस्मिन् कर्मफलनिर्वृत्तेः क्षेत्रमिति[2]" इति। इदं क्षेत्रं पञ्चमहाभूत–अहङ्कार–बुद्धि–अव्यक्त–पञ्चकर्मेन्द्रिय–पञ्चज्ञानेन्द्रिय–पञ्चविषय–इच्छा–द्वेष–सुख–दुःखानां सङ्घातरूपं, विकारि, जीवात्मन आधारभूतं च वर्तते।[3]

तदीदृशं शरीरापरपर्यायं क्षेत्रमवयवशः सङ्घातरूपेण चापादतलमस्तकं स्वज्ञानेन विषयीकृत्य स्वभावत उपदेशेन वा वेदिता जीवात्मा क्षेत्रज्ञ इति कथ्यते। वेद्यभूतात् क्षेत्राद्वेदितृरूपः क्षेत्रज्ञो भिन्नः। भगवत्पादा रामानुजाचार्याः– "यद्यपि देहव्यतिरिक्तघटपटाद्यर्थानुसन्धानवेलायां देवोऽहम्, मनुष्योऽहं घटादिकं जानामीति देहसमानाधिकरण्येन ज्ञातारमात्मानमनुसन्धत्ते; तथापि देहानुभववेलायां देहमपि घटादिकमिवेदमहं वेद्मीति वेद्यतया वेदितानुभवतीति वेत्तुरात्मनो वेद्यतया शरीरमपि घटादिवदर्थान्तरभूतम् ; तथा घटादेरिव वेद्यभूतात् शरीरादपि वेदिता क्षेत्रज्ञोऽर्थान्तरभूतः"[4] इति क्षेत्रात् क्षेत्रज्ञस्य भिन्नत्वमुक्तवन्तः।

जीवात्मनोऽणुत्वम्

जीवात्मस्वरूपविमर्शकेषु दार्शनिकेषु केचन जीवात्मनोऽणुरूपत्वम्, अन्ये च विभुरूपत्वमङ्गीकुर्वन्ति। जीवात्मनो विभुत्वे तस्य लोकान्तरगमनागमनोत्क्रमणानामनुपपत्तेरणुरूपत्वमेव शास्त्रसम्मतमिति प्रतीयते। तथा ह्यत्र भगवद्गीतायां "ते पुण्यं सुरेन्द्रलोकमासाद्य"[5] इति जीवस्य गमनम्, "क्षीणे पुण्ये मर्त्यलोकं विशन्ति"[6] इत्यागमनम् , "उत्क्रामन्तं स्थितं वापि"[7] इत्युत्क्रमणं च निर्दिश्य,

---

[1] कुमारसम्भवम्, ५.३३

[2] भ. गी. शां. भा. १३.१

[3] महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च।
इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः।।
इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः।
एतत् क्षेत्रं समासेन सविकारमुदाहृतम्।। (भ. गी. १३.५–६)

[4] भ. गी. रा. भा. १३.१

[5] भ. गी. ९.२

[6] भ. गी. ९.२२

[7] भ. गी. १५.१०

“एवं त्रयीधर्ममनुपपन्ना गतागतं कामकामा लभन्ते”[१] इत्यत्र जीवात्मनो गमनागमनं स्पष्टमुपदिष्टम्। अनेन जीवात्मनोऽणुरूपत्वमेव गीताभिमतमिति ज्ञायते। जीवात्मनो विभुत्वाङ्गीकारे सर्वत्र विद्यमानत्वात् तस्य शरीरवियोगासम्भवः; येन तद्गमनागमनाद्यनुपपत्तिः। तदनुपपत्तौ च भगवद्गीतोक्तजीवलोकान्तरगमनादिवचनानां व्याघातप्रसङ्गो वैयर्थ्यं च।

किञ्च, श्रुतिष्वपि “तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरेभ्यः”[२] इति उत्क्रान्तिः “ये वैके चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव सर्वे गच्छन्ति”[३] इति गतिः, “तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे”[४] इत्यागतिश्चेति जीवात्मनः परलोकगमनागमनादिकं श्रूयते। न च लिङ्गशरीरादिगमनागमनमेवात्मनि तदुपचार इति वक्तव्यम्, “तमुत्क्रान्तं प्राणोऽनूत्क्रामति”[५] इति श्रुतावात्मनः प्रथमगमनस्य, तदनु तत्प्राणोपलक्षितलिङ्गशरीरगमनस्योक्तत्वाद्, गीतायामपि–

मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति।
शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः।।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्।।
श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च।
अधिष्ठाय मनश्चायं विषयानुपसेवते।।[६]

इति जीवोत्क्रमणवेलायां तेन साकं लिङ्गशरीरस्याप्युत्क्रमणस्य स्मृतत्वाच्च। तस्मात् “एषोऽणुरात्मा चेतसा वेदितव्यः”[७], “अङ्गुष्ठमात्रः रवितुल्यरूपः” इत्यादिश्रुतिसम्मतमणुत्वमेव जीवात्मनो गीतास्वभिप्रेतमित्यवगन्तव्यम्। यत्तु गीतायाम्–“यो लोकत्रयमाविश्य बिभर्त्यव्ययः”[९], नित्यः सर्वगतः स्थाणुः”[१०] इत्यात्मनो विभुत्वं श्रूयते, तत्परमात्मपरमिति वेदितव्यम्।

---

[१] भ.गी., ९.२१
[२] बृ. उ. ४.४.२
[३] कौषी १.२
[४] बृ. उ. ४.४.६
[५] बृ. उ. ४.४.१२
[६] भ. गी. १५.७-९
[७] मुण्डको. ३.१.९
[८] श्वे. उ. ५.८
[९] भ. गी. १५.१७
[१०] भ. गी. २.२४

किञ्च, "हृत्पुण्डरीकं विरजं विशुद्धम्,"[1] इति श्रुत्यनुसारं गीतायां "सर्वस्य चाहं हृदि सन्निविष्टः"[2]। "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति"[3] इतीश्वर एव जीवभूतः प्राणिनां स्थानविशेषे हृदये निवसतीति प्रतिपादनेनाऽपि जीवात्मनोऽणुरूपत्वमेव गीतासम्मतमिति ज्ञायते, सर्वगतत्वाद्विभुत्वस्यैकस्थाननिवासानुपपत्तित्वात्।

ननु हृदयस्थो जीवात्मा करचरणाद्यवयवेषु सञ्जायमानसुखदुःखादिकं कथमनुभवतीति जिज्ञासायामुच्यते–

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत।।[4] इति।

अत्रायं भावः– गगनैकदेशे विद्यमानोऽपि भानुर्यथा स्वप्रकाशेन प्रपञ्चमावर्त्य तिष्ठति, तथाऽयं जीवो हृदेकदेशे विद्यमानोऽपि स्वचित्प्रभया सर्वं देहमावृत्य तत्तदवयवजन्यसुखदुःखान्यनुभवतीति। तस्मादणुरूपत्वमेव जीवात्मनो गीताभिमतमित्यवगन्तव्यम्।

जीवेश्वरयोरंशांशिभावसम्बन्धः

"ममैवांशो जीवलोके जीवभूतः सनातनः"[5] इति भगवद्गीतावचनानुसारमयं जीवात्मा परमात्मनोंऽश इति गीतायां जीवेश्वरयोरंशांशिभावसम्बन्धः स्वीक्रियते। अत एवोपनिषत्स्वपि–

यथा सुदीप्तात् पावकाद् विस्फुलिङ्गाः
सहस्रशः प्रभवन्ते सरूपाः।
तथाक्षराद्विविधाः सौम्य भावाः
प्रजायन्ते तत्र चैवापियन्ति।।[6]

इत्युक्तम्। अस्यायं भावः– पावकात्तदंशरूपा अनन्ता अग्निकणा काष्ठयोगेनोपजायन्ते, तद्वदेवेश्वरे तच्छक्तिसङ्कल्पयोगेन तस्मादंशरूपा विविधवासनायुक्ता

---

[1] कैवल्यो. १.६
[2] भ.गी. १५.१५
[3] तत्रैव, १८:६१
[4] भ. गी. १३.३३
[5] भ. गी. १५.७
[6] मुण्डको. २.१.१

जीवा उत्पद्यन्त इति। यथा विस्फुलिङ्गाग्न्योरंशांशिभावः सङ्गच्छते, तथा जीवात्मपरमात्मनोरप्यंशांशिभावसम्बन्धोऽङ्गीक्रियते। भगवान् बादरायणोऽपि जीवस्यांशत्वमुपपादयन्– "अंशो नानाव्यपदेशात्[1]" इत्युक्तवान्।

न च जीवात्मन इदमंशत्वं काल्पनिकमौपाधिकं वेति वक्तव्यम्, जीवस्य लोकान्तरव्युत्क्रमणनानाशरीरगमनागमनादिप्रतिपादकानां गीताश्रुतिवचनानां वैयर्थ्यात्। अत एव "ममैवांशो----" इति श्लोकस्य व्याख्यानावसरे श्रीरामानुजभगवत्पादाः- "इत्थमुक्तस्वरूपः सनातनो ममांश एव सन् कश्चिदनादिकर्मरूपाविद्यावेष्टनतिरोहितस्वरूपो जीवभूतो जीवलोके वर्तमानो देवमनुष्यादिप्रकृतिपरिणामविशेषशरीरस्थानि मनःषष्ठानीन्द्रियाणि कर्षति"[2] इति प्रतिपादितवन्तः।

शिवगीतायामपि–

सत्यज्ञानात्मकोऽनन्तो विभुरात्मा महेश्वरः।
तस्यैवांशो जीवलोके हृदये प्राणिनां स्थितः।।

विस्फुलिङ्गा यथा वह्नौ जायन्ते काष्ठयोगतः।
अनादिकर्मसम्बद्धास्तद्वदंशा महेशितुः।।
अनादिवासनायुक्ताः क्षेत्रज्ञा इति ते स्मृताः।।[3]

इति महर्षिणाऽगस्त्येन श्रीरामं प्रति परमात्मनोऽनादिकर्मवासनाऽऽवृतांश एव जीव इति समुपदिष्टम्। अनेन गीतानुसारं जीवपरमात्मनोरंशाशिभावसम्बन्धः स्वीकृत इति ज्ञायते।

जीवपरमात्मनोर्भेदोऽभेदो वा

तत्र तावद्भगवद्गीतायां जीवपरमात्मनोर्भेद एव, उत वाऽभेद एवेति स्पष्टं नोक्तम्। भेदवर्णनावसरे भेदस्यैव, अभेदवर्णनवेलायां चाभेदस्यैव सत्यत्वमिव निरूपितम्। तथा हि–

अहमात्मा गुडाकेश सर्वभूताशयस्थितः।
अहमादिश्च मध्यं च भूतानामन्त एव च।।[4]

---

[1] ब्र. सू. २.३.४५

[2] भ. गी. रा. भा. १५.७

[3] शि. गी. २.२७-२९

[4] भ. गी. १०.२०

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत।[१]
उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः।
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः।।[२]

इत्यादिषु स्वस्यैव जीवात्मत्वोद्घोषणव्याजेन भगवता श्रीकृष्णेन जीवपरमात्मनोरभेद उपदिष्टः। किञ्चात्र दृश्यमदृश्यं च यत्किञ्चिदस्ति जडचेतनात्मकं तत्सर्वमपि परमात्मैव; तद्व्यतिरिक्तं न किमप्यस्ति चेति प्रतिपाद्यते। तथा हि–

मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव।।[३]

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन।।[४]

इति सर्वस्य परमात्मत्वमुपस्थापितम्। एतेषां गीतावचनानामवलोकनेन भगवद्गीता जीवपरमात्मनोरभेदपरेति को नाम न निर्णिनुयात्! अत एवाद्वैतवादिनो मनीषिणो घटाकाश–मेघाकाश–महाकाशदृष्टान्तैर्जीवेश्वरब्रह्मस्वरूपमुपपादयन्तो जीवेश्वरयोर्भेदस्यौपाधिकत्वम्, तयोरभेदस्यैव सत्यत्वं गीताभिमतमित्याकलयन्ति।

किन्तु गीतायां जीवपरमात्मनोरभेदबोधकवचनान्येव न सन्ति, अपि तु जीवस्य, ईश्वरस्य, ब्रह्मणश्च स्वरूपाणां विभिन्नरूपेणोपपादनमुखेन तेषां भेदोपवर्णनवचनान्यप्युपलभन्ते। तथा हि–

ज्ञेयं यत् तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते।।[५]

इत्यादिष्वक्षर–अचिन्त्य–ब्रह्म–अनिर्देश्यादिपदैर्निर्गुणब्रह्मस्वरूपम्,

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः।।[६]

---

[१] भ. गी. १३.२
[२] भ. गी. १३.२२
[३] भ. गी. ७.७
[४] भ. गी. ९.१९
[५] भ. गी. १३.१२
[६] भ. गी. १०.६

इत्यादिषु चातुर्वर्ण्यस्रष्टृ[१]– सर्वलोकमहेश्वरा[२]दिरूपेण चेश्वरस्वरूपम्,

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु।।[३]

इत्यादिषु भोक्तृ-क्षेत्रज्ञ-देहीत्यादिपदैश्च जीवस्वरूपं चोपवर्णितम्। अनेन जीवेश्वरयोर्भेदः प्रतीयते। किञ्च तत्रैव गीतायाम्–

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते।।[४]

इति सकलभूतानि क्षरशब्देन, कूटस्थापरपर्यायं जीवं चाक्षरशब्देन व्यपदिश्य-

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः।।
यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः।।[५]

इति तयोः क्षराक्षरयोरपि परमात्मा भिन्न इति जीवपरमात्मनोर्भेदः स्पष्टमुपदिष्टः। अनेनेयं भगवद्गीता द्वैतपरेति प्रतीयते। अत एव द्वैतवादिनो विद्वांसः सालोक्य-सामीप्य-सारूप्यादिमोक्षमात्रमङ्गीकुर्वाणा जीवपरमात्मनोर्भेदसत्यत्वमेव भगवद्गीतासम्मतमित्याकलयन्ति।

तत्र जीवपरमात्मनोर्भेदसत्यत्वाङ्गीकारे भेदोपपादकवचनानाम्, भेदसत्यत्वाङ्गीकारे चाभेदप्रतिपादकवचनानां वैयर्थ्यप्रसङ्ग इति उभयतः पाशारज्जुरिति नाभेदस्य न वा भेदस्यैव सत्यत्वमिति भेदाभेदसत्यत्वमङ्गीकार्यम्। ननु एकत्रैव भेदस्याभेदस्य च कथं सत्यत्वसम्भव इति चेत्, "अहिकुण्डलवत्" "स्वर्णकुण्डलवच्च तत्सम्भवात्।" भक्ति-उपासनाद्यवसरे भेदसत्यत्वम्, स्वरूपसाक्षात्काररूपज्ञानाधिगमवेलायां चाभेदसत्यत्वं विभाव्य आत्मोन्नतिं साधयन्तु साधकाः स्वस्वाधिकारभेदतया इत्येव भगवता श्रीकृष्णेन भेदाभेदोभयसत्यत्वमुक्तमित्यवगन्तव्यम्। अत एवात्र निखिलमार्गाणां कैवल्यहेतुकत्वमुक्तम्। तथा हि–

---

[१] द्र. भ. गी. ४.१३
[२] द्र. भ. गी. ५.२९
[३] भ. गी. १३.२१
[४] भ. गी. १५.१६
[५] भ. गी. १५.१७-१८

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना।
अन्ये सांख्येन योगेन कर्मयोगेन चापरे।।
अन्ये त्वेवमजानन्तः श्रुत्वाऽन्येभ्य उपासते।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः।।[१]

इति भेदमूलकविधीयमानानां श्रवण-कर्म-उपासन-भक्त्यादीनाम् , अभेदमूलकविधीयमानानां ज्ञानस्य च मोक्षसाधकत्वमुपवर्णितम् । तस्माज्जीवपरमात्मनोर्भेदाभेद एव गीताभिमत इति ज्ञायते । अत एव भास्कराचार्या रामकण्ठाचार्या रामानुजाचार्याः टी. जी. सिद्धप्पाराध्याश्च भेदाभेदपरमेव भाष्यं विरचयामासुः ।

जीवस्य लोकान्तरगमनम्

जीवानां गतयो बह्व्यो गीतया तु त्रिधा मता।
द्विधोर्ध्वा हि द्विधा चाधो मध्यमैकेति पञ्चधा।।[२]

इत्युक्त्यनुसारं गीतायां जीवस्योर्ध्व-मध्य-अधश्चेति त्रिविधाः गतयो निर्दिष्टाः। तत्राप्यूर्ध्वगतौ पुनरावृत्तिसहिता, पुनरावृत्तिरहिता चेति, अधोगतौ च हीनयोनिगतिर्नरकगतिश्चेति विभागद्वयमुपदिश्यते। तत्र कीदृशा जीवा ऊर्ध्वादिगतिरधिगच्छन्तीति जिज्ञासायामुक्तम्-

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः।
जघन्यगुणवृत्तस्था अधो गच्छन्ति तामसाः।।[३] इति।

अत्रेदमवधेयम्- "यान्ते मतिः सान्ते गतिः" इत्युक्त्यनुसारं, "यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय सदा तद्भावभावितः[४]।। इति श्रीकृष्णोक्त्यनुसारं च मरणसमये सत्त्ववृत्तिप्रवृद्धा जीवाः कृतसुकृतानामात्मयाथात्म्यविदामूर्ध्वलोकेषु, रजोवृत्तिप्रवृद्धाः कर्मासक्तमनुष्ययोनिषु, तमोवृत्तिप्रवृद्धाश्च पश्वादिमूढयोनिषु नरकादिपापलोकेषु च यान्ति । तदुक्तम्-

यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत्।
तदोत्तमविदां लोकानमलान् प्रतिपद्यते।।

---

[१] भ. गी. १३.२४-२५
[२] गी. द. पृ. ९३
[३] भ. गी. १४.१८
[४] भ. गी. ८.६

रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते।
तथा प्रलीनस्तमसि मूढयोनिषु जायते।।[१] इति।

ऊर्ध्वगतिः

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः।।[२]

इति भगवदुक्त्यनुसारं परमेश्वरस्योपासनेन परोक्षभावेन च कृतब्रह्मसाक्षात्कारा जना ज्योतिर्मयाग्न्यभिमानिदेवतादिनाभिमानिदेवता–शुक्लपक्षाभिमानिदेवता-उत्तरायणकालीनषण्मासाभिमानिदेवताभिर्युक्ते शुक्लाभिधेये ऊर्ध्वमार्गे गच्छन्तो ब्रह्म प्राप्नुवन्ति। तत्तदभिमानिदेवताभिस्ते परं धाम[३] नीयन्त इति भावः। अनेन मार्गेण गता महात्मानो न ततः पुनरावर्तन्ते । तदुक्तम् –

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गतिम्।।[४] इति।

अयं शुक्लमार्ग एवोपनिषत्सु अर्चिमार्ग–देवयानमार्गेत्यभिधानाभ्यां वर्णितोऽस्ति। तथा ह्युपनिषदि– "ते य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धां सत्यमुपासते तेऽर्चिरभिसम्भवन्ति, अर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाण–पक्षाद्यान् षण्मासानुदित्य एति मासेभ्यो देवलोकं देवलोकादादित्यमादित्याद्वैद्युतं तावन्वैद्युतान् पुरुषो मानस एत्य ब्रह्मलोकान् गमयति तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति तेषां न पुनरावृत्तिः"[५] इत्युक्तम् ।

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निर्वतते।।[६]

इति गीतावचनानुसारं सकामकर्मनिरता योगिनो धूमाभिमानिदेवता-रात्र्यभिमानिदेवता–कृष्णपक्षाभिमानिदेवता–दक्षिणायनीयषण्मासाभिमानिदेवतायुक्ते

---

[१] भ. गी. १४.१४–१५
[२] भ. गी. ८.२४
[३] "यं प्राप्य न निवर्तन्ते तद्धाम परमं मम।" (भ. गी. ८.२१)
[४] भ. गी. ८.१५
[५] बृ. उ. ६.२.१५; द्र. छा. उ. ५.१०.१–२
[६] भ. गी. ८.२५

कृष्णमार्गे गच्छन्तः, तत्तद्देवताभिः क्रमशश्चान्द्रमसज्योतिपर्यन्तं नीताः, ततस्ते स्वर्गं गत्वा तत्र स्वकृतपुण्यकर्मफलमुपभुज्य स्वर्गलोकं विशालं– "ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति"[1] इति गीतोक्त्या स्वर्गात्पुनर्मर्त्यलोकं निवर्तन्ते। अयं कृष्णमार्ग एवोपनिषत्सु धूममार्ग–पितृयानमार्गेत्यभिधेयाभ्यां व्यपदिष्टः। तथा हि– "अथ ये यज्ञेन दानेन तपसा लोकाञ्जयन्ति ते धूममभिसम्भवन्ति धूमाद्रात्रिं रात्रेरपक्षीयमाणपक्षमपक्षीयमाणपक्षाद्यान् षण्मासान् दक्षिणादित्य एति मासेभ्यः पितृलोकं पितृलोकाच्चन्द्रं ते चन्द्रं प्राप्यान्नं भवन्ति तांस्तत्र देवा--"[2] .इत्युक्तम्। पुण्यकर्मफलभोगानन्तरं तल्लोकान्मृत्युलोकागमनपद्धतिरप्युपनिषदि निर्दिष्टा। तथा हि छान्दोग्ये– "तस्मिन् यावत्सम्पादमुषित्वाथैतमेवाध्वानं पुनर्निवर्तते, यथैतमाकाशमाकाशाद्वायुम् वायुर्भूत्वा धूमो भवति। धूमो भूत्वाभ्रं भवति। अभ्रं भूत्वा मेघो भवति। मेघो भूत्वा प्रवर्षति, त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्तेऽन्तो वै खलु दुर्निष्प्रपतरं यो यो ह्यन्नमत्ति यो रेतः सिञ्चति तद्भूय एव भवति"[3] इत्युपदिष्टः पुनरावर्तनपन्थाः।

योगभ्रष्टसाधकोऽपि पितृयान–धूममार्गाभिधेये कृष्णमार्गे एव गत्वा पुण्यलोकानुषित्वा पुनस्ततो मृत्युलोके पूर्वोक्तमार्गेण श्रीमतां योगिनां वा गेहे जन्माधिगच्छति । तदुक्तम्–

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते।।
अथवा योगिनामेव कुले भवति धीमताम्।।[4] इति।

तदेतयोः शुक्लमार्गेण परं धाम गता जीवा न पुनरावर्तन्ते, कृष्णमार्गेण पुण्यलोकगता जीवाश्च पुनरावर्तन्ते[5] इत्येतन्मार्गयोर्भेदो विज्ञेयः।

---

[1] भ. गी. ९.२७

[2] बृ. उ. ६.२.१६; द्र. छा. उ. ५.१०.३-४

[3] छा. उ. ५.१०.५-६

[4] भ. गी. ६.४१-४२

[5] शुक्लकृष्णो गती ह्येते जगतः शाश्वते मते।
एकया यात्यनावृत्तिमन्ययाऽऽवर्तते पुनः।। (भ. गी. ८.२६)

मध्यगतिः

मनुष्यलोक एव जीवानां गतिर्मध्यगतिरित्यभिधीयते। रजोगुणप्रवृद्धौ मृत्युमवाप्तानां जीवानां प्राणाः सूक्ष्मशरीरेण साकं समष्टिवायुं प्रविशन्ति। स वायुस्तान् प्राणान् ससूक्ष्मशरीरानस्मिन् लोके तत्कर्मानुगुणप्राप्तव्यदेहानां खाद्यपदार्थेषु प्रेषयति। तत्कर्मानुप्राप्तव्यदेहगर्भमन्नरूपेण प्रविष्टा जीवास्तत्तद्योनिभ्यस्तत्तदेहानधिगम्य तत्कृतकर्मफलान्यनुभवन्ति। योनिपरिवर्तनप्रधानसाधकोऽयं वायुरीश्वरप्रेरणयैव जीवान् तत्तद्योनिषु प्रेषयति। स्वर्गादिपुण्यलोकगता जीवा अपि अत्र मनुष्यलोके आगत्य सुकृतानाचर्य पुनरूर्ध्वलोकम्, दुष्कृत्यान्याचर्य चाधोलोकं समाप्नुवन्ति। एवमेवाधोगतिगता अपि पुण्यविशेषेण मनुष्यलोकमागत्यैव ऊर्ध्वादिलोकं गमिष्यन्तीति विज्ञेयम्।

अधोगतिः

तमोगुणप्रवृद्धौ मृत्युमधिगता आसुरप्रवृत्तिपरा जीवा यां गतिमाप्नुवन्ति, साऽधोगतिरित्याख्यायते। अत्र केचन आसुरीं हीनयोनिम्, केचन च नरकं गच्छन्ति। तत्राहङ्कार-बल-दर्प-कामक्रोधाद्यरिषड्वर्ग-ईश्वरद्वेषादिक्रूरगुणयुक्ता जीवाः पश्वादिहीनयोनिमवाप्य, तत्रापि क्रूरगुणयुता भवेयुश्चेत्, तर्हि ततोऽप्यधमां गतिं भूत-प्रेत-पिशाचादिरूपामाप्नुवन्ति। तदुक्तम्–

अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः।।
तानहं द्विषतः क्रूरान् संसारेषु नराधमान्।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु।।
आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्।।[1] इति।

अत्रापि मध्यगताविव वायुरेव तत्तद्धीनयोनिषु जीवानीश्वरप्रेरणया प्रेषयतीति विज्ञेयम्। अधोगतावयं हीनयोनिमार्गः।

सकलकर्मदुरभिमानिनोऽज्ञानविमूढा भ्रमितचित्ता मोहपाशबद्धाः कामाद्यनुरक्ताश्च जीवा नरकं विन्दन्ति। तदुक्तम्–

---

[1] भ. गी. १६.१८-२०

आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः।।
अनेकचित्तविभ्रान्ता मोहजालसमावृताः।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ।।[1] इति।

तत्र नरके दुष्कर्मजन्यनरकयातनामनुभवन्ति ते। अधोगतावयं नरकमार्गः। काम-क्रोध-लोभा एवाधोगतयो प्रधानहेतुका इति विज्ञेयम्[2]।

तदेवं श्रीमद्भगवद्गीतानुसारमपराप्रकृतिपदवाच्यो जीवः शरीरेन्द्रियाद्यतिरिक्तो नित्योऽणुरूपः क्षेत्रज्ञाभिधेयश्च वर्तते । जीवपरमात्मनोरंशांशिभावसम्बन्धो भेदाभेदश्च गीताभिमतः । अयं जीवः स्वकर्मसूत्रबद्ध ऊर्ध्व-मध्य-अधोलोकगतिमान् सन् तत्र तत्कृतकर्मफलान्युपभुङ्क्त इति विज्ञेयम् ।

गीतानुसारं जगत्स्वरूपम्

भारतीयदार्शनिकेषु जगत्स्वरूपविवेचनवेलायां परिणामवादो विवर्तवादश्चेति वादद्वयं प्रचलितमस्ति । तत्र केचन परिणामवादेन केचन च विवर्तवादेन जगत्स्वरूपमभ्युपपादयन्ति । परिणामवाद एव विकारवादनाम्नाऽपि प्रथितः। तत्र वस्तुनः स्वयथार्थरूपं परित्यज्य स्वरूपान्यापत्तिः परिणामः, यथा दुग्धस्य दधिरूपापत्तिर्बीजस्य वृक्षरूपापत्तिर्वा। वस्तुनः स्वस्वरूपापरित्यागेनैव वस्त्वन्तरमिथ्याप्रतीतिर्विवर्तवादः, यथा रज्जावहेः, शुक्तौ रजतस्य, स्थाणौ पुरुषस्य वा प्रतीतिः। तदुक्तं वेदान्तसारे-

सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीरितः।
अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदीरितः।।[3] इति।

तत्र तावद्भगवद्गीतायामनयोः को वादः समर्थित इति विवेचनीयम् । न ह्यस्मिन् विषयेऽत्र वस्तुतः परिणामवाद उत वा विवर्तवादः स्वीकृत इति निश्चयेन वक्तुं शक्यते, यतो हि परोक्षेण प्रत्यक्षेण वोभयसमर्थनपराणि वचनान्यत्रोपलभन्ते। तथा हि-

---

[1] भ. गी. १६.१५-१६

[2] त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ।। (भ. गी. १६.२१)

[3] वेदान्तसारः २१

अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम्।
यन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम्।।

पिताऽहमस्य जगतो माता धाता च पितामहः।
वेद्यं पवित्रमोङ्कार ऋक्साम यजुरेव च ।।

गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत्।
प्रभवः प्रलयस्थानं निधानं बीजमव्ययम्।।[1]

इत्यत्र प्रपञ्चगतनिखिलवस्तुरूपेण तत्कर्तृरूपेण ब्रह्मण एव प्रतिपादितत्वाज्जगदिदं तत्परिणामभूतमिति ज्ञायते। अत एव जगत्परिणामवादिनो विद्वांस ईदृशानि वचनान्यवलोक्य "तदैक्षत बहुस्यां प्रजायेय"[2] इति श्रुतिप्रमाणपुरःसरं गीता परिणामवादपरेत्याकलयन्ति ।

एवमेव "न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा"[3] इत्यत्र जगतो ब्रह्मविवर्तत्वमपि निर्दिश्यते । अत एवास्या गीतोक्तेर्व्याख्यानवेलायां पूज्यपादैः शङ्कराचार्यभगवत्पादैः– "न रूपमस्येह यथा वर्णितं तथा नैवोपलभ्यते, स्वप्नमरीचिकमाया–गन्धर्वनगरसमत्वाद् दृष्टनष्टस्वरूपो हि स इत्यत एव नान्तो न पर्यन्तो निष्ठा समाप्तिर्वा विद्यते। तथा च नादिः, इत आरभ्यायं प्रवृत्त इति न केनचिद् गम्यते। न च सम्प्रतिष्ठा स्थितिर्मध्यस्य न केनचिदुपलभ्यते"[4] इति जगतो विवर्तत्वं कल्पितत्वं वा प्रतिपादितम् । अनेन विवर्तवादोपपादकाः शङ्करभगवत्पादाद्याचार्या गीता विवर्तवादपरेत्याकलयन्तीति ज्ञायते ।

अत्रेदमाकूतम्– जगदिदं ब्रह्मविवर्तमित्यङ्गीकारे "तदैक्षत बहुस्यां प्रजायेय"[5] इत्यादिजगत्परिणामपरश्रुतिवचनानां वैयर्थ्यं भवेदिति, प्रत्यक्षादिप्रमाणैर्जगदनुभूयते इति च हेतोः परिणामवादिनस्तस्य परिणाममङ्गीकृत्य, गीताऽपि तद्वादपरेति निरूपयन्ति। विवर्तवादिनश्च ब्रह्मपरिणामभूतं जगदिति स्वीकारे ब्रह्मणि विकारापत्तिः, येन ब्रह्मानित्यत्वदोषयुक्तं स्यादिति हेतोर्विवर्तवादमङ्गीकृत्य गीता विवर्तवादपरेत्युपपादयति। उभयपरवचनानामत्रोपलम्भाद् गीताया वास्तविकोऽभिप्रायः क इति विचारणीयम्।

---

[1] भ. गी. ९.१५-१७
[2] छा. उ. ६.२.२
[3] भ. गी. १५.३
[4] भ. गी. शां. भा. १५.३
[5] छा. उ. ६.२.२

गीतायां परिणाम–विवर्तवादोभयपरत्वप्रतिपादनस्य कारणमिदं यत् परिणामवादिभिराक्षिप्ता सृष्टिपरश्रुतिवचनवैयर्थ्यापत्तिः, विवर्तवादिभिराक्षिप्ता ब्रह्मानित्यत्वदोषापत्तिश्च न भवेदिति। ननूभयप्रतिपादनादुभयाक्षेपयोरप्यत्राऽऽपतनमिति चेन्न, तदाक्षेपपरिहारसक्षमस्याविकृतपरिणामवादस्य गीतासम्मतत्वात्। तथा हि– ब्रह्मणः स्वरूपे किञ्चिद्विकारं विनैव जगद्रूपेण तत्परिणाम एवाविकृतपरिणामवादः। ननु स्वरूपे किञ्चिद्विकारं विनैवान्यथारूपेण परिणामः कीदृशः? इति चेदुच्यते– यथा कूर्मः कदाचित् स्वकरचरणाद्यवयवानि सङ्कोच्य तूष्णीं भावेन तिष्ठति, कदाचिच्च तेषां प्रसारणेन वारिणि मह्यां वा विहरति; तथा मूलप्रकृतिविशिष्ट ईश्वरो जगदुत्पत्तितः पूर्वं स्वशक्तिसङ्कोचवशात् तूष्णीं भावेन तिष्ठति, जगदुत्पत्तिसमये च स्वचित्प्रेरणया तत्प्रकृतिविकासद्वारा जगदुत्पादयति। अत एव भगवद्गीतासु–

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्।।

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात्।।[१]

इति स्वालीनप्रकृतिपरिणामपुरःसरं ब्रह्मजगत्सृजतीति प्रतिपादितम्। तस्माद्यथा स्वावयवसङ्कोचविकासाभ्यां कूर्मे न कश्चिद्विकार आरोप्यते, तथा स्वमूलप्रकृतिसङ्कोचविकासाभ्यामीश्वरेऽपि विकृतिर्नायातीत्ययमविकृतिपरिणामवाद इत्युच्यते। अनेन वादेन जगदुत्पत्तिपराणां श्रुतीनां विरोधो ब्रह्मानित्यत्वप्रसङ्गश्च न भवतीति भगवद्गीताऽविकृतपरिणामवादपरेति ज्ञायते। अत एव रामानुजाचार्याः– "एवं च सति परस्य ब्रह्मणः कार्यानुप्रवेशेऽपि स्वरूपान्यथाभावाभावादविकृतत्वमुपपन्नतरम्। स्थूलावस्थस्य नामरूपविभागविभक्तस्य चिदचिद्वस्तुन आत्मतयाऽवस्थानात् कार्यत्वमप्युपपन्नतरम्। अवस्थान्तरापत्तिरेव हि कार्यता"[२] इति गीताभाष्यावसरेऽविकृतपरिणामवादं जगत उपपादितवन्तः। अनेनाविकृतपरिणामवाद एव भगवद्गीतासम्मत इति निश्चप्रचम्।

गीतोपवर्णितः संसारवृक्षः

तदेतावतोपपादितं जगदेव नित्यपरिवर्तनशीलत्वात् संसार इत्यभिधानेन व्यवह्रियते। अयं संसार एव गीतायाम्–

---

[१] भ. गी. ९.७–८

[२] भ. गी. रा. भा. १३/२ ।

ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्।।[१]

इत्यश्वत्थवृक्षप्रतिमयोपवर्णितः। "न श्वश्चिरं तिष्ठति यथावदिति अश्वत्थः' इति व्युत्पत्या संसारोऽयं शाश्वतः परिवर्तनशीलश्चेति निर्देशनार्थमत्राश्वत्थशब्देन व्यवहारः। उपनिषत्सु "ऊर्ध्वमूलमवाक्शाख एषोऽश्वत्थः सनातनः"[२] इति संसारोऽश्वत्थशब्देन निर्दिष्टः। अस्या गीतोक्तेरयं भावः– मूलप्रकृतिविशिष्टं ब्रह्म कालतोऽपि सूक्ष्मत्वात् , सकलकारणत्वान्नित्यमहत्त्वाच्चोर्ध्वशब्देनाभिहितः। ब्रह्मण एवास्य मूलत्वादयमूर्ध्वमूलो वृक्षः संसारः। यथा वृक्षो मूलेनाहारजलादिकं गृहीत्वा तदाश्रित्यैव तिष्ठति, तथाऽयं संसारोऽपि तद्ब्रह्माश्रित्य तिष्ठतीति भावः। अत एव भगवान् श्रीकृष्णः स्वं– "सनातनं बीजम्"[३], "बीजमव्ययम्"[४] इति संसारबीजं कथयति। महदहङ्कारतन्मात्रादयः सकलनरपशुपक्षिकृमिकीटपतङ्गादयश्च शाखा इवास्याधो भवन्तीत्ययमधः शाखः। संसारोऽयमनादिकालप्रवृत्तत्वात्, "सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्। कल्पक्षये--"[५] इति भगवदुक्त्या प्रलयकालेऽपि परमात्मशक्तौ बीजरूपेण विद्यमानत्वाच्चाव्ययः। अस्य पर्णानि छन्दांसि, शास्त्राणीत्यर्थः। वृक्षो यथा पर्णैर्नूतनैर्विकासं विन्दति, तथाऽयं संसारः कर्माचरणेनाभिवर्धते। कर्मव्यवस्था च शास्त्रादेव खलु। तथा च गीतायामुक्तम्-

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि।।[६] इति।

तस्मादस्य संसारवृक्षस्य शास्त्राणि पर्णानि। तदनु पुनश्च संसारवृक्षस्यापरावयवकल्पनोच्यते–

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा
गुणप्रवृद्धा विषयप्रवालाः।
अधश्च मूलान्यनुसन्ततानि
कर्मानुबन्धीनि मनुष्यलोके।।

---

[१] भ. गी. १५.१
[२] कठो. २.३/.१
[३] भ. गी. ७.१०
[४] भ. गी. ९.१८
[५] भ. गी. ९.७
[६] भ. गी. १६.२४

न रूपस्येह तथोपलभ्यते नान्तो
न चादिर्न च सम्प्रतिष्ठा।।[1] इति।

अस्य काञ्चन शाखा उपरिस्थितस्वर्गलोकादिपर्यन्तम्, अन्याश्च चाधःस्थितनरकादिलोकपर्यन्तम्, उत वा पशुपक्षिभूतपिशाचादिहीनयोनिपर्यन्तं प्रसृताः। ताश्च शाखाः सत्त्वादिगुणैः प्रवृद्धाः शब्दस्पर्शादिविषयपल्लवविशिष्टाश्च सन्ति। यथा वृक्षस्य शाखा यावत्प्रवृद्धाः सत्त्वयुताश्च भवन्ति, तावत् तत्पल्लवानामभिवृद्धिर्जायते, तथाऽस्मिन् संसारे यावती गुणासक्तिः, तावती विषयानुरक्तिरभिवर्धत इति भावः। मूलप्रकृतिविशिष्टब्रह्मोपादानस्यास्य संसारवृक्षस्य मूलं कर्मानुबन्धरूपेण मनुष्यलोकेऽपि विद्यते। यथेश्वरः सर्वज्ञत्वादिशक्तिभिर्विशालं सकललोकं विसृजति, तथा जीवा अपि कर्माधिकारविशेषेण निजाल्पज्ञत्वादिसङ्कुचितशक्तिभिः सङ्कुचितं संसारं गृह–क्षेत्र–गृहिणी–पुत्र–पौत्रादिरूपं रागद्वेषादिवासनारूपं वा रचयतीति ब्रह्ममूलवन्मनुष्यमूलोऽप्ययं संसारः। नित्यपरिवर्तनशीलत्वादस्य रूपं क्षणपूर्ववत् क्षणान्तरे तद्वद्दृश्यमानमपि तदेव नोपलभ्यते। अनादित्वादनन्तत्वाच्चास्यादिरन्तं च नावगम्येते। अस्मिन् संसारे सूर्य–चन्द्र–भू–नक्षत्रादयः कस्यचित्स्थानस्याश्रयं विनैवाकाशे कथं तिष्ठन्तीत्यस्य प्रतिष्ठापि नावगम्यते। इतीदृशं संसारवृक्षं नित्यपरिवर्तनशीलमशाश्वतं मूलप्रकृतिविशिष्टब्रह्मजनितमिति यो वेत्ति, स वेदवित्, उपक्रमोपसंहारादिभिर्वेदानां तात्पर्यं वेत्ति संसारकारणब्रह्मणो ज्ञानपरत्वात्। इत्येवं गीतायां संसारवृक्ष उपवर्णितः।

जगत्कारणविवेचनम्

ननु कार्यं प्रति निमित्तमुपादानं चेति द्विविधस्य कारणस्य शास्त्रे प्रतिपादितत्वादयमीश्वरो जगत्कार्यं प्रति उपादानकारणम्, उत वा निमित्तकारणम् ? इति जिज्ञासायाम् – "तत्सृष्ट्वा तदेवानुप्राविशत्। तदनुप्रविश्य सच्चत्यच्चाभवत्। विज्ञानं चाविज्ञानं च। सत्यं चानृतं च सत्यमभवत्"[2] इति श्रुतिप्रमाणानुसारं स ईश्वर एव स्वप्रकृत्यंशेन जगद्रूपेण परिणम्य चिदंशेन तत्सृष्टिं विदधातीति जगत्कार्यं प्रति मूलप्रकृतिविशिष्ट ईश्वरोऽभिन्ननिमित्तोपादानकारणं भवति। अत एव गीतायाम्–

---

[1] भ. गी. १५.२–३

[2] तै. उ. २.६.१

"बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम्"[१] "यच्चापि सर्वभूतानां बीजं तदहमर्जुन"[२] इति जगत्कार्यं प्रतीश्वरस्योपादानत्वम्,

मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम्।
सम्भवः सर्वभूतानां ततो भवति भारत।।
सर्वयोनिषु कौन्तेय मूर्तयः सम्भवन्ति याः।
तासां ब्रह्म महद् योनिरहं बीजप्रदः पिता।।[३]

इति बीजप्रदपितृरूपेण तस्य निमित्तकारणत्वं चोपपादितम्। पुनः–

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन।।[४]

इति तस्य जगत्स्रष्टृत्व-जगद्रूपत्वप्रतिपादनद्वाराऽभिन्ननिमित्तोपादानकारणत्वं समर्थितम्।

नन्वीश्वरो निमित्तकारणं प्रकृतिश्चोपादानकारणमिति पृथक् पृथगङ्गीकर्तव्यम्, प्रपञ्चेऽपि घटकार्यं प्रति निमित्तकारणभूतः कुलाल उपादानकारणभूतया मृत्तिकया भिन्न एव वर्तते, तस्माज्जगन्निमित्तोपादानकारणयोः पार्थक्यमेव युक्तमिति चेत्, मैवम्, ईश्वरस्योपादानत्वप्रतिपादकानां पूर्वोक्तानां गीतावचनानाम्, "आत्मैवेदं सर्वम्"[५] इत्याद्यात्मोपादानप्रतिपादकश्रुतिवचनानां च वैयर्थ्यात्। किञ्च, "यथोर्णनाभिः सृजते गृह्णते च"[६] इति श्रुतिरपि यथोर्णनाभिः स्वयं निमित्तोपादानत्वमापन्नः स्वशरीरात् तन्तुजालमुद्गमते गृह्णाति च, तथेश्वरोऽपि स्वयं निमित्तोपादानतामापन्नः स्वविलीनमूलप्रकृत्या निखिलं प्रपञ्चं सृजति संहरति चेत्यभिन्ननिमित्तोपादानत्वं समर्थ्यते। तदेवमभिन्ननिमित्तोपादानत्वाङ्गीकारेणेश्वरस्य निमित्तकारणत्वोपपादकश्रुतीनामुपादानकारणत्वोपपादकश्रुतीनां च समन्वयो भवितुमर्हतीति तस्याभिन्ननिमित्तकारणत्वं युक्तियुक्तम्।

---

[१] भ. गी. ७.१०
[२] भ. गी. १०.३९
[३] भ. गी. १४.३-४
[४] भ. गी. ९.१९
[५] छा. उ. ७.२५-२
[६] मुण्डको. १.१.७

ननु जगदुत्पत्तेः पूर्वं ब्रह्मणस्तद्गतशक्तेश्च निराकाररूपेण विद्यमानत्वात् कथं स्थूलमाकारमधिजग्मतुरित्याकाङ्क्षायामुच्यते– यथाकाशे रविकिरणेषु निराकाररूपेणावस्थितानि जलानि वायोः सङ्घर्षणेन धूमरूपमवाप्य, तदनु मेघाकारा सन्तो जलरूपेण व्यक्तानि भवन्ति, यथा वाग्निराकाशे निराकाररूपेण तिष्ठन् केनचिदालम्बनेन प्रकटीभूय पुनस्तत्रैव निराकारतामाप्नोति, तथा परमात्माभिन्नमूलप्रकृतौ निराकारसूक्ष्मरूपेण लीनं जगदेवेश्वरसङ्कल्पवशाद् व्यक्तरूपेण परिणमते पुनस्तत्रैव निराकारतामाप्नोति चेति ।

सृष्टिविचारः

तदेवमभिन्ननिमित्तोपादानभूतप्रकृतिविशिष्टेश्वरनिर्मित्तस्य जगत उत्पत्तिः परमात्मसृष्टिः ब्रह्मसृष्टिरिति च प्रभेदेन द्विधोपलभ्यते गीतायाम् ।

परमात्मसृष्टिः

सर्वप्रथमं शक्तिविशिष्टपरमात्मेतरवस्त्वभावसमये परमात्मनो सकललोकानां हिरण्यगर्भादिसमस्तदेवजीवपश्वादीनां च या सृष्टिरजायत सा परमात्मसृष्टिरित्यभिधीयते। इयं सृष्टिरेव महासर्ग इत्यभिधीयते। महासर्गोऽयं परमात्मनः सङ्कल्पाज्जायते। यदा परमात्माभिन्नप्रकृतौ स्वस्वसंस्कारसहितविलीनानां जीवानां कर्माणि परिपक्वीभूय फलोन्मुखानि भवन्ति, तदा परमात्मनि "एकाकी नैव रमते", "तदैक्षत बहु स्यां प्रजायेय"[1] इत्यादिश्रुत्यनुसारं जगदुत्पादनसङ्कल्पो भवति। तत्सङ्कल्पेन स स्वाभिन्नां प्रकृतिं स्वीकृत्य चतुर्मुखब्रह्मणः समस्तजीवानां निखिललोकानां च रचनां विदधाति। तदुक्तम्–

> प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः।
> भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ।।[2] इति।

तत्र प्रथमं हिरण्यगर्भं ब्रह्माणं सृजति। अत एवोपनिषत्सु, "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै"[3] इति परमात्मनो ब्रह्मोत्पादकत्वं श्रूयते। गीतायामपि तदुच्यते–

---

[1] छा. उ. ६.२.२

[2] भ. गी. ९.८

[3] श्वे. उ. ६.१८

ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा।।[1] इति।

तदनु तेन भृगुर्मरीचिरत्रिः पुलहः पुलस्त्यः क्रतुर्वसिष्ठश्चेति सप्तर्षयः[2], सावर्णिर्धर्मसावर्णिर्दक्षसावर्णिः सावर्णश्चेति चतुर्विधाः[3] मनवश्चोत्पादिताः। तदुक्तं भगवता श्रीकृष्णेन–

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः।।[4] इति।

इमे हिरण्यगर्भादयः, भृग्वादिसप्तमहर्षयः, सावर्ण्यादिमनवश्च परमात्मनो विशेषसामर्थ्यांशेन जाता विशेषालौकिकशक्तिज्ञानसम्पन्नाः। अत एव ते सर्वे सामान्यजीवपङ्क्तौ न गण्यन्ते।

गीतायां पूर्वोपपादिता प्रकृतिः परमात्मनोऽध्यक्षतायां तत्प्रेरणया च परा-अपराभेदेन द्विधा विभज्यते। तत्रापरा प्रकृतिर्जगन्मूलकारणभूताव्यक्तरूपेण, अहङ्कारकारणमहत्तत्त्वरूपेण, मनःकारणाहङ्काररूपेण, पृथ्वी–अप्– तेज–वायु-आकाशनामकपञ्चतन्मात्ररूपेण च परिणमते। तदुक्तम्–

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा।।
अपरेयम् -----------------------।।[5] इति।

---

[1] भ. गी. १३.२३, अस्य श्लोकस्योद्धरणपूर्वकं योगिनीहृदयदीपिकायां (पृ. १२६) तस्य शिवस्य प्रकाशमयस्य प्रथा विमर्शशक्तिः, यथा दीपस्य प्रभा तद्वत् तस्याः प्रसरः षट्त्रिंशत्तत्त्वात्मना परिणामः" इति प्रतिपादितम्।

[2] इमे सप्तर्षयः स्वायम्भुवमन्वन्तरान्तर्गताः तदानन्तरीयत्रयोदशमन्वन्तरेष्वपि विभिन्नाः सप्तर्षयो भवन्तीति प्रसिद्धिः। तत्तन्मन्वन्तरान्तर्गतानां सप्तर्षीणां नामानि पुराणेषु समुपलभ्यन्ते। शब्दार्थकौस्तुभाख्ये संस्कृत–कन्नडशब्दकोशे समुल्लिखितानि तत्र द्रष्टव्यानि, भा. ६ 'सप्तर्षि' इति शब्दार्थे।

[3] द्र. भ. गी. शां भा. १/२३ टिप्पणी; गीताप्रेस, गोरखपुर।
वस्तुतः शास्त्रेषु स्वायम्भुवादिचतुर्दशमनवो गणिताः, तथाप्यत्र सावर्णादयो चत्वारो मनवोऽभिप्रेताः। इदं चतुर्दशमनूनामुपलक्षणमित्यपि विचारयितुं शक्यते।

[4] भ. गी. १३/२३ ।

[5] भ. गी. ७/४/५ ।

अस्य श्लोकस्य भाष्यरचनावेलायां श्रीशङ्करभगवत्पादाचार्यैः– "भूमिरिति पृथिवी तन्मात्रमुच्यते न स्थूला, भिन्ना प्रकृतिरष्टधा" इति वचनात्। तथाऽबादयोऽपि तन्मात्राण्येवोच्यन्ते। आपोऽनलो वायुः खं मन इति मनसः कारणमहङ्कारो गृह्यते। बुद्धिरित्यहङ्कारकारणं महत् तत्त्वम् अहङ्कार इत्यविद्यासंयुक्तमव्यक्तम्। यथा विषसंयुक्तमन्नं विषमित्युच्यते, एवमहङ्कारवासनावदव्यक्तं मूलकारणमहङ्कार इत्युच्यते प्रवर्तकत्वादहङ्कारस्य। अहङ्कार एव हि सर्वस्य प्रवृत्तिबीजं दृष्टं लोके"[१] इति भूम्यादिशब्दानां तत्तत्तन्मात्रमिति, मनसोऽहङ्कार इति, बुद्धेर्महदिति, अहङ्कारस्याव्यक्तमिति च व्याख्यातम्। अत्र भूम्यादिपादानि शब्दादिविषयाणाम्, श्रोत्रादीन्द्रियाणाम्, आकाशादिस्थूलभूतानां चोपलक्षणानीति विज्ञेयम्।

इतोऽप्यन्या पराप्रकृतिश्च प्राणधारणनिमित्तजीवरूपा सती अपराप्रकृतिजन्यपञ्चभूतगतपञ्चविषयानुपभुनक्ति। तदुक्तम्–

-----इतस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
जीवभूतां महाबाहो ययेदं धार्यते जगत्।।[२] इति।

तदेवं परमात्मा स्वप्रकृत्या सम्पूर्णं जगदिदं विसृज्य "तत्सृष्ट्वा तदेवानुप्राविशत्"[३] इति श्रुत्या स्वयमपि मालायामनुस्यूतसूत्रवदनुगतोऽस्ति स्वकीयेन सद्रूपेण चिद्रूपेणानन्दरूपेण च। अत एवोक्तं भगवता श्रीकृष्णेन–

एतद्योनीनि भूतानि सर्वाणीत्युपधारय।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा।।

मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव।।[४] इति।

अत्रायं भावः– मालागतमणीनामाश्रयभूतं सूत्रं मणिष्वनुस्यूतमपि यथा मण्यन्तरस्थानेऽपि वर्तते तथा स परमात्मा "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्"[५] इति भगवदुक्त्या निखिलविश्वरूपेणोपस्थितोऽपि विश्वोत्तीर्ण-

---

[१] भ. गी. शां. भा. ७.४
[२] भ. गी. ७.५
[३] तै. उ. २.६.१
[४] भ. गी. ७.६-७
[५] भ. गी. १०.४२

रूपेणाऽप्यस्ति।[१] अत एव स जगदविभक्तरूपेण, जगद्विभक्तरूपेण च विराजते। तदुक्तम्–

अविभक्तं च भूतेषु विभक्तमिव च स्थितम्।
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च।।[२] इति।

अनेन हेतुना तस्य जगदुभयकारणत्वम्, प्रपञ्चस्य वास्तविकत्वं च सिद्ध्यति। अत एव प्रसिद्धविमर्शकाः श्रीबलदेव–उपाध्यायमहाभागा गीतायाः "नासतो विद्यते भावो नाभावो विद्यते सतः"[३] इत्युक्तिं प्रमाणयन्तः– "गीता सत्कार्यवादं प्रतिपादयतीति तद्दृष्ट्या जगदिदं मायिकं काल्पनिकं वा नास्ति, अपि तु सर्वथा सत्यं वास्तविकं चास्ति"[४] इति कथयन्ति। तस्माद् गीतासु जगतः सत्यत्वमेवाभिप्रेतमित्यप्यवगम्यत इत्यलमतिविस्तरेण।

ब्रह्म (हिरण्यगर्भ) सृष्टिः

प्रथमसृष्टेरवान्तरप्रलयानन्तरीयसृष्टिर्ब्रह्मसृष्टिरिति कथ्यते। मनुष्यलोकपरिगणितानि सहस्त्रयुगानि हिरण्यगर्भस्यैकमहरिति अपरयुगसहस्त्रं च तस्य रात्रिरिति च परिगण्येते। यथा जना आ दिनं कार्यानुरक्ताः कर्म कुर्वाणा रात्र्यागमे सर्वकार्याणि विहाय शेरते, तथा ब्रह्मापि दिनपर्यन्तं सृष्टिकार्यं कुर्वन् रजन्यागमे तत्परिहाय शेते। यदा हिरण्यगर्भस्य ब्रह्मणो रात्रिरायाति अर्थात् मनुष्यलोके परिगणितं युगसहस्त्रं व्यतीतं भवति, तदाऽयं लोकस्तस्मिन् विलीयावान्तरं प्रलयं याति, पुनर्यदा तस्य दिनमागच्छति तदा तस्य सृष्टिर्जायत इतीयं ब्रह्मसृष्टिरवारन्तरसृष्टिर्वेति पर्यायेणोच्यते। तदुक्तम्–

सहस्त्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदुः।
रात्रिं युगसहस्त्रान्तां तेऽहोरात्रविदो जनाः।।

अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे।
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके।।

---

[१] प्रत्यभिज्ञाहृदयस्याष्टमसूत्रस्य व्याख्यानावसरे क्षेमराजः– "विश्वोत्तीर्णमात्मतत्त्वमिति तान्त्रिकाः विश्वमयमिति कुलाद्यविद्याम्नायनिविष्टाः, विश्वोत्तीर्णं विश्वमयं चेति त्रिकादिदर्शनविदः" इति प्रतिपादितवान्।

[२] भ. गी. १३.१६

[३] भ. गी. २.१६

[४] भारतीय दर्शन पृ. ५९, शारदा मन्दिर, वाराणसी, १९९७ ई.।

भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते।
रात्र्यागमेऽवशः पार्थ प्रभवन्त्यहरागमे।।[१] इति।

किञ्च, "सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः"[२] इत्यत्र यज्ञादीनां प्रजानां च यद्ब्रह्मस्रष्टृत्वमुपपादितम्, तदवान्तरसृष्ट्यन्तर्गतमिति विज्ञेयम्। एवं महासृष्टिः परमात्मना अवान्तरसृष्टिश्च हिरण्यगर्भाख्यचतुर्मुखब्रह्मणा विरच्यत इति ज्ञायते।

तदेतावता श्रीमद्भगवद्गीतानुसारमिदं जगत् परमात्मनोऽविकृतपरिणामभूतम्, परिवर्तनशीलत्वादश्वत्थवृक्षरूपं च वर्तते। मूलप्रकृतिविशिष्टं ब्रह्माऽस्याऽभिन्ननिमित्तोपादानकारणम्; अत एवेदं न कल्पितमसत्यं वा, अपि तु वास्तविकमस्ति। महासर्गे इदं परमात्मन उत्पद्य, पुनरवान्तरसृष्टिसमये हिरण्यगर्भात् प्रादुर्भवतीति विवेचितम्।

सिद्धान्तशिखामण्यनुसारेण जीवस्वरूपम्

तत्र शिवजीवयोर्भेदाभेदसमन्वयात्मकवीरशैवसिद्धान्तप्रतिपादके श्रीसिद्धान्तशिखामणिग्रन्थे देहेन्द्रियाद्यतिरिक्त एव जीवात्मेति स्वीक्रियते। तदुक्तं भगवत्पादैः रेणुकाचार्यैः–

नेन्द्रियाणां न देहस्य न बुद्धेरात्मता भवेत्।
अहं प्रत्ययवेद्यत्वादनुभूतस्मृतेरपि ।।
शरीरेन्द्रियबुद्धिभ्यो व्यतिरिक्तः सनातनः।।[३] इति।

नन्वयं जीवः किं स्वरूप इति जिज्ञासायामुक्तं तत्रैव–

एक एव शिवः साक्षाच्चिदानन्दमयो विभुः।
निर्विकल्पो निराकारो निर्गुणो निष्प्रपञ्चकः।।
अनाद्यविद्यासम्बन्धात्तदंशो जीवनामकः।।[४] इति।

अस्यायमर्थः– अकुण्ठितेच्छाद्यनेककल्याणगुणगणपूर्णः परशिव एव स्वविमर्शशक्त्यंशभूतानाद्यविद्यासम्बन्धात् 'जीवः' इत्यभिधानवान् भवति। तदेवमत्र

---

१. भ. गी. ८.१७-१९
२. भ. गी. ३.१०
३. सि. शि. ५.५७-५८
४. सि. शि. ५.३३-३४

दर्शने परशिवस्यांश एव जीव इति प्रतिपादितं भवति। अत एवायं जीवः परशिवस्य सर्वकर्तृत्व-सर्वज्ञत्व-परिपूर्णत्व-नित्यत्व-व्यापकत्वरूपशक्तीनां सङ्कोचभूतैः कला-विद्या-राग-काल-नियतिरूपपञ्चकञ्चुकैरावृतः, किञ्चित्कर्तृत्वकिञ्चिज्ज्ञत्वापूर्णत्वा-नित्यत्वाव्यापकत्वधर्मी सन् स्वकर्मानुसारेण प्रपञ्चे परिभ्रमति। तदुक्तम्–

किञ्चित्कर्ता च किञ्चिज्ज्ञो बद्धोऽनादिशरीरवान्।
अविद्यामोहिता जीवा ब्रह्मैक्यज्ञानवर्जिताः।।

परिभ्रमन्ति संसारे निजकर्मानुसारतः।
देवतिर्यङ्मनुष्यादिनानायोनिविभेदतः ।।[1] इति।

उक्तं च श्रीमद्भिर्मरितोण्टदार्यैः– "काष्ठगताग्निविस्फुलिङ्गवदीश्वरचिकीर्षासादितभेदवत्त्वे सति, ईश्वरमायावष्टब्धवासनाप्रतिबिम्बितत्वाणवकार्ममायिकमलावृतत्वे सति, सर्वकर्तृत्वसर्वज्ञत्वपरिपूर्णत्वनित्यत्वव्यापकत्वविलक्षणकिञ्चित्कर्तृत्वकिञ्चिज्ज्ञत्वापूर्णत्वानित्यत्वाव्यापकत्वापादितकलाविद्यारागकालनियतिरूपपञ्चकञ्चुकवत्त्वे सति औन्मुख्यगर्भितेच्छाशक्तिस्फुरितज्ञानक्रियान्योऽन्यभावलक्षणमायाप्रतिस्फुरितसुखदुःखमोहप्रदसत्त्वरजस्तमस्साम्यावस्थालक्षणपञ्चविंशतितत्त्वरूपपाशवत्वम्। तदेव जीवत्वम्"[2] इति। अनेन परिपूर्णशक्तिविशिष्टपरशिव एव सङ्कुचितशक्तिविशिष्टः सन् जीवो भवतीति ज्ञायते। अत एवात्र दर्शने–

नञभावे निषेधे च स्वरूपार्थे व्यतिक्रमे।
ईषदर्थे च सादृश्ये तद्विरुद्धतदर्थयोः।।

इति मेदिनीकोशोक्तेषु नञर्थेषु जीवस्यांशत्वापादकस्याज्ञानस्येषज्ज्ञानमज्ञानमितीषदर्थे नञङ्गीकृतः, न त्वद्वैतवेदान्तवज्ज्ञानविरोधिभावरूपमज्ञानमिति विरूद्धार्थे। तस्मादत्र सङ्कुचितज्ञानमज्ञानमित्यर्थः। मुक्तौ तु ज्ञानादेः सङ्कोचकारणीभूतानामाणवादिमलत्रयाणामपगमे तस्य ज्ञानादिशक्तीनां पुनर्विकासो भवति। तदुक्तम्–

जीवत्वं दुःखसर्वस्वं तदिदं मलकल्पितम्।
निरस्यते गुरोर्बोधाद् ज्ञानशक्तिः प्रकाशते।।[3] इति।

---

[1] सि. शि. ५.४७-४८

[2] वी. आ. चं., पृ. ४५

[3] सि. शि. १८.१७

वृत्तिकारैः शङ्करशास्त्रिमहाभागैरपि– "अस्मन्मते शिवजीवयोर्भेदस्य मिथ्याज्ञानकृतत्वाभावात् शिवशक्तिस्वातन्त्र्यपरिकल्पितसङ्कोचकृतत्वात्तयोरभेदस्य विकसितस्वशक्तिदशायामुपपन्नत्वात् कूर्माङ्गमङ्गि–अहिकुण्डल–स्वर्णकुण्डल–न्यायादिपद्धत्या स्वरूपस्यैव स्वेच्छया सङ्कोचः स्वरूपस्यैवाविर्भावः"[१] इति सङ्कुचितशक्तिकस्य शिवस्यैव जीवत्वमिति, पुनः शक्तिविकासे तस्यैव शिवत्वमिति च समर्थितम्।

पिण्ड-पिण्डज्ञानविचारः

सोऽयमल्पशक्तिविशिष्टो जीवात्मा मनोबुद्धिचित्ताहङ्काराख्यान्तःकरण–चतुष्टयेनावृतः। तदन्तःकरणचतुष्टयं तु शुद्धाशुद्धभेदेन द्विविधम्। पापकर्मप्रवृत्त्यात्मकमशुद्धम्, पुण्यकर्मप्रवृत्त्या विनष्टपापं शुद्धम्। यदाऽनेकजन्मसु समाचरितधर्मेण पूर्वकृतानि मनोवाक्कायजन्यानि पापान्यपगच्छन्ति, तदाऽयं जीवः शुद्धान्तःकरणवान् भवति। निर्मलान्तःकरणवानयमेव जीवः 'पिण्ड' इति कथ्यते। तदुक्तम्–

बहुजन्मकृतैः पुण्यैः प्रक्षीणे पापपञ्जरे।
शुद्धान्तःकरणो देही पिण्डशब्देन गीयते।।

शिवशक्तिसमुत्पन्ने प्रपञ्चेऽस्मिन् विशिष्यते।
पुण्याधिकः क्षीणपापः शुद्धात्मा पिण्डनामकः।।[२] इति।

एतादृशक्षीणपापत्वस्थितिप्राप्तिपूर्वमयं जीवः स्वकर्मफलमनुभोक्तुं "देवतिर्यङ्मनुष्यादिनानायोनिविभेदतः"[३] इति भगवदाचार्योक्त्या नानायोनिषु परिभ्रमति। ताश्च योनयो देवजन्मनि षोडशलक्षप्रकाराः, मनुष्यजन्मनि नवलक्षप्रकाराः, जलजजन्मनि दशलक्षप्रकाराः, विहगजन्मनि दशलक्षप्रकाराः, मृगजन्मनि दशलक्षप्रकाराः, सरीसृपजन्मनि एकादशलक्षप्रकाराः, वृक्षजन्मन्यष्टादशलक्षप्रकारा इति सप्तविध–जन्मान्तर्गताश्चतुरशीतिलक्षप्रकाराः। तत्समर्थितं श्रीमद्भिर्मरितोण्टदार्यैः–

देवाः षोडशलक्षाणि नवलक्षाणि मानुषाः।
दशभिर्दशभिस्तद्वज्जलजा विहगा मृगाः।।

---

[१] ब्र. सू. शा. वृ. १.३.१९

[२] सि. शि. ५.३१–३२

[३] तत्रैव, ५.४८

सरीसृपास्तु लक्षाणि एकादश चरेतराः।
अष्टौ च दशलक्षाणि सप्तजन्मान्यमूनि वै।।[१]

इति स्कन्दपुराणोक्त्या। एतादृशयोनिषु परिभ्रमन् जीवो मानुषं देहमाश्रितः स्वधर्माचरणबलेन शिवानुग्रहेण च प्रक्षीणमलवासनः शुद्धान्तःकरणश्च सन् पिण्डशब्देनाभिधीयते। "जन्तुरन्त्यशरीरोऽसौ पिण्डशब्दाभिधेयकः"[२] इति रेणुकभगवत्पादोक्त्या पिण्डशब्दवाच्योऽयं जीवो ज्ञानोदयभूमिरूपं निर्मलान्तःकरणमवाप्तः, पुनः पिण्डज्ञानाद्युत्तरोत्तरस्थलमधिगम्य मोक्षमवाप्स्यतीत्ययमन्त्यशरीरी भवति।

निर्मले दर्पणे एव यथा वस्तुचित्रं वास्तविकं दृश्यते, तथा निर्मलान्तःकरणे एव नित्यानित्यविवेक उदेति। आत्मनो नित्यत्वम्, तद्भिन्नं शरीरादिकं यत् किञ्चित् सर्वमनित्यमिति नित्यानित्यविवेकवानेव 'पिण्डज्ञानी' इति कथ्यते। तदुक्तम्–

शरीरात्मविवेकेन पिण्डज्ञानी स कथ्यते।
शरीरात् पृथगात्मानमात्मभ्यः पृथगीश्वरम्।
प्रेरकं यो विजानाति पिण्डज्ञानीति कथ्यते ।।[३] इति।

अयं शरीरात्मविवेक एव गीतायां क्षेत्रक्षेत्रज्ञविवेक इत्युच्यते ।

जीवात्मनोऽणुरूपत्वम्

नन्वस्य शरीरात्पृथग्भूतस्य जीवात्मनोऽणुपरिमाणत्वमुत वा विंभुपरिणामत्वम्? इति जिज्ञासायाम्, वीरशैवदर्शने–

एषोऽणुरात्मा चेतसा वेदितव्यः ।[४]
बालाचग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्प्यते ।।[५]

इत्यादिश्रुत्यनुसारेण वीरशैवदंर्शने जीवस्याणुपरिमाणत्वं स्वीक्रियते । तदुक्तम्–

बालाग्रशतभागेन सदृशो हृदयस्थितः।
अश्नन् कर्मफलं सर्वमात्मा स्फुरति दीपवत्।।

---

[१] सि. शि. ५.३५ तत्वप्रदीपिका व्याख्या।

[२] सि. शि. ५.५४

[३] सि. शि. ५.५५, ६०

[४] मुण्ड. ३.१.९

[५] श्वे. उ. ५.९

आत्मापि सर्वभूतानामन्तःकरणमाश्रितः।
अणुभूतो मलासङ्गादादिकर्मनियन्त्रितः।।[1] इति।

ननु जीवस्याणुत्वे तस्य शरीरैकदेशनिष्ठत्वेन पादे मे वेदना शिरसि मे सुखमिति सर्वाङ्गीणचैतन्योपलब्धिः कथमिति चेन्न, प्रदीपवत् तदुपपत्तेः। अत एवोक्तं भगवत्पादैः– "अश्नन् कर्मफलं सर्वमात्मा स्फुरति दीपवत्" इति। यथा प्रदीपो गृहस्यैकदेशे वर्तमानोऽपि स्वप्रभया सम्पूर्णं गृहं व्याप्य तदन्तर्गतसकलवस्तूनि प्रकाशयति, तद्वदयं जीवात्मा शरीरैकदेशस्थितोऽपि स्वीयया ज्ञानप्रभया सर्वं शरीरं व्याप्य सर्वाङ्गीणसम्भूयमानसुखदुःखादिकं जानाति।

भगवता बादरायणेनापि– "अविरोधश्चन्दनवत्"[2], "गुणाद्वाऽऽलोकवत्"[3] इति सूत्राभ्यां चन्दनालोकदृष्टान्ताभ्यामात्मनोऽणुत्वेऽपि स्वज्ञानप्रभया शरीरव्यापित्वं तस्य समर्थितम्।

अत्रायं भावः– यथा देहैकदेशस्थितस्य चन्दनस्य सकलशरीरशैत्यजनकत्वम्, तथा क्षेत्रज्ञस्यैकस्मिन् प्रदेशे स्थितस्यापि सर्वाङ्गसुखदुःखभोक्तृत्वमुपपन्नम्। यथा वा लोके मणिप्रदीपप्रभृतीनामेकदेशवर्तिनामपि तत्प्रभया सर्वदेशवर्तित्वं तथाऽणुरप्यात्मा स्वज्ञानेन शरीरं व्याप्य तिष्ठति। ननु कथं गुणो गुणिव्यतिरेकेणान्यत्र वर्तेत, नहि पटस्य शुक्लो गुणः पटव्यतिरेकेणान्यत्र वर्तमानो दृश्यते? इति चेत्, मैवम्, शुक्लादिगुणानां स्वद्रव्यव्यतिरेकेणानुपलभ्यमानोऽपि गन्धप्रकाशयोस्तत्सम्भवात्। नहि रसो गुणो जिह्वयोपलभ्यत इति रूपादयोऽपि गुणा जिह्वयैवोपलभ्येरन्निति नियन्तुं शक्यते। फलबलकल्प्यस्य स्वभाव एव शरणमिति लोकानुभवेन प्रदीपप्रभावद् ज्ञानप्रभायाः शरीरव्याप्यत्वेन स्वीकारे न कोऽपि दोषः। यथा पृथिव्या गन्धस्य गुणत्वेनोपलभ्यमानस्य ततो व्यतिरेकः, तथा जानामीति ज्ञातृगुणत्वेन प्रतीयमानस्य ज्ञानस्याप्यात्मनो व्यतिरेकसिद्धिः। अत एव "आलोमभ्य आनखेभ्यः"[4], "प्रज्ञया शरीरं समारुह्य शरीरेण सुखदुःखे आप्नोति"[5] इत्याद्याः श्रुतयो जीवात्मनश्चैतन्यगुणस्य समस्तशरीरव्यापित्वं दर्शयन्ति।[6]

---

[1] सि. शि. १८.६–७
[2] ब्र. सू. २.३.२२
[3] ब्र. सू. २.३.२४
[4] छा. उ. ८.८.१
[5] कौषी. ३.६
[6] ब्र. सू. श्रीकर. २.३.२२–२५

आणवमलेनावृतत्वादेव जीवः स्वीयं परिपूर्णभावं विस्मृत्याणुतामापद्यते। जीवस्य मलावृतस्वरूपत्वं नीलकण्ठशिवाचार्यैरप्युक्तम्– "तत्र स्थूलचिदचिद्रूपशक्तिविशिष्टत्वं जीवात्मनो लक्षणम् । स्थूलत्वं च मलत्रयविशिष्टत्वम्। वैशिष्ट्यमपृथग्भावसम्बन्धेन। एतन्मलत्रयरूपशक्तिविशिष्टो जीवः संसारीति निगद्यते"[१] इति।

यथा सुदीप्तात् पावकाद्
विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः।
तथाक्षराद् विविधाः सौम्य भावाः
प्रजायन्ते तत्र चैवापियन्ति ।।[२]

इति श्रुत्युक्त्यनुसारं यथाऽग्नेस्तदुत्पन्नविस्फुलिङ्गानां चांशांशिभावः, परमात्मनस्तदाविर्भूतजीवानामपि तथांशांशि-भावोऽङ्गीक्रियते। अत एव रेणुकभगवत्पादाः–

यस्मिन् ज्योतिर्गणाः सर्वे स्फुलिङ्गा इव पावकात्।
उत्पत्य विलयं यान्ति तद्रूपं परमात्मनः।।[३]

इति वह्निविस्फुलिङ्गयोर्दृष्टान्तेन परमात्मनो जीवानामुत्पत्तिमुक्त्वा,

निर्विकल्पो निराकारो निर्गुणो निष्प्रपञ्चकः।
अनाद्यविद्यासम्बन्धात् तदंशो जीवनामकः।।[४]

इति जीवस्यांशत्वमुपस्थापितवन्तः। श्री मायिदेवेनाऽपि– "आत्मायं केवलः शुद्धः शिवस्यांशः सदामलः"[५] इति जीवस्य शिवांशत्वं प्रतिपादितम् ।

जीवपरमात्मनोरङ्गाङ्गिभावः

न यस्याङ्गपरिज्ञानं नाङ्गाङ्गिभावबोधनम्।
न तेन लभ्यते मुक्तिर्दूरस्था हि यतः शिवे ।।[६]

---

[१] शि. परि., पृ. ६

[२] मुण्ड. २.१.१

[३] सि. शि. १८/३१, अत्र मरितोण्टदार्याः 'ज्योतिर्गणाः' इत्यस्य समस्तजीवतेजःसमूहा इत्यर्थं कृतवन्तः।

[४] सि. शि. ५.३४

[५] अनु. सू. ५.३

[६] पारमे. ६.३९

इत्यागमे जीवपरमात्मनोरङ्गाङ्गिभावप्रतिपादनाज्जीवपरमात्मनोरयमंशांशिभावो न ह्यौपाधिकः, अपि त्वङ्गाङ्गिरूपो वास्तविकः। अत एवात्र सिद्धान्ते जीवोऽङ्गशब्देनाभिधीयते। तदुक्तं मायिदेवेन–

अनाद्यन्तमजं लिङ्गं तत्परं परमं प्रति।
यद् गच्छति महाभक्त्या तदङ्गमिति निश्चितम्।।

अं भवेत् परमं ब्रह्म तद्गतं तत्परायणम्।
अङ्गस्थलमिति प्राहुरङ्गतत्त्वविशारदाः।।[1] इति।

ननु– "अङ्गं प्रतीकोऽवयवो----"[2] इत्यादिकोशवचनेन शरीरतदवयवाद्यर्थेष्वेवाङ्गशब्दप्रयोगदर्शनाज्जीवस्य कथमङ्गत्वमिति जिज्ञासायाम्, श्रीनीलकण्ठशिवाचार्यैः– "अङ्गपदस्य रूढिशक्त्या शरीरवाचित्वेऽपि "यस्य चात्मा शरीरम्---- यस्य चाव्यक्तं शरीरम्" इत्यन्तर्यामिब्राह्मणेन पृथिव्यादिजीवात्मपर्यन्तस्य सकलस्य वस्तुजातस्य परशिवशरीरत्वबोधनाज्जीवस्याङ्गपदवाच्यत्वे न काप्यनुपपत्तिः"[3] इत्यङ्गपदस्य जीववाचकत्वं समर्थितम्।

परमात्मनोऽवयवभूतत्वाच्चायं जीवोऽङ्गपदवाच्यः। अत एव रेणुकभगवत्पादैः–

पत्रशाखादिरूपेण यथा तिष्ठति पादपः।
तथा भूम्यादिरूपेण शिव एको विराजते।।[4]

इति परशिव एव चराचररूपेण वर्तत इति प्रतिपादितम्। तत्र परशिवस्य धृतिशक्त्या धरणिः, करुणया जलम्, उज्ज्वलतया तेजः, परमानन्दस्पन्देन वायुः, चिद्व्याप्त्या व्योम, चितिसङ्कोचचित्तविशिष्टो जीव इति मरितोण्टदार्यैः शिवः स्वकीयभिन्नभिन्नशक्त्या भूम्यादिरूपेण परिणामं प्राप्य चितिसङ्कोचभूतचित्तविशिष्टत्वेन जीवोऽभूदिति व्याख्यातम्[5]। तस्माद्यया वृक्षशाखादिष्ववयवावयविभावस्तथा जगज्जीवपरमात्मनोरप्यवयवावयविभावः। अत एवं–

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।
तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत्।।[6]

---

[1] अनु. सू. ४.२–३
[2] अ. को. १.४१
[3] शि. परि., पृ. ५९
[4] सि. शि. १०.७०
[5] सि. शि. तत्त्वप्रदीपिकाव्याख्या १०.७०
[6] श्वे. उ. ४.१०

इति श्रुतिं प्रमाणयद्भिर्भगवत्पादैः श्रीपतिपण्डिताराध्यैरपि– "तस्मान्मायिनः परमशिवावयवलेशः पुरुषो जीवः"[१] इति जीवस्य परशिवावयवत्वं प्रतिपादितम्। तस्माज्जीवपरमात्मनोरवयवावयविभावरूपोंऽशांशिभावः ।

ननु परशिवस्य निरवयवत्वात् कथं जीवपरमात्मनोरवयवावयविभावरूपोंऽशांशिभाव इति चेन्न, अस्मदादेरिव तस्य प्राकृतावयवाभावेऽपि–

सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः।
अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य।।[२]

इत्यादिप्रमाणेन विलक्षणनित्याङ्गसत्त्वेन दोषाभावात् । जीवस्य परशिवस्यावयवरूपांशत्वे– "तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत्"[३], "मच्छरीरमिदं जगत्"[४], "अंशो नानाव्यपदेशात्"[५] इति श्रुत्यागमसूत्रादयोऽपि प्रमाणम् । तस्माद्यथा न्यायमते "पञ्चावयवं वाक्यं न्यायः" इति न्यायलक्षणस्य निरवयवे शब्दे गुणरूपे द्रव्यत्वव्याप्यस्यावयवत्वस्य द्रव्यत्वाभाववति शब्दे नितरामभावेन लक्षणस्यासम्भवित्वापत्ता अधीनत्वलक्षणमवयवत्वमारोपितं स्वीकृत्य दोषनिरासः क्रियते, तथैव प्रकृतेऽपि परिदर्शितो निष्पक्षपातः पन्थाः परिद्रष्टव्यः।

नन्वेवं जीवस्येश्वराङ्गत्वेऽङ्गीकृते "भक्षितेऽपि लशुने न शान्तो व्याधिः" इत्याभाणकानुसारेण यथा हस्तपादाद्यवयवगतव्रणादिजन्यदुःखेन देवदत्तस्य दुःखित्वम्, मृदुस्पर्शादिजन्यसुखेन च तस्य सुखित्वं दृश्यते, तथा परशिवस्याङ्गभूतजीवस्य सुखित्वे दुःखित्वे च तदंशिनः परशिवस्य सुखित्वदुःखित्वप्रसङ्गः ? इति चेत्, मैवम्, दुःखमोहादीनामाणवमलकार्यत्वात् । तदुक्तं रेणुकभगवत्पादैः– "जीवत्वं दुःखसर्वस्वं तदिदं मलकल्पितम्"[६] इति। अस्यायं भावः– परशिवस्येच्छाशक्तिसङ्कोच आणवमलः, ज्ञानशक्तिसङ्कोचो मायीयमलः, क्रियाशक्तिसङ्कोचश्च कार्ममल इति व्यवह्रियते। तत्राणवमलो जीवेऽणुतामापाद्य परमात्मनोऽस्य भेदबुद्धिं कल्पयति। मायीयमलश्च धरादारात्मजादिषु ममतामभिजनयति । कार्ममलश्च जीवस्य

---

[१] ब्र. सू. श्रीकर २.३.४१

[२] वा. पु. १२.३१; पारमे. ६.३३; अनु. सू. ४.२०

[३] श्वे. उ. ४.१०

[४] पारमे. २९.९०

[५] ब्र. सू. २.३.१५

[६] सि. शि. १८.१७

पुण्यपापकर्मसम्पादने हेतुर्भवति। एतन्मलत्रयावृतः परमात्मचैतन्यैकदेश एव जीवः। यथा हि शिवः सहजतयेच्छाज्ञानक्रियाशक्तिविशिष्टः, तथा जीवस्तत्सङ्कोचभूतैराणव-मायीय-कार्ममलैः सहजतयाऽऽवृतो वर्तते। अत एवोक्तं किरणागमे–

एवं तत्त्वकलाबद्धः किञ्चिज्ज्ञो देहसंयुतः।
मायाभोगपरिष्वक्तस्तन्मयः सहजावृतः।।
ततः सुखादिकं कृत्स्नं भोगं भुङ्क्ते स्वकर्मतः।।[१] इति।

तस्मादेवं सुखदुःखादीनां मलकार्यत्वात् मलानां च जीवे विद्यमानत्वात्, परशिवे तदत्यन्ताभावाच्च जीवस्यैव सुखदुःखसाक्षात्कारः[२]। उक्तं च श्रीपतिपण्डिताराध्यैः– "अनादिस्वाभाविकमायापाशबद्धघोरापारनिःसारसंसारव्यापारतापत्रयानलदन्दह्यमाननानाशरीरप्रवेशनिर्गमनवर्णाश्रमाभिमानविशिष्टकामक्रोधाद्यनुस्यूतसुखदुःखाद्याश्रयत्वं जीवत्वम्"[३] इति।

तस्मात् 'अयं सुखी', 'अयं दुःखी' इति व्यवहारदर्शनात् सुखदुःखादिमत्त्वं जीवात्मनस्तटस्थलक्षणं भवितुमर्हति, 'शाखाग्रे चन्द्रः' इत्यादिवत् सुखदुःखादीनां ताटस्थ्येन जीवे विद्यमानत्वात्। सुखदुःखादयो हि जीवस्य तत्तत्सामग्रीसमवधानदशायां तत्तच्छरीरादिसम्बन्धेन पर्यवस्यन्ति, सुखदुःखादिनिष्ठोपभोग्यता-निरूपितोपभोक्तृत्वस्य तत्तत्सामग्रीसमावधानदशायां शरीरादिसम्बन्धेन जीव एव सत्त्वात्। अतः सुखदुःखादिविषयेषु भोज्यत्वम्, जीवस्य भोक्तृत्वं च सर्वजनीनम्[४]। अत एव "एतेषां देहिनां साक्षी प्रेरकः परमेश्वरः"[५] इति रेणुकभगवत्पादैरपीश्वरस्य जीवानां प्रेरकत्वमुक्तम्, न तु तत्सुखदुःखभोक्तृत्वम्।

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति।।[६]

इति श्रुत्यापि सुपर्णयोर्दृष्टान्तेनेश्वरस्याभोक्तृत्वं जीवस्यैव भोक्तृत्वं प्रतिपादितम्। उक्तं च पारमेश्वरागमेऽपि–

---

[१] किरणा. वि. पा. १.१९-२०
[२] श. वि. द., पृ. ९०-९१
[३] ब्र. सू. श्रीकर. १.१.१, पृ. ४
[४] शि. परि., पृ. ७
[५] सि. शि. ५.५०
[६] श्वे. उ. ४.६, मन्त्रस्यास्य विस्तृतविवरणं श्रीकरभाष्ये (२.३.४४) द्रष्टव्यम्।

आभासरूपिणो भोक्तुर्न मे साक्षाच्चिदात्मनः।
परिच्छिन्नत्वमायातमायातस्य विकारिता।।[१] इति।

श्रीविद्यारण्यस्वामिभिरपि- यथा पितृजन्या कन्या भर्तुर्भोग्या, न पितुरिति सदृष्टान्तमीश्वरस्य जगत्कर्तृत्वेऽपि न तस्य भोक्तृत्वम्, भोक्तृत्वं तु जीवस्यैवेति प्रतिपादितम्। तथा हि-

ईशकार्यं जीवभोग्यं जगद् द्वाभ्यां समन्वितम्।
पितृजन्या भर्तृभोग्या यथा योषित्तथेष्यताम्।।[२] इति।

अत एव- "सुख्यहं चेति जीव एवाभिमन्यते"[३] इत्येवं श्रीराममुपदिशता महर्षिणाऽगस्त्येन जीवस्यैव सुखदुःखिभोगित्वं समुद्घोषितम्। तस्मादत्र नीरोगहस्तपादाद्यवयवगतसुखदुःखैर्देवदत्तस्य सुखित्वदुःखित्वसम्भवेऽपि अर्धाङ्गवायुनामकरोगावृतहस्तपादादीनां तदीयावयवत्वेऽपि तद्गतसुखदुःखादयस्तेन यथा नानुभूयन्ते, तथा जीवानां परशिवाङ्गत्वेऽपि मलावृतजीवगतसुखदुःखादयो परशिवेन नानुभूयन्त इति विज्ञेयम्।

जीवात्मनो बहुत्वम्

दृश्यन्ते खल्वत्र जीवेषु केचन सुखिनः, केचन दुःखिनः, अपरे बद्धाः, अन्ये च मुक्ताः। एतादृशं जीवानुभववैलक्षण्यमवलोक्य "यथा दृश्यते तथा कल्प्यते" इति नियमानुसारं जीवात्मनो बहुत्वमङ्गीक्रियते, अन्यथा जगद्वैचित्र्यभङ्गप्रसङ्गः, भोगसाङ्कर्यापत्तिश्च। अत एव वीरशैवदर्शने जीवस्याणुत्वमङ्गीकृत्य, तदुपाधिभूताया अविद्याया अंशानामानन्त्याज्जीवानामप्यानन्त्यम्। तदुक्तं भगवत्पादै रेणुकाचार्यैः- "अविद्याशक्तिभेदेन जीवा बहुविधाः स्मृताः"[४] इति।

ननु सुखदुःखादिवैचित्र्यव्यवस्थार्थं जीवानां बहुत्वाङ्गीकारे गौरवदोषः तस्माद्यथैकस्य देवदत्तस्य पादे मे वेदना, शिरसि मे सुखम्, इत्यादिशिरःपादाद्यवच्छेदेनानुभवोपपत्तिः, तद्वदेकस्यैव विभुरूपस्यात्मनो देवदत्तादिशरीरावच्छेदेन नानाविधानां सुखदुःखादीनामनुभवो भवेदिति चेन्न, पादाद्यवच्छेद्यसुखादिषु योऽहं

---

१. पारमे. २१.७८
२. पञ्च. ४.१८
३. शि. गी. २.३५
४. सि. शि. ५.४५

शिरसि सुखमनुभवामि सोऽहं पादे दुःखमनुभवामीत्यवयवावच्छेदेनानुभूतज्ञानोपपत्तिवद् योऽहं देवदत्तशरीरेण सुखमनुभवामि सोऽहं चैत्रशरीरेण दुःखमनुभवामीत्यनुभवाभावान्नैकात्मवादः शोभनः प्रतिभाति। अतः "गौरवं च फलमुखं न दोषाय"[1] इति वचनानुसारं सुखदुःखादिवैचित्र्यव्यवस्थार्थं आत्मनो बहुत्वाङ्गीकारे न गौरवम्। उक्तं च भगवत्पादैः श्रीपतिपण्डिताराध्यैः– "किञ्चाद्वैतमते जीवानां विभुत्वेन सर्वेषां प्रतिबिम्बभूतस्वशरीरेषु विद्यमानत्वाददृष्टनियमात्, अदृष्टानां पुण्यपापानामनियमाद् नियमाभावात् केषाञ्चिद् दारिद्र्यं केषाञ्चिदैश्वर्यमिति व्यवस्था न स्यात्। तस्माज्जीवानामणुत्वं बहुत्वं प्रतिशरीरं स्वाभाविकं भिन्नत्वं चाङ्गीकर्तव्यम्"[2] इति।

नन्वेवं परमात्मनो जीवभावापत्तिः किमर्थमिति चेत्, लीलार्थमित्यभ्युपगम्यते। तथा हि– लोके सकलैश्वर्यपराक्रमधुर्यस्य सर्वमण्डलाधीश्वरस्य महाराजस्य कदाचिद्विलासेन कार्यारम्भकत्वं कदाचिच्च तूष्णीभूतावस्थात्वं दृश्यते, तथा परशिवस्यापि कदाचिल्लीलावस्था कदाचिच्च केवलावस्थेति निर्णीयते। तस्मात् "स वै नैव रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छत्"[3]

अहमेव वरारोहे निर्विकल्पादिलक्षणः।
भवत्या मम शक्त्यैवं विक्रीडामि यथासुखम्।।[4]

अस्वतन्त्राश्च किञ्चिज्ज्ञाः किञ्चित्कर्तृत्वहेतवः।
लीलाभाजनतां प्राप्ताः शिवस्य परमात्मनः।।[5]

इति श्रुत्यागमसिद्धान्तशिखामणिप्रमाणानुसारं यदा हि स रन्तुमिच्छति तदाऽखण्डरसास्वादपरिबृंहितोऽपि पूज्यपूजकरूपेण क्रीडार्थं खण्डरसास्वादार्थं चाज्ञानकर्मयोगेन, अर्थात् स्वातन्त्र्यपरिकल्पिताणवादिमलसम्बन्धेन घृतकाठिन्यन्यायेनांशतः शरीरी भवति[6]। तदुक्तं भगवत्पादैः–

न चास्ति देहसम्बन्धो निर्देहस्य स्वभावतः।
अज्ञानकर्मयोगेन देही भवति भुक्तये।।[7] इति।

---

[1] अ. ब्र. सि., पृ. ११०
[2] ब्र. सू. श्रीकर. २.३.४८
[3] बृ. उ. १.४.३
[4] पारमे. २१/४९
[5] सि. शि. १८.१४
[6] ब्र. सू. श्रीकर. २.१.३३; सि. शि. १८.११ तत्त्वप्रदीपिकाव्याख्या।
[7] सि. शि. १८.११

जीवपरमात्मनोर्भेदाभेदः

तदेवमज्ञानकर्मयोगेन मलत्रयावृतस्य जीवस्याणुत्वं स्वाभाविकमेव, न त्वौपाधिकम्। यथा वह्निविभक्तविस्फुलिङ्गानामणुत्वं स्वाभाविकम्, यथा च सरितां सरित्त्वं समुद्रादन्यत्वं च स्वाभाविकम्, तद्वज्जीवस्याणुत्वं परशिवादन्यत्वं च स्वाभाविकमेवेति संसारदशायां जीवपरमात्मनोर्भेदो वास्तविकः ।

नन्वेवं मलावृतत्वेन जीवस्य परमात्मनो वास्तविकभेदसिद्धौ कथं तस्य शिवांऽभिन्नत्वमिति चेन्न, शिवजीवयोर्भेदस्य वास्तविकत्वेऽपि न तस्य शाश्वतत्वमित्यङ्गीकारात्। यदा परमाचार्यो गुरुर्वेधा–मान्त्री–क्रियारूपदीक्षाभिराणवादिमलत्रयाणां निवारणपूर्वकं शिवाद्वैतज्ञानमुपदिशति, तदायं शुद्धो भूत्वा शिवस्वरूपो भवति। अत एव–

पूज्यपूजकयोर्लिङ्गजीवयोर्भेदवर्जने ।
पूजाकर्माद्यसम्पत्तेर्लिङ्गनिष्ठाविरोधतः ।।

प्रेरकं शङ्करं बुद्ध्वा प्रेर्यमात्मानमेव च ।
भेदात् तं पूजयेन्नित्यं न चाद्वैतपरो भवेत्।।

पतिः साक्षान्महादेवः पशुरेव तदाश्रयः।
अनयोः स्वामिभृत्यत्वमभेदे कथमिष्यते।।[१]

इत्यादिरूपेण बद्धावस्थायां (संसारदशायां) शिवजीवयोः पूज्यपूजकरूपेण पतिपशुरूपेण च वास्तविकभेदाऽभावे लिङ्गनिष्ठारूपोपासनाविरोधापत्तिरिति पतिरूपं परशिवं प्रेरकं मत्वा, आत्मानं प्रेर्यं चेति ज्ञात्वा पूज्यपूजकभेदभावेन तं शिवमर्चयेदिति प्रतिपाद्य,'

साक्षात्कृतं परं तत्त्वं यदा भवति बोधतः।
तदाद्वैतसमापत्तिर्ज्ञानहीनस्य न क्वचित्।।[२]

जीवत्वं दुःखसर्वस्वं तदिदं मलकल्पितम्।
निरस्यते गुरोर्बोधाज्ज्ञानशक्तिः प्रकाशते।।[३]

---

२. *सि. शि. १०.३७, ३९–४०*
३. *सि. शि. १०.४१*
४. *सि. शि. १८/.१७*

इत्यादिषु च यदा शास्त्रतो गुरुतः स्वतश्चानुभवज्ञानेन परशिवब्रह्माख्यं महालिङ्गतत्त्वं साक्षात्कृतं भवति, तदाऽद्वैतज्ञानसम्प्राप्त्या प्राक्तनस्य वास्तविकस्यानित्यस्य भेदस्य निवृत्तिर्जायत इति रेणुकभगवत्पादैः संसारावस्थायां जीवपरमात्मनोर्भेदस्य वास्तविकत्वम्, मुक्तावस्थायां च तयोरेवाभेदस्य वास्तविकत्वमुपपादितम् । उक्तं चागमेऽपि–

एवं तत्त्वकलाबद्धः किञ्चिज्ज्ञो देहसंयुतः।
मायाभोगपरिष्वक्तस्तन्मयः सहजावृतः।।
ततः सुखादिकं कृत्स्नं भोगं भुङ्क्ते स्वकर्मतः।
समे कर्मणि सञ्जाते कालान्तरवशात् ततः।।
तीव्रशक्तिनिपातेन गुरुणा दीक्षितो यदा।
सर्वज्ञः स शिवो यद्वत् किञ्चिज्ज्ञत्वविवर्जितः।।
शिवत्वव्यक्तिसम्पूर्णः संसारी न पुनस्तदा।।[1] इति।

अत्रेदमवधातव्यम्– संसारदशायां शिवजीवयोः भ्रमरकीटवत् परस्परविरुद्धस्वभावाद् भेदः स्वाभाविक इति युक्त्यनुभवप्रसिद्धः, मोक्षदशायां च सागरप्रविष्टस्वर्णदीवत् तयोरैक्येऽभेदः श्रुत्यागमगोचरः । अतोऽत्र दर्शने शिवः सर्वज्ञत्वसर्वकर्तृत्वादिशक्तिसमन्वित उपमातीतो नित्यमुक्त इति, जीवश्च तदंशः किञ्चिज्ज्ञत्वकिञ्चित्कर्तृत्वादिविशिष्टोऽविद्यामोहग्रस्तः शिवैक्यज्ञानविरहितो बद्धश्चेति स्वीक्रियते । इत्येवं शिवजीवयोर्वैधर्म्यात् तयोर्भिन्नत्वेऽपि चैतन्येनाभिन्नयोरुपासनमहिम्ना मुक्तावस्थायामैक्यमुपपन्नं भवति। किञ्चिदत्र विशेषोऽयं यत् संसारावस्थायामपि तयोर्न केवलं भेदः, नाप्यभेद एवेति वक्तुं युक्तम्; अपि त्वभेदगर्भितभेदो वक्तव्यः । जीवस्य सर्वदा शिवाऽभिन्नत्वे सर्वज्ञत्वादिकं तस्यापि भवेत्, यच्च जीवे नोपलभ्यते; सर्वदा भिन्नत्वे च तस्य जडत्वापत्तिः । तदिदमेव सदृष्टान्तमुक्तं शङ्करशास्त्रिणा– "जीवेश्वरयोर्यदि भेदवादिनामिव भेद एवेष्टस्तदा तूलादिषु लग्नस्य विस्फुलिङ्गस्य दाहकत्वं न स्यात्, अग्निभिन्नजलादिवद्विस्फुलिङ्गस्याप्यंशस्याग्निभिन्नत्वात्। तूलादिष्वग्निकणे लग्ने चार्द्री भवेत्। किञ्च "यदग्ने रोहितं रूपम्" इति छान्दोग्यश्रुतिसिद्धरूपमन्तरा रूपान्तरं प्रतीयात् । तथा न प्रतीयतेऽनुभवविरोधात्। भेदानुपपत्त्या अग्निकणयोर्दाहकत्वेन रोहितत्वेन चाभेदोऽङ्गीकरणीयः। अभेदे च

---

[1] किरणा. वि. पा. १/१९-२२ ।

विवक्षिते वह्नेः पाकसाधनत्वशीतनिवर्तकत्वादिधर्मवत् सर्वेऽग्निधर्माः कणेऽपि सम्भवेयुः। तदुक्तं क्रियासारे–

अग्निस्फुलिङ्गयोर्नास्ति यथा भेदः स्वरूपतः।
अग्नित्वेन कणत्वेन भेदोऽपि स्फुरति क्वचित्।। इति।

तथा अंशिनो लिङ्गस्य अंशस्याङ्गस्य च भेदाभेदौ युज्येते"[1] इति। अतः संसारदशायां जीवस्य स्वाभाविको भेदः, मुक्तावस्थायां चात्यन्ताभेदः स्वीक्रियते। अनेन जीवस्य स्वभिन्नपरमात्मोपासनम्, तद्द्वारा क्रमशो भेदनिवृत्तिः, तदनु च परमात्मैक्यरूपात्यन्तोऽभेद उपपन्नो भवति।

भाष्यकृद्भिः श्रीपतिपण्डिताराध्यैरपि– "यथा नद्यः स्यन्दमानाः समुद्रे ह्यस्तं गच्छन्ति नामरूपे विहाय। तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्।।", "स यो ह वै तत्परमम्" "ब्रह्म वेद ब्रह्मैव भवति" इत्यादौ निष्कलपरशिवोपासकानां भक्तानां लिङ्गशरीरभङ्गद्वारा परमशिवसायुज्यमुपदिश्यते। तस्माज्जीवपरमेश्वरयोः प्राप्यप्रापकत्वेन भेदाभेदो निर्णीयते। "परात्परं पुरुषमुपैति" इत्यनेन भ्रमरकीटवत् स्वाभाविकभेदसिद्धस्य जीवस्य परमशिवप्राप्त्युपदेशात् स्वकण्ठाभरणवन्नित्यब्रह्मात्मकत्वं निषिध्यते"[2] इति शिवजीवयोर्नित्याभेदं निराकृत्य भेदाभेदयोः प्राशस्त्यमुपस्थापितम्।

अत एवानादिमलत्रयावृतोऽयं जीवो यदा प्रगाढमोहान्धकारनिमग्नः सद्गुणसदाचारविरहितो जीवति, तदा बद्धः संसारी पशुरित्यादिशब्दैर्व्यवह्रियते; यदा चायं गुरुदीक्षया निवृत्तमलत्रयो रागादिवर्जितः सन् मुमुक्षुर्भवति, तदा शुद्धजीव इत्यभिधीयते। यदा पुनः शिवाभिन्नज्ञानानुभवसम्पन्नो भवति, तदा शिखिकर्पूरवत् शिवस्वरूपो भूत्वा मुक्तजीव इत्युच्यते। तदुक्तं शिवागमेषु–

बद्धशुद्धविभेदेन जीवत्रयमिदं स्मृतम्।
गुरुदीक्षाविहीनश्च शिवभक्तिविवर्जितः।।
स्वकर्तृत्वाभिमानी तु बद्धः स पशुरुच्यते।
गुरुदीक्षां परां लब्ध्वा कैङ्कर्यत्रयसंयुतः।।

---

[1] ब्र. सू. शां. वृ. उपो., पृ. ९

[2] ब्र. सू. श्रीकर १.३.२

शान्त्यादिसद्गुणोपेतो मुमुक्षू रागवर्जितः।
शिवाधीनः सुधीर्भक्तः शुद्धजीव इति स्मृतः।।
शिवयोगशिवज्ञानविभावानन्दसंयुतः ।
प्रचण्डातपमध्यस्थशुद्धकर्पूरदीपवत् ।।
शिवाकारे पराकाशे कोटिसूर्यप्रकाशके।
विलीनचित्तवृत्तिस्तु मुक्तजीव इति स्मृतः।।[1] इति।

तदेवं श्रीसिद्धान्तशिखामण्युक्तवीरशैवदर्शनदिशा जीवः परमात्मनः सङ्कुचितशक्तिविशिष्टत्वात् तदंशरूपोऽणुपरिमाणः प्रतिशरीरं भिन्नो नित्यश्च । अस्य शिवांशत्वादेव शिवजीवयोरङ्गाङ्गिभाव इति, उक्तगुणभेदाभेदादग्निविस्फुलिङ्गयोरिव तयोर्भेदाभेदौ चोपपद्येत इति विदितं भवति।

श्रीसिद्धान्तशिखामण्यनुसारं जगत्स्वरूपम्

तत्र तावत् शक्तिविशिष्टाद्वैतदर्शनेऽविकृतपरिणामवादमङ्गीकृत्य जगत्स्वरूपं व्यवस्थाप्यते। स्वीये स्वरूपे किञ्चिद्विकारं विनैवान्यथारूपेण परिणमनमविकृतपरिणाम इत्युच्यते। अत्रेदमवगन्तव्यम्, अस्मिन् सिद्धान्ते परशिवः स्वशक्तिविकासेन जगत्सृष्टिम्, तत्सङ्कोचेन च प्रलयं विदधातीति परशिवशक्तिसङ्कोचविकासाभ्यां सृष्टिप्रलयावुपपद्येते। यथा स्वाङ्गसङ्कोचविकासाभ्यां कूर्मे न कश्चिद्विकार आरोप्यते तथा स्वशक्तिसङ्कोचविकासाभ्यां परशिवे विकृतिर्नायातीत्ययमविकृतपरिणामवाद इत्युच्यते। वादोऽयमेव रेणुकभगवत्पादैः—

आत्मशक्तिविकासेन शिवो विश्वात्मना स्थितः।
कुटीभावाद्यथा भाति पटः स्वस्य प्रसारणात्।।[2]

इति पटकुटीदृष्टान्तेनासाधितः। यथा पटो विलक्षणप्रसारेण कुटीभावं धरति, तत्सङ्कोचे च मूलपटरूपेणावतिष्ठते, नैवात्र पटसङ्कोचविकासाभ्यां पटस्वरूपे विकारो जायते, तथा शिवोऽपि स्वात्मशक्तिविकासेन विश्वात्मना परिणममानोऽपि तस्मिन्न काचिद्विकारापत्तिरिति भावः।

---

[1] ब्र. सू. श्रीकर २.३.४६
[2] सि. शि. १०.६६

ननु जडस्य प्रपञ्चस्य चेतनपरशिवपरिणामत्वाङ्गीकारे परशिववज्जगच्चैतन्यं स्यात्, सर्वस्य चेतनब्रह्मपरिणामत्वात्; उत वा जडप्रपञ्चहेतुभूतब्रह्मणो जडत्वं स्यात् "कारणगुणाः कार्येऽनुवर्तन्ते" इति नियमादिति चेन्न, इच्छाशक्तिवशेन शक्तिविशिष्टपरशिवस्य चेतनाचेतनरूपेण परिणामसम्भवात्। तदुक्तं भगवत्पादैः- "मायाशक्तिवशादीशो नानामूर्त्तिधरः प्रभुः"[1] इति। भगवती श्रुतिरपि- "विज्ञानं चाविज्ञानं च। सत्यं चानृतं च सत्यमभवत्"[2] इति ब्रह्मैव सदसज्जडचेतनाद्यनन्तरूपमाधृतवानित्युक्तवती। किञ्च, नास्ति चेतनाच्चेतनमचेतनादचेतनमेवोत्पद्यतेति सार्वत्रिको नियमः, गोमयादचेतनाच्चेतनक्रिमिकीटानामुत्पत्तिदर्शनात्, चेतनपुरुषात् केशनखादिजडपदार्थानामुद्भवदर्शनाच्च। तस्माद्यथा चेतनपुरुषात् केशलोमादिजडवस्तून्युत्पद्यन्ते तथा चेतनपरमेश्वरादिदं जडरूपं जगदजायतेत्यत्र न काऽप्यनुपपत्तिः। तथा चाह श्रुतिः-

यथोर्णनाभिः सृजते गृह्णते च
यथा पृथिव्यामोषधयः सम्भवन्ति।
यथा सतः पुरुषात् केशलोमानि
तथाक्षरात् सम्भवतीह विश्वम्।।[3] इति।

अपरञ्च, "अत्यन्तगूढचैतन्यं जडमव्यक्तमुच्यते"[4] इति रेणुकभगवत्पादोक्त्या जडमित्यवगम्यमानवस्तून्यपि वस्तुतो मूलरूपेण चेतनात्मकान्येव, अथापि तदनुपलम्भाज्जडत्वेन व्यवह्रियन्ते। आधुनिकविज्ञानिनोऽपीदमामन्वते। अनेनेदं जगज्जडचेतनात्मकमिति ज्ञायते। तस्मादेतादृशजडचेतनात्मकप्रपञ्चरूपेण चेतनपरशिवः स्वात्मशक्तिविकासेन परिणमत इत्यत्र न सन्देहः। अत एव रेणुकभगवत्पादाः-

पत्रशाखादिरूपेण यथा तिष्ठति पादपः।
तथा भूम्यादिरूपेण शिव एको विराजते।।[5]

इति वृक्षस्य दृष्टान्तेनाऽप्यविकृतपरिणामवादमुपस्थापितवन्तः। श्रीमरितोण्टदार्यैरस्यार्थ एवमुक्तः- "वृक्षो यथा कालशक्त्या विकाररहितेन

---

[1] सि. शि. ५.४६
[2] तै. उ. २.६.१
[3] तै. उ. १.१.७
[4] सि. शि. ५.४३
[5] सि. शि. १०.७०

स्वान्तर्लीनस्वविजातीयपत्रपुष्पादिभेदविशिष्टत्वेन भाति, तथा शिव एव स्वसमवेतशक्तितादात्म्यक्रोडीकृतभूम्यादिरूपेण प्रतिस्फुरणगत्या भातीत्यर्थः। तत्र धृत्या धरणिः, करुणया जलम्, उज्ज्वलतया तेजः, परमानन्दस्पन्देन वायुः, चिद्व्याप्त्या व्योम, चितिसङ्कोचचित्तविशिष्टो जीव इति विवेकः"[1] इति।

ननु सावयवत्वाद् वृक्षस्य पत्रशाखादिरूपेण परिणामसम्भवेऽपि, निरवयवस्य परशिवस्य कथं विश्वात्मना परिणामित्वम्? इति चेत्, मैवम्, वीरशैवदर्शने परशिवसमवेतशक्तेरेव विश्वात्मना परिणामित्वस्वीकारात्। अत्रेदं बोध्यम्– यद्यपि ब्रह्माश्रिता सूक्ष्मचिदचिद्रूपा शक्तिः स्थूलचिदचिद्रूपशक्त्यात्मकसमस्तचेतनाचेतनरूपप्रपञ्चाकारेण परिणमते, न तु ब्रह्म केनाप्याकारेण परिणमते, तथापि तथा तथा परिणममानानां ब्रह्माश्रितशक्तीनां ब्रह्मैवायुतसिद्धपर्यवसानभूमिरिति। अत एव– "शक्तिरस्य जगत्कृत्स्नं शक्तिमांस्तु महेश्वरः" इत्यागमेन सकलप्रपञ्चस्य शक्तिरूपत्वमुक्तम्। किञ्च,

मायां तु प्रकृतिं विद्धि मायिनं तु महेश्वरम्।
तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत्।।[2]

इति श्रुतिरपि विश्वस्य शक्तिरूपत्वं प्रतिपादितवती। रेणुकभगवत्पादाः अस्या विश्वरूपपरिणममानायाः शक्तेः परशिवापृथक्सिद्धधर्मत्वमेवं प्रतिपादितवन्तः–

विमर्शाख्या पराशक्तिर्विश्ववैचित्र्यकारिणो।
यस्मिन् प्रतिष्ठितं ब्रह्म तदिदं ब्रह्मकारणम्।।

अन्तःकरणरूपेण जगदङ्कुररूपतः।
यस्मिन् विभाति चिच्छक्तिर्ब्रह्मभूतः स उच्यते।।

यथा चन्द्रे स्थिरा ज्योत्स्ना विश्ववस्तुप्रकाशिनी।
तथा शक्तिर्विमर्शाख्या प्रकाशे ब्रह्मणि स्थिरा।।[3] इति।

तस्मादेवं यथा कारणरूपसूक्ष्मचिदचिद्रूपशक्तेरपि परशिवापृथग्भूतत्वम्, तथैव कार्यरूपापन्नस्थूलचिदचिद्रूपशक्तेरपि परशिवापृथक्सिद्ध्युपपन्नत्वात् सम्भवत्येव परशिवस्य चेतनाचेतनात्मकजगद्रूपेण परिणामः।

---

[1] सि. शि. १०.७० *तत्त्वप्रदीपिकाव्याख्या।*
[2] श्वे. उ. ४.१०
[3] सि. शि. २०.३६–३८

जगदुभयकारणविवेचनम्

कार्यं प्रति निमित्तमुपादानं चेति द्विविधं कारणम् । 'कार्यावस्थाश्रयत्वे सति कारणत्वमुपादानत्वम्, 'उपादानाश्रयत्वे सति कारणत्वं निमित्तकारणत्वम्' इति तयोर्लक्षणम्। पूर्वोक्तप्रमाणैः शक्त्यविनाभावापन्नः परशिव एव जगत उभयकारणमित्यत्र न कोऽपि विवादावकाशः। एवमीश्वरस्याभिन्ननिमित्तोपादानकारणत्वाङ्गीकारेऽपि नाऽयं वादोऽद्वैतवेदान्तवद् ब्रह्मणो विवर्तमानतया मायायाः परिणममानतयोपादानत्वपरः, यतो हि सद्रूपापन्ने विवर्ताधिष्ठानभूते वस्तुन्यसद्रूपापन्नप्रपञ्चोपादानत्वकल्पनानौचित्यात्।

अत्रेदमवधेयम्– सद्रूपापन्नायां विवर्ताधिष्ठानभूतायां शुक्तौ असद्रूपापन्नरजतोपादानत्वप्रतिपादनं न युक्तियुक्तम्, अनुभवविरोधात् असमानाधिकरणयोः शुक्तिरजतयोः कार्यकारणभावासम्भवात्, कार्यकारणयोः सामानाधिकरण्यस्य सर्वशास्त्रसिद्धत्वात् । तदनङ्गीकारे घटं प्रति तन्तोः, पटं प्रति कपालस्य कार्यकारणभावो निर्वर्जनीयः स्यात् । अतः कार्यकारणयोः सामानाधिकरण्यमवश्यमभ्युपेयम् । तथा सति सदसतोः सामानाधिकरण्याभावात् कार्यकारणभावानुपपत्तिरिति कृत्वा वीरशैवसिद्धान्ते समस्तोपादेयस्य जगतः सदात्मकतया तस्योपादानस्यापि सदात्मकत्वात् सदात्मकशक्तिविशिष्टपरशिवस्यैवाभिन्ननिमित्तोपादानत्वमिति'[1]। तस्मादद्वैतवेदान्त-स्येश्वरस्याभिन्ननिमित्तोपादानाद्वीरशैवसिद्धान्तस्य शक्तिविशिष्टपरशिवस्याभिन्ननिमित्तोपादानकारणत्वस्य वैशिष्ट्यं युक्तियुक्तं च।

ननु परमात्मा केवलं निमित्तभूतः स्वव्यतिरिक्तपदार्थैः सर्वं प्रपञ्चं सृजतीति केचनाङ्गीकुर्वन्ति, न हि घटं निर्मिमाणः कुलालः स्वयमेव मृत्पिण्डीभूय घटं निर्माति, तस्मान्निमित्तभूतस्य परशिवस्य कथमुपादानत्वमपि सङ्गच्छते? इति चेत्, मैवम्, "विश्वाधिको रुद्रो महर्षिः"[2] इत्यादिना यथा विश्वाधिकत्वेन परमात्मनो निमित्तत्वमवगम्यते, तथा "सर्वं खल्विदं ब्रह्म"[3], "सर्वो वै रुद्रः"[4] इत्यादिना परप्रकृतिरूपत्वेन सर्वोपादानत्वमपि तस्य श्रूयते'। अत एव रेणुकभगवत्पादाचार्याः-

यस्मादेतत् समुत्पन्नं महादेवाच्चराचरम्।
तस्मादेतन्न भिद्येत यथा कुम्भादिकं मृदः।।

---

[1] शि. परि., पृ. २३ ।
[2] श्वे. उ. ३/४ ।
[3] छा. उ. ३/१४/१ ।
[4] महाना. १०/११ ।

यथा तन्तुभिरुत्पन्नः पटस्तन्तुमयः स्मृतः।
तथा शिवात् समुत्पन्नं शिव एव चराचरम्।।[१]

इति मृद्घटयोः तन्तुपटयोश्चोपमानेन परशिवस्य जगदुपादानत्वम्,

जगत् सिसृक्षुः प्रथमं ब्रह्माणं सर्वदेहिनाम्।
कर्तारं सर्वलोकानां विदधे विश्वनायकः।।[२]

इति तस्य निमित्तकारणत्वं च प्रतिपादयामासुः।

किञ्च, छान्दोग्ये एकविज्ञानेन सर्वविज्ञानमिति प्रतिज्ञाय "यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्"[३] इति घटशरावादिमृत्कार्यस्योपादानभूतमृत्पिण्डदृष्टान्तानुरोधेन तत्समर्थितम्। यथा घटकार्यनिमित्तभूतकुलालज्ञानेन घटादिमृत्कार्यं सर्वं न ज्ञायते, किन्तु तदुपादानमृत्पिण्डज्ञानेन सर्वं मृत्कार्यमवगम्यते, तथा ब्रह्मणो निमित्तमात्रत्वे तद्विज्ञानेन सकलप्रपञ्चविज्ञानं न सम्भवति। अतो निमित्तभूतस्य परशिवस्य स्वापृथक्-सिद्धशक्तिपरिणामभूतसर्वप्रपञ्चोपादानत्वं निष्प्रत्यूहमेव अन्यथा श्रुतिविरोधः।

ननु एकस्य कार्यस्योपादानमेकमेव भवति, न हि घटकार्यं प्रति मृत्पिण्डान्तरोपादानं दृश्यते, तस्मात् प्रपञ्चकार्यं प्रति शिवः शक्तिश्चेति कथमुपादानद्वयकल्पना? इति चेत्, मैवम्,

शक्त्यादि च पृथिव्यन्तं जगदेतच्चराचरम्।
शिवशक्तिसमुत्पन्नं तन्तुर्लूतोद्भवो यथा।।

तत्र स्वतन्त्ररूपेण शिवः सच्चित्सुखात्मकः।
शक्तिस्तु पारतन्त्रेण विश्वोपादानमिष्यते।।[४]

इति शक्तिसन्दोहवचनानुसारं शिवस्य स्वातन्त्र्येण, शक्तेश्च पारतन्त्र्येण जगत्कार्यं प्रत्युपादानत्वप्रतिपादनात्। वस्तुतस्तु "शिवशक्तिरिति ह्येकं तत्त्वमाहुर्मनीषिणः" इत्युक्त्या शिवशक्त्योरेकीभावाङ्गीरात् पूर्वोक्तशङ्काया नास्त्यवसरः। शिवशक्तिरूपं तत् तत्त्वमेव शिवांशेन स्वतन्त्रोपादानं शक्त्यंशेन परतन्त्रोपादानं भवतीति निष्कर्षः।

---

[१] सि. शि. १०.६३, ६५
[२] सि. शि. २.१४
[३] छा. उ. ६.१.४
[४] शक्तिसन्दोह, प्र. १

सृष्टिविचारः

तदेव सूक्ष्मचिदचिद्रूपशक्तिविशिष्टस्य परशिवस्य कारणत्वं स्थूलचिदचिद्रूपशक्तिविशिष्टस्य प्रपञ्चस्य च कार्यत्वमिति सामान्यतः कार्यकारणभावो निरूपितः। साम्प्रतं शिवादिभूम्यन्तानां षट्त्रिंशत् तत्त्वानां विकासक्रमो निगद्यते।

तत्र तावद्वीरशैवदर्शने– १. शिवः, २. शक्तिः, ३. सदाशिवः, ४. ईश्वरः, ५. शुद्धविद्या, ६. माया, ७. कला, ८. विद्या, ९. रागः, १०. कालः, ११. नियतिः, १२. पुरुषः, १३. प्रकृतिः, १४. महान्, १५. अहङ्कारः, १६. मनः, १७. श्रोत्रम्, १८. त्वक्, १९. चक्षुः, २०. जिह्वा, २१. घ्राणम्, २२. वाक्, २३. पाणिः, २४. पादः, २५. पायुः, २६. उपस्थः, २७. शब्दः, २८. स्पर्शः, २९. रूपम्, ३०. रसः, ३१. गन्धः, ३२. आकाशः, ३३. वायुः, ३४. अग्निः, ३५. जलम्, ३६. पृथिवी चेति षट्त्रिंशत्तत्त्वानि परिगणितानि। तत्त्वानामेतेषां मूलं कारणं तु सूक्ष्मचिदचिद्रूपशक्तिविशिष्टः परशिव एव । अत एव श्रीशिवयोगि-शिवाचार्यः–

> त्रैलोक्यसम्पदालेख्यसमुल्लेखनभित्तये ।
> सच्चिदानन्दरूपाय शिवाय ब्रह्मणे नमः ।।
>
> यस्योर्मिबुद्बुदाभासः षट्त्रिंशत्तत्त्वसञ्चयः ।
> निर्मलं शिवनामानं तं वन्दे चिन्महोदधिम् ।।[1]
>
> सदाशिवमुखाशेषतत्त्वमौक्तिकशुक्तिकाम् ।
> वन्दे माहेश्वरीं शक्तिं महामायादिरूपिणीम् ।।[2]

इत्यादिरूपेण श्रीसिद्धान्तशिखामणौ ग्रन्थारम्भे स्तुतिव्याजेन परशिवस्य तन्निष्ठमूलशक्तेश्च सर्वतत्त्वानां मूलकारणत्वं निरूपयामास। अयं परशिवः सर्वतत्त्वानामुत्पत्तिविलयाधार इति कार्यान्तर्गतव्यावहारिकपदार्थेषु षट्त्रिंशत्तत्त्वेषु तस्य गणना न क्रियते। अनेन परशिवस्य षट्त्रिंशत्तत्त्वविलक्षणत्वं प्रपञ्चातीतत्वं नित्यत्वं च सिद्ध्यति।

षट्त्रिंशत्तत्त्वानां विकासक्रमः

"अस्ति सच्चित्सुखाकारमलक्षणपदास्पदम्"[1] इत्यादिना श्रीसिद्धान्तशिखामणौ जगदुत्पत्तेः पूर्वं परशिव एव केवलो नामरूपविभागानर्हसूक्ष्मचिदचिद्रूपशक्तिविशिष्टत्वेन

---

१. सि. शि. १.१, ३
२. सि. शि. २.२
३. सि. शि. २.३

परिशिष्टोऽभवदित्युक्तम्। तस्मिन् परशिवे कदाचित् सहजतया सर्वैश्वर्यसमन्वितस्य महाराजस्येव केवलावस्थायामरतिरुत्पद्यते। यथा कस्यचिदरतिनिवृत्तये क्रीडादिषु प्रवृत्तिर्जायते, तथा स्वीयारतिनिरासाय तस्य लीलायां प्रवृत्तिरुन्मिषति। तदा "स ईक्षां चक्रे"[1], "तदैक्षत बहु स्यां प्रजायेय"[2] इत्यादिश्रुत्युक्त्यनुसारं "इदं जगत् सृजेयम्" इतीच्छोदेति। एतादृशेच्छावशान्निस्तरङ्गे सागरे वायुसम्पर्केण किञ्चिद्विचलनमिव परशिवे किञ्चिदिव विक्रिया भवति। ईषच्चलनरूपोऽयं प्राथमिकोऽभियोगो विमर्शशक्तिरित्युच्यते। तदुक्तमुपनिषदि–

यदा तमस्तन्न दिवा न रात्रिर्न
सन्न चासच्छिव एव केवलम्।
तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च
तस्मात् प्रसृता पुराणी।।[3] इति।

परशिवस्येच्छारूपाया विमर्शशक्तेरन्तरङ्गबहिरङ्गभेदेन पुनराकारद्वयं विकसति। अन्तरङ्गभूतो ज्ञानशक्तिपदवाच्यः, बहिरङ्गभूतश्च क्रियाशक्तिपदवाच्यः। तदेवमाहत्य विमर्शशक्तिरिच्छा, ज्ञानम्, क्रिया चेत्याकारत्रयं धारयति। तदुक्तं भगवत्पादैः–

गुणत्रयात्मिका शक्तिर्ब्रह्मनिष्ठा सनातनी।
तद्वैषम्यात् समुत्पन्ना तस्मिन् वस्तुत्रयाभिधा।।[4] इति।

अत्रेदमाकूतम्– विमर्शशक्तेरवस्थाद्वयं भवति। तत्रैका 'अविभागपरामर्शा', द्वितीया 'विभागपरामर्शा' इति। सृष्टेः प्रागियं विमर्शशक्तिः 'मयूराण्डरसन्यायेन, अर्थात् मयूराण्डरसे भाविपक्षिणः पादपक्षवर्णवैचित्र्यादिर्विभागेन न दृश्यते, तथा सृष्टिकारणीभूतेच्छा–ज्ञान–क्रियाशक्तिर्विभागं विनैव तिष्ठति। इयमेवाविभागपरामर्शेत्युच्यते। सृष्ट्युन्मुखावस्थायां चेयमेवेच्छा–ज्ञान–क्रियारूपेण परिणमत इति सेयमवस्था विभागपरामर्शेत्युच्यते[5]। सृष्ट्युन्मुखपरशिवादिच्छादिशक्तित्रयस्योत्पत्तिरागमेऽप्युक्ता। तथा हि–

---

[1] श्वे. उ. ४.१८
[2] प्रश्नो. ६.३
[3] छा. उ. ६.२.३
[4] सि. शि. ५.३९
[5] सि. शि. ५.३९ तत्त्वप्रदीपिकाव्याख्या।

अनादिनिधनाच्छान्ताच्छिवात् परमकारणात्।
इच्छाशक्तिर्विनिष्क्रान्ता ततो ज्ञानं ततः क्रिया।।
तयोत्पन्नानि भूतानि भुवनानि चतुर्दश ।।[१] इति।

इच्छादीनां क्रमविचारः

ननु जानाति, इच्छति, यतते करोति इत्येव क्रमो युक्तः, विनैव ज्ञानमिच्छाया अनुदयात्, कथमिच्छाशक्तेरादावेवोदय इति चेत्, मैवम्, यद्यपि स्वोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं कर्तृत्वमिति नैयायिकाः प्रतिपादयन्ति, तथापि नैयायिकानामयं क्रमो न श्रुतिसम्मतः। श्रुतिस्तु– 'सोऽकामयत। बहुस्यां प्रजायेयेति। स तपोऽतप्यत। स तपस्तप्त्वा इदं सर्वमसृजत"[२] इति ब्रह्मणः सृष्टिक्रमे 'सोऽकामयत" इतीच्छाम्, ततः 'स तपोऽतप्यत' इति स्रष्टव्यवस्तुविषयकं परिशीलनरूपं ज्ञानम्, ततः पुनः 'इदं सर्वमसृजत' इति क्रियां च प्रतिपादितवती। तस्मात् 'इच्छा, ज्ञानम्, क्रिया' इत्येव क्रमः श्रुतिसम्मतः ।

किञ्च, वीरशैवदर्शने इच्छादीनां प्रथमोत्पन्नत्वेऽपि तत्त्वरूपेण गणना न क्रियते। यथा सांख्यनये न कार्योपादानत्वं प्रकृतित्वम्, किन्तु तत्त्वान्तरोपादानत्वं प्रकृतित्वमित्यङ्गीक्रियते, तथा वीरशैवसिद्धान्तेऽपि परिणामसामान्यस्य न तत्त्वशब्देन व्यवहारः, किन्तु स्वतन्त्रं वस्त्वन्तरोपादनभूतं द्रव्यमेव तत्त्वशब्देन व्यवह्रियते। उपर्युक्तमिच्छादिशक्तित्रयं न स्वतन्त्रं द्रव्यम्, किन्तु परशिवस्वरूपभूतमेव, परशिवस्याविनाभावेन शक्तिविशिष्टत्वाङ्गीकारात् । तस्मात् 'शिवः, शक्तिः, सदाशिवः' इत्येवं तत्त्वगणना प्रारभ्यते, न तु इच्छादिशक्तिभिः। अतोऽधुना शिवादितत्त्वस्वरूपं विचार्यते।

१. शिवतत्त्वम्– षट्त्रिंशत् तत्त्वेषु शिवतत्त्वं प्रथमम् । सृष्ट्युन्मुखः परशिवो यदा स्वेच्छाशक्तेरन्तरङ्ग–भूतज्ञानांशमनुप्रविशति, तदा शिवतत्त्वमिति कथ्यते। इदमेव भाविचराचरप्रपञ्चनिमित्तकारणभूतं सत् शिव–नीलकण्ठ–चन्द्रशेखर–त्रिलोचनेत्याद्य-भिधानैर्व्यवह्रियते। सगुणरूपत्वादिदं शिवतत्त्वमेव मुमुक्षूणामुपास्यं भवति। तत्स्वरूपमुप–वर्णितं श्रीसिद्धान्तशिखामणौ–

---

[१] शिवा. मञ्ज. पृ. ३२

[२] तै. उ. २.६

शिवाभिधं परं ब्रह्म जगन्निर्मातुमिच्छया।
स्वरूपमादधे किञ्चित् सुखस्फूर्तिविजृम्भितम्।।
निरस्तदोषसम्बन्धं निरुपाधिकमव्ययम्।
दिव्यमप्राकृतं नित्यं नीलकण्ठं त्रिलोचनम्।।
चन्द्रार्धशेखरं शुद्धं शुद्धस्फटिकसन्निभम्।
शुद्धमुक्ताफलाभासमुपास्यं गुणमूर्तिभिः।।[1] इति।

२. **शक्तितत्त्वम्**– इच्छाशक्तेर्बहिरङ्गभूतं क्रियांशमनुप्रविष्टं परशिवचैतन्यमेव शक्तितत्त्वमित्युच्यते। इदं शक्तितत्त्वमेव सदाशिवाद्यग्रिमतत्त्वानामुपादान-कारणमित्यङ्गीक्रियते। तदुक्तं श्रीसिद्धान्तशिखामणौ–

सदाशिवमुखाशेषतत्त्वमौक्तिकशुक्तिकाम्।
वन्दे माहेश्वरीं शक्तिं महामायादिरूपिणीम्।।[2] इति।

३. **सदाशिवतत्त्वम्**– उपर्युक्तं शक्तितत्त्वमेव स्वेच्छाशक्त्यन्तरङ्ग-भूतज्ञानशक्त्युद्रेकावस्थां प्रविश्य जलाधिवासितचणकादिवत् पूर्वावस्थावैलक्ष्ये-णाङ्कुरायमाणेदन्ताप्रथनरूपं गर्भावरकवत् स्वाहन्तयाऽऽच्छाद्य वर्तमानविश्वस्फुरणरूपं सदाशिवतत्त्वमित्युच्यते। इदं तत्त्वमेव सादाख्यरुद्रतत्त्वमिति व्यवह्रियते।

४. **ईश्वरतत्त्वम्**– तच्छक्तितत्त्वमेव स्वक्रियाशक्त्युद्रेकदशां प्रविष्टं सत् कृतवस्तुवदङ्कुरितमिदन्तारूपं स्वाहन्तयाऽऽच्छाद्य स्थितं विश्वस्फूर्तिमयमीश्वरतत्त्वम्। अत्रेदमवधेयम्– जगदुपादानभूता शक्तिर्वर्तमानविश्वस्फुरणरूपतया सदाशिवतत्त्वं भजते। जगदङ्कुरितावस्थायां सैव शक्तिः समुद्भूतविश्वस्फूर्तिरूपतयेश्वरावस्थां भजते। क्षेत्रनिपतितं बीजं प्रागङ्कुरायते, अनन्तरमङ्कुरितं भवति; क्रमेणाङ्कुरमुपलभ्यते, एवं शक्तिबीजेऽपि तादृशविकाराः क्रमशः सम्भाव्यन्ते। सृष्टिक्रमालोचनावसरे ज्ञानप्राधान्येन या शक्तिः सदाशिवावस्थां प्राप्य सृज्यमानवस्तुविषयकपरिशीलनं करोति। सैव शक्तिर्विचिन्तितक्रमेण कार्यं साधयितुं क्रियाप्राधान्येनेश्वरावस्थां भजते। इदमीश्वरतत्त्वमेव 'नारायणः' इत्यप्युच्यते।

५. **शुद्धविद्या**– तदेव शक्तितत्त्वं क्रियाशक्तिप्रधानेदन्तायाः संविद्रूपान्तर्गतत्वेन प्रकाशमानत्वाद्विभागनिबन्धनभेदघटितसागरतरङ्गन्यायेनाहन्तेदन्तयोरैक्यप्रतिपत्तिः

---

[1] सि. शि. २.८–१०
[2] सि. शि. २.२

शुद्धविद्यातत्त्वमित्युच्यते। अर्थात् "इदं सर्वमसृजत्" इतीच्छाशक्तिभित्तौ निखिलजगच्चित्रमुन्मीलयति तदा शुद्धविद्यातत्त्वमित्युच्यते इदं तत्त्वमेव चतुर्मुखो ब्रह्मेत्यप्युच्यते। एवं सागरस्य तरङ्गाणां जलमयत्वाद् यथाऽभेदस्तथा 'अहमेवेदं सर्वं जगत्' इत्यहन्तायाः प्रपञ्चस्य च योऽभेदस्तज्ज्ञानं शुद्धविद्यया सम्पाद्यते। तस्माद् गुरूपदेशलब्धं शास्त्रजन्यं च निर्मलं ज्ञानमपि शुद्धविद्येत्युच्यते। एतावत्पर्यन्तं प्रतिपादितानि शिव-शक्ति-सदाशिव-ईश्वर-शुद्धविद्या इत्याख्यानि पञ्चतत्त्वानि शिवांशबाहुल्यात् शुद्धतत्त्वानीति कथ्यन्ते।

६. मायातत्त्वम् – उपर्युक्तशुद्धविद्यातत्त्वमेव मयूराण्डरसन्यायेन, अर्थात् मयूराण्डरसे यथा मयूरस्य भाविपादपक्षवर्णवैचित्र्यादयः सूक्ष्मरूपेण विद्यन्ते, तथा भाविप्रपञ्चनिर्माणसामग्रीणां सूक्ष्मरूपाणामाश्रयीभूतं सत् तेषां परस्परभेदबुद्धिप्राधान्येन मायातत्त्वं भवति। अतो माया नाम मयूराण्डरसवद्भाविप्रपञ्चसृष्ट्युन्मुखगुणविचित्रानन्तशक्तिगर्भः शुद्धविद्यापरिणामः। इयमेव परमात्मनोंऽशे जीवे 'नाहमीश्वरः' इत्यादिभ्रमहेतुर्भवति। अस्या मायायाः प्रभावेण शुद्धो जीवः संसारीत्युच्यते।

७-११. कलादिपञ्चतत्त्वानि– परमात्मनोंऽशं जीवं महेश्वराद्विभक्तं कर्तुं महेश्वरस्य सर्वकर्तृत्व-सर्वज्ञत्व-परिपूर्णत्व-नित्यत्व-व्यापकत्वाख्याः पञ्चशक्तयः सङ्कोचं प्राप्ताः कला-विद्या-राग-काल-नियतिरूपेण व्यवह्रियन्ते। तत्र

१. सर्वकर्तृत्वशक्तिरेव किञ्चित्कर्तृतारूपमापद्य कलातत्त्वं भवति।
२. सर्वज्ञताशक्तिरेव किञ्चिज्ज्ञत्वरूपमापद्य विद्यातत्त्वमित्यभिधीयते।
३. पूर्णताशक्तिरेवापूर्णतां प्राप्य स्रक्चन्दनादिविषयासक्तिरूपं रागतत्त्वं भवति।
४. नित्यत्वमेवानित्यत्वं प्राप्य भूतभविष्यद्वर्तमानरूपं कालतत्त्वमित्युच्यते।
५. व्यापकता ह्यव्यापकतां प्राप्य मयेदं कर्तव्यमिति नियमहेतुभूतं नियतितत्त्वमित्याख्यायते। एतानि कलादिपञ्चतत्त्वानि जीवस्वरूपावरणकारणत्वात् पञ्चकञ्चुकानीत्युच्यन्ते। एतैर्बद्धो जीवः (पुरुषः) संसरतीतीमानि पुरुषबन्धकानि।

१२. पुरुषतत्त्वम्– स्वान्तर्लीनचराचरात् परमेश्वरात् काष्ठयोगेन वह्नेर्विस्फुलिङ्गाविर्भाववत् परशिवस्येच्छाशक्तिवशाद् विभक्तः सन् उक्तलक्षणमायाशक्तौ प्रविष्टो यः परशिवांशः, स पुरुषतत्त्वमित्युच्यते। स्वतन्त्रप्रकाशमहेश्वराद्विच्छिन्नत्वेन पराधीनः सङ्कूचितप्रकाशो न्यूनशक्तिकोऽयं पुरुषो मायाक्रान्तत्वाद् 'नाहमीश्वर' इत्यात्मन्यनात्मभावम्, अनात्मनि देहादौ चात्मभावमारोपयति। एवमयथार्थभावापत्तिरेवाणवमलम्। तत एव शुभाशुभवासनादूषितं कार्ममलम्, अन्योन्याभावभेदलक्षणं मायिकमलं च

प्राप्तं भवति। एवंविधमलत्रयशृङ्खलितत्वादयं पुरुषः संसारीत्युच्यते। एतानि मायादिपुरुषान्तानि सप्ततत्त्वानि शुद्धाशुद्धतत्त्वानीत्युच्यन्ते।

१३. प्रकृतितत्त्वम्– प्रकृतितत्त्वादारभ्य भूमितत्त्वं यावदशुद्धसृष्टिरुत्पद्यते। विश्वं मोहात्मकमिति तदुपादानमपि तादृशमेव वक्तव्यम्। उपर्युक्तानि द्वादशतत्त्वानि त्रिगुणातीतानि, प्रपञ्चश्च त्रिगुणात्मकः। एवमुभयोः सङ्घट्टकं द्रव्यमेव प्रकृतितत्त्वमित्युच्यते। कार्योन्मुखेच्छाशक्तिः प्रतिस्फुरणगत्या स्वगतज्ञानक्रियान्योन्याभावरूपायां मायाशक्तौ प्रविश्य सत्त्वरजस्तमोगुणसाम्यावस्थारूपिणी प्रकृतिर्भवति। जगद्रचनायां प्राधान्येनोपयुक्तत्वादस्याः प्रधानमित्यपरं नाम। इयं प्रकृतिर्बुध्याद्यग्रिमत्रयोविंशतितत्त्वानां मूलकारणम्।

१४-३६. महदादित्रयोविंशतितत्त्वानि– तत्र सत्वगुणप्रधानतयाऽध्यवसायहेतुभूतं तत्त्वं महदित्युच्यते। अस्यैव बुद्धिरिति नामान्तरम्। तमोगुणप्रधानतया ममेदं कर्तव्यमित्यभिमानहेतुभूतं तत्त्वमहङ्कारः। रजोगुणप्रधानतया स्थाणुर्वा पुरुषो वेति सङ्कल्पविकल्पसाधनं मनस्तत्त्वम्। तदिदं बुद्ध्यहङ्कारमनस्त्रितयं सुखदुःखाद्यान्तरपदार्थावधारणकारणरूपत्वादन्तःकरणमित्युच्यते। एतत्त्रयमिच्छाशक्तिप्रधानम्।

पूर्वोक्तं प्रकृतितत्त्वं ज्ञानशक्तिप्राधान्येन शरीरबाह्यसंलग्नं सत् पञ्चज्ञानेन्द्रियरूपेण परिणमते। तत्र शब्दज्ञानैककरणं श्रोत्रम्, स्पर्शज्ञानैककरणं त्वक्, रूपज्ञानैककरणं चक्षुः, रसज्ञानैककरणं रसनम्, गन्धज्ञानैककरणं घ्राणम्।

क्रियाशक्त्युद्रेकदशापन्नौन्मुख्यशक्तिविशिष्टचैतन्याद् रजोगुणप्रधानतया तदेव प्रकृतितत्त्वं पञ्चकर्मेन्द्रियरूपेण परिणमते। तत्र उच्चारणक्रियासाधनं वाक्, दानादानादिक्रियासाधनं पाणिः, गमनागमनक्रियासाधनं पादः, मलपरित्यागसाधनं पायुः, मूत्रोत्सर्जनप्रजोत्पादनक्रियासाधनमुपस्थः। एवं बाह्यकरणपञ्चकं क्रियाशक्तिप्रधानत्वात् कर्मेन्द्रियमित्युच्यते। तदेवं करणत्रयोदशकं प्रकृतेरिच्छाज्ञानक्रियाशक्त्यात्मकमिति मन्तव्यम्।

अथ क्रियाशक्त्युद्रेकदशापन्नौन्मुख्यशक्तिविशिष्टचैतन्यादात्मनस्तमोगुणप्रधानत्वेन आकाशः, आकाशद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी च समुद्भवन्ति। तथा च श्रुतिः– "आत्मनः आकाशः सम्भूतः, आकाशाद्वायुः, वायोरग्निः, अग्नेरापः अद्भ्यः पृथिवी"[१] इति। एतेषु शब्द-स्पर्श-रूप-रस-गन्धाख्यास्तत्तद्विशेषगुणाः

---

[१] तै. उ. २.१.१

अनभिव्यक्तत्वेन, अर्थाद् ध्वनिवर्ण-शीतोष्ण-नीलपीत-मधुराम्ल-सुरभ्यसुरभित्वादि-विभागशून्याः सूक्ष्मरूपेण वर्तन्त इति हेतोस्तानि पञ्चतन्मात्राणि सूक्ष्मभूतानीति च व्यपदिश्यन्ते।

एतेभ्यः पञ्चतन्मात्रेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि समुत्पद्यन्ते। तत्र सूक्ष्मशरीरं त्वाकाशादिसूक्ष्मभूतपञ्चकं श्रोत्रादिज्ञानेन्द्रियपञ्चकं वागादिकर्मेन्द्रियपञ्चकं वृत्तित्रयात्मकमेकमन्तःकरणं श्वासप्रश्वासादिपञ्चवृत्तिक एकः प्राणश्चेत्याहत्य सप्तदशावयवात्मकम्। इदमेव लिङ्गशरीरमिति व्यवह्रियते। अत्र ज्ञानेन्द्रियसहितं ज्ञानशक्तिप्रधानं बुद्धितत्त्वं कर्तृधर्मरूपविज्ञानमयकोशो भवति। ज्ञानेन्द्रियसहितमिच्छाशक्तिप्रधानं मनस्तत्त्वं करणरूपं मनोमयकोशो भवति। कर्मेन्द्रियसहितं क्रियाशक्तिप्रधानं प्राणतत्त्वं कार्यरूपप्राणमयकोशो भवति। एतत्कोशत्रयमिलितमेव सूक्ष्मशरीरमित्यवगन्तव्यम्।

स्थूलभूतोत्पत्तिक्रमस्तु पूर्वोक्तात् तामसाहङ्कारात् शब्दतन्मात्रम् , तत आकाशः, आकाशात् स्पर्शतन्मात्रम्, ततो वायुः, वायो रूपतन्मात्रम्, ततोऽग्निः, अग्ने रसतन्मात्रम्, ततो जलम्, जलाद् गन्धतन्मात्रम् , ततो भूमिरिति।

त्रिवृत्करणम्

स्थूलभूतानि त्रिवृत्कृतानि। त्रिवृत्करणं नाम तेजोबन्नानां मध्ये एकैकं द्विधा समं विभज्य, पुनरेकैकभागस्य द्विधा विभागं कृत्वा स्वस्वद्वितीयस्थूलभागं परित्यज्य अन्यदीयस्थूलभागयोरेकैकस्य संयोजनम्। तथा च- "सोऽयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रिवृतमेकैकां करवाणि"[1] इति श्रुतेः।

एवं त्रिवृत्कृतेभ्यो भूतेभ्यश्चतुर्दशलोकानां ब्रह्माण्डस्य तदन्तर्वर्तिचतुर्विधस्थूलशरीराणां तदुचितान्नपानादीनां चोत्पत्तिर्भवति। तत्र भूः, भुवः, स्वः, महः, जनः, तपः, सत्यमित्येतन्नामका सप्त उपर्युपरि वर्तमानाः, अतल-वितल-सुतल-रसातल-तलातल-महातल-पातालनामका अधोऽधो वर्तमानाश्च सप्तेत्याहत्य चतुर्दशलोकाः। जरायुज-अण्डज-उद्भिज्ज-स्वेदजाख्यानि चतुर्विधशरीराणि। तत्र जरायुजानि मनुष्यपश्वादीनि। अण्डजानि पक्षिपन्नगादीनि। उद्भिज्जानि वृक्षलतादीनि। स्वेदजानि कृमिमशकादीनि।

---

[1] छा. उ. ६.३.२-३

तदेवं शक्तिविशिष्टः परशिवः शिवादिभूम्यन्तषट्त्रिंशत् तत्त्वात्मना परिणामं प्राप्य लीलाविनोदमनुभवति। लीलावस्थाव्यापारोपरमे च स्वशक्तिसङ्कोचेन समस्तं चराचरं विश्वं स्वशक्तौ विलाप्य केवलावस्थामास्थाय तिष्ठति।

प्रपञ्चपरमेश्वरयोर्भेदाभेदसम्बन्धः

शिवशक्तिविलासरूपमिदं जगदेवं शिवतत्त्वात् समुत्पन्नम्। वीरशैवदर्शने–

> शरीरभूतादेतस्मात् प्रपञ्चात् परमेष्ठिनः।
> आत्मभूतस्य देवस्य नाऽभेदो न पृथक्स्थितिः।।[1]

इति रेणुकभगवत्पादोक्त्या प्रपञ्चपरमात्मनोर्भेदाभेदसम्बन्धोऽङ्गीक्रियते। ननु प्रपञ्चपरमेश्वरयोर्भेदाऽभेदो वा एक एव सम्बन्धो वक्तव्यः, एकत्रैवोभयोरनुपपन्नत्वादिति चेत्, मैवम्, कनककुण्डलन्यायेन तदुपपत्तेः। तथा हि– यथा कुण्डलस्य कटकाद् भिन्नत्वेऽपि सुवर्णत्वेनाभेद उपपद्यते, तथा प्रपञ्चस्य परशिवाद् भिन्नत्वेऽपि, शिवमयत्वेन तस्याभेद इति प्रपञ्चपरमेश्वरयोर्भेदाभेदः प्रतिपाद्यते।

ननु कनकभिन्नं किञ्चित् कुण्डलं नोपलभ्यते, अतः तयोरभेद एव सत्यम्, भेदो मिथ्या भवेदिति चेदत्रोच्यते मरितोण्टदार्यैः– “भेदो द्विविधः– अन्योन्याभावात्मक एकः, अपरस्तु वैभागिकः। तत्र जगद्ब्रह्मणोरन्यमाध्ववत्पूर्वं भेदं न वदामः, किन्तु द्वितीयं वैभागिकम् । जगद्ब्रह्मणोश्च वैभागिको भेद एव वर्तत इति कृत्वा नाद्वैतहानिः। तथा हि कुण्डलं स्वर्णादिविभक्ततयैव वर्तते। यदि नास्तीत्युच्यते तर्हि, ग्रैवेयकेऽपि कुण्डलमिति प्रतीतिः स्यात्, स्वर्णस्य कुण्डल इव तत्रापि विद्यमानत्वात्। अतः किं वक्तव्यम्, कश्चिद्भेदोऽप्यस्ति स्वर्णकुण्डलयोः”[2] इति। तस्माद्यथा स्वर्णकुण्डलयोर्भेदाभेदः तथा प्रपञ्चपरमेश्वरयोरपीति विज्ञेयम्।

जगत्सत्यत्वम्

एवं प्रपञ्चपरमेश्वरयोर्भेदाभेदसम्बन्धप्रतिपादके वीरशैवसिद्धान्ते “सर्वं खल्विदं ब्रह्म”[3], “सर्वो वै रुद्रः”[4] इत्यादिश्रुतिबलेन सकलप्रपञ्चस्य शिवमयत्वाङ्गीकारात्, शिववज्जगतोऽपि सत्यत्वं प्रतिपाद्यते। अत एव रेणुकभगवत्पादाः– “शिवतत्त्वात्

---

१. सि. शि. १०.५२
२. वी. आ. च., पृ. ४३८
३. छा. उ. ३.१४.१
४. महाना. १०.११

समुत्पन्नं जगदस्मान्न भिद्यते”[1], “तथा शिवात् समुत्पन्नं शिव एव चराचरम्”[2] “तस्माच्छिवमयं सर्वं जगदेतच्चराचरम्”[3] “निरस्तभेदसद्भावे शिवे विश्वं विराजते”[4] इति शिवस्य जगन्मयत्वं निरूप्य जगतः सत्यत्वमुद्घोषितवन्तः।

ननु प्रपञ्चस्य नित्यपरिवर्तनशीलत्वात् कथमस्य सत्यत्वम्? इति, चेन्न, जगत्सत्यत्वस्य तदस्तित्वमात्रप्रतिपादनपरत्वात्। तथा हि– सृष्टिप्राक्काले सङ्कुचितकूर्माङ्गवत् मयूराण्डरसवद्वा परशिवसमवेताविभागपरामर्शावस्थ-सूक्ष्मचिदचिद्रूपेण जगदिदं सूक्ष्मरूपेण विद्यत इति तत्सत्तोपलम्भात् तदुत्पत्तिपूर्वमपि तत्सत्यम्। अतो जगतः प्रागभावं वक्तुं न शक्यते, यन्न दृश्यते तन्नास्तीति वक्तुमशक्यत्वात्। सृष्ट्यनन्तरकाले तु प्रत्यक्षसिद्धत्वात् सत्यमेव। पुनरन्तेऽपि तदुपादानभूतशिवशक्तिरूपेण सङ्कुचिततया स्थितत्वात् सत्यमेव।

किञ्च, “असद्वा इदमग्र आसीत् ततो वै सदजायत”[5] इत्याद्याः श्रुतयः प्रलयावस्थायां स्थूलचिदचिदात्मकशक्तिरूपस्य प्रपञ्चस्य सच्चिदानन्दस्वरूपे परशिवे ग्रीष्मकालधरित्रीविलीनतृणादिबीजवत् सूक्ष्मचिदचिदात्मकशक्तिस्वरूपेणावस्थानं प्रतिपादयन्ति। तदुक्तं शिवादित्यचरणैः–

> असद्वेत्यादिवाक्येषु नासत्त्वं जगतः स्मृतम्।
> प्रलये तु चिदानन्दे शिवे परमकारणे।।
> चराचरप्रपञ्चस्य ग्रीष्मे क्ष्मालीनबीजवत्।
> सूक्ष्मरूपेण कार्यस्य संस्थितिः श्रूयते तदा।।
> कार्यात्मना निषेधो हि न तावत्कारणात्मना।।[6] इति।

अत एव रेणुकभगवत्पादैः शक्तिविशिष्टः शिव एव स्वाविनाभूतशक्तेः सत्त्वादिगुणभेदेन भोक्ता, भोज्यम् , प्रेरयिता चेति त्रिविधरूपेणापि परिणमत इत्युक्तम्। तथा हि–

---

[1] सि. शि. १०.६४
[2] सि. शि. १०.६५
[3] सि. शि. १०.६७
[4] सि. शि. १०.६९
[5] तै. उ. २.७
[6] शक्तिसन्दोह. प्र. १

भोक्ता भोज्यं प्रेरयिता वस्तुत्रयमिदं स्मृतम्।
अखण्डे ब्रह्मचैतन्ये कल्पितं गुणभेदतः।।
अत्र प्रेरयिता शम्भुः शुद्धोपाधिर्महेश्वरः।
समिश्रोपाधयः सर्वे भोक्तारः पशवः स्मृताः।।
भोज्यमव्यक्तमित्युक्तं शुद्धतामसरूपकम् ।।[१] इति।

तदेवं शुद्धसत्त्वगुणप्राधान्येन शिवः प्रेरयितेति, मलिनसत्त्वगुणप्राधान्येन भोक्तेति, तमोगुणप्राधान्येन च भोज्यमिति कथ्यमानत्वादेकस्यैव त्रिविधरूपत्वाच्च वीरशैवदर्शने शिव-जीव-जगतां सत्यत्वमङ्गीक्रियते। भाष्यकाराः श्रीपतिपण्डिताराध्यभगवत्पादा अपि–

जीवः सत्यं जगत्सत्यं शिवः सत्यं स्वभावतः।
तयोरभेदः सत्यं वा क्रिमिभ्रमरयोरिव।।[२]

इत्यागमवचनोदाहरणेन शिव-जीव-जगतां सत्यत्वं व्यवस्थापितवन्तः। तस्माद्वीरशैवदर्शने शिव-जीव-जगतामधिकरणरूपेण परशिवचैतन्यरूपत्वात् मुख्यसामानाधिकरणसम्बन्धेन प्रपञ्चस्य शिवरूपत्वम्, अत एव तत्सत्यत्वं चाङ्गीक्रियते।[३]

---

[१] सि. शि. ५.४१-४३

[२] ब्र. सू. श्रीकर २.३.४०

[३] श्रीसिद्धान्तशिखामणौ क्वचित् स्थानेषु जगन्मिथ्यात्ववादिभिरङ्गीकृताः रज्जुसर्प-स्थाणुचोर-जलमरीचि-गन्धर्वपुरीत्याद्या दृष्टान्ताः शिवजगन्मयस्थले उल्लिखिताः सन्ति। तथा हि–

तस्माच्छिवमयं सर्वं जगदेतच्चराचरम्।
तदभिन्नतया भाति सर्पत्वमिव रज्जुतः।।
रज्जौ सर्पत्ववद्भाति शुक्तौ च रजतत्ववत्।
चोरत्ववदपि स्थाणौ मरीच्यां च जलत्ववत्।।
गन्धर्वपुरवद् व्योम्नि सच्चिदानन्दलक्षणे।
निरस्तभेदसद्भावे शिवे विश्वं विराजते।। इति।

(सि. शि. १०.६७-६९)

एतादृशदृष्टान्तानामवलोकनेन सिद्धान्तशिखामणिर्जगन्मिथ्यात्वं प्रतिपादयतीति प्रतीतिः स्वाभाविकी। अत एव काशीनाथशास्त्रिण उपर्युक्ता श्लोका प्रक्षिप्ता इति निर्णीय स्वसम्पादिते सिद्धान्तशिखामणिग्रन्थे तान् परिशिष्टे मुद्रितवन्तः सन्ति। किन्तु मरितोण्टदार्या एतेषामुपर्युक्तनां श्लोकानां व्याख्यारचनावेलायां सर्परज्ज्वादिदृष्टान्तानामपि वीरशैवैरङ्गीकृतं जगत्सत्यत्वपरमेवार्थं प्रतिपाद्य जगतः सत्यत्वमुपस्थापितवन्तः। तथा हि– "रज्जुः

तदेवमेतावता श्रीमद्भगवद्गीतानुसारं श्रीसिद्धान्तशिखामण्युक्तवीरशैवदर्शननयेन च परशिवब्रह्मण उत्पन्नयोः जीवजगतोः स्वरूपं जगत्सृष्टिविचारश्च पार्थक्येनोपस्थापितम्। अधुना उभयसम्मतजीव-जगत्स्वरूपयोः समीक्षा प्रस्तूयते ।

उभयसम्मतजीव-जगत्स्वरूपसमीक्षा

अत्र हि जीवात्मनः शरीरेन्द्रियबुद्धिभ्यो व्यतिरिक्तत्वम्–

स्वनिष्ठदीर्घवृत्तगोधूमवर्णताशक्तिवशाद् विकारराहित्येन यथा सर्पत्वेन भाति, तथा शिवोऽपि विकारराहित्येन स्वसमवेतमायाशक्त्या विश्वाभिन्नतया भाति, तस्मात् सर्वमेतच्चराचरं विश्वं शिवमयम्, न तद्व्यतिरिक्तमित्यर्थः। रज्ज्वां गोधूमवर्णताशक्त्या सर्पत्ववत्, शुक्तौ धावल्यशक्त्या रजतत्ववत्, स्थाणौ दीर्घताशक्त्या पुरुषत्ववत्, मरीच्यां स्वच्छतोद्रेकशक्त्या जलत्ववत्, कालशक्त्या व्योम्नि गन्धर्वनगरवत् निरस्तसमस्तप्रापञ्चिकभेदवति निर्विकारे सच्चिदानन्दस्वरूपे परशिवब्रह्मणि तत्समवेतविमर्शशक्तिस्फुरणायमानमायाशक्त्या विश्वं तदभिन्नतया भातीत्यर्थः" इति प्रतिपादितवन्तः। पुनस्त एव–

पत्रशाखादिरूपेण यथा तिष्ठति पादपः।
तथा भूम्यादिरूपेण शिव एको विराजते।।

इति श्रीसिद्धान्तशिखामणिश्लोकस्य व्याख्यानात्पूर्वम् – "नन्वेभिर्दृष्टान्तैर्विश्वं प्रातीतिकं स्यादित्यत्र दृष्टान्तान्तरमाह" इत्युक्त्वा उपर्युक्तश्लोकानामविकृतपरिणामवादपरकार्थप्रतिपादने "पत्रशाखादि......." इति श्लोकं च प्रमाणत्वेनोपस्थापितवन्तः।

एवमेव मरितोण्टदार्याः– "मिथ्येति भावयन् विश्वम्" (सि. शि. १७.५५) इत्यत्र पक्षान्तरत्वेनोक्तभावनास्वरूपमिति, "शिवादन्यज्जगन्मिथ्या" (सि. शि. १७.६६) इत्यत्र जगत् शिवादन्यदिति मिथ्येति, "अयथार्थप्रपञ्चोऽयम्" (सि. शि. १७.७७) इत्यत्रायथार्थशब्दस्यानित्यमिति चार्थं निरूपितवन्तः। अयथार्थशब्दस्यानित्यत्वमित्यर्थप्रतिपादने "जगतो नास्ति नित्यता" (सि. शि. १०.७६) इति रेणुकभगवत्पादानामुक्तिरपि हेतुः। इत्येवं पदवाक्यप्रमाणपटवा मरितोण्टदार्याः जगन्मिथ्यात्वाभासकानां सिद्धान्तशिखामणिश्लोकानां विशेषार्थप्रतिपादनद्वारा तत्र तत्र वीरशैवसिद्धान्ताऽविरोधार्थतामेवोपस्थापितवन्तः ।

अथवा तत्र ग्रन्थे जगन्मिथ्यात्वपरा इति प्रतीयमानाः श्लोकाः शिवजगन्मयत्वस्य, जीवन्मुक्तशिवयोगिनां शिवमयत्वदृष्टेश्च वर्णनसन्दर्भे उल्लिखिताः सन्ति। जीवन्मुक्तशिवयोगिनां जगदिदं जगद्रूपेण न भासते, अपि तु शिवरूपेण, अतस्तेषां दृष्ट्या प्रपञ्चोऽयमसत्य इवेति विषयं प्रतिपादनार्थमेव तादृशरज्जुसर्पादिदृष्टान्ता मिथ्यादिशब्दप्रयोगाश्च विहिता जगत् प्रति, न तु तस्य प्रातिभासिकत्वस्य मिथ्यात्वस्य वा प्रतिपादनार्थमिति विज्ञेयम्। अन्यथा सम्प्रदायविरोध इति विभावनीयं श्रीमद्भिः।

इन्द्रियाणि परण्याहुरिन्द्रियेभ्यः परं मनः।
मन्त्रसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः।।[१]

इति गीतायाम्, "शरीरेन्द्रियबुद्धिभ्यो व्यतिरिक्तः सनातनः"[२] इति सिद्धान्तशिखामणौ च प्रतिपादितमित्यत्रोभयोः साम्यम्।

जीवात्मभिन्नशरीरादिकं गीतायां क्षेत्रशब्देन, जीवात्मा च क्षेत्रभूतं शरीरं जानातीति क्षेत्रज्ञशब्देन निर्दिष्टम् । तस्माच्छरीरात्मविवेकोऽत्र क्षेत्रक्षेत्रज्ञविवेक इत्युच्यते। अयमेव सिद्धान्तशिखामणौ पिण्डज्ञानमिति व्यवह्रियते। अत्रेदमवधेयम्– गीतायाः क्षेत्रज्ञशब्दः, सिद्धान्तशिखामणेः 'पिण्डज्ञानशब्दश्चात्मज्ञानार्थं जनयत इत्युभयोः समानत्वेऽपि, क्षेत्रशब्दः पिण्डशब्दश्च विभिन्नेऽर्थे प्रयुक्तौ। तथा हि–"इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते"[३] इति शरीरार्थे क्षेत्रशब्दो निर्दिष्टः, "शुद्धान्तःकरणो देही पिण्डशब्देन गीयते"[४] इति निर्मलान्तःकरणविशिष्टे जीवे च पिण्डशब्दः प्रयुक्त इत्ययं विशेष इति।

एवं जडदेहादिभ्यः पृथग्भूतोऽयं जीवात्मा किं रूपः? इत्याकाङ्क्षायां गीतायां जीवस्योत्क्रमण–गमन–आगमनादीनां प्रतिपादनद्वारा, "सर्वस्य चाहं हृदि सन्निविष्टः"[५] "हृद्देशेऽर्जुन तिष्ठति"[६] इति तस्यैकदेशनिवासप्रतिपादनमुखेन च तस्य "एषोऽणुरात्मा चेतसा वेदितव्यः"[७] इत्यादिश्रुतिसिद्धमणुत्वमुक्तम् । सिद्धान्तशिखामणावपि–

आत्मापि सर्वभूतानामन्तःकरणमाश्रितः।
अणुभूतो मलासङ्गादादिकर्मनियन्त्रितः।।[८]

इति तस्याणुत्वमेवोक्तम् । एवमणुत्वादेव तस्य नित्यत्वं सिद्ध्यति। अत एव गीतायां "अजो नित्यः शाश्वतोऽयं पुराणः"[९] इति, सिद्धान्तशिखामणौ च "नित्यानन्दचिदाकारमात्मतत्त्वम्"[१०] इति तस्य नित्यत्वं प्रतिपादितम् । तस्माज्जीवात्मनोऽणुत्वविषये नित्यत्वविषये चोभयोः साम्यमेव दृष्टिपथमायाति।

---

[१] भ. गी. ३.४२
[२] सि. शि. ५.५८
[३] भ. गी. १३.१
[४] सि. शि. ५.३१
[५] भ. गी. १५.१५
[६] भ. गी. १८.६१
[७] मुण्ड. ३.१.९
[८] सि. शि. १८.७
[९] भ. गी. २.२०
[१०] सि. शि. ५.७३

ननु जीवस्याणुत्वे शरीरैकनिष्ठत्वेन 'पादे मे वेदना, शिरसि मे सुखम्, इति सर्वाङ्गीणचैतन्योपलब्धेरनुपपत्तिरित्याक्षेपे, गीतायाम् –

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत।।[१]

इति, सिद्धान्तशिखामणौ "आत्मा स्फुरति दीपवत्"[२] इति च तदाक्षेपो परिहृतः। यथा सूर्य एकदेशस्थितोऽपि सकललोकान् तद्गतवस्तूनि च प्रकाशयति; यथा वा प्रदीपो गृहस्यैकदेशवर्तमानोऽपि स्वप्रभया सम्पूर्णं गृहं व्याप्य तदन्तर्गतसकलवस्तूनि प्रकाशयति, तथा जीवात्मा ह्यणुरूपेण शरीरैकदेशस्थितोऽपि स्वज्ञानप्रभवा सर्वं शरीरं व्याप्य सर्वाङ्गीणसुखदुःखादिकमनुभवतीत्यवगन्तव्यम्।

जीवपरमात्मनोरंशांशित्वसमीक्षा

सोऽयं जीवात्मा परमात्मनोंऽश इत्युभयत्र स्वीक्रियते। उक्तं हि तदंशत्वम् – "ममैवांशो जीवलोके जीवभूतः सनातनः"[३] इति गीतया, "अनाद्यविद्यासम्बन्धात्तदंशो जीवनामकः"[४] इति सिद्धान्तशिखामणिना च। तस्माज्जीवपरमात्मनोरंशांशिभावः।

जीवपरमात्मनोरंशांशिभावो न वास्तविकः, किन्त्वौपाधिक इति केषाञ्चन अभिप्रायः। तन्न मनोरमम्, जीवस्य लोकान्तरव्युत्क्रमणनानाशरीरगमनागमनादिप्रतिपादकश्रुतिगीतावचनानामानर्थक्यप्रसङ्गात्। तथा हि–"प्रद्योतेनैष आत्मा निष्क्रामति"[५], "उत्क्रामन्तं स्थितं वापि"[६] इत्यादिभिः श्रुतिगीतयोरुत्क्रमणादिकमुक्तम्। न च लिङ्गशरीरस्योत्क्रमणादिकमेवात्मनि तदुपचार इति वक्तव्यम्, "तमुत्क्रान्तं प्राणोऽनुत्क्रामति"[७] इति श्रुतावात्मनः प्रथमगमनस्य, तदनु प्राणोपलक्षितसूक्ष्मशरीरगमनस्योक्तत्वात्। उक्तं च गीतायामपि–

मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति।
शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः।।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ।।[८] इति।

---

१. भ. गी. १३.३३
२. सि. शि. १८.६
३. भ. गी. १५.७
४. सि. शि. ५.३४
५. बृ. उ. ४.४.२
६. भ. गी. १५.१०
७. बृ. उ. ४.४.२
८. भ. गी. १५.७-८

तस्माज्जीवात्मनो विभुत्वे, अंशत्वस्यौपाधिकत्वे चाङ्गीकृते श्रुतिगीतोक्त-जीवात्मोत्क्रमणादयो न सम्भवन्ति, विभुत्वस्य सर्वगतत्वेन गमनागमनाद्यनुपपन्नत्वात्, अतो जीवात्मनोऽणुत्वं, वास्तविकमंशत्वं च गीताभिमतमिति विज्ञेयम्। अत एव डॉ. राधाकृष्णन् महाभागाः– "ममैवांश----" इत्यत्र जीवस्यांशत्वस्य काल्पनिकत्वं वदन्तः शङ्कराचार्यभगवत्पादा गीताकाराभिप्रायाय नैजं न्याय्यं न प्रददति"[1] इति जीवस्यांशत्वस्य काल्पनिकत्वं न गीताकाराभिमतमित्यवदन्।

श्रीसिद्धान्तशिखामण्युक्तवीरशैवदर्शने जीवपरमात्मनोरंशांशित्वमङ्गाङ्गिभावरूपेण वास्तविकमिति स्वीकृत्य,

अनाद्यन्तमजं लिङ्गं तत्परं परमं प्रति।
यद्गच्छति महाभक्त्या तदङ्गमिति निश्चितम्।।[2]

इत्यनुभवसूत्रादिप्रमाणेन जीवस्याङ्गत्वं शिवस्याङ्गित्वं च निर्दिश्य तयोर्वास्तविकमंशांशित्वं व्यवस्थापितमिति गीतोक्तस्य जीवस्यांशत्वं वीरशैवदर्शन एव सुष्ठु पर्यवस्यति।

जीवपरमात्मनोर्भेदाभेदसमीक्षा

ननु जीवपरमात्मनोरंशांशित्वस्य वास्तविकत्वे जीवस्य तयोरभिन्नरूप-मोक्षोऽनुपपन्न इति चेत्, मैवम्, शिवजीवयोर्भेदाभेदाङ्गीकारेण तदुपपत्तेः।

तत्र हि गीतायां "द्वाविमौ पुरुषौ लोके"[3], "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः"[4] इत्यादिषु जीवपरमात्मनोर्भेदः, "अहमात्मा गुडाकेशः सर्वभूताशयस्थितः"[5], "क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत"[6] इति तयोरभेदश्च प्रतिपादितः। भेदोक्तीनामेव सत्यत्वेऽभेदोक्तीनां वैयर्थ्यम्, अभेदस्यैव सत्यत्वे भेदोपपादकवचनानां च वैयर्थ्यमिति भेदाभेद एव गीतासम्मतमिति मन्तव्यं भवति।

ननु परस्परविरुद्धयोर्वास्तविकयोर्भेदाभेदयोरेकत्र कथं सम्भवः? इति चेन्न, अवस्थाभेदेन कालभेदेन च तत्सम्भवात् तस्य वीरशैवसिद्धान्ते सुष्ठु

---

[1] भा. द., भा. १, पृ. ४४९
[2] अनु. सू. ४.२-३
[3] भ. गी. १५.१६
[4] भ. गी. १५.१७
[5] भ. गी. १०.२०
[6] भ. गी. १३.२

व्यवस्थापितत्वाच्च। तथा हि– बद्धदशायां जीवः सत्त्वादिगुणैराणवादिमलैश्चावृतत्वात् परमात्मना भिन्नः स्वकर्मजन्यनानासुखदुःखादिकमनुभवति। अत एव–

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु।।[1]

इति गीतायाम्, "जीवत्वं दुःखसर्वस्वं तदिदं मलकल्पितम्"[2] इति सिद्धान्तशिखामणौ चोक्तम्। अस्यामवस्थायां भेदोक्तीनां समन्वयः। यदा गुरूपदेशेन शिवद्वैतज्ञानमुद्भवति, तदा शिवजीवयोरभेदः सिद्ध्यति। तदुक्तं गीतायाम्–

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः।।

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि।।[3] इति।

सिद्धान्तशिखामणौ च–

जीवत्वं दुःखसर्वस्वं तदिदं मलकल्पितम्।
निरस्यते गुरोर्बोधाज्ज्ञानशक्तिः प्रकाशते।।[4]

साक्षात्कृतं परं तत्त्वं यदा भवति बोधतः।
तदाद्वैतसमापत्तिर्ज्ञानहीनस्य न क्वचित्।।[5] इति।

एतादृशायामद्वैतवचनानां समन्वयः। तस्मात् संसारदशायां जीवपरमात्मनोः भ्रमरकीटवत् परस्परविरुद्धस्वभावाद् भेदः स्वाभाविक इति युक्त्यनुभवप्रसिद्धः। मोक्षदशायां च सागरप्रविष्टस्वर्णदीव तयोरैक्येऽभेदः श्रुत्यागमगोचरः।

वीरशैवदर्शनेऽयं भेदाभेद एवं व्यवस्थाप्यते– शिवः सर्वज्ञत्वसर्वकर्तृत्वादिशक्तिसमन्वितः, जीवश्च तदंशः किञ्चिज्ज्ञत्वकिञ्चित्कर्तृत्वादिविशिष्ट इति शिवजीवयोर्वैधर्म्यात् तयोर्भिन्नत्वेऽपि चेतनत्वेनाभिन्नयोस्तयोरुपासनमहिम्ना मुक्तावस्थायामैक्यमुपपन्नं भवतीति। किञ्चिदत्र विशेषः– संसारावस्थायामपि तयोर्न

---

[1] भ. गी. १३.२१
[2] सि. शि. १८.१७
[3] भ. गी. ४.३४-३५
[4] सि. शि. १८.१७
[5] सि. शि. १०.४१

केवलं भेदः, नाप्यभेद एवेति वक्तुं युक्तम्, अपि त्वभेदगर्भितभेदो वक्तव्यः। जीवस्य सर्वदा शिवाऽभिन्नत्वे सर्वज्ञत्वादिकं तस्यापि भवेत्, यच्च जीवे नोपलभ्यते; सर्वदा भिन्नत्वे च तस्य जडत्वापत्तिः। अत एव–

अग्निविस्फुलिङ्गयोर्नास्ति यथा भेदः स्वरूपतः।
अग्नित्वेन कणत्वेन भेदोऽपि स्फुरति क्वचित् ।।

इति क्रियासारोक्तिं प्रमाणत्वेनोपस्थापयन्तः [१]श्रीशङ्करशास्त्रिणोऽग्निविस्फुलिङ्गयोरिव शिवजीवयोर्भेदाभेद इति व्यवस्थापितवन्तः।

किञ्च इह खलु सन्ति केचन दार्शनिका भेदवादिनः, केचन अभेदवादिनश्च। तत्र भेदवादिमते "ब्रह्म वेद ब्रह्मैव भवति"[२], "स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्प्यते"[३] इत्यादिमोक्षकालीनाभेदबोधकश्रुतिगीतावचनानां पूर्णरूपेण नावकाशः। अभेदवादिमते चोपर्युक्तानामभेदोपपादकवचनानामवकाशत्वेऽपि "द्वा सुपर्णा सयुजा सखाया"[४], "द्वाविमौ पुरुषौ लोके"[५] "उत्तमः पुरुषस्त्वन्यः"[६] इति जीवस्य बन्धकालीनभेदबोधकश्रुतिगीतावचनानामासमन्ततयाऽनवकाशः। वीरशैवदर्शने तु पूर्वोक्तप्रकारेण जीवस्य बद्धदशायां परमात्मना साकं वास्तविकं भेदम्, मोक्षदशायां वास्तविकमभेदं चाङ्गीकृत्य भेदाभेदोभयपरश्रुतिगीतावाक्यानां समन्वयः साधितः। अत एव भाष्यकृद्भिः श्रीपतिपण्डिताराध्यभगवत्पादैर्वीरशैवदर्शनं सर्वश्रुतिसमन्वयात्मकमिति तस्य विशेषाद्वैतमिति नामधेयं कृतम्। तथा हि–

श्रुत्यैकदेशप्रामाण्यं द्वैताऽद्वैतमतादिषु।
द्वैताऽद्वैतमते शुद्धे विशेषाद्वैतसंज्ञिते।
वीरशैवैकसिद्धान्ते सर्वश्रुतिसमन्वयः ।।[७] इति।

अत्र विश्च शेषश्च विशेषौ परमात्मजीवौ, तयोरद्वैतं "विशेषाद्वैतम्" इति तस्य व्युत्पत्तिः। अत्र 'विः' इत्यनेन "विश्चक्षुषि व्योम्नि वाते परमात्मनि पक्षिणि"[८] इति

---

[१] ब्र. सू. शा. वृ., उपो. पृ. ९
[२] मुण्ड. ३.२.९
[३] भ. गी. १४.२६
[४] श्वे. उ. ४.६
[५] भ. गी. १५.१६
[६] भ. गी. १५.१७
[७] ब्र. सू. श्रीकर मङ्गलश्लो. १५
[८] एकाक्षरनामकोषसङ्ग्रहः, पृ. १८

निघण्टुषु पक्षिवाचकस्य विशब्दस्य परमात्मनोऽपि वाचकत्वात्, "द्वा सुपर्णा", "हंस हंसेति यो ब्रूयाद्धंसो ब्रह्मा हरिः शिवः"[१] इत्यादिश्रुतिषु च परमात्मनः पक्षिरूपेण वर्णनाद् विशब्देन परमात्मैव गृह्यते। एवमेव– "यथाऽग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति"[२] इत्यादिश्रुतिषु जीवानां परमेश्वरांशत्वव्यपदेशात् शेषशब्देन जीवो व्यवह्रियते। अद्वैतपदेन "यथा नद्यः"[३] इत्यादिश्रुतिसिद्धं सायुज्यं जीवब्रह्मणोरुपदिष्टम्। तदुक्तम्–

> विशब्देनोच्यते शम्भुर्द्वासुपर्णेति मन्त्रतः।
> शेषशब्देन शारीरो यथाग्नेरिति मन्त्रतः।।
> अद्वैतेन भवेद्योगो यथा नद्यादिमन्त्रतः।।[४] इति।

तस्मादेवं वीरशैवदर्शने भेदाभेदयोः समन्वयाद् वैशिष्ट्यपूर्णं सर्ववेदानुसारि चेदं दर्शनम्। अत एवोक्तं रेणुकभगवत्पादैः–

> वेदैकदेशवर्तिभ्यः सांख्यादिभ्यो महामुने।
> सर्ववेदानुसारित्वाच्छैवतन्त्रं विशिष्यते।।[५] इति।

इत्येवं सिद्धान्तशिखामण्युक्तवीरशैवदर्शने परस्परविरोधत्वेन प्रतीयमानानां भेदाभेदश्रुतीनां सुष्ठु समन्वयो व्यवस्थापित इति, तच्छ्रुति(उपनिषत्)साररूपेण तत्समन्वयार्थमेव प्रवृत्ताया गीताया अपि भेदाभेदोपपादकवचनानां समन्वयो वीरशैवदर्शने एवोपपद्यत इति सर्वं समञ्जसम्।

जगत्स्वरूपसमीक्षा

तत्र तावद्गीतायां "तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता"[६] इति परमेश्वरस्य जगन्निमित्तकारणत्वम्, "यच्चापि सर्वभूतानां बीजं तदहमर्जुन"[७] इति च तस्य जगदुपादानत्वं प्रतिपादितमिति प्रकृतिविशिष्टस्य परमेश्वरस्य जगत् प्रत्यभिन्ननिमित्तोपादानकारणत्वं गीता प्रतिपादयतीति ज्ञायते। सिद्धान्तशिखामणौ च–

---

[१] ब्र वि. ३४
[२] बृ. उ. ३.१.२०
[३] मुण्ड. ३.२.८
[४] ब्र. सू. श्रीकर. मङ्गलश्लो. १६
[५] सि. शि. ५.७
[६] भ. गी. १४.४
[७] भ. गी. १०.३८

जगत् सिसृक्षुः प्रथमं ब्रह्माणं सर्वदेहिनाम्।
कर्तारं सर्वलोकानां विदधे विश्वनायकः।।[१]

इति शिवस्य जगन्निमित्तत्वम्,

यस्मादेतत् समुत्पन्नं महादेवाच्चराचरम्।
तस्मादेतन्न भिद्येत यथा कुम्भादिकं मृदः।।[२]

इति च तस्य जगदुपादानत्वं प्रतिपादितमिति, अत्रापि सृष्टेरभिन्ननिमित्तोपादानकारणं शक्तिविशिष्टः शिव एव।

अत्रेदमवधेयम्– "प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि"[३] इति गीतोक्त्या, "न शिवेन विना शक्तिर्न शक्तिरहितः शिवः"[४] इत्यागमोक्त्या च शिवशक्त्योरविनाभावसम्बन्धः। एवमविनाभावसम्बन्धेन शिवे विद्यमानायाः शक्तेरवस्थाद्वयम् अविभागपरामर्शविभागपरामर्शभेदन। अविभागपरामर्शावस्थायां सङ्कुचितकूर्माङ्गवत् सम्पूर्णं जगत् स्वस्मिन् विन्यस्य परशिवे सच्चिदानन्दबोधरूपेण तूष्णीं भावेन तिष्ठति। सृष्टिसमये च विभागपरामर्शदशामापन्नाजगद्रूपेण परिणमते। एवं स्वाभिन्नशक्त्या परमेश्वरो जगदिदं सृजतीति तस्याभिन्ननिमित्तोपादानत्वम्। अत एवोक्तम्–

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः।
भूतग्राममिमं कृत्स्नमवशः प्रकृतेर्वशात्।।[५]

इति गीतायाम्, "आत्मशक्तिविकासेन शिवो विश्वात्मना स्थितः"[६] इति सिद्धान्तशिखामणौ च। एतदतिरिक्तं "यथोर्णनाभिः सृजते गृह्णते च"[७] इत्याद्याः श्रुतयोऽप्यत्र प्रमाणम्। अनेनैव हेतुनाऽविकृतपरिणामवादोऽपि समर्थितो भवति। अत्रायं भावः– यथोर्णनाभिः कदाचित् स्वशरीरस्थद्रव्यविशेषेण तन्तुजालमुद्वमते, कदाचिच्च स्वस्मिन् प्रगृह्य तूष्णीमवतिष्ठते। एवं चोर्णनाभिस्तन्तुजालं प्रति स्वयमभिन्ननिमित्तोपादानं भवति; तद्वदेव परशिवः स्वाभिन्नशक्तिविकासेन जगत्सृष्टिं

---

[१] सि. शि. २.१४
[२] सि. शि. १०.६३
[३] भ. गी. १३.१९
[४] वी. आ. च., पृ. ७
[५] भ. गी. ९.८
[६] सि. शि. १०.६६
[७] तै. उ. १.१.७

सङ्कोचेन च विलयं विदधातीति परशिवः प्रपञ्चं प्रत्यभिन्ननिमित्तोपादानकारणं भवति। यथा च स्वाभिन्नद्रव्यविकासेनोर्णनाभौ न कश्चिद्विकार आरोप्यते तथा स्वशक्तिविकासेन सङ्कोचेन वा परशिवे विकृतिर्नायातीतीदृशोऽविकृतपरिणामवादोऽपि समर्थितो भवति।

तदेवं गीतायां सिद्धान्तशिखामणौ च शक्तिविशिष्टपरमेश्वरस्य जगदुभयकारणत्वप्रतिपादनद्वाराऽविकृत–परिणामवादो व्यवस्थापित इत्युभयोः समन्वयः।

सृष्टिसमीक्षा

तत्र गीतायां प्रपञ्चस्याभिन्ननिमित्तोपादनभूतपरमेश्वरे विद्यमाना मूलप्रकृतिरेव तत्प्रेरणया परापरभेदेन विभक्ता जडचेतनात्मकप्रपञ्चरूपेण परिणमते। तत्रापरा प्रकृतिः स्थूलसूक्ष्मात्मकजगद्रूपेण परिणता तदुपाधिर्भवति, परा प्रकृतिश्च जीवोपाधिरूपेण परिणमत इति प्रतिपाद्यते। तथा हि–

> भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
> अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा।।
> अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
> जीवभूतां महाबाहो ययेदं धार्यते जगत्।।[1] इति।

वीरशैवदर्शने च परशिवनिष्ठविमर्शशक्तिपरिणामभूता स्थूलचिदचिद्रूपशक्तिरेवावरणशक्तिरौन्मुख्यशक्तिरिति भेदेन द्विधा भवति। तत्रावरणशक्तिर्जीवोपाधिरूपेण, औन्मुख्यशक्तिश्च सकलजगदात्मना परिणमते। अत एव तत्रभवद्भिः शिवानुभवशिवाचार्यैः– सेयं स्थूलचिदचिद्रूपशक्तिरावरणशक्तिरौन्मुख्यशक्तिरिति द्विधा भवति। तत्र सूक्ष्मचिच्छक्तिपरिणामरूपा ब्रह्मचैतन्यगोपनानुकूला शक्तिरावरणशक्तिः। गोपनत्वं च ब्रह्म नास्ति, न प्रकाशत इति व्यवहारयोग्यत्वम् । सा च शक्तिः शिवतत्त्वमाश्रित्य कला–विद्या–राग–काल–नियति– भेदेन पञ्चधा भवति। तत्र सर्वकर्तृत्वशक्तिपरिणामरूपा किञ्चित्कर्तृत्वशक्तिः कलाशक्तिः, सर्वज्ञताशक्तिपरिणामरूपा किञ्चिज्ज्ञत्वशक्तिर्विद्याशक्तिः, पूर्णताशक्तिपरिणामरूपाऽपूर्णशक्ती रागशक्तिः, नित्यत्वशक्तिपरिणामरूपाऽनित्यत्वशक्तिः कालशक्तिः, व्यापकताशक्तिपरिणामरूपाऽव्यापकताशक्तिर्नियतिशक्तिः। एवंविधकलादिशक्तिपञ्चकस्य जीवस्य परशिवशासनादपरिच्छिन्नस्य स्वरूपावरणभूतत्वादावरणशक्तिः"[2] इत्यावरणशक्तेर्जीवावरकत्वमुक्त्वा, "अथ

---

[1] भ. गी. ७.४–५

[2] शि. द., पृ. १४

सूक्ष्माचिच्छक्तिपरिणामरूपा तत्तज्जीवसाधारणसुखदुःखादिभोगानुकूला शक्तिरौन्मुख्यशक्तिः। सा च शुद्धचैतन्यरूपपरशिवप्रेरकत्वेन प्रकृतितत्त्वादिपृथिवीतत्त्वपर्यन्तं चतुर्विंशतितत्त्वात्मना परिणमते"[1] इत्यौन्मुख्यशक्तेश्च जगद्रूपेण परिणामित्वं प्रतिपादितम् ।

तदेवं वीरशैवदर्शने गीतोक्ता परा प्रकृतिरेवावरणशक्तिरिति, अपराप्रकृतिरेवौन्मुख्यशक्तिरित्युच्यत इत्युभयोः साम्यमेव दृष्टिपथमायाति। तथापि वीरशैवाभिमतसृष्टिविकासो गीतायां आंशिकरूपेणोपलभमानोऽपि यथावत् स नोपलभ्यत इत्यपि सत्यमेव। तस्मादस्मिन् विषये पूर्णरूपेण समन्वयो नोपपद्यते।

जगत्सत्यत्वसमीक्षा

तत्र तावद् गीतायाम्–

> असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्।
> अपरस्परसम्भूतं किमन्यत्कामहेतुकम्।।
>
> एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः।
> प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः।।[2]

इत्यत्र जगतो मिथ्यात्वमसत्यं वा निरस्य, "न तदस्ति विना यत् स्यान्मया भूतं चराचरम्"[3], "अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन"[4] इत्यादिषु परमेश्वरस्य सर्वजगन्मयत्वप्रतिपादनात्,

> सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्।
> कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्।।[5]

---

[1] शि. द., पृ. १५

[2] भ. गी. १६.८–९; अत्र 'असत्यम्' इत्यस्यार्थं शङ्करभगवत्पादाः– "यथा वयमनृतप्रायास्तथेदं जगत्सर्वमसत्यम्" अर्थादासुरा जनाः स्वयमनृतपथनिरताः प्रपञ्चे विद्यमानाः सर्वे जना असत्यमार्गनिरता इति कथयन्तीति प्रतिपादयामासुः। किन्तु रामानुजाचार्याः– "जगदेतत् सत्यशब्दनिर्दिष्टब्रह्मकार्यतया ब्रह्मात्मकमिति नाहुः, अप्रतिष्ठं तथा ब्रह्मणि प्रतिष्ठितमिति न वदन्ति" इति 'असक्तमप्रतिष्ठम्' इत्यस्यार्थमुपपादितवन्तः।

[3] भ. गी. १०.३९

[4] भ. गी. ९.१९

[5] भ. गी. ९.७

इति जगतः सृष्टिपूर्वं प्रलयानन्तरं च प्रकृत्यां सूक्ष्मरूपेण विद्यमानत्वश्रवणाच्च जगतः सत्यत्वमेव गीतासम्मतमिति ज्ञायते।

अत एव डॉ. राधाकृष्णन्महाभागाः– "गीता जगतो मिथ्यात्वमनाधारत्वमशासकत्वं च निराकरोति। तस्माद् गीतानुसारं जगति सम्भूयमानो विकासो यथार्थः, ईश्वरस्तस्याधिष्ठाता। अस्मदीयास्तित्वपर्यन्तमेव जगद् यथार्थमिति गीता कथयतीति कथनमनुचितमेव। दुःखस्वप्नवदिदं जगदित्यस्य सङ्केतो गीतायां नोपलभ्यते। गीतानुसारं परिणामरूपेऽस्मिन् प्रपञ्चे निवसन्नपि कालातीतमात्मसत्तारूपममरत्वमवाप्तुं शक्यते। तदर्थं तत्र भ्रान्तिं विनैव जगत उपयोगं कुर्वतां पुरुषोत्तमानां दृष्टान्त उपपादितः। जगदिदं सर्वथा विलुप्तं न भविष्यति, किन्तु स्वस्मिन्नेव परिवर्तमानं तिष्ठति। चेतनाचेतनात्मकमिदं जगदीश्वरसत्त्वस्य परिणामः। ईश्वरः शून्येनेदं न निर्माति; अपि तु सद्वस्तुना विदधाति। प्रलये जीवसहितं सम्पूर्णं जगत् सूक्ष्मावस्थारूपेण तत्रैव दैवीसत्तायां स्थितं वर्तते"[1] इति जगत्सत्यमेव गीतासम्मतमिति। निरूपितवन्तः।

श्रीबलदेव-उपाध्यायमहाभागा अपि "नासतो विद्यते भावो नाभावो विद्यते सतः"[2] इति गीतोक्तिं प्रमाणयन्तः– "गीता सत्कार्यवादं प्रतिपादयतीति दृष्ट्या जगदिदं मायिकं काल्पनिकं वा नास्ति, अपि तु सत्यं वास्तविकं चास्ति"[3] इत्युक्तवन्तः। तस्मात् श्रीमद्भगवद्गीता जगतो मिथ्यात्वं न प्रतिपादयति, अपि तु तस्य सत्यत्वं वास्तविकत्वमेव प्रतिपादयतीति निश्चीयते।

वीरशैवदर्शने तावत् "सर्वं खल्विदं ब्रह्म"[4] इत्यादिश्रुतिबलेन जगन्मिथ्यात्वं निराकृत्य तत्सत्यत्वमुपस्थाप्यते। अत एव सिद्धान्तशिखामणौ "तथा शिवात् समुत्पन्नं शिव एव चराचरम्"[5] इत्याद्यनेकस्थानेषु रेणुकभगवत्पादैर्जगतः शिवमयत्वप्रतिपादनद्वारा तस्य सत्यत्वं व्यवस्थापितम्। अत्र प्रपञ्चो नाम शिवादिभूम्यन्तषट्त्रिंशत्तत्त्वात्मकः। एतानि षट्त्रिंशत्तत्त्वानि शक्तिविशिष्टपरशिवस्यैव विकासरूपाणीति तेषां मिथ्यात्वं नैव सिद्ध्यति। अत एवात्र शिवादिभूम्यन्तपदार्थानां

---

[1] भारतीय दर्शन., भा. १, पृ. ४४८ (डॉ. राधाकृष्णन्)

[2] भ. गी. २/१६

[3] भारतीय दर्शन., पृ. ५९, (आचार्यबलदेव उपाध्याय) शारदामन्दिर, वाराणसी १९९७ ई.।

[4] छा. उ. ३.१४.१

[5] सि. शि. १०.६५

तत्त्वशब्देन व्यपदेशः कृतः। "तत्त्वं नाम अनारोपितं रूपम्, प्रमितिविषयत्वं वा" इति तत्त्वशब्दस्य व्युत्पत्तिसिद्धेनार्थेनाऽपि प्रपञ्चस्य सत्यत्वं ज्ञायते।

ननु प्रपञ्चस्य नित्यपरिवर्तनशीलत्वात् कथं सत्यत्वम्? इति चेत्, मैवम्, जगत्सत्यत्वस्य तदस्तित्वमात्रप्रतिपादनपरत्वात्। तथा हि– सृष्टिप्राक्काले सङ्कुचितकूर्माङ्गवत् परशिवसमवेतविमर्शशक्तौ सूक्ष्मरूपेण विद्यत इति तत्सत्ताया उपलभमानत्वात् तदुत्पत्तिपूर्वमपि तत्सत्यम्। अतो जगतः प्रागभावो न वक्तुं शक्यः, यन्न दृश्यते तन्नास्तीति वक्तुमशक्यत्वात्। सृष्ट्यनन्तरकाले तु प्रत्यक्षगोचरत्वात् सत्यमेव। पुनरन्ते च तदुपादानभूतशिवशक्तिरूपेण सङ्कुचिततया स्थितत्वात् सत्यमेवेति वीरशैवदर्शने प्रतिपाद्यते।

तत्र भवन्तः श्रीपतिपण्डिताराध्यभगवत्पादाः– "किञ्च, मिथ्यात्वं नाम असत्त्वम्, अनिर्वचनीयत्वम्, बाध्यत्वं वा? नाद्यः, वेदाप्रामाण्यप्रसङ्गात्। न द्वितीयः, मौनत्वापत्तेः। न तृतीयः, किमिदं बाध्यत्वं नाम? त्रैकालिकनिषेधप्रतियोगित्वम्, ज्ञाननिवर्त्यत्वं वा? नाद्यः, प्रपञ्चस्य विद्यमानत्वात्, अर्थसिद्धिक्रियासिद्धिसत्त्वाच्च। अनादित्वान्न पूर्वकालनिषेधः, अनुभूयमानत्वान्न वर्तमानकालनिषेधः, सङ्कोचरूपेण वेदराशेः प्रलयेऽपि परमेश्वरे सत्त्वान्न भविष्यत्कालनिषेधः। न द्वितीयः, ज्ञानिनां पूर्ववत्प्रपञ्चस्य भासमानत्वात्, तेषां क्षुत्पिपासादिकस्य दृष्टत्वाच्च"[1] इत्यादिबहुभिर्युक्तिप्रयुक्तिभिः 'प्रपञ्चस्य मिथ्यात्वं निरस्य, तस्य सत्यत्वं च प्रतिष्ठाप्य, पुनरग्रे–

जीवः सत्यं जगत्सत्यं शिवः सत्यं स्वभावतः।
तयोरभेदः सत्यं वा क्रिमिभ्रमरयोरिव।।[2]

इत्यागमोक्त्या च प्रपञ्चस्य सत्यत्वं समर्थितवन्तः।

प्रपञ्चस्य सत्यत्वप्रतिपादने वीरशैवाचार्याणामयमभिप्रायः– लोके हि ज्ञानिनामपेक्षयाऽज्ञानिनो बहवो वर्तन्ते। प्रपञ्चो मिथ्येति कथनेन यद्यपि ज्ञानिनः प्रपञ्चे आस्थां परित्यज्य परे ब्रह्मणि निष्ठावन्तो भवन्ति, किन्त्वज्ञानिनस्तद्वचनं श्रुत्वा नित्यनैमित्तिकादिषु श्रद्धारहिताः सन्तो नास्तिका भवेयुः। तथा सति च लौकिकजीवनं निरादर्शतामापद्येत। यदा तु–

---

[1] ब्र. सू. श्रीकर १.१.२

[2] ब्र. सू. श्रीकर २.३.४०

यथा तन्तुभिरुत्पन्नः पटस्तन्तुमयः स्मृतः।
तथा शिवात् समुत्पन्नं शिव एव चराचरम्।।
तस्माच्छिवमयं सर्वं जगदेतच्चराचरम्।।[१]

इत्यादिभिः श्रीरेणुकभगवत्पादोक्तिभिः प्रपञ्चस्य शिवरूपत्वं प्रतिपाद्यते, तदा यथा ज्ञानिनां प्रपञ्चे परशिवत्वबुद्धिः समुदेति, तथाऽज्ञानिनामपि नित्यादिकर्मसु श्रद्धा समुत्पद्यते। एवं च सति लौकिकजीवनमप्यादर्शप्रायं भवतीति। तस्मात् प्रपञ्चनिषेधमुखेन परमतत्त्वस्य स्वरूपबोधनापेक्षया प्रपञ्चस्यैव परशिवरूपत्वं प्रतिपाद्य परमतत्त्वबोधनमधिकं लाभप्रदमिति सिद्ध्यति।

तदेवं श्रीसिद्धान्तशिखामण्युक्तवीरशैवदर्शने ज्ञानिनामज्ञानिनां वा सर्वानुकूलार्थम्, लौकिकजीवनस्यादर्शाभिवृद्ध्यर्थं च प्रपञ्चस्य मिथ्यात्वं निरस्य तस्य सत्यत्वमुपस्थापितम् । तस्मादेव सर्वहितप्रवृत्तभगवद्गीतोक्ता जगतः सत्यत्वादिविचारा वीरशैवदर्शने एव सर्वभावेन समन्विता भवन्तीति शिवम् ।

* * *

---

[१] सि. शि. १०.६५.६७

पञ्चमोऽध्यायः

बन्धमोक्षस्वरूपविमर्शः

इह खल्वीश्वरनिर्मिते प्रपञ्चे आगतानां परमेश्वरनिर्गतानां जन्ममरणादिनानादुःखपरितप्तानां जीवानां निखिलदुःखनिवारणायैव दार्शनिकचिन्तनप्रवाहो भारते वर्षे सनातनेन कालेन प्रवहति। तदीदृशमनादिकालतो जीवमावृत्य प्रवृत्तं दुःखं किं हेतुकमिति जिज्ञासायां संसारबन्धस्तत्कारणमिति सर्वेऽप्यामनन्ति दार्शनिकाः। समस्तदुःखानां कारणीभूतमिदं बन्धनं किं रूपमित्यस्मिन् विचारे दार्शनिकानां परस्परं वैलक्षण्यमस्ति। तत्र बन्धनं सत्त्वादिगुणत्रयरूपमिति श्रीमद्भगवद्गीतायाम्, आणवादिमलत्रयरूपमिति श्रीसिद्धान्तशिखामणौ चोच्यते। अनेन बन्धनत्वेनाभिमतानां सत्त्वादिगुणानाम्, आणवादिमलानां च निवृत्तिरेव मोक्ष इति तत्र तत्र निर्णीयते।

अयं च मोक्षश्चतुर्विधेषु धर्मार्थकाममोक्षाख्येषु पुरुषार्थेषु परमपुरुषार्थत्वेनाभिहितः। नन्वितरेषां परमपुरुषार्थत्वं किमर्थं नाभिहितमित्याकाङ्क्षायाम्–

अपध्यानमलो धर्मो मलोऽर्थस्य निगूहनम्।
सम्प्रमोदमलः कामो भूयः स्वगुणवर्जितः।।[1]

इति वेदव्यासोक्त्या धर्मः सकामदोषेण, अर्थोऽदानदोषेण, कामश्च सम्मोहनदोषेण दूषित इति धर्मार्थकामानां पुरुषार्थत्रयाणां न परमपुरुषार्थत्वम्। अपि तु–

इति संसारदुःखार्क-ताप-तपित-चेतसाम्।
विमुक्तिपादपच्छायामृते कुत्र सुखं नृणाम्।।[2]

इति विष्णुपुराणोक्त्या मोक्षस्योत्कृष्टत्वमिति तस्यैव परमपुरुषार्थत्वसिद्धिः।

अयं परमपुरुषार्थः– "मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम्। मोक्षोऽपवर्गः"[3] इत्यमरकोशवचनेन मुक्तिः, कैवल्यम्, निर्वाणम्, श्रेयस्, निःश्रेयसम्,

---

[1] म. भा. शां. प. १२३.१०

[2] वि. पु. ६.५.५७

[3] अ. को. १.५.६–७

अमृतम्, मोक्षः, अपवर्ग इत्याद्यनेकनामभाग् भवति। तत्र "मुच्यते सर्वदुःखबन्धनैर्यत्र स मोक्षः, सा मुक्तिर्वा", "केवलस्य भावः कैवल्यम्", "निर्गतो वाणस्तापो यस्मात् तन्निर्वाणम्", "नास्ति श्रेयो यस्मादधिकं तच्छ्रेयो निःश्रेयसम् वा", यद्वा "निश्चितं श्रेयो निःश्रेयसम्" "न मृतं मरणं यत्र तदमृतम्" इत्यादिपर्यायनामधेयानां व्युत्पत्त्याऽपि मोक्षस्य परमपुरुषार्थत्वं सिद्ध्यति।

अथ साम्प्रतं श्रीमद्भगवद्गीताश्रीसिद्धान्तशिखामण्यभिमतबन्धमोक्षयोः स्वरूपं तावत् क्रमेण यथाग्रन्थं यथामति च विमृश्यते।

गीतानुसारेण बन्धस्वरूपं बन्धकारणानि च

तत्र तावद्भगवद्गीतायां प्रकृत्या उत्पन्नानां त्रिगुणानामावरणमेव बन्धनम्, तेषामतितरणमेव मोक्ष इति गुणानामावरणनिवृत्तिभ्यां बन्धमोक्षौ व्यवस्थाप्येते। अत एवोक्तं भगवता श्रीकृष्णेन–

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम्।।

गुणानेतानतीत्य त्रीन् देही देहसमुद्भवान्।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ।।[1] इति।

गुणत्रयस्वरूपम्

"गुणयन्ति अभिवर्धयन्ति जीवात्मनो देहादिसम्बन्धमिति गुणाः" इति व्युत्पत्त्या गुणा जीवात्मनो बन्धनमभिवर्धयन्ति। नात्र गुणशब्देन न्यायवैशेषिकदर्शनयोः प्रतिपादिता द्रव्याश्रिता रूपरसादिचतुर्विंशतिगुणा अभीष्टाः, अपि तु सांख्यदर्शनाभिमताः, "सत्त्वं रजस्तम इति प्रकृतेर्गुणाः"[2] इति भागवतमहापुराणे उपपादिताश्चाभीष्टाः। "सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः"[3] इत्युक्त्या प्रकृतेः कारणावस्थायां साम्यावस्थारूपेणाऽव्यक्ततया विद्यमाना इमे तस्याः कार्यावस्थायां विषमरूपेण प्रकटीभूय जीवमनुबध्नन्ति। तदीदृशानां सत्त्वरजस्तम आख्यानां त्रिगुणानां स्वरूपं कीदृशम्; ते कथं जीवमनुबध्नन्तीति सक्रमं निरूप्यते।

---

[1] भ. गी. १४.५, २०

[2] भाग. १.२.२३

[3] सां. सू. १.६१

सत्त्वगुणः

तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम्।
सुखरूपेण बध्नाति ज्ञानसङ्गेन चानघ।।[१]

इति भगवदुक्त्या सत्त्वं मलरहितम्, प्रकाशकम्, अनामयं च वर्तते। "कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम्"[२] इति भगवता श्रीकृष्णेन सत्त्वस्य सुकृतजन्यत्वमुक्त्वा तद्व्याजेन तस्य निर्मलत्वम्, अर्थात् पापरहितत्वं दृढीकृतम्। एवं निष्पापत्वादेव स्फटिकादिवत् प्रकाशकम्, मित्रवदनामयम्, अर्थाद् निरुपद्रवं च वर्तते। उक्तं च श्रीमदीश्वरकृष्णेन– "सत्त्वं लघु प्रकाशकम्"[३] इति। तदीदृशं सत्त्वं सुखसङ्गेन ज्ञानसङ्गेन च जीवात्मानं पञ्चभौतिके कलेवरे बध्नाति।

ननु "तमेव विदित्वाऽतिमृत्युमेति"[४], "न हि ज्ञानेन सदृशम्"[५] इत्यादिश्रुति-गीतासु ज्ञानं बन्धनिवारकत्वेनोक्तम्, तस्मात् कथं सत्त्वं ज्ञानसङ्गेन बध्नाति? ज्ञानस्य बन्धकत्वे "सत्यं ज्ञानमनन्तं ब्रह्म"[६], "विज्ञानमानन्दं ब्रह्म"[७] इत्यादिश्रुत्युपपादितस्य सर्वज्ञत्वादिगुणगणसमन्वितस्येश्वरस्यापि बद्धत्वापत्तिरिति चेत्, मैवम्, सत्त्वगुणजन्यज्ञानस्य सङ्कुचितत्वात्। तथा हि वारिधेर्जलस्य घटगतजलस्य च स्वरूपे साम्येऽपि विशालत्वाद्वारिधिजलं नित्यनिर्मलम्, सङ्कुचितत्वाद् घटगतजलं च कालान्तरे कश्मलवत्। एवमेवेश्वरगतं ज्ञानं निःसीममिति तन्न बन्धहेतुकम्, जीवस्य सत्त्वजन्यं ज्ञानं च सङ्कुचितत्वाद् बन्धनकारणं भवति। अत एव भगवता शिवेन– "ज्ञानं बन्धः"[८] इति जीवगतज्ञानस्य बन्धकत्वमुक्तम्। अस्य सूत्रस्य व्याख्यानावसरे श्रीक्षेमराजेन "शिवाभेदाख्यात्मकाज्ञान-स्वभावोऽपूर्णम्मन्यतात्मकाणवमलसतत्त्वसङ्कुचितज्ञानात्मा बन्धः"[९] इति सङ्कुचितज्ञानं बन्ध इत्युक्तम्। अत एव भगवता श्रीकृष्णद्वैपायनव्यासेन–

---

[१] भ. गी. १४.६
[२] भ. गी. १४.१६
[३] सां. का. १३
[४] श्वे. उ. ३.७
[५] भ. गी. ४.३८
[६] तै. उ. २.१
[७] बृ. उ. ३.९.२८
[८] शि. सू. १.२
[९] शि. सू. वि., पृ. १२

ज्ञानं बन्ध इतीदं तु द्वितीयं सूत्रमीशितुः।
ज्ञानमित्यात्मनस्तस्य किञ्चिज्ज्ञानक्रियात्मकम्।।[१]

इति शिवसूत्रोक्तस्य 'ज्ञानम्' इत्यस्य किञ्चिज्ज्ञत्वमिति तस्य सङ्कुचितत्वमेवोपस्थापितम्। अनेन सत्त्वं 'ज्ञानसङ्गेन बध्नाति' इत्यस्य सङ्कुचितज्ञानसङ्गेनेत्यर्थो बोध्यः, तादृशस्यैव बन्धसाध्यत्वात्।

किञ्च, शङ्कराचार्यभगवत्पादा अस्य श्लोकस्य व्याख्यानावसरे– "ज्ञानमिति सुखसाहचर्यात् क्षेत्रज्ञस्यैवान्तःकरणस्य धर्मो नात्मनः, आत्मधर्मत्वे सङ्गानुपपत्तेः, बन्धानुपपत्तेश्च"[२] इत्यन्तःकरणधर्मभूतं ज्ञानं जीवस्य बन्धकारणमित्यूचुः। रामानुजाचार्याश्च– "ज्ञानसुखयोः सङ्गे हि जाते तत्साधनेषु लौकिकवैदिकेषु प्रवर्तते, ततश्च तत्फलानुभवसाधनभूतासु योनिषु जायते; इति सत्त्वं सुखज्ञानसङ्गद्वारेण पुरुषं बध्नाति; ज्ञानसुखजननं पुनरपि तयोः सङ्गजननं च सत्त्वमित्युक्तं भवति"[३] इति सत्त्वं ज्ञानासक्तिद्वारेण बध्नातीति निरूपितवन्तः।

तदेतावतोक्तैः प्रमाणैः सकलं ज्ञानं न बन्धनकारणम्, अपि तु सङ्कुचितम्, अन्तःकरणधर्मभूतं वा ज्ञानम्, तादृशज्ञानासक्तिश्च जीवं बध्नातीति सत्त्वजन्यज्ञानस्य बन्धनत्वकथनमुपपन्नतरमेव। अनेनेश्वरे विद्यमानस्य सर्वज्ञत्वस्यासङ्कुचितत्वादन्तःकरणाजन्यत्वादलौकिकत्वाच्चेश्वरं न बध्नातीति तस्य नित्यमुक्तत्वमप्युपपन्नतरम्। "सुखसङ्गेन बध्नाति" इत्यत्रापि ज्ञानवदेव तदपि बन्धकारणमिति सङ्गमनीयम्।

ननु कथमिदमवगम्येत यद्देहे सत्त्वगुणः प्रवृद्ध इति जिज्ञासायामुच्यते– इह खलु कार्योपलब्ध्या कारणमनुमीयते। यथा धूममवलोक्य वह्नेरनुमानम्। "सत्त्वात् सञ्जायते ज्ञानम्"[४], "सत्त्वं सुखे सञ्जयति"[५] इति भगवदुक्त्या यदा देहगतेषु चक्षुरादिषु करणेषु घटपटादिवस्तुविषयकं ज्ञानम्, तज्जन्यं सुखं चोपजायते, तदा सत्त्वगुणो विवृद्धो देह इति विज्ञेयम्। तदुक्तं भगवता–

सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते।
ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत।।[६] इति।

---

१. शि. पु. ६/१६/४६–४७।
२. भ. गी. शा. भा. १४/६।
३. भ. गी. रा. भा. १४/६।
४. भ. गी. १४/१७।
५. भ. गी. १४/९।
६. भ. गी. १४/११।

तदेवमत्र देहेऽन्तःकरणगतं वैषयिकं सङ्कुचितं ज्ञानम्, सुखं च सत्त्वगुणस्य कार्यम्; स सत्त्वगुणः स्वकार्येण विषयप्रकाशकेन ज्ञानेन, तज्जन्यसुखेन च जीवं देहे बध्नातीति सत्त्वं प्रथमं बन्धनम्।

रजोगुणः

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्।।[१]

इति भगवता श्रीकृष्णेन रजोगुणस्वरूपं तत्कार्यं चोपदिष्टम्। तदनुसारं रजो रागस्वरूपम्। अत्र रागो नाम प्राप्तो विषयः क्षयकारणे सत्यपि न क्षीयतामित्येवमाकारश्चित्तवृत्तिविशेषः, सुखभोगानन्तरमन्तःकरणे वर्तमानोऽभिलाषविशेषो वा। अत एवोक्तं भगवता पतञ्जलिमहर्षिणा– "सुखानुशयी रागः"[२] इति। अस्यायमर्थः– "सुखमनुशेते विषयीकरोतीति व्युत्पत्त्या सुखाभिज्ञस्य सुखानुस्मृतिपूर्विका सुखतत्साधनेषु च याऽपेक्षा सैव राग इति। यदा यस्य यादृशः सुखानुभवो भवति; तदा तच्चेतसि तादृशसुखसंस्कारस्तत्साधनसंस्कारश्चोदेति, ततः संस्कारात् तस्य सुखतत्साधनयोः स्मृतिर्भवति, स्मृत्या च पुनस्तादृशसुखस्य तत्साधनस्य च योऽभिलाषो भवति स एव राग इति"[३]।

किञ्चायं राग एव "रञ्जनाद् रागः" इति व्युत्पत्त्या वस्तुतो दुःखरूपेषु विषयेषु सुखबुद्धिं जनयित्वा तेषु चित्तस्य रञ्जनं विदधाति। यथा धूमपानमद्यपानादयो वस्तुतो दुःखरूपा अपि तद्व्यसनाधीना नरास्तान् सुखरूपा इत्येव मत्वा सेवन्ते। एवं रागः सुखाच्छादितानि दुःखान्येव प्रददातीत्ययं जीवस्य हितशत्रुः। अत एव भगवान् श्रीकृष्णः–

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।
तयोर्न वशमागच्छेत् तौ ह्यस्य परिपन्थिनौ।।[४]

इति रागं परिपन्थिशब्देन निर्दिष्टवान्। एतादृशरागात्मकमिदं रज इति रजोगुणस्वरूपम्।

---

[१] भ. गी. १४.७
[२] यो. सू. २.७
[३] यो. सू. भा. २.७ तत्त्ववैशारदी च।
[४] भ. गी. ३.३४

तदिदं रागात्मकं रजस्तृष्णां सङ्गं च जनयति। तृष्णा नाम प्राप्यमाणेष्वपि विषयेष्वतृप्तिः, अप्राप्तविषयाणामभिलाषो वा। सङ्गश्च प्राप्तविषयेषु मनस आसक्तिरूपः। एतादृशौ तृष्णासङ्गौ रजोगुणजन्यत्वात् तस्य कार्ये।

किञ्च, "काम एष क्रोध एष रजोगुणसमुद्भवः"[1], "रजसो लोभ एव च"[2] इति भगवदुक्त्या जीवानामन्तःकरणमावृत्य स्थिताः काम-क्रोध-लोभा अपि रजोगुणसमुद्भवाः। त एते कामादयो जीवस्याधोगतेः, निःश्रेयसाभ्युदयनाशस्य च मूलभूतानि द्वाराणि। अत एवोक्तम् –

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्।।[3] इति।

तत्रापि कामः साधकस्य ज्ञानविज्ञाननाशनपूर्वकं तं शत्रुवद्विशेषरूपेण बाधते। अत एवोक्तं भगवता–

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च।।
इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम्।।
तस्मात् त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्।।[4] इति।

एते रजोगुणकार्यरूपास्तृष्णासङ्गकामादयः स्वस्वपूर्वगुणजनिताः, अर्थात् विषयानुचिन्तनरूपायास्तृष्णाया विषयसङ्गः, तस्मात् कामः, ततः क्रोध इत्येवं क्रमेणोदिताः। तदुक्तम्–

ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते।
सङ्गात् सञ्जायते कामः कामात् क्रोधोऽभिजायते।।[5] इति।

---

[1] भ. गी. ३.३७
[2] भ. गी. १४.१७
[3] भ. गी. १६.२१
[4] भ. गी. ३.३९-४१
[5] भ. गी. २.६२

ननु तद् रजः कीदृशमनुबध्नाति जीवमित्याकाङ्क्षायामुक्तम्– "तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्" इति। उक्तप्रकारेण तृष्णादिरजोगुणकार्यावृतो जीवः शब्दादिविषयजन्यस्यैहिकस्य सुखस्य, स्वर्गाद्यामुष्मिकस्य सुखस्य वा प्राप्त्यर्थं सकामानि कर्माणि समाचरति। सकामेन विहितैः शुभाशुभकर्मभिः शुभाशुभवासनोदेति, येन जीवस्तद्वासनाप्रेरितो जन्ममरणादिषु नित्यं परिभ्रमति। अत्र कर्मशब्देन सकामकर्मैवाभीष्टम्, अन्यथा गीतोपदिष्टस्य कर्मयोगस्य मोक्षसम्पादकत्वानुपपत्तिः, निष्कामकर्मणोऽपि बन्धकत्वापत्तेः। एवं रजः सकामकर्मणा जीवं बध्नातीति विषयमेव दृढीकर्तुं भगवता पुनः– "रजः कर्माणि भारत"[१] इत्युक्तम्।

यथा सत्त्वं जीवात्मने सुखं प्रददाति, तथेदं रजस्तृष्णासङ्गादिभिर्वैषयिकं दुःखम् , सकामेन कर्मणा जन्ममरणादिदुःखं चाददति। अत एव भगवता श्रीकृष्णेन– "रजसस्तु फलं दुःखम्"[२] इत्युक्तम्। श्रीमदीश्वरकृष्णेनापि रजसो लक्षणमप्रीत्यात्मकमिति कृतम्[३]।

तदेवं रजोगुणः स्वात्मरूपेण रागेण, स्वकार्यरूपैस्तृष्णासङ्गकामादिभिः, तत्फलरूपेण दुःखेन च जीवमनुबध्नाति। तस्मात्–

लोभः प्रवृत्तिरारम्भः कर्मणाशमः स्पृहा।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ।।[४]

इति भगवदुक्त्या उक्तगुणा लोभादयो यदाऽन्तःकरणे विवर्धन्ते, तदा जीवो रजोगुणावृत इत्यवगन्तव्यम्। एवं रजो विविधैर्भावैर्जीवं देहे बध्नातीत्ययं द्वितीयो बन्धः।

तमोगुणः

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत।।[५]

---

[१] भ. गी. १४.९
[२] भ. गी. १४.१६
[३] सां. का. १२
[४] भ. गी. १४.१२
[५] भ. गी. १४.८

इति भगवता श्रीकृष्णेन तमोगुणस्वरूपं तत्कार्यं च निर्दिष्टम्। तदनुसारं तमोगुणोऽज्ञानादुत्पन्नो मोहस्य हेतुभूतो जीवं प्रमादेनालस्येन निद्रया च निबध्नाति। अस्य गीतामन्त्रस्य व्याख्यानवेलायां श्रीरामानुजभगवत्पादा अज्ञान-मोहन-प्रमादादिशब्दानामर्थमेवमुपपादितवन्तः– "ज्ञानादन्यदिहाज्ञानमभिप्रेतम्, ज्ञानं वस्तुयाथात्म्यावबोधः, तस्मादन्यत्, तद्विपर्ययमज्ञानं तमस्तु याथात्म्यविपरीतविषयज्ञानजं मोहनं सर्वदेहिनाम्, मोहो विपर्यज्ञानम्, विपर्ययज्ञानहेतुरित्यर्थः। तत्तमः प्रमादालस्यनिद्राहेतुतया तद्द्वारेण देहिनं निबध्नाति। प्रमादः कर्तव्यात् कर्मणोऽन्यत्र प्रवृत्तिहेतुभूतमनवधानम्, आलस्यं कर्मस्वनारम्भस्वभावः, स्तब्धतेति यावत्। पुरुषस्येन्द्रियप्रवर्तनश्रान्त्या सर्वेन्द्रियप्रवर्तनोपरतिर्निद्रा; तत्र बाह्येन्द्रियप्रवर्तनोपरमः स्वप्नः; मनस अप्युपरतिः सुषुप्तिः"[1] इति।

ननु "गुणाः प्रकृतिसम्भवाः"[2] इति भगवदुक्त्या गुणानां प्रकृतिजन्यत्वावगमादत्र पुनस्तमसोऽज्ञानजन्यत्वं कीदृशमिति चेत्, मैवम्, तदात्मकत्वप्रतिपादनाय तज्जन्यत्वस्योक्तत्वात्। तथा ह्यत्र तम इदमज्ञानस्वरूपमिति ज्ञापनाय 'तमस्त्वज्ञानजम्' इत्युपचारः। वस्तुतस्तु "अविवेक्यादेः सिद्धिस्त्रैगुण्यात्तद्विपर्ययाभावात्"[3] इति सांख्यकारिकोक्त्या त्रिषु गुणेष्वप्यज्ञानं वर्तत एव, तथापि तमोगुणे तद्विशेषतयाऽभिव्यक्तीभवतीति तमसोऽज्ञानात्मकत्वावबोधनार्थं तस्याज्ञानजत्वकथनं युक्तम्। एवमज्ञानलक्षणत्वादिदम् "अज्ञानं तमसः फलम्"[4], "प्रमादमोहौ तमसो भवतोऽज्ञानमेव च"[5] इत्यादिभगवदुक्त्याऽज्ञानस्य हेतुर्भवति। यथा यादृशो बीजस्तादृशानि फलानि तद्वृक्षे उपजायन्ते, इति नियमेनाज्ञानात्मकत्वादेव तमोबीजस्याज्ञानं फलं भवितुमर्हति।

पूर्वोक्तेन रजसाऽऽवृते जीवे रजसः कार्यरूपाः कामादयो यावद् घनीभूता भवन्ति, तावत् तमोगुणकार्यरूपा मोह-प्रमाद-अविवेकादयस्तस्मिन् क्रमेण प्रविष्टास्तद्विनाशमेवासादयन्ति। तदुक्तम्–

क्रोधाद्भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति।।[6] इति।

---

[1] भ. गी. रा. भा. १४.८

[2] भ. गी. १४.५

[3] सां. का. १४

[4] भ. गी. १४.१६

[5] भ. गी. १४.१७

[6] भ. गी. २.६३

ननु विनाशशीलेन तमसाऽवृता जना कीदृशैर्भावैः कर्मभिश्च जीवन्ति भुवने? इत्याकाङ्क्षायाम्–

असौ मया हतः शत्रुर्हनिष्ये चापरानपि।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी।।

आढ्योऽभिजानवानस्मि कोऽन्योऽस्ति सदृशो मया।
यक्षे दास्यामि मोदिष्य इत्यज्ञानविमोहिताः।।

अनेकचित्तविभ्रान्ता मोहजालसमावृताः।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ।।[1]

इति भगवदुक्त्या परपीडानुरक्ता निषिद्धकर्मावलम्बिनोऽहङ्कारविमूढात्मानश्च जीवाः पशोरपि हीनजीवनं यापयन्ति। तस्माद् यस्य देहेऽविवेक-प्रमाद-मोह-निद्राधिक्य-आलस्यादयः प्रवृद्धा भवन्ति, स तमोगुणेनावृत इत्यवगन्तव्यम्। अत एवोक्तं भगवता–

अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन।।[2] इति।

एवमज्ञानात्मकमिदं तमः स्वीयैः कार्यरूपैर्मोहादिभिर्विविधैर्भावैर्जीवं देहे बध्नातीतीदं तृतीयो बन्धः। तदेतेषां गुणानां वृत्तयः मतङ्गपारमेश्वरागमे एवं प्रतिपादिताः। तथा हि–

स्थैर्यं धैर्यं तथा दाक्ष्यमार्जवं लघुता तथा।
सन्तोषो मार्दवं शौचं व्यवसायः क्षमा स्मृतिः।।

सौहित्यं पटुता कान्तिर्दया दानं घृणा सदा।
औत्सुक्यं चेति सत्त्वस्य वृत्तयः समुदाहृताः।।

क्रौर्यं शौर्यं महोत्साहः स्वाभिमानः सकल्कता।
दार्ढ्यं निर्दयत्वं च भोगो दम्भश्च वृत्तयः।।

रजसः प्रतिपत्तव्यास्तन्त्रेऽस्मिन् पारमेश्वरे।
अरतिर्मन्दता दैन्यं पैशुन्यं गुरुता सदा।।

---

[1] भ. गी. १६.१४-१६

[2] भ. गी. १४.१३

निद्राधिक्यं मदालस्यं निरोधो मूढता च या।
तमसो वृत्तयः प्रोक्ता विभिन्नाः सर्वजन्तुषु।।[१] इति।

त इमे गुणाः "अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः[२] इति श्रीमदीश्वरकृष्णोक्त्याऽन्योऽ-न्याभिभवाः, अन्योऽन्याश्रयाः, अन्योऽन्यजननः, अन्योऽन्यमिथुनाः, अन्योऽन्यवृत्तयश्च भवन्ति। तथा हि– अन्योऽन्यं परस्परं सुखदुःखादिभिर्धर्मैरभिभवन्ति। यथा, यदा सत्त्वमुत्कटं भवति तदा रजस्तमसी अभिभूते भवतः, यदा रज उत्कटं तदा सत्त्वतमसी अभिभूते तिष्ठतः; यदा तमस्तदा सत्त्वरजसी अभिभूते चावतिष्ठेते । तथा चोक्तम्–

रजस्तमश्चाभिभूय सत्त्वं भवति भारत।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा।।[३] इति।

तथाऽन्योन्याश्रयाश्चेमे गुणाः, यथा द्व्यणुकाः परस्परं परमाण्वाश्रिताः तथैते गुणा अपीत्यर्थः। अन्योऽन्यजननाः, यथा मृत्पिण्डो घटं जनयति। अन्योऽन्यमिथुनाश्च यथा स्त्रीपुंसौ अन्योऽन्यमिथुनौ तथा गुणाः । परस्परसहाया इत्यर्थः। उक्तं च–

अन्योऽन्यमिथुनाः सर्वे सर्वे सर्वत्र गामिनः।
रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः।।

तमसश्चापि मिथुनं ते सत्त्वरजसी उभे।
उभयोः सत्त्वरजसोर्मिथुनं तम उच्यते।।
नैषामादिः सम्प्रयोगो वियोगो वोपलभ्यते ।। इति।

तथाऽन्योऽन्यवृत्तयश्च परस्परं वर्तन्ते, "गुणा गुणेषु वर्तन्ते" इति वचनात्। यथा सुरूपा सुशीला स्त्री पत्युः सुखहेतुः, सपत्नीनां सैव दुःखहेतुः, सैव रागिणां मोहं जनयति; एवं सत्त्वं सत्त्वस्यातिरिक्तं रजस्तमसोर्वृत्तिहेतुः। यथा राजा सदोद्युक्तः प्रजापालने दुष्टनिग्रहे शिष्टानां सुखमुत्पादयति, दुष्टानां दुःखं मोहं च, एवं रजो रजोऽतिरिक्तं सत्त्वतमसोर्वृत्तिमपि जनयति। तथा तमः स्वरूपेणाज्ञानावरणात्मकेन तमसोऽतिरिक्तं सत्त्वरजसोर्वृत्तिं जनयति। यथा मेघाः खमावृत्य जगतः सुखमुत्पादयन्ति, ते वृष्ट्या कर्षकाणां कर्षणोद्योगम्, विरहिणां मोहं च। एवमन्योऽन्यवृत्तयो गुणाः[४]।

---

[१] मतङ्गपारमेश्वर. वि. पा. १६.१७–२२
[२] सां. का. १२
[३] भ. गी. १४.१०
[४] द्र. सां. का. १२ गौडपादभाष्यम्।

नन्वेते त्रिविधाः सुख–दुःख–मोहात्मकास्त्रिगुणा विरुद्धार्था बन्धनरूपा एकस्मिन् कार्ये कथं प्रवृत्ता भवन्तीति जिज्ञासायां श्रीमदीश्वरकृष्णेन– "प्रदीपवच्चार्थतो वृत्तिः"[1] इत्युक्तम्। अस्यायमर्थः– यथा प्रदीपः परस्परविरूद्धानां तैल–तूल–अनलानां संयोगेन वस्तुप्रकाशरूपं कार्यं जनयति, यथा वा वात–पित्त–श्लेष्माणो देहधारणरूपं कार्यं निर्वहन्ति, तथा सत्त्वरजस्तमांसि परस्परं विरुद्धार्था अपि अन्योऽन्यसंयोगेन जीवात्मनो बन्धं निष्पादयन्ति।

नन्विमे गुणाः स्वतो जडत्वाज्जीवबन्धने कथं प्रवृत्ता भवन्तीति जिज्ञासायाम् –

ये चैव सात्त्विका भावा राजसास्तामसाश्च ये।
मत्त एवेति तान् विद्धि न त्वहं तेषु ते मयि।।[2]

इति भगवता श्रीकृष्णेन त्रिगुणाः ईश्वरचेतनस्य प्रेरणयैव प्रवृत्ता भवन्तीत्युपपादितम्।

इह प्रपञ्चे सर्वेऽपि जीवास्तत्कृतपूजायज्ञदानत्यागादिकर्माणि, तज्जन्यबुद्धि-धृतिसुखानि भावाश्च गुणत्रयावृता एव। अत एव भगवता श्रीकृष्णेन [3]पूजा–आहार–यज्ञ–तपः–दान–त्याग–ज्ञान–कर्म–कर्तृ–बुद्धि–धृति–सुखानां सात्विकं, राजसं, तामसं च स्वरूपं सविस्तारमुपवर्ण्य, पुनः–

न तदस्ति पृथिव्यां वा दिवि दैवेषु वा पुनः।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः।।[4]

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम्।।[5]

इति देव–दानव–मानवादिनिखिललोकेष्वपि त्रिगुणानां बन्धनसत्त्वं निर्दिष्टम्। एवं त्रिगुणा बन्धनरूपा अपि तत्र सत्त्वं किञ्चिन्मात्रबन्धनम्, रजो मध्यमरूपं बन्धनम्, तमश्च तीक्ष्णं बन्धनमिति विशेषः। अत एव जीवानां गत्युपपादनावसरे भगवता श्रीकृष्णेन–

---

[1] सां. का. १३
[2] भ. गी. ७.१२
[3] द्र. भ. गी.– पूजा १७.४, आहार–यज्ञ १७.८–१३, तप–दान १७.१७–२२, त्याग १८.७–९, ज्ञान–कर्म–कर्ता १८.२०–२८, बुद्धि–धृति–सुख १८.३०–३९।
[4] भ. गी. १८.४०
[5] भ. गी. ७.१३

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः।
जघन्यगुणवृत्तस्था अधो गच्छन्ति तामसाः ।।[१]

इति सात्त्विकानामूर्ध्वगतिः, राजसानां मध्यगतिः, तामसानां च नीचगतिश्च निर्दिष्टाः।

तदेतावता श्रीमद्भगवद्गीतानुसारं सत्त्वं, रजस्तम इत्याख्या गुणा बन्धरूपाः; तत्र सत्त्वं सुख-ज्ञानसङ्गाभ्याम्, रजस्तृष्णा-सङ्ग-कर्मभिः, तमो मोह-प्रमाद-आलस्यादिभिश्च देहे देहिनं बध्नन्तीतीमे गुणा बन्धा इति निर्दिश्यन्ते शास्त्रेषु।

मोक्षस्वरूपम्

तत्र तावद्भगवद्गीतायां चरमपुरुषार्थो मोक्षः ब्रह्मनिर्वाणम्[२], अमृतम्[३], साधर्म्यम्[४], अपुनरावृत्तिः[५], अव्ययपदम्[६], योगः[७] इत्यादिशब्दैर्व्यवह्रियते। स च बन्धहेतुभूतानां त्रिगुणानां तत्कार्याणां चातितरणरूपः । बन्धत्वेनोपपादितगुणतत्कार्यविलये तज्जन्यदुःखानामप्यत्यन्ताभावः। कार्योपादानभूतकारणस्य विनाशे कार्यस्यापि विनाशो नूनमेव, यथा कपालद्वयविनाशे तज्जन्यघटविनाशः। तस्मादत्र मोक्षो नाम गुणानां तत्कार्यभूतानां सुख-दुःख-मोहादीनां चाभावरूपः। अत एव भगवता श्रीकृष्णेन-

गुणानेतानतीत्य त्रीन् देही देहसमुद्भवान्।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ।।[८]

इति मोक्षे गुणातीतत्वं दुःखराहित्यं च निर्दिष्टम्। नायं मोक्षो दुःखानामत्यन्ताभावरूपमात्रम्, अपि तु निरतिशयनित्याव्ययानन्दलक्षणः। अत एवोक्तं भगवता-

---

[१] भ. गी. १४.१८

[२] एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वाऽस्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ।। (भ. गी. २.७२)

[३] "ज्ञेयं यत्तत् प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते" (भ. गी. १३.१२)

[४] इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ।। (भ. गी. १४.२)

[५] "गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः"। (भ. गी. १४.२)

[६] "गच्छन्त्यमूढाः पदमव्ययं तत्" (भ. गी. १५.५)

[७] समाधावचला बुद्धिस्तदा योगमवाप्स्यसि । (भ. गी. २.५३)

[८] भ. गी. १४.२०

> बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम्।
> स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते।।[1] इति।

अयं च मोक्षः–

> न तद्भासयते सूर्यो न शशाङ्को न पावकः।
> यद्गत्वा न निवर्तन्ते तद्धाम परमं मम।।[2]

इति भगवदुक्त्या स्वर्गादिवन्न क्षणिकः, किन्तु पुनरागमनरहितो नित्यः शाश्वतश्च ।

जीवन्मुक्तयोगिनां स्वरूपम्

तदेतादृशं मोक्षापरपर्यायं परमं ब्रह्मभावमापन्नो गुणसङ्गविदूरो विनष्टसर्वसञ्चितकर्माऽवशिष्टप्रारब्धमात्रः पुरुषो जीवन्मुक्तयोगीत्युच्यते।

ननु "क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे"[3] इति श्रुत्या "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा"[4] इति गीतोक्त्या च ब्रह्मभावापन्नस्य सर्वकर्मक्षयत्वप्रतिपादनात् कथं प्रारब्धोऽवशिष्यते? इति चेन्न "विमुक्तश्च विमुच्यते"[5] "तस्य तावदेव चिरं यावन्न विमोक्षेऽथ सम्पत्स्ये"[6] इति श्रुतिभ्याम् , "नेहाभिक्रमनाशोऽस्ति"[7], "पार्थ नैवेह नाऽमुत्र विनाशस्तस्य विद्यते"[8] इति गीतोक्तिभ्याम्, "नाभुक्तं क्षीयते कर्म" इति स्मृत्या चोत्पादितकार्यकर्मव्यतिरिक्तानां सञ्चितकर्मणामेव ज्ञानविनाशित्वावगमात् ।

प्रारब्धकर्मणाऽवशिष्टदेहस्य जीवन्मुक्तस्य स्वरूपं तदाचरणानि च स्थितप्रज्ञ-भक्त-गुणातीतेत्यादिशब्दैर्निरूपितानि भगवद्गीतासु[9]। इह खलु विमुक्तये कर्मयोगो भक्तियोगो ज्ञानयोगश्चेति योगाः प्रसिद्धाः पन्थानः । तत्र कर्मयोगेनासादितब्रह्मसाक्षात्कारो

---

[1] भ. गी. ५.२१
[2] भ. गी. १५.६
[3] मुण्ड. २.२.८
[4] भ. गी. ४.३७
[5] कठ. २.५.१
[6] छा. उ. ६.१४.२
[7] भ. गी. २.४०
[8] भ. गी. ६.४०
[9] द्र. भारतीयर्दन–बलदेव उपाध्याय. पृ. ६८

योगी 'स्थितप्रज्ञः' इति शब्देन, भक्तियोगेनावाप्तसमदर्शनो योगी 'भक्तः' इति शब्देन, ज्ञानयोगेन साक्षात्कृतब्रह्मापरोक्षज्ञानवान् योगी 'गुणातीतः' इति शब्देन च निर्दिश्यते। तेषां स्वरूपमाचरणानि च तत्तत् शब्देन विमृष्टानि। तथा हि–

प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते।।

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते।।

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम्।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता।।[1]

इत्युपक्रम्य–

या निशा सर्वभूतानां तस्यां जागर्ति संयमी।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः।।

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्।
तद्वत् कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी।।

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति।
स्थित्वाऽस्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति।।[2]

इत्यन्तं यावत् स्थितप्रज्ञस्य लक्षणं तदाचरणानि च,

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी।।

सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धिर्यो मे भक्तः स मे प्रियः ।।[3]

इत्यादिना

तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्।
अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो नरः ।।

---

[1] भ. गी. २.५५-५७

[2] भ. गी. २.६९-७०, ७२

[3] भ. गी. १२.१३-१४

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ।।[१]

इत्यन्तेन भक्तस्य लक्षणं तदाचरणानि च

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव।
न द्वेष्टि सम्प्रवृत्तानि न निवृत्तानि काङ्क्षति।।

उदासीनवदासीनो गुणैर्यो न विचाल्यते।
गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते।।

समदुःखसुखस्वस्थः समलोष्टाश्मकाञ्चनः।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ।।

मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते ।।[२]

इत्यादिभिश्च गुणातीतस्य स्वरूपं तदाचरणानि चोपवर्णितानि। एतदतिरिक्तं जीवन्मुक्तयोगिनं प्रति पण्डितः[३], योगारूढः[४], धीर[५] इत्यादिपदान्यपि प्रयुक्तानि।

एतेषां स्थितप्रज्ञ–भक्त–गुणातीतानां स्वरूपाणामाचरणानां चावलोकनेनेदं ज्ञायते यदेतेष्वनेकानि लक्षणान्याचरणानि च परस्परं समानान्येव दृश्यन्ते, साधनमार्गाणां भिन्नत्वेऽपि साध्यस्य साक्षात्कारोपरान्तं सकलयोगिनामनुभवस्याभिन्नत्वात्। यथा विभिन्नपथगानां सर्वासां नदीनामर्णवप्रवेशादनु तत्रैकत्वमेव। उक्तं हि खलु पुष्पदन्तेन "रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां, नृणामेको गम्यः"[६] इति। महाकविना कालिदासेनाप्युक्तम्–

---

[१] भ. गी. १२.१९–२०

[२] भ. गी. १४.२२–२५

[३] "ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः" (भ. गी. ४.१९)
"गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः" (भ. गी. २.११)
"पण्डिताः समदर्शिनः" (भ. गी. ५.१८)

[४] यदा हि नेन्द्रियार्थेषु न कर्मस्वनुसज्जते।
सर्वसङ्कल्पसंन्यासी योगारूढस्तदोच्यते ।। (भ. गी. ६.४)

[५] यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ।। (भ. गी. २.१५)

[६] शिवमहिम्न. श्लो. ७

बहुधा ह्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः।
त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे।।[१] इति।

यथा पूर्णरूपेण मिलनपर्यन्तं किञ्चित्कालं यावद् विभिन्ननदीनां वर्णादिकं विभिन्नरूपेण दृश्यते, तथैव तत्तन्मार्गे साधनवेलायामनुष्ठितान्याचरणानि, आसादिताः स्वभावाश्च विदेहमुक्तिपर्यन्तं भिन्नभिन्नरूपेणाऽपि स्थातुमर्हन्ति। अत एवोक्तं भगवता-

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति।।[२] इति।

स्थितप्रज्ञ-भक्त-गुणातीतादिषु किञ्चिदाचारणभेदेऽपि, न त आचारा गुणाश्च शास्त्रनिषिद्धा भवितुमर्हन्ति, साधनसमये शास्त्रानुकूलानामाचरणानां गुणानां वानुष्ठानद्वारा तेषां परिशुद्धप्रकृतिकत्वात्। तस्मात्सर्वविधजीवन्मुक्तमहापुरुषाणामाचरणानि शास्त्रसम्मतानि पवित्राणि दिव्यानि च।

तत्र कर्मयोगेनात्मसाक्षात्कारो जीवन्मुक्तयोगी साधनकालाज्जीवन्मुक्तिं यावत् स्वार्थ-आसक्ति-अभिमानादिभिर्विरहितः सन् लोकसङ्ग्रहार्थं कर्मानुतिष्ठति। तस्माज्जीवन्मुक्त्युत्तरकालेऽपि तस्मिंल्लोकहितैकचित्तेना-चरितकर्मबाहुल्यं भवितुमर्हति। अत एव-

यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ।।[३]
कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसङ्ग्रहमेवापि सम्पश्यन् कर्तुमर्हसि ।।[४]

इति भगवता श्रीकृष्णेन पण्डितशब्देन निर्दिष्टे जीवन्मुक्ते कामसङ्कल्पाद्यन्तरेणाचरितकर्मणामस्तित्वम्, तादृशकर्माचरणेनावाप्तसिद्धीनां जनकादीनामुदाहरणं चोपस्थापितम् । ननु जीवन्मुक्तयोगिनि कर्माधिक्ये तत्कृतकर्मण उत्पन्नानि फलानि तस्य बन्धकारणानि भविष्यन्ति, "अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्" इति स्मृत्या कर्मणोऽविनाशित्वावगमादिति चेत्, मैवम्, आसक्तभावेनानुष्ठितानामेव कर्मणां

---

१. रघुवंश. १०.२६
२. भ. गी. ३.३३
३. भ. गी. ४.१९
४. भ. गी. ३.२०

बन्धकत्वात्, जीवन्मुक्तस्य त्वनासक्तभावविहितत्वान्न तानि बन्धहेतवः। उक्तं च तत्प्राशस्त्यं भगवता–

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः।
कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः।।

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम्।।

यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः।
समः सिद्धावसिद्धौ च कृत्वाऽपि न निबध्यते ।।

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते।।[1] इति।

वस्तुतो जीवन्मुक्तयोगिनः कर्मणामनुष्ठाने परित्यागे वा न किञ्चित् स्वकीयं प्रयोजनं विद्यते[2], अथापि "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः"[3] इति भगवदुक्त्या "महाजनो येन गतः स पन्थाः"[4] इति महाभारतोक्त्या च जनसामान्यान् सन्मार्गे प्रेरयितुं तत्सत्पथनिर्धारणार्थं च तेऽपि सुकर्माचरणपथरता भवन्ति। अत एवादिष्टं भगवता–

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत।
कुर्याद्विद्वांसस्तथासक्ताश्चिकीर्षुर्लोकसङ्ग्रहम्।।[5] इति।

भक्तियोगेन साक्षात्कृतेश्वरो जीवन्मुक्तयोगी साधनकालतो जीवन्मुक्तिपर्यन्तमीश्वरविषयकान् श्रद्धाभक्तिशरणागत्यादिमृदुमधुरभावानासादयति। तस्माज्जीवन्मुक्त्यवस्थाप्राप्त्युपरान्तेऽपि तस्मिन् समस्तभूतान् प्रति प्रेमादिसद्गुणाः स्वभावतो प्रवर्धन्ते। एवं सर्वभूतेषु प्रेमदृष्टिप्रवर्धने स्वीयाराधितदेवतायाः सर्वत्र

---

[1] भ. गी. ४.२०–२३

[2] यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः।
आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते।।
नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः।। (भ. गी. ३.१७–१८)

[3] भ. गी. ३.२१

[4] महा. भा. वन. ३१३.११७

[5] भ. गी. ३.२५

दर्शनमप्यत्र कारणम्। अत एव भगवान् श्रीकृष्णः– "अद्वेष्टा सर्वभूतानाम्--" इत्यादिभिरुक्तमन्त्रैस्तस्य प्रेममयभावम्,

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः।।[1]

इति तस्य समदर्शित्वं च प्रदर्शितवान्।

साधनकालत एव भगवच्चिन्तनस्वभावस्यास्य जीवन्मुक्तस्य चित्तप्रवृत्तिः सांसारिककर्मणोऽपसृता परमेश्वर एव नैरन्तर्येणावतिष्ठत इत्यस्मिन् योगिनि कर्मयोगिवत् कर्मणां विस्तारो न सम्भवति। तस्मात्–

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते।।[2]

इति भगवदुक्त्याऽयं जीवन्मुक्तो बाह्ये किञ्चित्कर्मपरायण इव दृश्यमानोऽपि स परमात्मन्येव सर्वथा वर्तते।

ज्ञानयोगेन कृतब्रह्मापरोक्षज्ञानवान् गुणातीतो जीवन्मुक्तो योगी साधनकालतो जीवन्मुक्तिं यावद् ज्ञान-वैराग्य-उपरमताद्याध्यात्मिकगुणानासादित इति, अस्मिन् जीवन्मुक्त्यवस्थाप्राप्त्यनन्तरमपि तादृशा गुणा एव दृढतां विस्तरतां च यान्ति। अस्मिन् योगिनि शास्त्रविहितानि लौकिकानि, धार्मिकानि वाचरणानि प्रायः क्षीयन्त एव। जीविकानिर्वाहायावश्यकानि कर्माण्येवानेन कर्तृत्वाभिमानं विना क्रियन्त इव प्रतीयन्ते; साधनसमयादस्य तावदेवाभ्यासात्। तथा हि स साधनकालत एव–

नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित्।
पश्यञ्शृण्वन् स्पृशञ्जिघ्रन्नश्नन् गच्छन् स्वपञ्श्वसन्।।
प्रलपन् विसृजन् गृह्णन्नुन्मिषन्निमिषन्नपि।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन्।।[3]

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते।।[4]

---

[1] भ. गी. ५.१८
[2] भ. गी. ६.३१
[3] भ. गी. ५.८-९
[4] भ. गी. ३.२८

नान्यं गुणेभ्यः कर्तारं यदा द्रष्टाऽनुपश्यति।
गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति।।[१]

इति भगवदुक्त्या कर्तृत्वादयः सर्वे इन्द्रियाणां गुणानां वा धर्मा इति मत्वा स्वयं केवलः साक्षीन्द्रियादिभिर्भिन्नो गुणानां परश्चेति जानन् जीवन्मुक्त्यवस्थामधिगतो वर्तते। तस्मादीदृशचिन्तनमेवास्य सहजा प्रवृत्तिर्भवति, न तु कर्माद्याचरणम्। तथाप्यस्मिन् जीविकानिर्वाहोचितम्, सामान्यजनान् सत्कर्मसु प्रेरणपरं च किञ्चित् कर्मापि वर्तत इति विशेषः, "न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्"[२] इति भगवदुक्तेः। एवं स्थितप्रज्ञ-भक्त-गुणातीताद्यभिधेयेषु सर्वेषु जीवन्मुक्तयोगिषु विद्यमानान्याचरणानि परमपवित्राण्यादर्शानि च भवन्ति। एतेषामाचरणान्येव शास्त्रेषु सदाचारेति नाम्ना प्रसिद्धानि।

केचन विद्वांसो ब्रह्मसाक्षात्कारानन्तरमपि क्षालितलशुनभाण्डानुवृत्तलशुनवासनावदविद्यालेशरूपेण देहपातपर्यन्तं वर्तत इति मत्वा तदविद्यावशाद्योगिषु अनृतचोर्यपरस्त्रीगमनादिनिषिद्धाचरणान्यपि भवितुमर्हन्ति; कामक्रोधादीनामन्तःकरणधर्मवत्त्वात्तेषां देहपातपर्यन्तं देहे सम्भवेऽपि साक्षिभावापन्नस्य जीवन्मुक्तस्य न तत्र कश्चित् सम्बन्ध इति। प्रारब्धकर्मैव तं पापादिकार्येष्वपि बलान्नियोजयतीति वदन्ति। किन्तु नायं विचारो युक्तियुक्तः शास्त्रसम्मतो वा।

अत्रैवं प्रष्टव्यास्ते यद् ज्ञानिनां निषिद्धकर्माणि किं निमित्तानि? अन्तःकरणप्रवृत्तिनिमित्तानि, उत वा प्रारब्धभोगनिमित्तानि? इति। न चान्तःकरणप्रवृत्तिनिमित्तानीति वाच्यम्, तेषां विशुद्धान्तःकरणत्वात्। तथा हि कर्म-भक्ति-योग-ज्ञानादिविभिन्नमार्गैर्जीवन्मुक्तावस्थामापन्नाः सर्वेऽपि योगिनः साधनवेलायां नित्यनैमित्तिकादिविहितकर्मणामाचरणेन, काम्यनिषिद्धकर्मणां परित्यागेन, उपासनादिभिश्चाश्वासितविशुद्धान्तःकरणा भवन्ति। अत एव परमहंसेन सदानन्दयतीनाऽधिकारिलक्षणोपपादनावसरे- "अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता"[३] इति ब्रह्मसाक्षात्कारपूर्वमधिकार्यवस्थायामेव तेषां

---

[१] भ. गी. १४.१९
[२] भ. गी. ३.५
[३] वे. सा., पृ. ३-४

विशुद्धान्तःकरणत्वमुक्तम्। एवं नितान्तनिर्मलस्वान्तःकरणयुतेषु जीवन्मुक्तेषु पापाचरणसङ्कल्पादीनामसम्भवात् तेष्वन्तःप्रवृत्तिनिमित्तेन निषिद्धाचरणानि भवन्तीति कथनं वाचारम्भणमात्रम्, न तु युक्तियुक्तम्।

किञ्च, यदुक्तं कामादयोऽन्तःकरणधर्मा इति, तदप्ययुक्तम्। तथा ह्यन्तःकरणं नाम मनोबुद्धिचित्ताहङ्काराः; तेषु सङ्कल्पविकल्पा मनसः, निश्चयं बुद्धेः, चिन्तनं चित्तस्य, अभिमानमहङ्कारस्य च धर्मा इति शास्त्रे स्वीकारात् कथं कामादयोऽन्तःकरणधर्माः? नैतेऽन्तःकरणधर्माः, अपि तु तस्य विकाराः। अत एव भगवता श्रीकृष्णेन–

इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः।
एतत् क्षेत्रं समासेन सविकारमुदाहृतम्।।[1]

इतीच्छापरपर्यायकामादीनां सविकारत्वमुक्तम्। कामादीनामन्तःकरणधर्मत्वाङ्गीकारे यावदन्तःकरणसत्त्वं तावदेषा- मप्यस्तित्वमङ्गीकरणीयं भवति। विकारत्वेनाङ्गीकारेऽन्तःकरणसत्त्वेऽपि कामादीनां नाशः सम्भवति। अत एव भगवता–

कामक्रोधवियुक्तानां यतीनां यतचेतसाम्।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम्।।[2]

निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः।
द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत् ।।[3]

इति जीवन्मुक्तस्थितौ कामादीनां निवृत्तिरुक्ता । तस्मात् कामादीनामन्तःकरणविकारत्वात्, विकाराणां नाशस्योपपन्नत्वाच्च कामादयोऽन्तःकरणधर्मा देहपातपर्यन्तं जीवन्मुक्तेऽपि स्थिता निषिद्धकर्मप्रवृत्तिहेतवो भवन्तीति कथनमप्ययुक्तमशास्त्रसम्मतं च।

न च योगिनां निषिद्धाचरणानि प्रारब्धभोगनिमित्तानीति वाच्यम्, पापकर्मणामनवस्थाप्रसङ्गादिनानादोषोपपन्नत्वात् । तथा हि– पूर्वकृतकर्मणः फलभोग एव प्रारब्धः खलु ! कस्यचित् पापकर्मणः फलभोगार्थं पुनः पापकर्माचरितव्यमिति चेत्, तेनापि पुनः पापप्रवृत्तिरिति पापकर्मणामनवस्थाप्रसङ्गः, एतादृशव्यवस्थायाः

---

[1] भ. गी. १३.६
[2] भ. गी. ५.२६
[3] भ. गी. १५.५

शास्त्रसम्मतत्वाङ्गीकारे शास्त्राणां वैषम्यनैर्घृण्यदोषोपपत्तिः, निखिलकर्मणां प्रारब्धजन्यत्वमापतति, तदा 'सत्यं वद', 'धर्मं चर', 'मा हिंस्यात्सर्वभूतानि' इत्यादिविधिनिषेधवाक्यानि व्यर्थानि भवन्ति। तस्मात् पापकर्मणः प्रारब्धफलं दुःखम्, पुण्यकर्मणश्च सुखम्; न तु पापकर्म न वा पुण्यकर्म फलं भवितुमर्हति। तस्मात् प्रारब्धवशाज्जीवन्मुक्तो योगी चौर्यादिनिषिद्धकर्माण्याचरिष्यतीति कथनमपि पूर्ववदनुपपन्नमेव।

यत्तु गीतायाम्– "सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि"[१] इत्युक्तम्, तज्जीवन्मुक्तानां प्राक्तनमार्गभेदात् तत्तन्मार्गेष्वाचरिता विभिन्नाः सदाचाराः सिद्धावस्थायामपि भिन्नभिन्नरूपेण वर्तन्त इति प्रतिपादनाय, न तु तेषां स्वैराचारप्रदर्शनाय।

ननु प्राक्तनपुण्यकर्मणां प्रारब्धफलरूपेण प्राप्तानां सुखानामुपभोगार्थमेव जीवन्मुक्तस्य परस्त्रीगमनाऽपेयपानादिकर्मसु प्रवृत्तिरिति चेन्न, प्रारब्धजन्यसुखभोगस्य शास्त्रविहितस्वस्त्रीगमनसुपेयपानादिभिरप्युपपत्तेः। न च परस्त्रीगमनादिभिरपि तत्सुखसम्भव इति वाच्यम्, साधनकालतोऽपि शास्त्रविहितकर्मस्वेव तस्यानुरक्तिरिति तादृशशास्त्रविहितकर्मजन्यफलेष्वेव सुखानुभूतिसम्भवात्। यथा सस्याहारिप्राणिनां सस्यभक्षणे एव सुखानुभूतिरिति सस्यभक्षणे एव तेषां प्रवृत्तिः, न कदापि मांसभक्षणे; तत्र तेषामानन्दानुभूतेरभावात्, तथैव जीवन्मुक्तानां निषिद्धेषु न सुखानुभूतिरिति न कदापि तेषां निषिद्धकर्मप्रवृत्तिः। किञ्च, यदि निषिद्धाचरणद्वारेणोत्पन्नसुखानि पूर्वकृतपुण्यकर्मणां फलरूपेण प्रारब्धवशात् प्राप्तानीति स्वीक्रियेत, तर्हि निषिद्धकर्मनिषेधपराणां श्रुतिवाक्यानां वैयर्थ्यं दुर्निवारम्। तस्माज्जीवन्मुक्तयोगिषु प्रारब्धजन्यसुखभोगार्थमपि निषिद्धाचारप्रवृत्तेरनुपपत्तिरिति तेषु सदाचारत्वोपपादनमेवोपपन्नतरम्।

केचन विचारकाः स्वेच्छा, अनिच्छा, परेच्छा चेति त्रिविधेषु प्रारब्धेष्वनिच्छाप्रारब्धस्याधारेण जीवन्मुक्तोऽनिच्छन्नप्यनिच्छाप्रारब्धवशाद् दुराचारे प्रवृत्तो भवतीति वदन्ति। एतत्पुष्ट्यर्थं ते–

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः।।[२]

---

[१] भ. गी. ३.३३
[२] भ. गी. ३.३६

इत्यर्जुनजिज्ञासोपशान्तये–

काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्।।[१]

इति भगवता श्रीकृष्णेनोपदिष्टं वचनं प्रमाणयन्तो जीवन्मुक्तेष्वनिच्छाप्रारब्धवशात् कामक्रोधादयः समुद्भवन्ति, तैस्ते दुराचारप्रवृत्ता भवन्तीति साधयन्ति। किन्तु गीताया दुरुपयोगार्थम्, जनेषु भ्रमोत्पादनार्थं चैतादृशो वादः न तु यथार्थोपस्थापनार्थम्। तथा हि नात्रार्जुनस्य जिज्ञासाऽनिच्छाप्रारब्धभोगविषयिणी, न वा भगवत उपदेशस्तद्विषयकः, अपि तु प्रश्नोत्तरावुभावपि क्रियमाणपापकर्मविषयकौ। अत्रार्जुनजिज्ञासाया अयं भावः– ईश्वरो यदि मनुष्यैः पापकर्म कारयितुं नापेक्षते चेत्, तर्हि मनुष्यः केनचिद् बलान्नियोजित इव पापकर्मणि प्रवृत्तो भवतीत्यत्र कारणं किम् ? इति। अस्योत्तररूपेण भगवान् श्रीकृष्णः क्रियमाणपापकर्मणो हेतवः कामादय इत्युक्त्वा नेश्वरस्य प्रारब्धस्य चात्र कारणत्वमिति प्रतिपादितवान् ।

यदि कामादयः प्रारब्धपरिणामा भवेयुस्तर्हि, अग्रे पुनर्भगवान् श्रीकृष्णः "पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्"[२] इति कामादीनां विनाशाय नादिशेत्, प्रारब्धस्यावश्यम्भावित्वात्। तस्मादत्र प्रारब्धभोगविषयकः प्रसङ्गो नास्ति।

अनिच्छाप्रारब्धस्तु स्वपरेच्छाभावेऽपि प्राकृतिकविपाकेनोत्पन्नानां सुख-दुःखादीनां भोग इत्यर्थः। यथा विद्युत्पतन–भूकम्पन–अतिवृष्टि–अनावृष्ट्यादिभिरुत्पन्नं दुःखम्, तापमये ग्रीष्मकालेऽकस्मात् कदाचिदागतवृष्ट्योत्पन्नं सुखम्। एवमेव परेषामिच्छाप्रयत्नादिभिर्यानि सुखदुःखानि जीवन्मुक्तं प्रत्यायान्ति, तानि परेच्छाप्रारब्धवशादागतानि। यथा चोरादिभिर्धनापहरणेन दुःखम्, कस्माच्चिदाढ्याद्धनप्राप्त्या सुखमित्यादयः।

तदेवं स्वेच्छा–अनिच्छा–परेच्छाप्रारब्धजन्यसुखदुःखभोगार्थमपि जीवन्मुक्तयोगिषु निषिद्धाचरणानामस्तित्वं नैव सिद्ध्यति, उक्तप्रकारेण तद्व्यवस्थासम्भवात्, अन्यथा विविधदोषोपपत्तेः। तस्मात् कर्म–भक्ति–ज्ञानादिविभिन्नमार्गेणात्तसिद्धावस्थेषु जीवन्मुक्तेषु योगिषु येन केन प्रकारेणापि निषिद्धाचरणानि न सम्भवन्तीति तेषां सर्वाण्यपि कर्माणि शास्त्रानुकूलानि, आदर्शपूर्णानि, पवित्राणि च भवन्तीत्येव श्रीमद्भगवद्गीतासम्मतम्।

---

[१] भ. गी. ३.३७

[२] भ. गी. ३.४१

एतादृशानां जीवन्मुक्तानामेव प्रारब्धपरिक्षयानन्तरं तत्प्रारब्धसूत्रबद्धदेहपाते विदेहमुक्तिर्जायते। तस्यामवस्थायां नान्तःकरणाद्यवयवविशिष्टसूक्ष्मशरीरम्, न वा कारणशरीमप्यवतिष्ठत इति तत्र केवलं सच्चिदानन्दघनपरमात्मैव सर्वत्र चकाशते।

सिद्धान्तशिखामण्यनुसारं बन्धस्वरूपम्

तत्र तावद्वीरशैवदर्शने शक्तिसङ्कोचविकासाभ्यां बन्धमोक्षौ व्यवस्थाप्येते। अर्थाद् इच्छा-ज्ञान-क्रियाशक्तिसङ्कोचरूपमलत्रयावरणमेव बन्धः, पुनस्तासां पूर्णविकास एव मोक्षः। अत एव तत्र भवद्भिः टी. जी. सिद्धप्पाराध्यैः– "मलपाशावरणमेव जीवस्य बन्ध उच्यते"[1] इति बन्धस्वरूपम्, श्रीशङ्करशास्त्रिभिश्च– "सङ्कुचित-शक्तित्रयरूपमलत्रयनिवृत्तिः शक्तिविकासरूपशिवत्वप्राप्तिर्मोक्षः"[2] इति मोक्षस्वरूपं निगदितम्।

बन्ध(मल)स्वरूपम्

"जीवत्वं दुःखसर्वस्वं तदिदं मलकल्पितम्" इति रेणुकभगवत्पादैर्मलावृतत्वमेव जीवत्वमिति समुपदिष्टत्वादत्र मल एव बन्धनम्। परमेश्वरस्य नैसर्गिकेच्छा-ज्ञान-क्रियाशक्तीनां सङ्कोच एव मल इत्युच्यते। पाशवज्जीवं बध्नातीत्ययं मल आगमशास्त्रे पाशशब्देनाप्युच्यते। एतस्यावरणेन जीवो मलिनः पशुश्च भवतीत्यत्र दर्शने मलशब्देनास्य व्यवहारो दरीदृश्यते। वीरशैवसिद्धान्ते आणव-मायीय-कार्मभेदेन त्रिविधो मलोऽङ्गीकृतः[3]। अत एव श्रीशिवानुभवशिवाचार्याः– "स्थूलचिदचिद्रूप-

---

[1] श्वे. उ. वीरशैवभाष्य १.८

[2] ई. उ. शाङ्करीव्याख्या ११

[3] शैवागमशास्त्रस्य सिद्धान्तादिशैवदर्शनेषु च १. मलः (आणवः) २. तिरोधानशक्तिः, ३. कर्म, ४. माया, ५. महामाया (बिन्दु) इति पञ्चविधाः पाशाः परिगणिताः। एतेषु तिरोधानशक्तिर्न केवलं पाशेषु परिगणिता, किन्तु पारमेश्वरशक्तिष्वपि। मुख्यतया त्वियं पारमेश्वरी शक्तिरेव। इयं जीवानामुपरि ईश्वरस्य शक्तिपातसमयेऽनुग्रहशक्तिरूपेण जीवबन्ध-विमोचनसाधिकाऽपि भवति। तस्मादत्रेयं पाशत्वेन न गृहीता। अत एवोक्तं मृगेन्द्रागमे–

तासां माहेश्वरी शक्तिः सर्वानुग्रहकारिका।
धर्मानुवर्तनादेव पाश इत्युपचर्यते ॥
परिणामयत्येताश्च रोधान्तं कार्कचित्त्विषा।
यदोन्मीलनमाधत्ते तदानुग्राहिकोच्यते ॥ इति।

(मृ. आ. वि. पा. ७.११-१२)

शक्तिविशिष्टो जीवः। ----स्थूलत्वं च मलत्रयविशिष्टत्वम्"[१] इति जीवात्मनो लक्षणनिरूपणावसरे तस्य मलत्रययुक्तत्वं प्रतिपाद्य पाशानां त्रैविध्यं सूचितवन्तः।

आणवमलः

परमेश्वरस्येच्छाशक्तिरेव सङ्कुचिता सती यदा जीवमावृणोति, तदाऽऽणवमल इति कथ्यते। अस्यावरणेन हि जीवः स्वकीयं विभुत्वं विस्मृत्य "अपूर्णोऽस्मीति" स्वात्मानमणुत्वेन व्यवहरति। तदुक्तं श्रीशिवानुभवशिवा-चार्येण– "अप्रतिहतस्वातन्त्र्यरूपेच्छाशक्तिः सङ्कुचिता सती अपूर्णम्मन्यतारूपमाणवमलम्"[२] इति तल्लक्षणमुपस्थापितम्। क्षेमराजचार्येणापि– "अपूर्णम्मन्यतारूपमाणवमलम्"[३] इत्युक्तम्। अयमाणव-मल एव शैवागमेषु मल-पशु-नीहाराद्यभिधानैर्व्यवह्रियते[४]।

तदीदृश आणवमलोऽनादिकालतः सहजतया ताम्रगतकलङ्कमिव जीवमावृत्य तं बध्नाति। आणवमलेन बद्धो जीवः संसारी विषयाधीनोऽपूर्णसङ्कल्पको भोक्ता परतन्त्रश्च सन् पाशावृतत्वात् पाश्यः, दीक्षया शोधनीयत्वात् शोध्यः, गुरुणा बोधनीयत्वाद् बोध्यश्चेति कथ्यते। तदुक्तम् –

एवमेव बिन्दूपरपर्याया महामाया, मायागुणविशिष्टत्वेन पाशशब्दिताऽपि "परमपि सितं कारणं बोधकं तत्" (सि. सा. ज्ञा. पा. ८) इति सिद्धान्तसारवलिवचनानुसारमियं शुद्धाध्वनो हेतुभूता शुद्धशिवस्वरूपावबोधसहकारिणी च भवतीति वीरशैवाचार्यैर्जीवबन्धहेतुभूतपाशत्वेन न परिगणिता। तस्माद्वीरशैवसिद्धान्ते त्रय एव पाशाः। काश्मीरशैवदर्शनेऽप्येवमेव मन्यते। लकुलीशपाशुपतमते च १. मिथ्याज्ञानम्, २. अधर्मः, ३. सक्तिहेतुः, अर्थाद् विषयासक्तिहेतुर्विषयसन्निधानादिः, ४. च्युतिः सदाचरणाद् भ्रंशः, ५. पशुत्वमूलम्, अर्थाज्जीवत्वप्रापकोऽनादिसंस्कार इति पञ्चविधा मला अङ्गीकृताः। तदुक्तम् –

मिथ्याज्ञानमधर्मश्च सक्तिहेतुश्च्युतिस्तथा ।
पशुत्वमूलं पञ्चैते तन्त्रे हेया विविक्तितः ।। इति। (स. द. स., पृ. ३००)

इमे त्रिविधमलेष्वेवान्तर्भवन्ति।

[१] *शि. द., पृ. १४*

[२] *शि. द., पृ. २१*

[३] *प्रत्यभिज्ञा. ९ सूत्रस्य व्याख्या।*

[४] *मृगेन्द्रागमे (वि. पा. ७.७) पशु-नीहार-मृत्यु-मूर्छा-मल-अञ्जन-अविद्या-आवृत्ति-रुक्-ग्लानि-पाप-मूल-क्षपेति, किरणागमे (वि. पा २.२०) मल-अज्ञान-पशुत्व-तिरस्कारकरस्तम-अविद्या-आवृत्ति-मूर्छेति चाणवमलस्य पर्यायनामानि निगदितानि।*

नीहारोऽनादिरेको मनुजसहभवस्ताम्रगा कालिकेव।
स्वाधिकारान्तनाशि-प्रतिपुरुषदृगावरितानेकशक्तिः ।।
पाश्यः शोध्यश्च बोध्यः स तु भवति यतो भोक्तृता पारतन्त्र्यम् ।
कर्मादेर्योगः------------------------------- ।।[1] इति।

किरणागमेऽप्युक्तम्–

तत्स्वभावात् पशुः पाश्यः शोध्यो बोध्यो मतस्त्विह।
पाश्यादिवृत्तयो यास्तु तस्य भेदा व्यवस्थिताः।।
मले सति भवन्त्येता भोक्तृत्वं च न केवलम् ।।[2] इति।

ननु पूर्वजन्मानुष्ठितकर्मवासनैव रागरूपेण जीवमावृत्य तद्भोक्तृत्वे हेतुर्भवतीति राग एवात्र जीवस्य भोक्तृत्वे कारणं भवतु मलस्य किं प्रयोजनम्? इति चेत्, मैवम्, मलविशिष्टजीवे एव रागस्यापि प्रवृत्तेः, मलस्यैव रागाद्यधिष्ठानभूत-शरीरोत्पादनहेतुत्वाच्च। अत एवोक्तम्–

चौर्यं हि बीजमावेक्ष्य यथा निगडबन्धनम्।
तथा पशुत्वमालोक्य रागतत्त्वं प्रवर्तते।
पशुत्वेन हि भोक्तृत्वं मायाबन्धस्तनुस्थितः।।[3] इति।

मायीयमलः

परशिवस्य ज्ञानशक्तिसङ्कोचरूपोऽयं मायीयो मलः। नद्यादिषु विशालत्वेन स्थितं निर्मलं जलमेव घटादिष्वागतं सङ्कुचितं सत् कालान्तरे यथा मलिनं भवति, तथा परशिवस्यापरिमितं निर्मलं ज्ञानं सङ्कुचितं सद् जीवबन्धनकारकं भवति। अत एव "ज्ञानं बन्धः"[4] इति शिवसूत्रस्य व्याख्यानावसरे श्रीक्षेमराजेन– "स एव शिवाभेदाख्यात्यात्मकाज्ञानस्वभावोऽपूर्णम्मन्यतात्मकाणवमलसतत्त्वसङ्कुचितज्ञानमात्मा बन्धः"[5] इति सङ्कुचितज्ञानस्यैव बन्धत्वमुक्तम्। अत एव भगवता श्रीकृष्ण-द्वैपायनव्यासेन–

---

[1] सि. सा., ज्ञा. पा, ६
[2] किरणा. वि. पा. २.२२–२३
[3] किरणा. वि. पा. ३.३–४
[4] शि. सू. १.२
[5] शि. सू. वि., पृ. १२

ज्ञानं बन्ध इतीदं तु द्वितीयं सूत्रमीशितुः।
ज्ञानमित्यात्मनस्तस्य किञ्चिज्ज्ञानक्रियात्मकम्।।[१]

इति "ज्ञानं बन्धः" इति शिवसूत्रगतस्य ज्ञानशब्दस्य किञ्चिज्ज्ञानमिति तस्य सङ्कुचितत्वमेवोपस्थापितम्। अत एवेदमज्ञानम्, अविद्येति च कथ्यते। अनेन मायीयमलाऽऽवरणेन जीवः स्वात्मानं शुद्धबुद्धमुक्तस्वरूपपरशिवाद् भिन्नं मत्वा, अनित्यदेहादिष्वहमिति, सती-सुत-गृहादिषु च ममेति व्यवहरन् मोहितो भवति। तदुक्तं रेणुकभगवत्पादैः-

किञ्चित्कर्ता च किञ्चिज्ज्ञो बद्धोऽनादिशरीरवान्।
अविद्यामोहिता जीवा ब्रह्मैक्यज्ञानवर्जिताः।।[२] इति।

आणवमलाऽऽवरणेनाखण्डाद्विच्छिद्याणुभूते जीवात्मनि मायीयमलोऽन्तः-करणज्ञानेन्द्रियादिसम्बन्धापादकत्वेन जीवं बध्नाति, अत एव जीवे भेदबुद्धिर्जनयति। तदुक्तं शिवानुभवशिवाचार्येण- "ज्ञानशक्तिः सङ्कुचिता सती सर्वज्ञत्वस्य किञ्चिज्ज्ञत्वाप्तेरन्तःकरणबुद्धीन्द्रियसम्बन्धवशाद् भेदवेद्यप्रथारूपं मायीयं मलम्"[३] इति, क्षेमराजेनापि च- "भिन्नवेद्यप्रथारूपं मायीयं मलम्"[४] इत्युक्तम्।

किञ्च, "मायीयमल एव इन्द्रियादिषु तन्द्राऽऽलस्यादिरूपेण जडत्वमभिवर्धयते। अत एव त्रिलोचन- शिवाचार्यैः-

मायाख्यं चित्रशक्त्या परिगतमकलं कष्टवर्त्मैकबीजं
नित्यं कर्मान्तरोधि स्वकृतिनिवसनं तत्कृतेर्व्यापकं च।
कार्याचित्त्वप्रकाशादशिवकरं मोहकं स्वापकाले
सर्वात्मावासम्---------------------- ।।[५]

इति मायापाशस्वरूपोपवर्णनावसरे 'कार्याचित्त्वप्रकाशादशिवकरं मोहकम्' इत्यनेन तस्य जडताभिवर्धकत्वम्, अत एव तस्य जडत्वं मोहकत्वं च प्रतिपादितम्। तस्मादेवं मायीयमल इन्द्रियादिभिर्जीवात्मनः सम्बन्धं कृत्वा तस्मिन् भेदबुद्धिं मोहं जडत्वं च जनयित्वा जीवं बध्नातीत्ययं द्वितीयो बन्धः।

---

[१] शि.पु. ६.१६.४६-४७
[२] सि. शि. ५.४७
[३] शि. द., पृ. २१
[४] प्रत्यभिज्ञा. ९ सूत्रस्य व्याख्या।
[५] सि. सा., ज्ञा. पा. ८

कार्ममलः

परमेश्वरस्य सङ्कुचिता क्रियाशक्तिरेव कार्ममल इत्यभिधीयते। अयं शुभाशुभवासनारूपः। अनयैव वासनया बलान्नियोजितो जीवः शुभाशुभानि कर्माणि कुर्वन् तत्कर्मजनितानि सुखदुःखात्मकानि फलानि वानुभवन् स्वकर्मानुसारेणैव देवतिर्यङ्मनुष्यादिनानायोनिषु परिभ्रमति। तदुक्तं रेणुकभगवत्पादैः–

परिभ्रमन्ति संसारे निजकर्मानुसारतः।
देवतिर्यङ्मनुष्यादिनानायोनिविभेदतः।।
चक्रनेमिक्रमेणैव भ्रमन्ति हि शरीरिणः।
जात्यायुर्भोगवैषम्यकारणं कर्म केवलम् ।।[१] इति।

अत एव "क्रियाशक्तिः सङ्कुचिता सती सर्वकर्तृत्वस्य किञ्चित्कर्तृत्वप्राप्तेः कर्मेन्द्रियसम्बन्धवशात् शुभाशुभवासनामयं कार्ममलम्"[२] इति श्रीशिवानुभवशिवाचार्येण, "शुभाशुभानुष्ठानमयं कार्ममलम्"[३] इति श्रीक्षेमराजाचार्येण च मायीयमलस्य लक्षणमुक्तम्।

ननु शुभाशुभकर्मानुष्ठानेन तद्वासनोत्पद्यते, सा च जीवं कर्मणि नियोजयति, तदनुष्ठानेन च पुनर्वासना, इत्येवं बीजाङ्कुरन्यायेनानवस्थाप्रसङ्ग इति चेन्न, "यथानादिर्मलस्तस्य कर्माप्येवमनादिकम्"[४] इति किरणागमवचनानुसारं कार्ममलस्यानादित्वाङ्गीकारात्। यथा बीजाङ्कुन्यायापतिताया अनवस्थाया निवारणार्थमङ्कुरसत्ताया अनादित्वमङ्गीक्रियते, तथैवात्रापि मन्तव्यम्। एवमनादिकालतोऽयं कार्ममल आत्मनि संस्काररूपेण सूक्ष्मतया वर्तत इत्यस्य 'अदृष्टम्' इत्यपरं नामधेयम्। अत एवोक्तं मृगेन्द्रागमे– "कर्म व्यापारजन्यत्वाददृष्टं सूक्ष्मभावतः"[५] इति।

किञ्च त्रिलोचनशिवाचार्यैरपि–

देहाद्यैर्योगहेतुर्विविधमपि च नुश्चित्रभोगप्रसूति-
र्नाशोत्पत्त्याऽप्यनादि प्रतिनरनियतं सूक्ष्मभावाददृष्टम्।

---

[१] सि. शि. ५.४८–४९
[२] शि. द., पृ. २१
[३] प्रत्यभिज्ञा. ९ सूत्रस्य व्याख्या।
[४] किरणा. वि. पा. ३.७
[५] मृगेन्द्रा. वि. पा. ८.३

वाग्धीकार्यार्थसाध्यं फलजनकधरं कर्म धर्मादिभोग्यं
स्वापे मायाप्तपाकं स्थितिमतिसहितं भोगदं स्यात् कलान्तम् ।।[१]

इति कार्ममलस्वरूपतत्कार्यनिरूपणावसरे तस्यानादित्वमदृष्टत्वं च संसूचितम्।

तदेवमाणवमलमणुत्वापादकत्वेन, मायीयमलमखण्डपरशिवाद्विच्छिद्याणुभूतस्य तस्यान्तःकरणबुद्धीन्द्रियानां भेदबुद्धेश्च सम्बन्धापादकत्वेन, कार्ममलं शुभाशुभकर्मप्रवर्तकत्वेन च जीवस्य बन्धनकारणानि भवन्ति। तदिदं बन्धापरपर्यायं मलत्रितयमनादिजीवनिष्ठम्। तस्माद्यथा शिवः परिपूर्णेच्छा–ज्ञान–क्रियाशक्तिविशिष्टो निर्मलो भवति, तथा जीवोऽपि तच्छक्तिसङ्कोचभूतैराणव–मायीय–कार्ममलैः सहजतयाऽऽवृतो मलिनः। तदुक्तं किरणागमे–

अनादिमलसम्बन्धान्मलिनत्वमणौ स्थितम्।
अनादिमलमुक्तत्त्वान्निर्मलत्वं शिवे स्थितम् ।।
ईदृग्रूपं स्थितं ताभ्यां शुद्धाशुद्धं यथार्थतः ।।[२] इति।

नन्वेवमनादिकालतो जीवमावृत्य स्थितो मलो जीवस्य धर्म एव भवतु इति चेत्, मैवम्, तस्य चिद्धर्मत्वात्। तस्माद्यथा भास्करे तद्धर्मरूपेण विद्यमानः प्रकाशो ग्रहणकाले तिरोहितः सन् पुनस्तद्विमोचने यथा पूर्वं भासते, तथा बद्धावस्थायां मलत्रयं जीवमावृत्य तद्धर्मवत् प्रतीयमानमपि, मोक्षदशायां शक्तिपात–शिवदीक्षा–उपासनादिभिस्तदशेषतया निवृत्तं आत्मनो चिद्धर्मतया पुनः प्रकाशते। तदुक्तम्–

अविद्याराहुनिर्मुक्तो ज्ञानचन्द्रः सुनिर्मलः।
प्रकाशते पराकाशे परानन्दमहाद्युतिः।।[३] इति।

उक्तं च किरणागमेऽपि–

आत्मनोऽनादिसम्बन्धाद् धर्म इत्युपचर्यते।
कथं तज्ज्ञानयुक्तत्वादज्ञानगुणतां गतः।।
तस्य धर्मो न धर्मत्वे परिणामः स्फुटो भवेत्।
चिद्धर्मे पुंसि नो धर्मो यदि स्यात् परिणामवान् ।।

---

[१] *सि. सा., ज्ञा. पा. ७*
[२] *किरणा., वि. पा. २.३-४*
[३] *सि. शि. १९.२०*

एकस्मिन् पूर्यते ज्ञानमन्यस्मिन् तत्तिरोहितम्।
परिणामोऽचित्तः प्रोक्तश्चेतनस्य न युज्यते ।।[1] इति।

तस्मान्मलत्रयं जीवेऽनादिकालेनाऽऽवरणरूपेणैव निवसति, न तद्धर्मरूपेण। तदावरणमद्वैतवेदान्तवन्न कल्पितमौपाधिकं वा, अपि तु स्वाभाविकं सत्यं च। अतो जीवः स्वभावतः परमात्मनो भिन्नः। तस्माद्यथा शिवः सत्यस्तथा जीवोऽपि सत्य इति संसारदशायां तयोर्भेदो नौपाधिकः, अपि तु वास्तविकः। मुक्तौ तयोरभेदोऽपि सत्य एवाङ्गीक्रियते। तथा हि स्मर्यते–

शिवः सत्यं जगत्सत्यं जीवः सत्यं स्वभावतः।
तेषामभेदः सत्यो वा क्रिमिभ्रमरयोरिव।।[2] इति।

एतन्मलत्रयरूपपाशबद्धोऽयं जीवः पशुरित्यभिधीयते ।

पशोर्दुःखत्रयभोक्तृत्वम्

भूत्वा कर्मवशाज्जन्तुर्ब्राह्मणादिषु जातिषु।
तापत्रयमहावह्निसन्तापाद्दह्यते भृशम् ।।

कर्ममूलेन दुःखेन पीड्यमानस्य देहिनः।
आध्यात्मिकादिना नित्यं कुत्र विश्रान्तिरिष्यते।।[3]

इति रेणुकभगवत्पादोक्त्या पूर्वोक्तमलत्रितये कार्ममलप्रभावेण जीवो नानाशरीरगमनागमनपूर्वकं दुःखमनुभवति। तदिदं दुःखम् आध्यात्मिकम्, आधिभौतिकम्, आधिदैविकं चेति त्रिविधम् । तत्राध्यात्मिकं बाह्याभ्यन्तरभेदेन द्विविधम्। बाह्याभ्यन्तरमेव शरीरमानसमित्यपि व्यवह्रियते। वातपित्तश्लेष्मविपर्ययजनितं ज्वरातीसारादि बाह्यम् । मानसं रागद्वेषादिहेतोः प्रियवियोगाप्रियसंयोगादिजनितम्। आधिभौतिकं चतुर्विधभूतग्रामनिमित्तं मनुष्यपशुमृगपक्षिसरीसृपदंशमशकयूकामत्कुणमत्स्यमकरग्राहस्थावरेभ्यो जरायुजाण्डजस्वेदजोद्भिज्जेभ्यः संकाशादुपजायते। आधिदैविकम्– देवानामिदं दैवम्, दिवः प्रभवतीति वा दैवम्, तन्निमित्तीकृत्य यदुद्भवति, अतिशीतोष्णवातवर्षादिकं ग्रहयक्षराक्षसादिग्रहणं च। तदुक्तं भगवत्पादैः–

---

[1] किरणा. २.२४–२७
[2] ब्र. सू. श्रीकर. २.३.४०
[3] सि. शि. ५.६५–६६

आध्यात्मिकं तु प्रथमं द्वितीयं चाधिभौतिकम्।
आधिदैविकमन्यच्च दुःखत्रयमिदं स्मृतम्।।
आध्यात्मिकं द्विधा प्रोक्तं बाह्याभ्यन्तरभेदतः।
वातपित्तादिजं दुःखं बाह्यमाध्यात्मिकं मतम्।।
रागद्वेषादिसम्पन्नमान्तरं परिकीर्त्यते।
आधिभौतिकमेतद्धि दुःखं राजादिभूतजम्।।
आधिदैविकमाख्यातं ग्रहयक्षादिसम्भवम्।।[1] इति।

तदेतत्तापत्रयपीडितो मलावृतो जीवस्तद् दुःखान्मुक्तिमिच्छन् श्रीगुरुमुपागच्छति। गुरुस्तं मलनिवारणसक्षमदीक्षाभिः संस्कृत्य शिवज्ञानमुपदिशति। तदुपदेशबलेन जीवः षट्स्थलोपासननिरतः सन् तेन कैवल्यमश्नुते। तत्र गुरुः कीदृशः? का नाम दीक्षा? षट्स्थलोपासना च कथम्? इत्यादिविषया मोक्षोपायविमर्शाख्ये षष्ठे परिच्छेदे वक्ष्यन्ते। साम्प्रतं सिद्धान्तशिखामण्यनुसारं मोक्षस्वरूपं जीवन्मुक्तशिवयोगिस्वरूपं च परिशील्यते।

सिद्धान्तशिखामण्यनुसारं मोक्षस्वरूपम्

तत्र तावद्वीरशैवसिद्धान्ते मलत्रयरूपपाशस्यात्यन्तिकनिवृत्तिपुरःसरं शिवत्वावाप्तिरेव मोक्ष इति स्वीक्रियते। स च शिवजीवापरपर्याययोर्लिङ्गाङ्गयोः सामरस्यात्मकः। अत एव रेणुकभगवत्पादैः–

जले जलमिव न्यस्तं वह्नौ वह्निरिवार्पितम्।
परे ब्रह्मणि लीनात्मा विभागेन न दृश्यते।।[2]

इति मोक्षस्थितिरुपवर्णिता। अत्रायं भावः– "जले जलमिश्रणेन यथा तयोः समरसभावो भवति, तथा जीवोऽपि परशिवे समायोगेन तत्समरसो भवतीत्यत्र सामरस्यात्मको मोक्षोऽभ्युपगम्यते। जले जलस्य मिश्रणेन वृद्धिः, निष्कासनेन हानिश्च भवतीति तद्वत्परशिवब्रह्मणि न्यूनाधिक्यं नाशङ्कनीयम्, व्याख्याकृद्भिर्मरितोण्टदार्यैः– "अत्र द्वैतज्ञानशून्यशिवाद्वैते जलवह्निदृष्टान्त आप्यतैजसस्थलरूपदृग्युगैक्यवत् समानसमरसरूपः, न तु हानिवृद्धिकरः, समुद्रजलवत्"[3] इति

---

[1] सि. शि. ५/६७-७०, सांख्यकारिकायाः (१) गौडपादभाष्येऽपि तापत्रयस्य वर्णनमस्ति।
[2] सि. शि. २०/६१ ।
[3] सि. शि. २०/६१ तत्त्वप्रदीपिकाव्याख्या ।

वारिधिवारिदृष्टान्तेन तस्य समाहितत्वात्। तस्माद्यथोदधौ नदीजलयोगेन, मेघात्मकतया जलनिष्कासनेन च वृद्धिहानी नायातः, तथा जीवसृष्टौ, जीवसामरस्ये च ब्रह्मणि न हानिवृद्धी, इत्यत्रत्यः सामरस्यमोक्षो न्यूनाधिकभावरहितः।

परशिवस्येच्छा-ज्ञान-क्रियाशक्तिसङ्कोचरूपाणामाणव-मायीय-कार्मिकाख्यमलानां शिवदीक्षादिभिर्निवृत्तौ सत्यामुपासनाद्युपायैर्जीवस्य सङ्कुचितशक्तयो विकसिताः सत्यः स्वकारणीभूतेच्छादिषु विलीना भवन्ति, जीवोऽपि स्वकारणभूतपरमचैतन्यरूपपरशिवत्वं याति। इदमेव सामरस्यमिति कथ्यते। अत एव पदवाक्यप्रमाणपटुभिः श्रीमद्भिर्मरितोण्टदार्यैः–"अनिर्वचनीयां ख्यातिमङ्गीकृत्य अनादिसान्तमायालिङ्गतत्त्वसम्बन्धस्य जगदात्मना परिणमनस्य चाङ्गीकारेऽप्येकत्रिंशत्तममायातत्त्वस्य तद्विशेषरूपाविद्यायाश्च सद्भावात् तद्विरोधिविद्योदयेन पाशशब्दिताविद्यानिवृत्तौ जडानां चेतनानां च कारणीभूतसदात्मनावस्थानं सामरस्यम्। पाशनिवृत्तिश्चाधिकरणात्मिकैव"[१] इति सामरस्यमोक्षस्य स्वरूपमुपस्थापितम्।

ननु वीरशैवसिद्धान्ते जीवस्य परमार्थतः परशिवाद् भिन्नत्वस्याङ्गीकृतत्वाज्जीवशिवयोरभेदात्मको मोक्षः कीदृशः? इति जिज्ञासायामुच्यते–

यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं
गच्छन्ति नामरूपे विहाय।
तथा विद्वान्नामरूपाद्विमुक्तः
परात्परं पुरुषमुपैति दिव्यम्।।[२]

इति श्रुतिर्नदीसमुद्रदृष्टान्तेन जीवस्य मुक्तिमभिदधाति। अत एव यथा समुद्रजलस्यैव मेघैर्वर्षितस्य नदीरूपत्वप्राप्तिः, तथा शक्तिसङ्कोचरूपमलत्रयावरणेन शिवांशस्यैव जीवत्वप्राप्तिर्भवति। तस्माद्यथा नदीसमुद्रयोः स्वाभाविको भेदस्तथा जीवपरशिवयोरपि भेदः सत्य एव। समुद्राद् वस्तुतो भिन्नाऽपि नदी यदा सागरं प्रविष्टा तदा तज्जले तस्याः स्वाभाविकमपि नदीत्वं निवृत्तं भवति, तथा परशिवात् परमार्थतो भिन्नोऽप्ययं जीवो मुक्तौ परशिवेनैकीभूतः सन् स्वकीयं जीवत्वं विहाय परशिवत्वं प्राप्नोति। किञ्च–

कीटो भ्रमरयोगेन भ्रमरो भवति ध्रुवम्।
मानवः शिवयोगेन शिवो भवति सर्वदा।।[३]

---

[१] वी. आ. च., पृ. ४४

[२] मुण्ड. ३.२.८

[३] लि. पु., उ. भा. २१.९५

इति लिङ्गपुराणेऽपि कीटभ्रमरदृष्टान्तेन परशिवाद् भिन्नस्य जीवस्य शिवत्वावाप्तिर्दर्शिता। अत्रायं भावः– यथा भृङ्गाद् भिन्नरूपोऽपि कीटो निरन्तरं भृङ्गचिन्तनबलेन कीटाकारं कीटस्वभावं च विहाय भ्रमराकारं भ्रमरत्वं च प्राप्नोति; यथा च भ्रमरभूतोऽयं कीटः पुनः कीटो न भवति तथाऽनादिकालादनादिमलावरणेन परशिवाद् भिन्नोऽयं जीवोऽविरतं 'शिवोऽहम्' इत्याकारकशिवध्यानेन शिवरूपः सञ्जायते।

अपरञ्च, जलं सत्यमपि स्वातिनक्षत्रसमये शुक्तौ पतितं तत्सम्बन्धसामर्थ्येन सहजमपि जलभावं परित्यज्यानर्घमौक्तिकाकारतां धत्ते, पश्चाच्च जलरूपं नाधिगच्छति; एवं हि यदा लोकेऽपि जडपदार्थेष्वप्यसाधारणवस्तुसम्पर्केण सत्यभूतस्यापि स्वभावस्य निवृत्तिर्दृश्यत इति सर्वानुभवसिद्धम्, तर्ह्यघटितघटनासमर्थः परशिवः स्वकीयोपासनायामविरतं निरतस्य शुद्धजीवस्य शक्तिसङ्कोचरूपं स्वाभाविकं मलं परिहृत्य स्वस्मिन् विलयरूपं सामरस्यात्मकमभेदलक्षणमैक्यमनुगृह्णातीत्यत्र किमाश्चर्यम्।

अत एव श्रीपतिपण्डिताराध्यभगवत्पादाः– "तस्मादात्यन्तिकपाशनिवृत्तिपूर्वकशिवत्वप्राप्तिरेव मुक्तिरित्युपदिश्यते। न चागन्तुकत्वेनानित्यत्वात् कथं शिवत्वप्राप्तिरेव मुक्तिरिति वाच्यम्, भ्रमरकीटन्यायेन सत्यक्रिमेः सत्यभ्रमरत्वप्राप्तिदर्शनात् सत्यात्मकस्य जलस्य स्वभावनिवृत्तिपूर्वकसत्यमौक्तिकत्वप्राप्तिदर्शनात् किमर्थं बन्धमिथ्यात्वकल्पनमिति विवेकिभिर्बोद्धव्यम्। ननु मरुमरीचिकायां भासमानस्यासत्यस्य तोयज्ञानस्य सत्यमरीचिकाज्ञानं निवर्तकमिति व्याप्तिबलाज्ज्ञानेन सत्यस्य कथं निवृत्तिः? इति चेन्न, सत्यस्य पूर्वज्ञानस्योत्तरज्ञानेन, स्मृत्या संस्कारस्य, शिवस्मरणेन पापस्य प्रियस्मरणेन दुःखस्य प्रत्यधिकरणं पूर्वपक्षनिर्णयेन, पूर्वपक्षस्य च सिद्धान्तेन निवृत्तिदर्शनात्"[1] इति सत्यक्रिमेः सत्यभ्रमरप्राप्तिवत् सत्यस्यापि जीवस्य बन्धनिवृत्तौ सत्यशिवत्वप्राप्तिः सम्भवतीति निर्णीय सत्यबन्धनमपि ज्ञानेन निवर्त्यत इति युक्तिमपि प्रदर्शितवन्तः।

श्रीशङ्करशास्त्रिणोऽपि– "प्रबलशक्तिको रोगादिवशात् क्षीणशक्तिकोऽपि व्यायामाभ्यासवशान्महतीं शक्तिं प्राप्नोति, तथा स्वलीलावशात् सङ्कुचितशक्तिकः सन् परमेश्वर एव संसारीत्युच्यते। पुनः शिवयोगसाधनवशाद् विकसितशक्तिकः सन् परमेश्वर एव भवति। परमेश्वरस्यैतादृशहीनदशाप्राप्तिं प्रति स्वलीलाया एव कारणत्वं वाच्यम्, छत्रचामरवाहनादिसम्पद्युक्तस्यापि राज्ञः कदाचित् स्वलीलया पादचारित्वदर्शनात्। तथा च एतादृशशक्तिविकासस्यैव मोक्षत्वमिति सिद्धम्। न तु

---

[1] ब्र. सू. श्रीकर १.१.१

पराभिमतविस्मृतकण्ठचामीकरप्राप्तिवत् स्वस्वरूपप्राप्तेर्मोक्षत्वम्। अस्मन्मते बन्धरूपसङ्कोचस्यापि विचार्यमाणत्वे विमर्शशक्तिरूपत्वेन ज्ञायमानत्वात् तादृशशक्तिविकासस्यैव मोक्षत्वम्"[1] इति रोगादिदृष्टान्तेन सत्यमलत्रयावृतस्य जीवस्य सत्यशक्तेर्विकासत्वं मोक्षत्वमिति प्रतिपादितवन्तः।

न च जीवमलयोरनादिसम्बन्धः स्वाभाविक इत्यङ्गीकाराद् मोक्षकाले तन्मलक्षये जीवस्यापि किञ्चिन्नाशो जायत इति मन्तव्यम्, यतो हि मलस्तावज्जीवात्मनि नारिकेले तत्कवचवद्वर्तते। तस्माद्यथा नारिकेलेऽनादिकालतः स्वभावतो विद्यमानस्यापि कवचस्य निवृत्त्या पक्वीभूतस्य नारिकेलस्य न किञ्चित् क्षयो भवति, तथा जीवात्मगतमलक्षये न तत्क्षयः। अत एव किरणागमे–

सहजा कालिका ताम्रे तत्क्षयात्र च तत्क्षयः।
यद्वत् ताम्रे क्षयस्तद्वत् पुरुषस्य मलक्षयः ।।

यथा तण्डुलकम्बूके प्रक्षीणेऽपि न तत्क्षयः।
विषसम्बन्धिनी शक्तिर्यथा मन्त्रैर्निरुध्यते।।
तथा न तद्विषं क्षीणमेवं पुंसो मलक्षयः ।।[2]

इति विविधैर्दृष्टान्तैर्मलक्षयेऽपि पुरुषस्याक्षयत्वमुपपादितम् ।

तदेवं मलत्रयस्यात्यन्तिकनिवृत्तिपूर्वकं शिवत्वप्राप्तिरूपे शिवजीवसामरस्यात्मके मोक्षे न काप्यनुपपत्तिरिति विदाङ्कुर्वन्तु विद्वांसः।

मुक्तेरानन्दरूपत्वम्

मुक्तिरेव परा तृप्तिः सच्चिदानन्दलक्षणा।
नित्यतृप्तस्य मुक्तस्य किमन्यैर्भोगसाधनैः।।[3]

इति रेणुकभगवत्पादैरुक्तत्वाद् वीरशैवदर्शने मुक्तेरानन्दरूपत्वमङ्गीक्रियते। सुखं तावत् त्रिविधम्– वैषयिकं स्वर्गीयं भौक्तिकं चेति। वैषयिकं विषयेन्द्रियसन्निकर्षजन्यमनित्यं क्षणिकं च। स्वर्गीयं चन्द्रलोकाद्युत्तमलोकोपलब्धाप्सरोभोगामृतपानादिजनितं क्षय-सातिशय-पतनादिदोषयुक्तम् । अत एव रेणुकभगवत्पादैः–

---

[1] ब्र. सू. शां. वृ. १.१.७, पृ. ५३

[2] किरणा. वि. पा. २.३१-३३

[3] सि. शि. १८.७४

ऐहिके क्षणिके सौख्ये पुत्रदारादिसम्भवे।
क्षयित्वादियुते स्वर्गे कस्य वाञ्छा विवेकिनः।।[1]

इति वैषयिकस्य स्वर्गीयस्य च सुखस्य दोषयुक्तत्वमुक्तम्। मौक्तिकं सुखं तु जीवस्य परमात्मसाक्षात्काररूपशिवत्वप्राप्तिजन्यं निर्विषयं नित्यशाश्वतम्। तदिदं ब्रह्मादिलोकवन्न सातिशयरूपम्, किन्तु सर्वोत्कृष्टत्वान्निरतिशयरूपम्। तदुक्तम्—

कुतो ब्रह्मा कुतो विष्णुः कुतो रुद्रः कुतो रविः।
साक्षात्कृतपरानन्दज्योतिषः साम्यकल्पना ।।

अपरोक्षपरानन्दविलासस्य महात्मनः।
ब्रह्मविष्ण्वादयो देवा विशेषाः सुखबिन्दवः ।।

यन्मात्रासहितं लोके वाञ्छन्ति विषयं नराः।
तदप्रमेयमानन्दं परमं को न वाञ्छति ।।[2] इति।

जीवन्मुक्तशिवयोगिनां स्वरूपम्

तदेतादृशं निरतिशयमानन्दरूपं लिङ्गाङ्गसामरस्यात्मकं मोक्षं प्राप्तस्य शिवयोगिन आणवमायीयकार्माख्य-पाशविच्छेदो भवत्येव, किन्तु सञ्चित-प्रारब्ध-आगामिनामक-त्रिविधकर्मसु 'शिवोऽहम्' इति ज्ञानेन सञ्चितस्यापक्षयेऽपि—

नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि।
अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम्।।[3]

इति पुराणोक्त्या प्रारब्धस्य भोगान्यथानाशानुपपत्तिः। तत्प्रारब्धजन्यसुख-दुःखादिकमनुभोक्तुं कलेवरस्य नितान्तमावश्यकत्वात् शिवज्ञानसिद्धस्यापि शिवयोगिनो देहः प्रारब्धपरिक्षयपर्यन्तमवशिष्यते, घटनिर्माणानन्तरमपि कुलालप्रेरितचक्रभ्रमणवत्। तदुक्तं किरणागमे—

जातायां घटनिष्पत्तौ यथा चक्रं भ्रमत्यपि।
पूर्वसंस्कारसंसिद्धं तथा वपुरिदं स्थितम्।।[4] इति।

---

१. सि. शि. ५.६२
२. सि. शि. १९.२६-२८
३. ना. पु. १.३१.६९-७०
४. किरणा. ६.१८

एवं प्रारब्धपरिक्षयपर्यन्तं शरीरविशिष्टस्य मुक्तस्य शिवयोगिनो यज्जीवनं तदेव जीवन्मुक्तिरित्युच्यते।

स्वस्वरूपं चिदाकारं ज्योतिः साक्षाद्विचिन्तयन्।
देहवानपि निर्देहो जीवन्मुक्तो हि साधकः।।

शुद्धाचारे शुद्धभावो विवेकी ज्योतिः
पश्यन् सर्वतः शैवमेकम्।
ज्ञानध्वस्तप्राकृतात्मप्रपञ्चो
जीवन्मुक्तश्चेष्टते दिव्ययोगी ।।[१]

इत्याद्यनेकस्थानेषु रेणुकभगवत्पादैर्जीवन्मुक्तशिवयोगिनां स्वरूपमुपवर्णितम्। अनेन दर्शनान्तरवद्वीरशैवसिद्धान्तेऽपि शिवज्ञानसम्पन्नस्य शरीरपातं यावज्जीवन्मुक्तदशेत्यङ्गीक्रियत इति ज्ञायते। जीवन्मुक्तेरभावे गुरुशास्त्रादिपरम्परैव विच्छिद्येतेत्यभिप्रायेण प्रायः सर्वत्र दार्शनिकलोके जीवन्मुक्तिदशाया अङ्गीकारो दृश्यते।

जीवन्मुक्तानां व्यवहारे शास्त्रस्य शासनं न प्रवर्तत इति तेषां व्यवहारा वैचित्र्यपूर्णा नैकविधाश्च वर्तन्ते। केषुचन जीवन्मुक्तयोगिषु लौकिकानामिव विषयोपभोगलिप्तत्वं दृश्यते। नन्वेवं जीवन्मुक्तस्यापि लोकवत्प्रवृत्तौ लौकिकानामिव तज्जन्यदोषभागीत्वं भवेदेवेति चेन्न,

शिवस्य पररूपस्य सर्वानुग्रहिणोऽर्चने।
त्यागो देहाभिमानस्य कार्यार्पितमुदाहृतम् ।।

यदा योगी निजं देहं शिवाय विनिवेदयेत्।
तदा भवति तद्रूपं शिवरूपं न संशयः ।।[२]

यद्यत्करणमालम्ब्य भुङ्क्ते विषयजं सुखम्।
तत्तच्छिवे समर्प्यैष करणार्पक उच्यते।।[३]

शिवे निश्चलभावेन भावानां यत्समर्पणम्।
भावार्पितमिदं प्रोक्तं शिवसद्भाववेदिभिः।।

---

[१] सि. शि. १६.५४, ८४
[२] सि. शि. १७.३४–३५
[३] सि. शि. १७.४०

भाव एव हि जन्तूनां कारणं बन्धमोक्षयोः।
भावशुद्धौ भवेन्मुक्तिर्विपरीते तु संसृतिः।।[१]

इत्यादिषु रेणुकभगवत्पादैर्जीवन्मुक्तः शिवार्पितैरेव काय-करण-भावैर्व्यवहरतीत्युक्तत्वात्तस्य सांसारिकाणामिव न त्रिकरणजन्यदोषभागीत्वम्। किञ्च,

घ्राणस्य घ्राणमाचारलिङ्गस्य मुखमुच्यते।
जिह्वायाश्च तथा जिह्वा गुरुलिङ्गमुखं भवेत्।।

चक्षुषश्च तथा चक्षुः शिवलिङ्गमुखं भवेत्।
त्वचस्त्वक् चररूपस्य लिङ्गस्य मुखमुच्यते।।

मुखं प्रसादलिङ्गस्य श्रोत्रं श्रोत्रस्य कथ्यते।
हृदयं हृदयस्यैव महालिङ्गमुखं भवेत्।।
एवं लिङ्गमुखं ज्ञेयं तत्तदङ्गे प्रतिष्ठितम्।।[२]

इति शिवागमोक्त्या वीरशैवसिद्धान्ते षडिन्द्रियेषु षड्विधलिङ्गानि भावितानि भवन्ति। तदेव केनोपनिषदि–

श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो
ह वाचं स उ प्राणस्य प्राणः।
चक्षुषश्चक्षुरतिमुच्य धीराः
प्रेत्याऽस्माल्लोकादमृता भवन्ति।।[३]

इति समर्थितम्। एवं तत्तदिन्द्रियेषु तत्तल्लिङ्गानि भावयित्वा तत्तद्विषयान् तत्तल्लिङ्गेभ्यः समर्प्य गन्धादिविषयाणां तत्तलिङ्गप्रसादरूपेण ग्रहणमुपदिश्यते। तदनुरूपं जीवन्मुक्तो घ्राणेन्द्रिये आचारलिङ्गं भावयित्वा तस्मै घ्रेयपदार्थगतं गन्धं समर्प्य तदनुभूतं गन्धप्रसादम्, रसनेद्रिये गुरुलिङ्गं भावयित्वा तस्मै रस्यपदार्थगतं रसं समर्प्य रसप्रसादम्, चक्षुरिन्द्रिये शिवलिङ्गं भावयित्वा तस्मै रूपं समर्प्य रूपप्रसादम्, त्वगिन्द्रिये चरलिङ्गं भावयित्वा तस्मै स्पर्शं समर्प्य स्पर्शप्रसादम्, श्रोत्रेन्द्रिये प्रसादलिङ्गं भावयित्वा तस्मै शब्दं समर्प्य शब्दप्रसादम्, मनसि च महालिङ्गं भावयित्वा तस्मै तृप्त्याख्यं पदार्थं समर्प्य तत्प्रसादं चोपभुङ्क्ते। एवमेव

---

[१] सि. शि. १७.५०-५१
[२] शि. द., पृ. २८
[३] केनो. २; द्र. शां. व्या, (वीरशैवभाष्य)।

हस्तपादादिकर्मेन्द्रियेष्वप्युपर्युक्तानि लिङ्गानि, अर्थात् पाय्विन्द्रिये आचारलिङ्गम्, उपस्थे गुरुलिङ्गम्, पादे शिवलिङ्गम्, पाणौ चरलिङ्गम्, वाचि च प्रसादलिङ्गं भावयित्वा तत्तदिन्द्रियकार्यं पूर्ववत् समर्प्य, कर्मेन्द्रियैः कार्यं कुर्वन्नपि न लिप्यते। एवं जीवन्मुक्तस्तत्तज्ज्ञानेन्द्रियगतलिङ्गेभ्यो तत्तद्विषयाणि समर्प्य तत्प्रसादरूपेण गृह्णातीति लिङ्गभोगोपभोगी, कर्मेन्द्रियगतलिङ्गेभ्यो तत्तत्कार्याणि समर्प्य करोतीति स्वयमकर्ता च भवति, अत एव रेणुकभगवत्पादैः-

दर्शनात् स्पर्शनाद् भुक्तेः श्रवणाद् घ्राणनादपि।
विषयेभ्यो यदुत्पन्नं शिवे तत्सुखमर्पयेत्।।

इन्द्रियैरेव जायन्ते पापानि सुकृतानि च।
तेषां समर्पणादीशे कुतः कर्मनिबन्धनम्।।

इन्द्रियाणि समस्तानि शरीरं भोगसाधनम्।
शिवपूजाङ्गभावेन भावयन् मुक्तिमाप्नुयात्।।[1]

इत्यादिरूपेण सर्वेन्द्रियैः शिवप्रसादोपभोगिनो न सांसारिकदोषप्रसक्तिरिति प्रतिपादितम्। तस्मान्न जीवन्मुक्तस्य सर्वव्यवहारं कुर्वतोऽपि दोषप्रसक्तिसम्भवः।

ननु प्रत्येकं कर्मणः फलनियतत्वात् शिवभावसम्पन्नेन शिवयोगिना कृतानां कर्मणां का गतिः? किं तानि नोत्तरजन्मकारणानि? इति जिज्ञासायाम्-

कर्म ज्ञानाग्निदग्धं न प्ररोहेत कथञ्चन।
ज्ञानेन हीनः पुरुषः कर्मणा बध्यते सदा।
ज्ञानिनः कर्मसङ्कल्पा भवन्ति किल निष्फलाः।।[2]

ज्ञानिनो यानि कर्माणि तानि नो जन्महेतवः।
अग्निदग्धानि बीजानि यथा नाङ्कुरकारणम्।।[3]

इति भर्जितबीजवत् शिवोऽहमिति ज्ञानेन दग्धकर्मणः शिवयोगिनो नोत्तरजन्मप्राप्तिरिति रेणुकभगवत्पादैरुपदिष्टम्। किञ्च- "स्तुतिनिन्दाकरास्तस्य पुण्यपापे समाप्नुयुः"[4] इत्यागमोक्त्या देहभावविमुक्तेन जीवन्मुक्तेन शिवयोगिना यन्त्रवदाचरितानां

---

[1] सि. शि. १७.३७, ४५, ४९
[2] सि. शि. १६.८२-८३
[3] सि. शि. १९.३०
[4] देवी. कालो. ८४

शुभकर्मणां फलरूपं सुखं तस्य स्तुतिकर्तारस्त्रिकरणैः सेवाकारिणश्च, अशुभकर्मणां च फलरूपं दुःखं निन्दकाः पीडकाश्च समाप्नुवन्तीति स सर्वकर्मबन्धविमुक्तः।

जङ्गमस्वरूपम्

तदेतादृशो जीवन्मुक्तशिवयोगी एव वीरशैवदर्शने 'जङ्गम' इत्यपि व्यवह्रियते। जङ्गमो नाम–

जानन्त्यतिशयाद्ये तु शिवं विश्वप्रकाशकम्।
स्वस्वरूपतया ते तु जङ्गमा इति कीर्तिताः।।[1]

इति रेणुकभगवत्पादोक्त्या सर्वप्रपञ्चप्रकाशकं परशिवं स्वात्मरूपेण दृढतयाऽवगन्ता शिवज्ञानी। वीरशैवसदाचारसङ्ग्रहे[2] 'ज' इत्यस्य जननरहित इति, 'ग' इत्यस्य गमनरहित इति, 'म' इत्यस्य च मरणरहित इत्यक्षरार्थ–प्रतिपादनद्वारा जङ्गमस्य जरामरणशून्यत्वमत एव तस्य जीवन्मुक्तत्वं चोक्तम्। सोऽयं जङ्गमो जीवन्मुक्तः स्वयजङ्गम–चरजङ्गम–परजङ्गमभेदेनावस्थात्रय–मभ्युपगम्यते। तदत्र क्रमशस्तेषां स्वरूपमुपवर्ण्यते–

स्वयजङ्गमः

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।।[3]

इति श्रुत्युक्त्यनुसारमयं जङ्गमः सर्वत्र स्वात्मानमेवानुपश्यतीति स्वयजङ्गम इत्युच्यते। उक्तं च तल्लक्षणमाचार्यैः–

स्वच्छन्दाचारसन्तुष्टो ज्योतिर्लिङ्गपरायणः।
आत्मस्थसकलाकारः स्वाभिधो मुनिसत्तमः।।[4] इति।

---

[1] सि. शि. ११.३६

[2] जकाराज्जननं दूरं गकाराद् गतिनाशनम्।
मकारान्मरणं नष्टं जङ्गमस्त्र्यक्षरात्मकः।।
यस्य नास्ति पुनर्जन्म गतिर्नास्ति कदाचन।
बाधते यं न मरणं शृणु नाथे स जङ्गमः।।
जरामरणशून्यत्वाद् गमागमविवर्जनम्।
मनुष्याचाररहित्याज्जङ्गमोऽयमुदाहृतः।। (वी. स. सं. १५.६–८)

[3] ई. उ. ६

[4] सि. शि. १५.५२

निर्ममो निरभिमानी चायं न कस्यापि वशवर्ती भवति। स्वतन्त्ररूपेण कुत्रापि निवसन् स्वेष्टलिङ्गपूजया सह प्राणभावाख्यज्योतिर्लिङ्गानुसन्धानपरायणो भवति। अस्य च महात्मनः शिवज्ञानम्, शिवध्यानम्, भिक्षाहारः, एकान्तशीलत्वं चेति चत्वार्येव प्रधानकर्माणि[१], अर्थादयं कस्यचिद् ग्रामस्य नगरस्य मठे मन्दिरे वा निवसन् शिवध्यानतत्परः सन् भक्तेभ्यः शिवज्ञानमुपदिशति। शिवभक्तगृहादानीतं भिक्षान्नं स्वीकृत्य सर्वदा शिवभावेन जीवनं यापयति।

चरजङ्गमः

स्वरूपज्ञानसम्पन्नो ध्वस्ताहम्ममताकृतिः।
स्वयमेव स्वयं भूत्वा चरतीति चराभिधः ।।[२]

इति रेणुकभगवत्पादोक्त्यनुसारं स्वस्वरूपज्ञानसम्पन्नः, अत एवाहङ्कारममकारशून्यो जीवन्मुक्तो यदा लोकहितार्थं सर्वत्र सञ्चरति तदाऽयं चरजङ्गम इत्यभिधीयते[३]। कुत्रापि स्थायिरूपेण निवासरहितोऽयं ज्ञानोपदेशाय ग्रामाद् ग्राममटति। स्वसञ्चारे तत्र तत्र कांश्चिद् दर्शनमात्रेण, कांश्चित् स्पर्शतः, कांश्चिदुपदेशतश्च जनानुद्धरति। अत एव रेणुकभगवत्पादैः–

पादाग्ररेणवो यत्र पतन्ति शिवयोगिनाम्।
तदेव सदनं पुण्यं पावनं गृहमेधिनाम्।।
सर्वसिद्धिकरं पुंसां दर्शनं शिवयोगिनाम्।
स्पर्शनं पापशमनं पूजनं मुक्तिसाधनम् ।।[४]

इत्यस्य जङ्गमस्य शिवयोगिनः सर्वोद्धारक्षमत्वमुक्तम्। मेघा यथा लोकहितप्रयोजनेन सर्वत्र सञ्चरन्तो वर्षन्ति, तथाऽयमपि सर्वत्र सञ्चरन् शिवज्ञानवर्षेण लोकोद्धारं करोति।

---

[१] *ध्यानं शैवं तथा ज्ञानं भिक्षा चैकान्तशीलता।*
यतेश्चत्वारि कर्माणि न पञ्चममिहेष्यते।। (सि. शि. १५.५६)

[२] *सि. शि. १५.५७*

[३] *सर्वलोकोपकाराय यो देवः परमेश्वरः।*
चरत्यतिथिरूपेण नमस्ते जङ्गमात्मने ।। (वीरागमे)

[४] *सि. शि. ११.४२–४३*

परजङ्गमः

'परश्चासौ जङ्गमश्च परजङ्गमः' इति व्युत्पत्त्या जीवन्मुक्तेषु श्रेष्ठः परजङ्गम इत्युच्यते। अपि च परो नाम विश्वोत्तीर्णः परशिवः, तं स्वात्मरूपेण तैलधारावन्निरन्तरं ध्यायमानस्यास्य परं स्वस्माद् भिन्नं न किञ्चिदपि वस्तु प्रतीयत इत्ययं परजङ्गम इत्यभिधीयते। तदुक्तम् –

स्वयमेव स्वयं भूत्वा चरतः स्वस्वरूपतः।
परं नास्तीति बोधस्य परत्वमभिधीयते।।[1]

अत्रेदं बोध्यम्– स्वयजङ्गमो घटपटादिसर्वपदार्थेषु स्वात्मानं पश्यति, परजङ्गमस्य तु घटपटादयो न प्रतीयन्ते, किन्तु स सर्वत्र स्वात्मानमेव पश्यति, अर्थादस्य व्यावहारिकभेदस्यापि प्रतीतिर्न भवति। अत एवाऽयं शिवयोगिराद् परमहंसश्चेति कथ्यते। अस्य व्यावहारिकभेदस्यापि प्रतीत्यभावादनेन तत्त्वोपदेशः कर्तुं न शक्यते, किन्तु तस्य दर्शनेन स्पर्शनेन च जनाः कृतार्था भवन्ति। लोकसङ्ग्रहादिवासनाविरहितोऽयं सदेहोऽपि निर्देहीत्युच्यते। परजङ्गमपादस्पर्शनमात्रेण नद्यः पावनानि तीर्थानि, तदीयनिवासस्थानानि च दिव्यक्षेत्राणि भवन्ति[2]। तदीदृशमहिमावानयं परजङ्गमः सम्पूर्णं देहाभिमानं परित्यज्य निवसति, तस्मादस्य भोजनादिक ऐहिकव्यवहारोऽन्येनैव सम्पाद्यते। तं परजङ्गमं नितान्तश्रद्धया गन्धपुष्पादिभिर्ये समर्चयन्ति, ये च निष्ठया तस्य सुश्रूषां कुर्वन्ति, ते फलितसर्वमनोरथा निवृत्तसर्वकिल्बिषाः पवित्रात्मानश्च सन्तो मोक्षं समाप्नुवन्ति। अत एव–

यदि भक्तिर्भवेच्छक्तिरर्चयेत् प्रणमेदपि।
कुर्याच्छुश्रूषणं तस्य स्वयं मुक्तो भवेद्ध्रुवम् ।।

दर्शनस्पर्शनालापसेवापूजादिभिः प्रिये।
स्वयं च संस्मरेत् कृच्छ्रं तुर्यवीरस्थलिङ्गिनम् ।।

जीर्णखर्परकन्थाढ्यमपि पश्येद् दिगम्बरम्।
यदृच्छया च तुर्यस्थो भक्तो मुञ्चेत किल्बिषात्।।[3]

---

[1] सि. शि. १५.६४

[2] द्र. सि. शि. १५.६५-७१; वी. स. सं., १५.५५-६१

[3] पारमे. १६.७२-७४

इत्यादिना पारमेश्वरगमे निराभारि-तुर्यवीराद्यपरपर्यायस्य परजङ्गमस्य जीवन्मुक्तस्य दर्शन-स्पर्शन-पूजन-प्रणमनादीनां फलं प्रोक्तम् ।

एतावतोपपादिता स्वय-चर-पराख्यजङ्गमभेदा अवस्थाभेदेन एकस्यैव जीवन्मुक्तस्य भवितुर्महन्ति। तस्मात् स्वयजङ्गम-चरजङ्गमादयः परस्परं पूर्णतया भिन्ना एवेति न मन्तव्यम् । स्वसाधनाबलेनैक एव साधकोऽवस्थात्रयमधिगच्छति। यदा जीवन्मुक्तः शिवयोगी परजङ्गमावस्थामवाप्नोति, यदा तस्य शिवोऽहं भावना पूर्णतया दृढीभूता भवति, तदा सैव ज्ञानशून्यावस्थेत्युच्यते। तदानीं ज्ञातृ-ज्ञान-ज्ञेयाख्यानां त्रिपुटीनामभावो जायते। जीवन्मुक्तस्येयं ज्ञानशून्यावस्था जीवन्मुक्तेर्हि पराकाष्ठा उच्यते। अत एवोक्तम् –

सर्वात्मनि परे तत्त्वे भेदशङ्काविवर्जिते।
ज्ञात्रादिव्यवहारोत्थं कुतो ज्ञानं विभाव्यते।।

ज्योतिर्लिङ्गे चिदाकारे स्वप्रकाशे निरुत्तरे।
एकीभावमुपेतस्य कथं ज्ञानस्य सम्भवः।।

यस्य कार्यदशा नास्ति कारणत्वमथापि वा।
शेषत्वं नैव शेषित्वं स मुक्तः पर उच्यते।।[१] इति।

तदेवं वीरशैवदर्शने मलत्रयस्यात्यन्तिकनिवृत्तिपूर्वकं शिवत्वावाप्तिरूपं सामरस्यात्मकं मोक्षमङ्गीकृत्य तस्य निरतिशयानन्दरूपत्वं व्यवस्थाप्यते। शिवसाक्षात्कारानन्तरमपि प्रारब्धवशात् शिवज्ञानिनः शरीरमवशिष्यत इति तस्य जीवन्मुक्तत्वम्; तस्य जीवन्मुक्तस्यात्र सिद्धान्ते 'शिवयोगी' 'जङ्गम' इत्याद्यभिधानैर्वर्णनं क्रियते ।

उभयसम्मतबन्धमोक्षस्वरूपसमीक्षा

एतावता श्रीमद्भगवद्गीतानुसारं श्रीसिद्धान्तशिखामण्युक्तवीरशैवसिद्धान्तानुसारं च बन्धस्वरूपं मोक्षस्वरूपं जीवन्मुक्तयोगिनां स्वरूपं च सविस्तरं निरूपितम् । साम्प्रतमुभयसम्मतबन्धमोक्षयोर्जीवन्मुक्तयोगिनां च स्वरूपाणां समन्वयात्मिका समीक्षा प्रस्तूयते।

---

[१] सि. शि. २०.६२, ६९-७०

बन्धस्वरूपसमीक्षा

तत्र तावद्गीतायाम् –

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम्।।[१]

इति सत्त्वरजस्तम इत्याख्यास्त्रयो गुणा विभिन्नैर्भावैर्जीवं बध्नन्तीति प्रतिपादनाद् गीतानुसारं सत्त्वादिगुणत्रयमेव बन्धः। सिद्धान्तशिखामणौ "जीवत्वं दुःखसर्वस्वं तदिदं मलकल्पितम्"[२] इत्याणव-मायीय-कार्माख्यास्त्रिविधा मला जीवमावृत्य, तस्य सर्वदुःखहेतवो भवन्तीति प्रतिपादनाद्वीरशैवदर्शनानुसारं मल एव बन्धः। अनेन बन्धविषये गीतायां सिद्धान्तशिखामणौ च न समानतेति प्रतीयते।

एवं गीतासिद्धान्तशिखामण्योर्बन्धविषये प्रतीयमानो व्यत्यासः केवलं नाममात्रम्, गुणत्रयस्य मलत्रयस्य च समानस्वभाववत्वात्। अर्थाद् गीतायां बन्धत्वेनोक्तेभ्यो गुणेभ्य उत्पद्यमानेषु बन्धनकारकेषु सुखदुःखादिभावेषु, वीरशैवसिद्धान्ते बन्धत्वेनोक्तेभ्यो मलेभ्य उत्पद्यमानेष्वपूर्णम्मन्यतादिभावेषु च समन्वयः सम्भवति। तथा हि– "तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम्"[३] इति गीतायां सत्त्वगुणस्य निर्मलत्वप्रतिपादनाद् मलत्रयेण साकमस्य तुलना न भवतीति प्रतीयते, अथापि "सुखरूपेण बध्नाति ज्ञानसङ्गेन चानघ"[४] इति तस्य ज्ञानसुखाभ्यां बन्धस्वभावत्वमपि प्रतिपादितमिति मलेन साकमस्य तुलनोपपद्यत एव। बन्धनं तावत् नित्यज्ञानानन्दसमन्वितस्य विभोः परमात्मनो न सम्भवति, अपि तु परमात्मनो भिन्नस्याणुरूपस्यैव जीवस्य। तस्माद् गीतोक्तसत्त्वंगुणजन्यसुखज्ञानयोर्बन्धनात्पूर्वं जीवस्य परमात्मनो भिन्नत्वमणुत्वं च वक्तव्यम्। वीरशैवदर्शनोक्तस्याणवमलस्यावरणेन जीवः परमात्मनो भिन्नत्वमणुत्वं चाधिगच्छति। अत एव शिवानुभवशिवाचार्याः–"अप्रतिहतस्वातन्त्र्यरूपेच्छाशक्तिः सङ्कुचिता सती अपूर्णम्मन्यतारूपमाणवमलम्"[५] इत्याणवमललक्षणनिरूपणावसरे तस्यापूर्णत्वरूपाणुत्वापादकत्वमुक्तवन्तः। तदेवमाणवमलावरणेनाणुभूते जीवात्मनि सत्त्वगुण ऐहिकं ज्ञानं सुखं च जनयित्वा तं बध्नाति, अर्थात् जीवस्याणुत्वादेव स

---

[१] भ. गी. १४.५

[२] सि. शि. १८.१७

[३] भ. गी. १४.६

[४] भ. गी. १४.६

[५] शि. द., पृ. २१

अपूर्णया इच्छयावृतो विषयादिषु सुखमन्वेषयन् तत्रोपलब्धेऽपूर्णे सुखे ज्ञाने वैवानुरक्तः सन् बद्धो भवति। एवं सत्त्वगुणस्याणवमलस्य च समन्वयः।

गीतोक्तो रजोगुणो वीरशैवदर्शने बन्धत्वेनोक्तः कार्ममलश्च समानभावैर्जीवं बध्नातीति तयोः समन्वयो भवितुर्महति। तथा हि तत्र गीतायाम् –

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्।।[1]

इति रजोगुणस्वरूपमुपदिष्टम्। अनेन रजोगुणो जीवात्मानं शुभाशुभकर्मसङ्गेन बध्नातीति ज्ञायते। शुभाशुभकर्मसङ्गस्तु शुभाशुभवासनाबलेनोपजायते। एतादृशशुभाशुभवासनैव वीरशैवदर्शने कार्ममलमित्यङ्गीक्रियते। अत एव शिवानुभवशिवाचार्यैः– "क्रियाशक्तिः सङ्कुचिता सती सर्वकर्तृत्वस्य किञ्चित्कर्तृत्वप्राप्तेः कर्मेन्द्रियसम्बन्धवशात् शुभाशुभवासनामयं कार्ममलम्"[2] इति कार्ममलस्य शुभाशुभवासनामयत्वमुक्तम्। अनया कर्मवासनया प्रेरितो जीवः–

परिभ्रमन्ति संसारे निजकर्मानुसारत ।
देवतिर्यङ्मनुष्यादिनानायोनिविभेदतः ।।[3]

इति रेणुकभगवत्पादोक्त्या देवतिर्यगाद्यनेकजन्मसु परिभ्रमन् बद्धो भवति।

ननु शुभाशुभकर्मानुष्ठाने तद्वासना कारणम्, तद्वासनायाश्च तदनुष्ठानं कारणमित्येवं बीजाङ्कुरन्यायवदनवस्थाप्रसङ्ग इति चेन्न, "यथानादिर्मलस्तस्य कर्माप्येवमनादिकम्"[4] इति किरणागमवचनानुसारं कार्ममलस्यानादित्वाङ्गीकारात् । यथा बीजाङ्कुरन्याये आपतिताया अनवस्थाया निवारणार्थमङ्कुरसत्ताया अनादित्वमङ्गीक्रियते, तथैव निष्पक्षपातः पन्थाः परिद्रष्टव्यः। तस्मादेवं रजोगुणः कार्ममलश्च जीवात्मानं शुभाशुभवासनाजनितशुभाशुभकर्मणि प्रेरयन्तौ तमनुबध्नात इत्युभयोः समन्वयः ।

तमोगुणस्तु "तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्"[5] इति भगवदुक्त्याऽज्ञानात्मको मोहोत्पादकश्चेति प्रमादादिभिर्जीवं बध्नाति। अत्राज्ञानं नाम अयथार्थज्ञानं

---

[1] भ. गी. १४.७
[2] शि. द., पृ. २१
[3] सि. शि. ५.४८
[4] किरणा. वि. पा. ३.७
[5] भ. गी. १४.८

भेदज्ञानं वेत्यर्थः, न तु ज्ञानाभाव इति। अत एव रामानुजभगवत्पादाः– "ज्ञानादन्यदिहाज्ञानमभिप्रेतम्, ज्ञानं वस्तुयाथात्म्यावबोधः, तस्मादन्यत्, तद्विपर्ययमज्ञानम्"[1] इत्यज्ञानशब्दस्य 'वस्तुयाथात्म्यविपरीतविषयज्ञानम्' इत्यर्थं प्रतिपादितवन्तः। वीरशैवदर्शने ईदृशमज्ञानमेव मायीयमल इति कथ्यते। शिवानुभवशिवाचार्यैः- "ज्ञानशक्तिः सङ्कुचिता सती सर्वज्ञत्वस्य किञ्चिज्ज्ञत्वाप्तेरन्तःकरणबुद्धीन्द्रियसम्बन्धवशाद् भेदवेद्यप्रथारूपं मायीयं मलम्"[2] इति मायीयमलस्य लक्षणे तस्य भेदवेद्यत्वमुक्तम्। इदं भेदवेद्यत्वमेवाज्ञानम्। ईदृशेन भेदबुद्धिरूपेणाज्ञानेनावृतो जीवः स्वात्मानं शुद्धबुद्धमुक्तस्वभावपरशिवाद् भिन्नं मत्वा अनित्यदेहादिष्वहमिति, सती–सुत–गृहादिषु च ममेति व्यवहरन् मोहितो भवति। तदुक्तं भगवत्पादैः-

किञ्चित्कर्ता च किञ्चिज्ज्ञो बद्धोऽनादिशरीरवान्।
अविद्यामोहिता जीवा ब्रह्मैक्यज्ञानवर्जिताः।।[3] इति।

अनेन मायीयमलस्य भेदवेद्यत्वरूपाज्ञानात्मकत्वं मोहकत्वं चावगम्यते। तस्मादेवं तमोगुणो मायीयमलश्चाज्ञानात्मकौ सन्तौ जीवात्मनि मोहं जनयित्वा तमनुबध्नात इत्युभयोः समन्वयः।

तदेवमाणवमलावृतत्वेन परमात्मनो भिन्नमणुरूपं च जीवात्मानं सत्त्वगुणः सुखज्ञानसङ्गाभ्याम्, रजोगुणः कार्ममलश्च शुभाशुभकर्मप्रेरकत्वेन, तमोगुणो मायीयमलश्च मोहाभिवर्धकत्वेन बध्नन्तीति गीतायाः सिद्धान्तशिखामणेश्च बन्धविषये[4] समन्वयमनुपश्यामः।

---

[1] भ. गी., रा. भा., १४.८

[2] शि. द., पृ. २१

[3] सि. शि. ५.४७

[4] शमो दमो विवेकश्च वैराग्यं पूर्णभावना।
क्षान्तिः कारुण्यसम्पत्तिः श्रद्धा सत्यसमुद्भवा।।
शिवभक्तिः परो धर्मः शिवज्ञानस्य बान्धवाः।
एतैर्युक्तो महायोगी सात्त्विकः परिकीर्तितः।।
यत्र कुत्रापि वा द्वेष्टि प्रपञ्चे शिवरूपिणि।
शिवद्वेषी स विज्ञेयो राजसाविष्टमानसः।।
यो द्वेष्टि सकलान् लोकान् यो वाऽहङ्कुरुते सदा।
योऽसत्यभावनायुक्तः स तामस इति स्मृतः।। (सि. शि. १३.१५-१९)
इत्यादिषु श्रीसिद्धान्तशिखामणावपि सत्त्वरजस्तमोगुणाः प्रतिपादिताः, किन्तु न ते बन्धत्वेनाङ्गीकृताः। मलत्रयमेव वीरशैवदर्शने बन्धत्वेनाङ्गीकृतम्। तस्माद् गीतोक्तसत्त्वादिगुणत्रयेण साकं मलत्रयाणां समीक्षा निरूपिता।

मोक्षस्वरूपसमीक्षा

तत्र तावद्गीतायां गुणत्रयावरणमेव बन्ध इत्यङ्गीकारात् तद् गुणत्रयस्य तज्जन्यदुःखस्य चात्यन्तिकनिवृत्तिपुरःसरं निरतिशयानन्दप्राप्तिरेव गीतानुसारं मोक्ष इत्यभिधीयते। स च स्वर्गादिवन्न क्षणिकः, अपि तु नित्यः शाश्वतः। अत एव भगवान् श्रीकृष्णः—

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते।।[१]

इति ब्रह्मादिलोकानां पुनरावर्तित्वमुक्त्वा मोक्षपदप्राप्तानां पुनरागमनरहितत्वं च प्रतिपादितम्।

वीरशैवदर्शने मलत्रयमेव बन्ध इति स्वीकाराद् मलत्रयरूपपाशस्यात्यन्तिकनिवृत्तिपूर्वकं सच्चिदानन्दनित्यपरिपूर्णशिवत्वावाप्तिरेव मोक्ष इत्यङ्गीक्रियते। अयं मोक्षः शिवजीवापरपर्यायलिङ्गाङ्गसामरस्यात्मकः। अत एवोक्तं रेणुकभगवत्पादैः—

जले जलमिव न्यस्तं वह्नौ वह्निरिवार्पितम्।
परे ब्रह्मणि लीनात्मा विभागेन न दृश्यते।।[२] इति।

मलत्रयावरणेनैव सर्वदुःखानि जीवात्मनि दृश्यन्त इति मोक्षे तस्य निवृत्तत्वाद् मोक्षः सर्वदुःखानामभावरूपः। न केवलं दुःखानामभावः, अपि तु मोक्षे नित्यानन्दपरिपूर्णशिवत्वावाप्तिरिति कथनादयं नित्यानन्दरूपश्च। अत एव भगवत्पादैः— "मुक्तिरेव परा तृप्तिः सच्चिदानन्दलक्षणा"[३] इत्युक्तम्। तस्माद् मोक्षेऽनुभूयमानस्यानन्दस्य—

कुतो ब्रह्मा कुतो विष्णुः कुतो रुद्रः कुतो रविः।
साक्षात्कृतपरानन्दविलयस्य महात्मनः।।[४]

इति भगवत्पादोक्त्या ब्रह्मादिलोकवन्न सातिशयत्वम्, किन्तु सर्वोत्कृष्टत्वान्निरतिशयरूपत्वम्।

एवं गीतायां सिद्धान्तशिखामणौ च सर्वदुःखनिवृत्तिपुरःसरं नित्यानन्दरूपपरमात्मप्राप्तिर्मोक्ष इति स्वीकाराद् मोक्षविषये उभयोः साम्यमेव दृष्टिपथमायाति।

---

[१] भ. गी. ८.१६
[२] सि. शि. २०.६१
[३] सि. शि. १८.७४
[४] सि. शि. १९.२६

जीवन्मुक्तयोगिनां स्वरूपसमीक्षा

तत्र तावद्गीतायां साधकः कर्म-भक्ति-ज्ञानादिमोक्षसाधनैर्गुणत्रयमतीत्य ब्रह्मभावापन्नो मुक्तोऽप्यवशिष्टप्रारब्धतया शरीरविशिष्टो भवतीति जीवन्मुक्तावस्थाङ्गीक्रियते। ब्रह्मसाक्षात्कारं प्राप्तो जीवः सर्वबन्धमुक्तोऽपि प्रारब्धपरिक्षयपर्यन्तं जीवतीति जीवन्मुक्त इत्युच्यते। वीरशैवदर्शनेऽपि

स्वस्वरूपं चिदाकारं ज्योतिः साक्षाद्विचिन्तयन्।
देहवानपि निर्देहो जीवन्मुक्तो हि साधकः ।।[1]

इत्यादिषु बहुषु स्थानेषु रेणुकभगवत्पादैर्जीवन्मुक्तस्थितेरुपवर्णितत्वाज्जीवन्मुक्तावस्थाऽङ्गीक्रियते। एवं जीवन्मुक्तदशाया अङ्गीकारविषये उभयोः साम्यमस्ति।

इमामवस्थां प्राप्तो योगी गीतायां स्थितप्रज्ञ-भक्त-गुणातीत-पण्डित-योगारूढधीरेत्यादिभिरभिधानैर्व्यवह्रियते । सिद्धान्तशिखामणौ च शिवयोगि-निराभारि-जङ्गमज्ञानीत्यादिशब्दैर्व्यवह्रियते। एवं गीतायां सिद्धान्तशिखामणौ च जीवन्मुक्तस्य पर्यायनामानि भिन्नभिन्नानि सन्त्यपि तस्य स्वरूपविषये साम्यमेवास्ति। तथा हि-जीवन्मुक्तो योगी साधनकालत एव शास्त्रानुकूलानामाचरणानामनुष्ठानद्वारा परिशुद्धप्रकृतिको वर्तत इति स सदाचारी सद्गुणसम्पन्नश्च भवति। न कदापि तस्मिन्ननिष्टचिन्तनादिदुर्गुणाः परपीडापरस्त्रीगमनादिदुराचारा वा शास्त्रनिषिद्धाः सम्भवन्ति। एतस्मिन् विषयेऽपि गीतायाः सिद्धान्तशिखामणेश्च समानोऽभिप्रायोऽस्ति। अत एव भगवता श्रीकृष्णेन-

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत।
कुर्याद्विद्वांसस्तथासक्तश्चिकीर्षुर्लोकसङ्ग्रहम्।।[2]

इति गीतायाम्, रेणुकभगवत्पादैश्च-

धर्म एव समस्तानां यतः संसिद्धिकारणम्।
निस्पृहोऽपि महायोगी धर्ममार्गं च न त्यजेत्।।
ज्ञानामृतेन तृप्तोऽपि योगी धर्मं न सन्त्यजेत्।।[3]

इति सिद्धान्तशिखामणावादिष्टम् ।

---

[1] सि. शि. १६.५४
[2] भ. गी. ३.२५
[3] सि. शि. १६.६४-६५

वस्तुतो जीवन्मुक्तयोगिनां सदाचारस्य दुराचारस्य वाऽनुष्ठानेन न किञ्चित् स्वीयं प्रयोजनम्, अथापि ते सदाचारनिष्ठा भवेयुरिति प्रतिपादने गीताचार्यस्य रेणुकाचार्यस्य चेदमैदम्पर्यम्– लोके सदाचारप्रवृत्त्यभिलाषिणामपेक्षया दुष्कर्मचिकीर्षवो बहवो वर्तन्ते, तत्र सहजतया मनसः प्रवृत्तेः। तत्रापि प्रायः सर्वे लौकिका जनाः महतामाचरणमवलोक्य तदेवोत्कृष्टमिति मत्वा तेषामाचरणमनुसरन्ति। अत एवोक्तम्– "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः"[१] इति गीतायाम्, "आचारं महतां दृष्ट्वा प्रवर्तन्ते हि लौकिकाः"[२] इति सिद्धान्तशिखामणौ च। तस्माद् यदि जीवन्मुक्तयोगिनः शास्त्रनिषिद्धानि कर्माणि समाचरेयुस्तर्हि, सदाचारिणोऽपि जनास्तानवलोक्य तदेव प्रमाणमिति मत्वा शास्त्रनिषिद्धे कर्मणि प्रवृत्ता भवेयुः। दुराचारिणस्तेषामाचरणं प्रमाणयन्तः स्वानुष्ठितदुष्कर्मस्यैवोत्कृष्टत्वं कथयेयुः, अन्यांश्च तन्मार्गे प्रेरयेयुः। तथा सति लौकिकजीवनं निरादर्शतामापद्येत। यदि तु जीवन्मुक्ता महान्तः सदाचारनिष्ठाः सद्गुणसम्पन्नाश्च भवेयुस्तर्हि, तान् संवीक्ष्य सज्जनास्ताननुसरन्तो लोकहितं साधयेयुः, दुर्जना अपि तैः सन्मार्गप्रवृत्तये प्रेरणां प्राप्नुयुश्च एवं लौकिकजीवनमादर्शप्रायं भवतीति।

एवं जीवन्मुक्तयोगिनां कर्मनिरतत्वेऽपि निष्कामभावनया, ईश्वरार्पणबुद्ध्या, लोकहितापेक्षया वा तैः कर्मानुष्ठीयत इति तत्कर्मजनितगुणदोषास्तान् न बाधन्ते। अस्मिन् विषयेऽपि गीतासिद्धान्तशिखामण्योः समानतैव दृश्यते। अत एव–

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः।
कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः ।।

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम्।।[३]

इति गीतायाम्,

शिवभावनया सर्वं नित्यनैमित्तिकादिकम्।
कुर्वन्नपि महायोगी गुणदोषैर्न बाध्यते ।।[४]

---

[१] भ. गी. ३.२१
[२] सि. शि. १६.६५
[३] भ. गी. ४.२०-२१
[४] सि. शि. १६.७०

इति सिद्धान्तशिखामणौ च प्रतिपाद्यते। एतदतिरिक्तं वीरशैवदर्शने श्रोत्रादि–ज्ञानेन्द्रियेषु वागादिकर्मेन्द्रियेषु च क्रमशः प्रसादलिङ्गम्, जङ्गमलिङ्गम्, शिवलिङ्गम्, गुरुलिङ्गम्, आचारलिङ्गमिति, मनसि च महालिङ्गमित्येवं सर्वेन्द्रियेषु लिङ्गानि प्रतिष्ठितानि वर्तन्त इति प्रतिपाद्यते। तत्तत्कर्मेन्द्रियैः क्रियमाणं कर्म, तत्तज्ज्ञानेन्द्रियैर्ज्ञायमानं विषयम्, मनसाऽनुभूयमानां तृप्तिं च जीवन्मुक्तस्तत्तधिष्ठितलिङ्गाय समर्प्य करोति, जानाति, अनुभवति चेति तस्य सर्वे व्यवहारा लिङ्गापरपर्यायशिवार्पिता भवन्ति। तस्मात् सः जीवन्मुक्तस्तत्तद्व्यवहारजनितगुणदोषैर्न बाध्यत इति निरूप्यते। किञ्च–"स्तुतिनिन्दाकारास्तस्य पुण्यपापे समाप्नुयुः"[1] इत्यागमप्रामाण्येन वीरशैवदर्शने देहभावविमुक्तेन जीवन्मुक्तेन योगिनाऽनुष्ठितानां शुभकर्मणां फलानि तस्य स्तुतिकर्ता, अशुभकर्मणां फलानि निन्दाकर्ता चाप्नोतीति तं तत्कृतकर्माणि न बध्नन्तीति प्रतिपाद्यते। किञ्च–

समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ।।

मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः।।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते ।।[2]

इति गीतायाम्,

जितकामा जितक्रोधा मोहग्रन्थिविभेदिनः।
समलोष्टाश्मकनकाः साधवः शिवयोगिनः।।

समाः शत्रौ च मित्रे च साक्षात्कृतशिवात्मकाः।
निस्पृहा निरहङ्कारा वर्तन्ते शिवयोगिनः।।[3]

इति सिद्धान्तशिखामणौ च जीवन्मुक्ता योगिनः स्तुतिनिन्दादिद्वन्द्वेषु समभावयुक्ता भवन्तीति प्रतिपादितत्वाज्जीवन्मुक्तस्य समस्थितिविषयेऽपि मिथः साम्यम् । तदेवं जीवन्मुक्तस्य स्वरूपविषये भगवद्गीतायाः सिद्धान्तशिखामणेश्च समन्वयः स्वयं सिद्ध एव ।

तदेवमेतावता भगवद्गीतानुसारं सिद्धान्तशिखामण्यनुसारं च बन्धमोक्षयोः स्वरूपं, जीवन्मुक्तशिवयोगिनां स्वरूपं च प्रथमं पार्थक्येनोपस्थाप्य, तदनूभयसम्मतबन्धमोक्ष–जीवन्मुक्तविषयाणां समन्वयात्मिका समीक्षा विहिता ।

* * *

---

[1] देवी. कालो. ८४

[2] भ. गी. १४.२४–२५

[3] सि. शि. ११.३९–४०

षष्ठोऽध्यायः

मोक्षोपायविमर्शः

अस्ति किलेह कश्चिद्ध्येयमधिगन्तुं कस्यचित्पथोऽनुसरणं नूनमावश्यकम्। मनुष्याणां निखिलध्येयेषु परमध्येयस्य चरमपुरुषार्थस्य प्राप्त्यर्थमप्यधिकारिभेदेन विविधाः पन्थानः क्रमेण समुच्चयेन वोपपादिताः शास्त्रेषु। मार्गभेदेऽपि तत्प्राप्यपरमपदो मोक्षस्त्वेक एव। यथा कञ्चिन्नगरं जिगमिषुषु जनेषु केचन विमानारूढाः, अपरे धूमयानोपविष्टाः, अन्ये चान्यवाहनारूढाः सन्तः, सर्वे शीघ्रं मन्दं वा तमेव नगरमवाप्स्यन्ति तथा मोक्षसाधनभूतविभिन्नमार्गमाश्रिता जनाः सर्वे तमेकमेव मोक्षमाविन्दन्ति। अत एव भगवता श्रीकृष्णेन–

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः।।[1]

इत्युक्तम्। शिवकविना पुष्पदन्तेनाऽपि– "रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको गम्यस्त्वमसि पयसामर्णव इव"[2] इति ऋजुत्वेन क्लिष्टत्वेन च मोक्षमार्गाणां नानात्वं प्राप्यस्य मोक्षस्य चैकत्वं स्तुतम्। त इमे मार्गाः शास्त्रेषु मोक्षोपायशब्देन व्यवह्रियन्ते।

तत्र तावत् श्रीमद्भगवद्गीतायाम् –

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना।
अन्ये सांख्येन योगेन कर्मयोगेन चापरे।।

अन्ये त्वेवमजानन्तः श्रुत्वाऽन्येभ्य उपासते।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः।।[3]

इति ज्ञान–कर्म–ध्यान–उपासनादिविविधमार्गा मोक्षोपायत्वेन व्यवस्थापिताः।

---

[1] भ. गी. ४.११

[2] शिवमहिम्न. ७

[3] भ. गी. १३.२४–२५

श्रीसिद्धान्तशिखामणौ च– "भावकर्मसमायुक्तं ज्ञानमेव विमुक्तिदम्"[१] इति कर्मसमुच्चितस्य ज्ञानस्य, "विना प्रसादमीशस्य संसारो न निवर्त्यते"[२] इति शिवानुग्रहस्य च मोक्षोपायत्वमुपस्थाप्यते। लब्धशिवदीक्षासंस्कारः कर्म-ज्ञान-शिवानुग्रहविशिष्टः साधकः षट्स्थलोपासनमार्गेण लिङ्गाङ्गसामरस्यरूपं मोक्षं समाप्नोतीति तत्र शिवदीक्षा-ज्ञान-कर्म-शिवानुग्रह-षट्स्थलोपासना मोक्षोपायत्वेन निर्दिष्टाः ।

अथ साम्प्रतं श्रीमद्भगवद्गीताभिमतानां श्रीसिद्धान्तशिखामणिसम्मतानां च मोक्षोपायानां स्वरूपं तावत् क्रमेण यथाग्रन्थं विमृश्य, तदनूभयसम्मतमोक्षोपायानां समीक्षोपस्थाप्यते।

गीतानुसारेण ज्ञानस्वरूपम्

तत्र श्रीमद्भगवद्गीतायां 'ज्ञायतेऽनेनात्माऽसद्वस्तुव्यावर्तकतयेति ज्ञानम्' इति व्युत्पत्तिसिद्ध आत्मानात्मविवेको ज्ञानशब्देनाभिहितः। तदुक्तम्– "क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम"[३] इति। अत्रात्मा क्षेत्रज्ञशब्देन, तद्भिन्नं शरीरादिकं च क्षेत्रशब्देन निगदितम्। इदं तु ज्ञानस्यारम्भिकं स्वरूपम्। तस्य परिपूर्णं स्वरूपं तु "सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि"[४] इति भगवदुक्त्या सर्वत्र स्वात्मानम्, स्वात्मनि च सर्वमिति विज्ञाय "सर्वं खल्विदं ब्रह्म"[५], "वासुदेवः सर्वमिति"[६] इति श्रुतिगीतोक्त्यनुसारं सर्वत्र ब्रह्मणो दृढानुभवरूपो विवेकः। "सर्वभूतस्थमात्मानम्' इत्यस्य विस्तीर्णं प्रामाणिकं च भगवद्गीताया विभूतियोगाभिधेये दशमेऽध्याये भगवता श्रीकृष्णेन सर्वत्र निजतेजसः सत्वप्रतिपादनव्याजेन दृढीकृतम्, सर्वभूतानि चात्मनि इत्यस्य च विस्तीर्णं प्रामाणिकत्वं च विश्वरूपदर्शनाख्ये एकादशाध्याये स्वस्मिन्नेव सकलविश्वप्रदर्शनव्याजेन दृढीकृतम्।

---

१. सि. शि. १६.२५

२. सि. शि. १८.६०

३. भ. गी. १३.२

४. भ. गी. ६.२९

५. छा. उ. ३.१४.१

६. भ. गी. ७.१९

ज्ञानस्य त्रैविध्यम्

गीतानुसारं ज्ञानं सात्त्विक-राजस-तामसभेदेन त्रिविधम्। तत्र येन ज्ञानेनाव्यक्तादिस्थावरान्तं विभक्तेषु सर्वभूतेष्वपि विभागरहित एक आत्मास्तीतीक्ष्यते तत्सात्त्विकम्, येन ज्ञानेन सर्वभूतेषु विभिन्नेषु विभिन्न आत्मा वर्तत इत्यवगम्यते तद्राजसम्, येन च ज्ञानेन जीवोऽपरिपूर्णमपि कार्यं पूर्णमिव मत्वा तत्रासक्तोऽयथार्थविवेकी, अल्पज्ञानी च भवति तत्तामसम्। तदुक्तं भगवता श्रीकृष्णेन–

सर्वभूतेषु येनैकं भावमव्ययमीक्षते।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्।।

पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान्।
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्।।

यत्तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहैतुकम्।
अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम्।।[१] इति।

एते क्रमेणोत्तम-मध्यम-कनिष्ठानि ज्ञानानि। अत एव वेङ्कटनाथो ब्रह्मानन्दगिर्याख्यानाभिधेये स्वीये गीताभाष्ये– "एतादृशाद्वितीयात्मतत्त्वज्ञानमेव सात्त्विकम्। द्वैतज्ञानं तु राजसं तामसं च संसारकारणम्, न सात्त्विकम्। तथा च श्रुतिः "उदरमन्तरं कुरुते, अथ तस्य भयं भवति"[२], "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति"[३] इत्यादि"[४] इति श्रुतिप्रमाणपुरःसरं सात्त्विकज्ञानस्योत्कृष्टत्वमुपस्थापितवान्, येन राजसतामसज्ञानयोर्निकृष्टत्वं स्वयमेव सिद्ध्यति। तस्मादत्र सात्त्विकं तज्ज्ञानमेव गीताभिहितज्ञानयोगपदवाच्यम्।

ज्ञानस्य प्रतिबन्धकावरणानि

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च।।[५]

---

[१] भ. गी. १८.२०-२२

[२] तै. उ. २.७

[३] बृ. उ. ४.४.१९; कठो. ४.१०

[४] भ. गी. ब्रह्मानन्दगिरि १८.२०

[५] भ. गी. ३.१९

इति भगवदुक्त्या ज्ञानिनो नित्यशत्रुभूतेन कामाद्यरिषड्वर्गेण ज्ञानमावृतं भवति। अत्र कामशब्दः क्रोध-लोभ-मोह-मद-मत्सराणामप्युपलक्षणम्, "कामात् क्रोधोऽभिजायते----"[१] इत्यादिभिर्भगवदुक्तिभिः क्रोधादीनां कामजन्यत्वावगमात्।

ननु कामादयो मूर्खस्यारयो भवेयुः, ज्ञानिनां कथम्? इत्याकाङ्क्षायामाचार्यचरणैः शङ्करभगवत्पादै रुच्यते- "ज्ञानी हि जानात्यनेनाहमनर्थे प्रयुक्तः पूर्वमिति। दुःखी च भवति नित्यमेव। अतोऽसौ ज्ञानिनो नित्यवैरी न तु मूर्खस्य। स हि कामं तृष्णाकाले मित्रमिव पश्यन् तत्कार्ये दुःखे प्राप्ते जानाति, तृष्णयाऽहं दुःखित्वमापादित इति, न पूर्वमेवातो ज्ञानिन एव नित्यवैरी"[२] इति।

ननु ज्ञानं प्रकाशात्मकमप्रकाशात्मकैः कामादिभिः कथमाव्रियते? इति जिज्ञासायामुच्यते, यथा प्रकाशात्मकोऽप्यनलो धूमेन, यथा वा प्रतिबिम्बदर्शनसक्षमो दर्पणो धूल्यादिमलेनाव्रियते तथा ज्ञानमप्रकाशात्मकैः कामादिभिराव्रियते। तदुक्तम् -

धूमेनाव्रियते वह्निर्यथादर्शो मलेन च।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम्।।[३] इति।

इमे च कामादयः किमधिष्ठानाः सन्तो ज्ञानमावृण्वन्ति? इत्याकाङ्क्षायाम्-

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम्।।[४]

इति भगवता बहिरन्तरिन्द्रियाण्येषामधिष्ठानमित्युक्तम् । एवं कामादयो ज्ञानस्य प्रतिबन्धकावरणानि भवन्तीति ज्ञानी साधकस्तेषां विनाशाय साधनकालत एव प्रयतेत।

ज्ञानसाधनानि

ननु कीदृशैः साधनैर्ज्ञानावरणानि सर्वाणि निवर्त्य ज्ञानं प्रकाशयति? इत्याकाङ्क्षायां भगवान् श्रीकृष्णः-

अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम्।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः।।

---

१. भ. गी. २.६२
२. भ. गी. शां. भा. ३.३९
३. भ. गी. ३.३८
४. भ. गी. ३.४०

इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ।।

असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु।।

मयि चानन्ययोगेन भक्तिरव्यभिचारिणी।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ।।

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थसाधनम्।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ।।[1]

इत्यमानित्वादिकं ज्ञानसाधनत्वेनोपदिदेश। ननु 'एतज्ज्ञानमिति' ज्ञानशब्देनाभिहितानाममानित्वादीनां ज्ञानसाधनत्वं कथम् ? इति चेत्, न ज्ञानसाधनत्वादेव तेषु ज्ञानत्वोपचारात् । तथा हि ज्ञानं नाम ज्ञेयस्य परिच्छेदकम् । न ह्यमानित्वादयो कस्यचिद्वस्तुनः परिच्छेदका भवितुमर्हन्ति। तस्मादिमे ज्ञानसाधनत्वेन ज्ञानपदवाच्याः, न तु ज्ञानत्वेन। यथाऽन्नस्य कारणीभूतं धान्यादिकमप्यन्नशब्देनाभिधीयते, तथेमे ज्ञानहेतुभूतत्वाज्ज्ञानशब्दाभिधेयाः। तत्र भवता भाष्यकारेण श्रीनीलकण्ठाचार्येण– "अमानत्वादयोऽपि चेतोवृत्तिविशेषाः, दृश्यत्वाच्च; तत्क्षेत्रविकारा एव सन्तः सत्त्वगुणकार्यत्वात् ज्ञानस्य साधनभूता अप्युपचाराज्ज्ञानपदवाच्या भवन्ति"[2] इत्यमानित्वादीनां ज्ञानसाधनत्वं समर्थितम् ।

एवं ज्ञानसाधनत्वेनोपदिष्टानाममानित्वादिपदानामयमर्थः– स्वीये विद्यमानैरविद्यमानैर्वा गुणैरात्मनः श्लाघारूपं सम्मानं मानित्वम्, तद्राहित्यममानित्वम्। नात्रामानित्वशब्देनानहङ्कारो ग्राह्यः, 'अनहङ्कार एव च' इत्युत्तरे उक्तत्वात् पुनरुक्तिदोषापत्तेः। ख्यातिलाभपूजार्थं स्वेनाचरितस्य धर्मस्य प्रकटनं दम्भः, तदभावोऽदम्भित्वम् । कायवाङ्मनोभिः प्राणिनां पीडनं हिंसा, तद्वर्जनमहिंसा । परेणापकृतेऽपि चित्तस्य निर्विकारत्वं क्षान्तिः। आर्जवमकुटिलत्वम्, अर्थात् त्रिकरणेष्वेकरूपत्वमिति भावः। मोक्षसाधनज्ञानाश्रयशास्त्रोपदेष्टुराचार्यस्य आप्त–अङ्ग–स्थान–सद्भावैः[3] सेवनम्, प्रणिपातपरिप्रश्नादिप्रयोगेण ज्ञानग्रहणं चाचार्योपसेवनम्। उक्तं चाचार्यलक्षणं स्मृतिकर्त्रा मनुमहर्षिणा–

---

[1] भ. गी. १३.७–११

[2] भ. गी. भारतभावदीपः १३.७

[3] एतासां चतुर्विधसेवानां विवरणमनुपदमेव वक्ष्यते सिद्धान्तशिखामण्यनुसारं मोक्षोपायस्वरूपप्रतिपादनावसरे।

उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।
साङ्गं च सरहस्यं च तमाचार्यं प्रचक्षते।।[1] इति।

एतादृशस्याचार्यस्योपासनविधानं च भगवता श्रीकृष्णेन–

तद्विद्धि प्राणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः।।[2]

इत्युपदिष्टम्। शौचं बाह्याभ्यन्तरभेदेन द्विविधम्; बाह्यमलानां मृज्जलाभ्यां प्रक्षालनेनोपजायमानं बाह्यम्, अन्तर्मलानां रागादीनां विषयदोषदर्शनाभ्यासेनोपजायमानमाभ्यन्तरम्। मोक्षसिषाधिषया तत्साधनप्रवृत्तस्य विघ्नबाधोपपत्तावपि तत्साधनापरित्यागेन पौनःपुन्येन तत्रैव प्रयत्नाधिक्यं स्थैर्यम्। आत्मविनिग्रहस्तु आत्मनो देहेन्द्रियादेर्मोक्षसाधनप्रतिकूलस्वभावनिरोधेन तदनुकूलतया व्यवस्थापनम्। इन्द्रियार्थेषु शब्दस्पर्शादिषु विषयेषु दृष्टानुश्रविकेषु फलेषु विरागभावो वैराग्यम्। अहमेव सर्वोत्कृष्ट इति गर्वोऽहङ्कारः, तदभावोऽनहङ्कारः।

ननूक्तं वैराग्यं कथमुपजायते? इति जिज्ञासायामुक्तम् "जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्" इति। गर्भवासयोनिद्वारनिःसरणं जन्म, मृत्युः सर्वमर्मच्छेदनरूपः, जरा तु बुद्धिबलतेजोविनाशसर्वपरिभवरूपा, व्याधयो वातपित्तश्लेष्मणां वैषम्यजन्या ज्वरादयः, इमे सर्वे दुःखरूपदोषयुक्ता इति जन्मादिषु दोषस्यानुदर्शनं पुनः पुनरवलोकनमित्यर्थः। एवं दोषदर्शनं विषयेषु वैराग्योदयहेतुकम्। क्वचिदुक्तं च विषयाणां दुःखत्वम्–

जन्मदुःखं जरादुःखं जायादुःखं पुनः पुनः।
संसारसागरं दुःखं तस्माज्जाग्रत जाग्रत।। इति।

पुत्रदारगृहादिषु ममतामात्रं सक्तिः, तद्राहित्यमसक्तिः। तेषु पुत्रादिष्वयमेवाहमिति तादात्म्यभावोऽभिष्वङ्गः। यथा पुत्रादेः सुखेऽहमेव सुखी, दुःखे चाहमेव दुःखीत्यादयः, तद्वर्जनमनभिष्वङ्गः। ईक्षितवस्तु-विषय-व्यक्तीनां प्राप्तौ हर्षराहित्यम्, अनपेक्षितवस्त्वादीनामवाप्तौ च दुःखराहित्यं नित्यं समचित्तत्वम्। आदिष्टं च भगवताऽन्यत्र–

---

[1] म. स्मृ. २.१४०

[2] भ. गी. ४.३४

न प्रहृष्येत् प्रियं प्राप्य नोद्विजेत् प्राप्य चाप्रियम्।
स्थिरबुद्धिरसम्मूढो ब्रह्मविद् ब्रह्मणि स्थितः।।[१] इति।

परमेश्वरे एकतानतयाऽऽत्यन्तिकी श्रद्धारूपाऽव्यभिचारिणी भक्तिः। शुद्धश्चित्तप्रसादजनको निर्जनो यो देशः, तत्सेवनं विविक्तसेवित्वम् । विविक्तेषु हि देशेषु चित्तं प्रसीदति यतः, तत आत्मादिभावना विविक्ते देशे उपजायत इति भावः। विषयानुरागिणां संसारिणां जनानां समुदायेऽप्रीतिररतिर्जनसंसदि। आत्मानमधिकृत्य क्रियमाणं नित्यमनुचिन्तनमध्यात्मज्ञाननित्यत्वम्, आत्मचिन्तने निश्चिता निष्ठेत्यर्थः। तथा तत्त्वज्ञानस्य वाक्यार्थरूपज्ञानस्य फलरूपो यो मोक्षस्तस्यालोचनं तत्त्वज्ञानार्थदर्शनम्। तत्त्वज्ञानफलालोचने हि तत्साधने प्रवृत्तिः स्यादिति भावः। तदेवमेतदमानित्वादितत्त्वज्ञानार्थदर्शनान्तं विंशतिसंख्याकं ज्ञानसाधनं प्रोक्तम् ।

ज्ञानस्य मोक्षहेतुत्वम्

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्।।

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ।।[२]

इति भगवदुक्त्यैतावतोक्तैर्ज्ञानसाधनैरज्ञानं सकलं तत्कार्यं ज्ञानावरणं कामादिकं च निवर्तते, "तत्त्वमसि"[३] इत्याचार्योपदेशेन देहाद्यतिरिक्तस्यात्मनो ज्ञानमुदेति तदनु तदनुसन्धानेन "अहं ब्रह्मास्मि" इत्युक्त्या ज्ञेयः[४] परमात्मैवाहमित्यनुभवात्मकं परमं ज्ञानं सिद्ध्यति। इदं ज्ञानमेव गीतायां विज्ञानशब्देनाभिधीयते[५]। एतादृशस्य विज्ञानापरपर्यायस्य ब्रह्मानुभावज्ञानस्योदये "तमेव विदित्वाऽतिमृत्युमेति[६], "ब्रह्मवेद

---

[१] भ. गी. ५.२०

[२] भ. गी. ५.१६-१७

[३] छा. उ. ६.८.७

[४] ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते ।
आदिमत्परं ब्रह्म न सत्तन्नासदुच्यते ।। भ. गी. १३.१२-१७

[५] "विज्ञानं हि विविक्ताकारविषयं ज्ञानम्, यथाहं मद्व्यतिरिक्तात् समस्तचिदचिद्वस्तुजातान्निखिलहेयप्रत्यनीकतयाऽनवधिकातिशयासंख्येयकल्याणगुणगणानन्तमहाविभूतितया च विविक्तस्तेन विविक्तविषयज्ञानेन सह मत्स्वरूपं विषयज्ञानम्"। (द्र.भ.गी.रा.भा. ७.२)

[६] श्वे. उ. ३.७

ब्रह्मैव भवति"[१] इत्यादिश्रुतिभिरात्यन्तिकदुःखनिवृत्तिपूर्वकं निरतिशयानन्दरूपं ब्रह्मस्वरूपं मोक्षमवाप्नोति। अत एव भगवता श्रीकृष्णेन–

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि।।[२]

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि।।

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा।।

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति।।[३]

इति ज्ञानस्योत्कृष्टत्वं कैवल्यकारणत्वं चोपदिष्टम् ।

कर्मणः स्वरूपम्

शरीरेन्द्रियादिभिरुपजायमानाः क्रियाः कर्मेत्यभिधीयन्ते। तत्कर्मणां शरीरम्, जीवात्मा, करणानि, विविधाश्चेष्टाः, दैवं चेति पञ्चविधानि कारणानि। एतैरेव शास्त्रविहितं शास्त्रनिषिद्धं वा सकलं कर्म निष्पद्यते। तदुक्तं भगवता–

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्।
विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ।।

शरीरवाङ्मनोभिर्यत् कर्म प्रारभते नरः।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ।।[४] इति।

एभिर्हेतुभिर्लोको कर्मसु प्रवृत्तो भवति।

कर्मणस्त्रैविध्यम्

ज्ञानमिव कर्माऽपि सात्त्विक–राजस–तामसभेदेन त्रैविध्यम् । तत्र कर्तृत्वाभिमानं विना रागद्वेषरहितेन भावेनाफलाकाङ्क्षया च क्रियमाणं यत् कर्म तत्सात्त्विकम्।

---

[१] मुण्ड. ३.२.९
[२] भ. गी. ४.३५
[३] भ. गी. ४.३५–३८
[४] भ. गी. १८.१४–१५

यत्तु फलप्रेप्सयाऽहङ्कारेण बहुधा प्रयासेन चाचर्यते तद्राजसम् । यच्च कर्मानन्तरजन्यं बन्धनम्, अर्थस्य शक्तेर्वा नाशकम्, परहिंसां स्वसामर्थ्यं चापरिगण्य मोहवशात् क्रियते, तत्तामसम्, तदुक्तं भगवता–

नियतं सङ्गरहितमरागद्वेषतः कृतम्।
अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते।।

यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः।
क्रियते बहुलायासं तद्राजसमुदाहृतम्।।

अनुबन्धं क्षयं हिंसामनवेक्ष्य च पौरुषम्।
मोहादारभ्यते कर्म यत्तत्तामसमुदाहृतम्।।[१] इति।

एतेषु सात्त्विकं कर्मैवोत्कृष्टं कर्म सद् गीताभिमतकर्मयोगपदवाच्यं भवति, न तु राजसं तामसं वा ।

कर्मयोगः

नात्राधिष्ठानादिहेतुभिर्निष्पद्यमानं येन केनाऽपि प्रकारेण विहितं सकलं कर्मयोगपदवाच्यं भवितुमर्हति, अपि तु "योगः कर्मसु कौशलम्"[२] इति भगवदुक्त्यनुसारं कुशलतापूर्वकं कृतमेव। किं तत्र कौशल्यम् ? इति जिज्ञासायामुच्यते– क्रियमाणं कर्म बन्धनकारणं यथा न भवेत्तथा तदाचरणमेव तत्र कौशल्यम् । कीदृशं तदाचरणम् ? इत्याकाङ्क्षायामुक्तमाचार्यचरणैः श्रीशङ्करभगवत्पादैः– "योगो हि कर्मसु कौशलं स्वधर्माख्येषु कर्मसु वर्तमानस्य या सिद्धसिद्ध्योः समत्वबुद्धिरीश्वरार्पितचेतस्तया तत् कौशलं कुशलभावः। तद्धि कौशलं यद् बन्धस्वभावान्यपि कर्माणि समत्वबुद्ध्या स्वभावान्निवर्तन्ते"[३] इति समत्वबुद्ध्या विहितकर्मणामबन्धकत्वं निर्दिष्टम् । इत्येवं समत्वबुद्ध्याचरितं कर्म कर्मयोग इत्युच्यते ।

कर्मयोगोऽयं त्रिधा सम्पाद्यते– तत्र प्रथमं फलाकाङ्क्षाराहित्येन, द्वितीयं कर्तृत्वाभिमानवर्जनेन, तृतीयमीश्वरार्पणतयेति। अत एव भगवता श्रीकृष्णेन–

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि।।[४]

---

[१] भ. गी. १८.२३-२५
[२] भ. गी. २.५०
[३] भ. गी. शा. भा. २.५०
[४] भ. गी. २.४७

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।
अयुक्तः कामकारेण फले सक्तो निबध्यते।।[१]

इत्याद्यनेकेषु स्थानेषु परित्यक्तफलानां कर्मणामबन्धकत्वम् ,

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहङ्कारविमूढात्मा कर्ताहमिति मन्यते।।

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ।।[२]

इत्यादिषु कर्तृत्वाभिमानपरित्यागपूर्वकं विहितानां कर्मणामबन्धकत्वम्,

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ।।
शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।।[३]

इत्यादिषु चेश्वरार्पणबुद्ध्या कृतानां कर्मणामबन्धकत्वं स्पष्टमुपवर्णितम्।

ननु कर्माणि सम्यगाचर्य तदनु तत्फलानि यदि परित्याज्यानि, तर्हि, किमर्थं तान्याचरणीयानि? कर्माचरणानन्तरं फलपरित्यागात् कर्मपरित्याग एव श्रेयस्करः, येन न कर्म घटते, न तत्फलस्य बन्धनमिति चेत्, मैवम्, कर्मत्यागस्यानुपपन्नत्वात्। तथा हि– न ह्यस्मिन् लोके वर्तमानः पुरुषः कश्चिदपि कर्माऽकुर्वाणः समवतिष्ठते। नाहं किञ्चित्करोमीति व्यवसितोऽपि सर्वः पुरुषो देहे प्राणानां सञ्चारं यावत्, प्रकृतिसमुद्भवैः सत्त्वरजस्तमोभिः प्राक्तनकर्मानुगुणं प्रवृद्धैर्गुणैः स्वोचितमपेक्षितमनपेक्षितं वा कर्म प्रत्यवशः प्रवर्तत एव। तदुक्तम्–

न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः।।[४]

यदहङ्कारमाश्रित्य न योत्स्य इति मन्यसे।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति।।

---

[१] भ. गी. ५.१२
[२] भ. गी. ३.२७–२८
[३] भ. गी. ९.२७–२८
[४] भ. गी. ३.५

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा।
कर्तुं नेच्छसि यन्मोहात् करिष्यस्यवशोऽपि तत्।।[1] इति।

एवं जीवतः पुरुषस्य स्वभाव इदं कर्मरतत्वं नाम। "स्वभावो दुरतिक्रमः" इत्यभियुक्तोक्त्या स्वभावरूपस्य कर्मणोऽतिक्रमणमनुपपन्नम् । अत एव श्रुतिरपि– "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः"[2] इति कर्म कुर्वन्नेवोपजीवितुमादिष्टवती। यदि स्वभाववशात्कर्मप्रवृत्तानि कर्मेन्द्रियाणि बलान्निरुद्धेरन्, तर्हि तन्निरोधमप्येकं कर्म भवति। यदि सर्वं परित्यज्य तूष्णीमुपविशेत्तर्हि श्वासप्रश्वासस्तु प्रचलत्येव निरन्तरम्, तदपि कर्मैव। एवं कर्मत्यागस्य सर्वथाऽनुपपन्नत्वात् कर्मफलानि हातव्यानि न कर्माणि। अत एव भगवता श्री कृष्णेन–

न हि देहभृतां शक्यं त्यक्तुं कर्माण्यशेषतः।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते।।[3]

इति कर्मणां त्यागस्यानुपपन्नत्वात् कर्मफलत्यागायादिष्टम् । वस्तुतस्तु कर्माणि न हि बन्धकानि, अपि तु कर्मफलानि कर्तृत्वाभिमानं च बन्धकानि, कर्मणां जडत्वात्, जडानां च प्रवृत्त्यभावात् । यदि कर्माण्येव बन्धकारणानि भवेयुस्तर्हि, अद्यास्माभिराचरितं यत्किञ्चिदपि कर्माद्यैव परिसमाप्यते एवं स्वयं समाप्तं कर्म कर्तुर्भाविजन्मप्रवर्तकं तत्कर्मफलरूपसुखदुःखकारणं च न प्रभवितुमर्हति, किन्तु कर्माचरणवेलायां कर्तुः फलाकाङ्क्षाभावेन कर्तृत्वाभिमानेन च तन्मनसि तत्कर्मणो वासनोदेति, या तस्य जन्मनः सुखदुःखयोश्च हेतुर्भवति। किञ्चैतद्विपरीतं केवलं मनसाऽपीदं करणीयम्, अनेनेदं फलं लभ्यत इत्यभिमानपूर्वकं चिन्तितं कर्म, शरीरबाह्येन्द्रियादिभिर्नाचरितमपि तत् फलोन्मुखं बन्धकं वा भवितुर्महति। अत एव हि शास्त्रेषु मनसाऽप्यनिष्टचिन्तनादिकं न कर्तव्यमिति निषेधो विहितः खलु! तस्मात् कर्माभिमानं तत्फलापेक्षं च बन्धकारणम्, न तु तत्कर्म, कर्मणां वासनोदये फलापेक्षाभिमानयोर्हेतुत्वात्, कर्मणामहेतुकत्वाच्च। अत एव भगवता श्रीकृष्णेन–

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्।
भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां[4] क्वचित्।।[5]

---

[1] भ. गी. १८.५९–६०
[2] ईशा. उ. २
[3] भ. गी. १८.११
[4] अनाश्रितः कर्मफलं कार्यं कर्म करोति यः।
स संन्यासी..............................।। (भ. गी. ६/१) इत्युक्तत्वात्र कर्मत्यागी संन्यासी।
[5] भ. गी. १८/११ ।

इति फलस्याभिमानस्य च त्यागिनामनिष्टादिफलैरबन्धकत्वमुक्तम् ।

किञ्च, सात्त्विकादित्यागत्रयेषु कर्माभिमानफलत्यागस्यैव सात्त्विकत्वप्रतिपादनव्याजेनात्र तस्योत्कृष्टत्वमनियतकर्मपरित्यागस्य तामसत्वप्रतिपादनव्याजेन तस्य निकृष्टत्वं चोपवर्णितं भगवता–

नियतस्य तु संन्यासः कर्मणो नोपपद्यते।
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः।।

दुःखमित्येव यत्कर्म कायक्लेशभयात् त्यजेत्।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्।।

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन।
सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः।।[१] इति।

किञ्च, कर्मणः फलाकाङ्क्षापरित्यागेनायमपि लाभः– फलाकाङ्क्षाविरहितो नरः क्रियमाणे कर्मणि पूर्णरूपेण स्वमनोऽवस्थापयितुं समर्थः सन् परिपूर्णतया कार्यसंलग्नो भवति, तस्मात्तेनाचरितं कर्म सर्वाङ्गसुन्दरमादर्शपूर्णं च भवति। यश्च फलाकाङ्क्षावृतस्तन्मनसि कर्मनिरतवेलायां तत्कर्मफलचिन्ताऽप्युपजायते, येन तस्य मनो द्विधा विभक्तं सद्, अर्धभागेन फलचिन्तामपरार्धभागेन मात्रं प्रवृत्तकर्मचिन्तां करोति। इत्येवं स पूर्णरूपेण कर्म नाचरितुमर्हतीति तत्कृतं कार्यमपि तावन्न सुन्दरं फलप्रदमपि वा भवति, यावत् स अपेक्षते। तस्मात् फलाकाङ्क्षाविरहितेन नरेण विहितं कर्म परिपूर्णमादर्शं च भवतीत्ययमपि फलापेक्षपरित्यागस्य लाभः। अत एव गीतायामनेकत्रफलापेक्षरहितम्, कर्तृत्वाभिमानवर्जितम्, कर्मेश्वरार्पणबुद्ध्याऽऽचरितुमुपदिष्टम्, एतेषां बन्धकाभावात् ।

ननूक्तप्राकारेण फलापेक्षारहितादिभावविहितानि सकलानि कर्माणि बन्धकानि न भवेयुस्तर्हि, उक्तफलापेक्षारहितादिभावैः शास्त्रनिषिद्धानि कर्माणि किमर्थं नाचरणीयानि, तेषामप्युक्तभावविहितत्वेन बन्धकाभावादिति चेत्, सत्यम् । किन्तु निषिद्धानां कर्मणामाचरणेन परपीडाशास्त्रोल्लङ्घनादिदोषा भवन्त्येव । तस्मात् स्वस्मायाबन्धकान्यपि निषिद्धानि कर्माणि नाचरितव्यानि। अत एव भगवता– "लोकसङ्ग्रहमेवापि सम्पश्यन् कर्तुमर्हसि"[२] इति कर्माचरणे परहितम्, "तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ"[३] इति शास्त्रप्रामाण्यं चावलोकयितुमुपदिष्टम् ।

---

[१] भ. गी. १८.७-९
[२] भ. गी. ३.१७
[३] भ. गी. १६.२४

किञ्च, "स्वधर्ममपि चावेक्ष्य"[1] इति भगवदुक्त्या स्वधर्मानुकूलान्येव शास्त्रसम्मतानि कर्माणि समाचरितव्यानि फलापेक्षाभिमानयोः परित्यागपूर्वकमीश्वरार्पणबुद्ध्या च भगवद्गीतोपदिष्टस्य कर्मयोगस्येदमेव स्वरूपम् ।

धार्मिकाचरणानि

ब्राह्मण-क्षत्रिय-वैश्य-शूद्रेषु ब्रह्मचर्य-गार्हस्थ्य-वानप्रस्थ-संन्यासाश्रमेषु च चतुर्विधेषु वर्णाश्रमधर्मेषु स्वस्वधर्मानुकूलान्याचरणानि कर्मापरपर्यायाणि धार्मिकाचरणानीत्यभिधीयन्ते। "चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः[2] इति भगवदुक्त्या च वर्णधर्मा गुणकर्मणां विभागेनोत्पन्नाः। तत्र च गुणा स्वभावजन्याः कर्माणि च तद्गुणजन्यानि। एवं ब्रह्मणादिवर्णानुकूलकर्माणि तत्तत्स्वभावेन प्रविभक्तानि। तदुक्तं भगवता–

ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः।।[3] इति।

एतेषु–

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्मस्वभावजम्।।[4]

इति भगवता श्रीकृष्णेन शमादीनां ब्राह्मणकर्मत्वमुपस्थापितम् । तत्र शमो बाह्येन्द्रियनियमनम्, दमोऽन्तःकरणनिग्रहः शौचादीनि ज्ञानसाधनानां प्रतिपादनावसरे व्याख्यातानि, ज्ञानं शास्त्रीयम्, विज्ञानमनुभवात्मकम्, आस्तिक्यमागमार्थेषु सत्यत्वनिश्चयः। इत्येतानि ब्राह्मणस्य स्वभावजानि कर्माणि अथवा एतच्छमादिषु यस्य स्वभावः प्रवर्तते स ब्राह्मणः, तस्येमानि कर्माणीति भावः ।

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्।।[5]

इति भगवता क्षत्रियाणां कर्माणि निर्दिष्टानि। अस्यायमर्थः– युद्धे निर्भयप्रवेशसामर्थ्यं शौर्यम्, परैरनभिभवनीयता तेजः, विघ्नोपनिपातेऽप्यारब्ध-

---

[1] भ. गी. २.३१
[2] भ. गी. ४.१३
[3] भ. गी. १८.४१
[4] भ. गी. १८.४२
[5] भ. गी. १८.४३

कर्मसमापनसामर्थ्यं धृतिः, कार्यनिर्वहणदक्षत्वं दाक्ष्यम्, आत्ममरणनिश्चयेऽपि शत्रुभ्यः पराङ्मुखराहित्यम्। देयद्रव्येषु मुक्तहस्तता दानम्, स्वव्यतिरिक्तसकलजननियमनसामर्थ्यमीश्वरभावः। इत्येतानि क्षत्रियस्य स्वभावजानि कर्माणि, उत वोक्तेषु शौर्यादिषु यस्य स्वभावः प्रवर्तते स क्षत्रियः, तस्येमानि कर्माणीति तात्पर्यम्।

सस्योत्पादनादिकृषिकर्म, पशुपालनम्, धनसञ्चयहेतुभूतं क्रयविक्रयात्मकं वाणिज्यमितीमानि वैश्यकर्माणि। सुश्रूषास्वभावात्मकं सेवाकर्म शूद्रस्य स्वभावजं कर्म। तदुक्तं भगवता–

> कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम्।
> परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्।।[1] इति।

अर्थात् कृष्यादिषु यस्य स्वभावः प्रवर्तते स वैश्यः, परिचर्यायां च यस्य स शूद्र इति। एवं ब्राह्मणस्य ज्ञानप्रवर्धनम्, क्षत्रियस्य शक्तिप्रवर्धनम्, वैश्यस्यान्नद्रव्ययोर्वर्धनम्, शूद्रस्य सेवा च स्वाभाविकं कर्म। "स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम्"[2] इति भगवदुक्त्यैतेषामाचरणेन पापानि नावृण्वन्ति। इमानि ब्राह्मणादिवर्णानां स्वाभाविकान्याचरणानि।

तदेवमेतावता विचारेण कर्मयोगो नाम शास्त्रविहितानां परहितपराणां स्वस्वधर्मानुकूलानां कर्मणामफलाकाङ्क्षया, कर्तृत्वाभिमानं विना, ईश्वरार्पणभावेन चाचरणम्। एतादृशानां कर्मणामीदृशमाचरणमेव कर्मसु कौशलम्। अयं च कर्मकौशलरूपः कर्मयोगो येनानुष्ठीयते स "लिप्यते न स पापेन पद्मपत्रमिवाम्भसा"[3] इत्युक्त्या कर्मबन्धात् प्रमुच्यते, कैवल्यं चावाप्नोति।

कर्मयोगस्य मोक्षहेतुत्वम्

> संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ।
> तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते ।।[4]
> कर्मणैव हि संसिद्धिमास्थिता जनकादयः।।[5]

---

[1] भ. गी. १८.४४
[2] भ. गी. १८.४७
[3] भ. गी. ५.११
[4] भ. गी. ५.२
[5] भ. गी. ३.२०

इति भगवता कर्मसंन्यासात् कर्मयोगस्य वैशिष्ट्यम्, जनकादीनां दृष्टान्तपुरःसरं तस्य निःश्रेयसहेतुत्वं च निर्दिष्टम्। ननु "न कर्मणा न प्रजया धनेन त्यागेनैके- नामृतत्वमानशुः"[1] इति श्रुत्या कर्मणा मोक्षानुपपत्तिप्रदर्शनात् कर्मत्यागेन तत्सिद्धेरुपपादितत्वाच्च कथं कर्म मोक्षसाधकमिति चेन्न, काम्यकर्मनिषेधः, कर्मफलत्यागश्चात्र कर्मत्यागशब्दयोस्तात्पर्यात्। तथा हि– 'न कर्मणा' इत्यनेन श्रुतौ काम्यनिषिद्धकर्मभिर्मोक्षानुपपत्तिमुक्त्वा "त्यागेनैके अमृतत्वमानशुः" इत्यनेन कर्माभिमानकर्मफलयोः परित्यागेन मोक्षसिद्धिरुपपादिता। अत एव भगवता–

काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः।।

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः।
यज्ञदानतपःकर्म न त्याज्यमिति चापरे।।

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्।।

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्।।[2]

इति यज्ञादिकर्मणामपरित्यागस्य स्वसम्मतत्वमुक्तम्। अत्रायं भावः– यथा सर्पा विषपूरितदन्तविशिष्टाः प्राणिनां प्राणघातकाः सन्तोऽपि त एव विषदन्तानामुच्छेदेन गारुडिकानां जीवननिर्वाहसाधना भवन्ति, यथा च वैषयिकं सङ्कुचितं ज्ञानं जीवानां बन्धनकारकम्, किन्तु तदेव ब्रह्मविषयकं सद् विकासमापद्य मोक्षकारणं भवति, तथा फलाकाङ्क्षया, कर्तृत्वाभिमानेन स्वार्थभावेन च युक्तं कर्मैव बन्धकं भवति, तदेव तेषां विसर्जनेन मोक्षहेतुर्भवति। अत एव भगवता–

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम्।।[3]

---

[1] महाना. ८.१४
[2] भ. गी. १८.२-३, ५-६
[3] भ. गी. २.५१

इति परित्यक्तफलानां कर्मणां[१] मोक्षहेतुत्वमुक्तम् । इत्येवं मोक्षहेतुभूतत्वात् कर्मयोगोऽपि मोक्षोपायेष्वन्यतमः ।

गीतानुसारं योग (ध्यानयोग) स्वरूपम्

युज संयमने (चुरा. २३१), युज् समाधौ (दिवा. ६६) युजिर् योगे (रुधा. ७) इति धातुभिर्निष्पन्नस्य योगशब्दस्य चित्तसंयमन–समाधि–परमात्मसामरस्याद्यर्थाः भवन्ति। तत्र भगवान् पतञ्जलिः "योगश्चित्तवृत्तिनिरोधः"[२] इति चित्तसंयमं योगपदेनोक्त्वा तदङ्गभूतेषु यमनियमादिष्वन्तिमयोगाङ्गरूपेण समाधिमङ्गीकृत्य समाधिमपि योगशब्देन विनिर्दिदेश। "तदा द्रष्टुः स्वरूपेऽवस्थानम् , वृत्तिसारूप्यमितरत्र"[३] इति परमात्मस्वरूपेणावस्थितिं तद्योगस्य परिणामं प्राह। एवं योगशास्त्रे योगपरिणामत्वेनाङ्गीकृतात्मस्वरूपावस्थितिरेवात्र गीतायां [४]योगशब्देन निर्दिश्यते। तथा हि–

यत्रोपरमते चित्तं निरूद्धं योगसेवया।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति।।

सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम्।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः।।

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः।
यस्मिंस्थितो न दुःखेन गुरुणाऽपि विचाल्यते।।
तं विद्याद् दुःखसंयोगवियोगं योगसंज्ञितम्।।[५]

---

[१] श्रीमद्भागवतमहापुराणे (१.३.८) केवलं कर्मण एव मोक्षसाधनत्वमुपवर्णितम्। मत्स्यपुराणे (५२.५; २५७.१) ज्ञानयोगापेक्षया कर्मयोगः सहस्रांशेनाधिकः इत्युक्तः। भागवतमहापुरणेऽन्यत्रापि (११.३.४१) कर्मयोगस्य महत्त्वं प्रतिपादितमस्ति। तत्र (११.२७.७) भगवदाराधनमेव क्रियायोग इत्युक्तः। कूर्मपुराणं ज्ञानस्येव कर्मणोऽपि मोक्षहेतुत्व-मङ्गीकरोति । (द्र. कूर्मपुराण–धर्म और दर्शन, पृ. २८४)

[२] यो. सू. १.१२ ।

[३] यो. सू. १.३-४ ।

[४] वस्तुतो गीतायां ज्ञानयोगः, कर्मयोग इति मोक्षोपायभूतज्ञानादयः, एतदतिरिक्तं प्रत्येकमध्यायोऽपि च योगशब्देन निर्दिष्टाः, अथापि ध्यानयोगस्यैव सर्वत्र योगशब्देन प्रथितत्वात्, गीतायामपि 'तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः। कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन।।" (६.४६) इत्यादौ तत्तन्नाम्ना ज्ञानकर्मणी च निर्दिश्य योगस्य ततो वैशिष्ट्यस्योक्तत्वाच्च योगपदेन ध्यानयोगो ग्राह्यः।

[५] भ. गी. ६.२०-२३ ।

इति निखिलदुःखवियोगो योगशब्देनाभिहितो भगवता। एवमात्मसाक्षात्कार-साधनभूता यमनियमासनादयो योगशास्त्रे योगशब्दाभिधेयाः, गीतायां तु तत्साधनजनित आत्मसाक्षात्कारो योगशब्दसंज्ञित इति पातञ्जलयोगाद् गीतायोगस्य वैशिष्ट्यम्। वस्तुतो गीतायां पतञ्जलिनिर्दिष्टानि योगाङ्गानि योगसाधनत्वेनोपलक्षितानीति न विरूद्धं तद्योगशास्त्रं गीतायाः[१]।

योगसाधकेनानुष्ठेया नियमाः

तदीदृशमात्मदर्शनलक्षणं गीताभिमतं योगमवाप्तुं साधकेन प्रथमं केचन नियमा अनुष्ठेया भवन्ति। तथा हि–

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः।
न चाति स्वप्नशीलस्य जाग्रतो नैव चार्जुन।।
युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा।।[२]

इति भगवता श्रीकृष्णेनात्यशनानशननिद्राजागरणादीनां वर्जनं मिताशनादीनामनुष्ठानं च विहितम्। अत एव "यदु ह वा आत्मसम्मितमन्नं तदवति तन्न हिनस्ति", "यद्भूयो हिनस्ति तद्यत्कनीयो न तदवति" इति श्रुती प्रमाणयन्तो भगवत्पादाः शङ्कराचार्याः– "तस्माद्योगी नात्मसम्मितादन्नादधिकं न्यूनं वाऽश्नीयात्। अथवा योगिनो योगशास्त्रे परिमितादन्नपरिमाणादतिमात्रमश्नतो योगो नास्ति। उक्तं हि–

अर्धमशनस्य सव्यञ्जनस्य तृतीयमुदकस्य तु।
वायोः सञ्चरणार्थं तु चतुर्थमवशेषयेत्।।

इत्यादिपरिमाणम्"[३] इति मिताहारस्य योगानुकूलत्वमुक्तवन्तः। उक्तं चोपनिषदि–

अल्पमृष्टाशनाभ्यां च चतुर्थांशावशेषकम्।
तस्माद्योगानुगुण्येन भोजनं मितभोजनम्।।[४] इति।

नन्वत्यशनादिना को दोष इत्याकाङ्क्षायां श्रीरामकण्ठाचार्याः– "अत्यशनाद्धि कायगौरवशूलाभिष्यन्दादयो दोषाश्चित्तमकर्मण्यं सम्पादयन्ति। अत्यन्ताशनाश्च (नाच्च)

---

[१] द्र. गीतादर्पण. पृ. १७४
[२] भ. गी. ६.१६–१७
[३] भ. गी. शां. भा. ६.१६
[४] श्रीजाबालदर्शनोपनिषत् १.१९

धातुक्षयादयः शक्तिहानिमावहन्ति। अतिस्वप्नादालस्यादय उद्योगभङ्गम् अत्यन्तनिद्रापहारादजीर्णादयो दौर्मनस्यादिकमापादयन्ति। अतो हितमात्राकालावच्छिन्नत्वादुत्पन्न आहारो भोजनम्, विहारः चङ्क्रमणादिर्यस्य तादृशस्य; तथा कर्मसु दृष्टादृष्टविषयेषु व्यापारेषु युक्ता चित्तशरीरानवसादित्वपर्यवसायिनी चेष्टा मनःकायव्यापारो यस्य तस्य तादृशस्य ; तथा युक्तौ यथाकालभावित्वान्न्याय्यौ स्वप्नबोधौ निद्राजागरौ यस्य तस्य; तादृशस्य योगिन एष योगो दुःखहा भवति अभ्यस्यमानः क्लेशं हन्ति, सुखेन सम्पद्यत इत्यर्थः"[१] इत्यशनादयोऽत्यन्ता योगसाधने बाधका इति तेषां वर्जनम् , मिताहारादयश्च साधका इति तेषामनुष्ठानं च ऊचुः ।

किञ्च, भगवता "प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः"[२] इत्यशान्तिभयमैथुनादिवर्जनमादिष्टम् । अशान्तिभयाभ्यामावृतचित्तस्यैकाग्र्यमनुपपन्नमिति ताभ्यां हेतुभूतविषयचिन्तनाद् विरहितो भवेत् । तत्र ब्रह्मचर्यं तु "ब्रह्मभावे मनश्चारं ब्रह्मचर्यम्"[३] इत्युपनिषदुक्त्या ब्रह्मभावापत्तिरेव वस्तुतो ब्रह्मचर्यम्, अथापि तत्साधनाङ्गभूतं मैथुनपरित्यागोऽपि ब्रह्मचर्यम् । अत एव भगवान् व्यासः– "ब्रह्मचर्यं गुप्तेन्द्रियस्योपस्थस्य संयमः"[४] इत्याह। नात्र केवलं मैथुनक्रियासंयमः, अपि तु तद्विषयकचिन्तनमननभाषणादेरपि संयम आवश्यकः । तदुक्तमीश्वरगीतायाम्–

कर्मणा मनसा वाचा सर्वावस्थासु सर्वदा।
सर्वत्र मैथुनत्यागं ब्रह्मचर्यं प्रचक्षते।।[५] इति।

उक्तं चान्यत्र–

स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम्।
सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च।।

एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः।
विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम्।। इति।

अत्र मैथुनस्याष्टाङ्गत्वमुक्त्वा तद्विपरीतविधया ब्रह्मचर्यस्याष्टाङ्गत्वमुक्तम्। एवंविधाष्टाङ्गब्रह्मचर्यपालनं त्वविवाहितसाधकानां कृते विहितम् । विवाहितानां च ऋतुकालमात्रे शास्त्रसम्मते स्वभार्यागमनं ब्रह्मचर्यम्। अत एवोपनिषदि–

---

[१] भ. गी. ६.१६–१७ सर्वतोभद्र।
[२] भ. गी. ६.१४
[३] श्रीजाबालदर्शनोपनिषत् १.१४
[४] यो. सू. भा. २.३०
[५] ई. गी. ११.१८

कायेन वाचा मनसा स्त्रीणां परिविवर्जनम्।
ऋतौ भार्यां तदा स्वस्य ब्रह्मचर्यं तदुच्यते।।[१]

इत्युभयसाधकयोः कृते ब्रह्मचर्यमुक्तम्। एवं विधं ब्रह्मचर्यं स स योगसाधकोऽनुपालयेदित्यर्थः।

किञ्च, "निराशीरपरिग्रहः"[२] इति भगवदुक्त्या योगसाधको निराशीः, अपरिग्रहश्च भवेत्। "निराशीः आशिषः फलाशंसा, अतो निष्क्रान्तो मोक्षलक्षणेऽपि फले प्रार्थनादैन्यरहितः" "अपरिग्रहश्च सर्वत्र ममत्वाभिमानरहितः"[३] इति रामकण्ठाचार्या निराश्यपरिग्रहयोर्लक्षणमूचुः। ममत्वाभिमानराहित्ये विषयाणामग्रहणं साध्यं भवति। तस्मात् "विषयाणामर्जनरक्षणक्षयसङ्गहिंसादोषदर्शनादस्वीकरणमपरिग्रहः"[४] इति व्यासोक्त्या विषयाणामग्रहणमप्यपरिग्रहः। अत एव भोजदेवेनापि– "अपरिग्रहो भोगसाधनानामनङ्गीकारः"[५] इत्यपरिग्रहस्वरूपं व्याख्यातम् ।

तदेवं योगसाधको मिताहारविहारकर्मनिद्राजागरणवान्, प्रशान्तात्मा धृतिविशिष्टो ब्रह्मचारी निराशीरपरिग्रहवान् च भवेत्, अर्थादेते नियमास्तेनानुष्ठेयाः। एतादृशनियमानामनुष्ठाता सुलभतया योगमधिगन्तुमर्हतीत्ययं योगसाधनाधिकारी प्रभवति।

योगसाधनपद्धतिः

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्।।
तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये।।[६]

इति भगवदुक्त्या योगं सिषाधयिषुरेतावतोक्तनियमानुष्ठानविशिष्टः साधकोऽशुचिभिः पुरुषैरनधिष्ठितेऽपरिगृहीते चाशुचिभिर्वस्तुभिरपृष्टे च पवित्रीभूते देशे, अर्थात् यतिश्चेत् पुण्यसरित्परिसरगिरिगुहादौ, गृहस्थश्चेत् सूपलिप्तविविक्तसदनादौ

---

[१] श्रीजाबालदर्शनोपनिषत् १.१३

[२] भ. गी. ६.१०

[३] भ. गी. ६.१० सर्वतोभद्र।

[४] यो. सू. भा. २.३०

[५] यो. सू. वृ. २.३०

[६] भ. गी. ६.११-१२

चैलाजिनकुशोत्तरमासनं[१] प्रतिष्ठाप्य; तदपि नात्युच्छ्रूतं नातिनीचं च भवेत्। तस्मिन् स्थिरसुख आसन[२] उपविश्य ध्येयत्वेन परिगृहीतैकवस्तुनिष्ठं मनः कृत्वा अर्थात् ध्येयवस्तुभिन्नवस्तुविषयकसङ्कल्पविकल्पादिमानसिकवृत्तिरहितः सन् योगं समादधीत।

तत्र योगसाधनवेलायां कायं कीदृशं संस्थापयेत् ? इत्याकाङ्क्षायामुच्यते-

> समं कायशिरोग्रीवं धारयन्नचलं स्थिरम्।
> सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ।।[३] इति।

अत्रोक्तशुचिस्थानस्थापितासने कायग्रीवादिकं सममचलं स्थिरं च कृत्वोपविश्य नासिकाग्रं सम्पश्यन् ध्यायेत् । अत्र दिक्षु दृग्विक्षेपपरिहारार्थं नाशिकाग्रदर्शनमुक्तम्, न तु तल्लक्षीकर्तव्यमित्यभिप्रायः, "आत्मसंस्थं मनः कृत्वा"[४] इति मनस आत्मसंस्थापनस्योक्तत्वात्। एवमुपविश्य सर्वसङ्कल्पहेतुभूतान् कामान् सर्वानशेषतो विहाय, विवेकयुक्तेन मनसा सर्वविषयेभ्य इन्द्रियग्रामं विनियम्य शनैः शनैर्बुद्धौ धृतिं[५] सम्पाद्य तद्विशिष्टया बुद्ध्योपरतिमधिगच्छेत्। तदनु चञ्चलं दुर्निग्रहमिमं मनोऽ[६]प्यभ्यासवैराग्याभ्यामात्मसंस्थं कृत्वा आत्मव्यतिरिक्तं न किञ्चिदपि चिन्तयेत्। स एव क्रमो भगवता श्रीकृष्णेन–

> सङ्कल्पप्रभवान् कामांस्त्यक्त्वा सर्वानशेषतः।
> मनसैवेन्द्रियग्रामं विनियम्य समन्ततः।।

---

[१] "चैलं वस्त्रम्, अजिनं मृगादिचर्म, कुशा दर्भाः, तदुत्तरं तत्प्रधानम्, तेन गृहस्थस्य चैलाजिनोत्तरम्, यत्यादेः कुशोत्तरम्" इति रामकण्ठाचार्याः; चैलमजिनं कुशाश्चोत्तरे यस्मिन्नासने तदासनम्" इति शङ्कराचार्यश्च व्याख्यातवन्तः। द्र.भ.गी. ६.११ सर्वतोभद्रः शाङ्करभाष्यं च ।

[२] "स्वस्तिकं गोमुखं पद्मं वीरसिंहासने तथा। भद्रं मुक्तासनं चैव मयूरासनमेव च।। सुखासनसमाख्यं च नवमं मुनिपुङ्गव।।" (श्रीजाबालदर्शनोपनिषत् ३.१-२) इति ध्यानानुकूलान्यासनान्युक्तानि। अत्रैवेषां स्वरूपमप्युक्तम् (३.२-१३)।

[३] भ. गी. ६.१३

[४] भ. गी. ६.२५

[५] धृत्या यया धारयते मनः प्राणेन्द्रियक्रियाः ।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ।। (भ. गी. १८.३३)

[६] असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ।। (भ. गी. ६.३५)

शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत्।।[1]

इत्येवमुक्तः। एवमात्मचिन्तननिरतमपि मनः पुनरितस्ततो गन्तुमर्हति, तस्मात् –

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम्।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्।।[2]

इत्येवमादिशति भगवान् श्रीकृष्णः। इतीयं योगसाधनपद्धतिः सुलभा निर्दिष्टा गीतायाम्।

योगसाधनस्य निर्वाणहेतुत्वम्

योगसाधको यदेवमुक्तविधया पौनःपुन्येन विहितेन प्रयत्नेनात्मनि चित्तस्थैर्यं सम्पादयति, तदा निवातस्थदीपवदात्मप्रकाशवान् सन् युक्तः, अर्थात् आत्मयोगीति कथ्यते। तदुक्तम् –

यदा विनियतं चित्तमात्मन्येवावतिष्ठते।
निस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा।।

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनि।।[3] इति।

सोऽयं युक्तो योगी परमामात्यन्तिकीं शान्तिमधिगम्य "दुःखसंयोगवियोगं योगसंज्ञितम्"[4] इत्युक्तं निखिलदुःखानामात्यन्तिकाभावलक्षणं नित्यसुखात्मकं निर्वाणं प्राप्य तद्ब्रह्मानन्दमनुभवति। तदुक्तम् –

युञ्जन्नेवं सदात्मानं योगी नियतमानसः।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति।।[5]

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम्।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम्।।

---

[1] भ. गी. ६/२४-२५।
[2] भ. गी. ६/२६।
[3] भ. गी. ६/१८-१९।
[4] भ. गी. ६/२३।
[5] भ. गी. ६/१५।

युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते।।[१] इति।

"एवमनेन यथोक्तेन क्रमेण प्रबन्धप्रतिपादितेन नियतमानसः संयतान्तःकरणो योगी सर्वदा सर्वावस्थासु "पश्यन् शृण्वन्" इत्यादिना प्रतिपादितः स्वात्मानं युञ्जन् समादधानः सुखेनासनप्राणायामप्रत्याहारध्यानधारणादिक्लेशाभावादनायासेन ब्रह्मणा परमात्मना संयोगमभेदमात्यन्तिकं नित्यमेवाधिगच्छति"[२] इति तत्र भवद्भी रामकण्ठाचार्यैरत्रोक्तयोगसाधनस्य कैवल्यहेतुकत्वं समर्थितम्। ध्यानरूपोऽयं योगः परमात्मनि नित्ययोगलक्षणमोक्षप्रापणे हेतुत्वादयमपि मोक्षोपायत्वेनाभिहितो गीतायां परमात्मना।

भक्तिस्वरूपम्

'भज सेवायाम्' (भ्वा. ७२४) इति धातोर्निष्पन्नो भक्तिशब्दो नितान्तं श्रद्धया क्रियमाणेषु गुरुवृद्धदेवतादीनां श्रेष्ठानां भजनयजनसेवादिषु प्रयुज्यते। अत एव भगवता "श्रद्धावान् भजते यो मां स मे युक्ततमो मतः"[३] इति भगवतो भजनमर्थात् कीर्तनम्,

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः।।[४]

इति तस्य पूजनम्, "मां च योऽव्यभिचारेण भक्तियोगेन सेवते"[५] इति तस्य सेवनं च निर्दिष्टम्। अस्यां भक्त्यां किञ्चिदप्यभिमानं बाधकं भवति। तस्मात् पूर्णभावेन साधकः स्वाराध्ये शरणागतिमधिगम्य "वासुदेवः सर्वमिति"[६] गीतोक्त्या स्वमाराध्यमेव स्वसर्वस्वमिति विभाव्य तस्य प्राप्त्यर्थं सततं तत्कीर्तननमनपूजनादिषु या प्रवृत्तिः सा भक्तिरुच्यते। अत एवोक्तं भगवता–

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ।।[७] इति।

---

[१] भ. गी. ६.२७-२८
[२] भ. गी. ६.२७-२८ सर्वतोभद्र।
[३] भ. गी. ६.४७
[४] भ. गी. ९.२६
[५] भ. गी. १४.२६
[६] भ. गी. ७.१९
[७] भ. गी. ९.१४

तदिदं नमनकीर्तनादिकं भक्तेर्बाह्यं स्वरूपम्, तस्या आन्तरिकं स्वरूपं तु स्वाराध्यविषये विद्यमाना स्वस्मादप्यधिका प्रीतिः।

इयं च भक्तिः सकामनिष्कामभेदेन द्विविधा। कस्यचित् फलस्योद्देशेन क्रियमाणा सकामा; तद्विपरीता च निष्कामा। निष्कामभक्तिरेवात्रोत्कृष्टतमा मोक्षसाधिका च। सकामभक्तिस्तु साधकस्येष्टफलप्रदात्री केवलम्। तस्मान्निःश्रेयससिषाधयिषुः साधको निष्कामभक्तिमेवाश्रयेत।

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ॥[1]

इति भगवदुक्त्या आर्तो जिज्ञासुरर्थार्थी ज्ञानी चेति चतुर्विधाः साधका इमं भक्तिमार्गमनुसरन्ति। "तत्रार्तोऽर्तिपरिगृहीतस्तस्करव्याघ्ररोगादिनाभिभूत आपन्नः, जिज्ञासुर्भगवत्तत्त्वं ज्ञातुमिच्छति यः, अर्थार्थी धनकामः, ज्ञानी विष्णोस्तत्त्वविच्च"[2] इति शङ्करभगवत्पादोक्त्या आर्त आपतितसङ्कटनिवारणार्थम्, जिज्ञासुर्ज्ञानप्राप्त्यर्थम्, अर्थार्थी धनलाभार्थं च भगवद्भक्तिं समाचरन्तीतीमे सकामभक्तियुताः, ज्ञानी च किञ्चित्फलापेक्षं विनैव भगवद्भक्तिनिरतो भवतीत्ययं निष्कामभक्तिमान्। अत एव भगवता–

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः॥[3]

इति ज्ञानिनो भक्तेर्वैशिष्ट्यमुक्तम्।

किञ्चात्र श्रीरामकण्ठाचार्याः– "यो मृदुतरमदनुग्रहमहौषधेन विशीर्यमाणसंसारमोहसन्निपाततया चिरात् संवेद्यतापन्नदुःखत्रयवेदनाकदर्थ्यमानमानसस्तन्निवृत्तिमिच्छन् सकललोकप्रसिद्धतत्तत्संज्ञाकारादिस्थूलोपायसमाश्रयणेन मद्भक्तो भवति, ततः क्रमेण वर्धमानसंवेशलेशवशाज्जिज्ञासुर्यः समुपजायमानजगद्भावहेयोपादेयविचारः सन् कोऽहं किमिदं शरीरेन्द्रियविषयादिमयं महामोहजालम्, कथमतो बन्धनात्परिमुच्चेय इति तत्त्वं ज्ञातुमिच्छुर्नानाशास्त्रशुश्रूषाश्रवणाद्यभियुक्तमतिः संशयापन्न एव मत्सपर्यापरो भवति। अत एव तत्त्वजिज्ञासाभिनिवेशप्रकर्षादाविर्भवद्विवेकावसानलोकविलीय–

---

[1] भ. गी. ७.१६
[2] भ. गी. शां. भा. ७.१६
[3] भ. गी. ७.१७

मानविपर्ययप्रत्ययतीव्रतिमिरत्वप्रथमानयथास्थितहेयोपादेयपदार्थप्रविभागोऽर्थार्थी मां भजते। यः शास्त्राभ्यासवशादुत्पन्ननिश्चयः सन्, इदमेव परमं फलमित्युपादेयतयाऽऽत्मतत्त्वलक्षणमर्थं वस्त्वर्थयतेऽभिकाङ्क्षति, ततो ज्ञानी मां भजते। यः सकलविचिकित्साविच्छेदविश्वस्तमतिः स्वीकृतयथोक्तज्ञानलक्षणपरमोपायः सन् यथोक्तस्वरूपमव्यवधानेन मामेवोपास्त इति"[१] इत्यार्तादिशब्दानां विशिष्टमर्थं प्रतिपाद्यत आर्तादयः क्रमेण भक्तेरुत्तरोत्तरदशामापन्ना ज्ञानिनो योत्कृष्टा भक्तिः, तां प्राप्नुवन्तीति प्रतिपादितवन्तः। अत एव भगवता श्रीकृष्णेन- "उदाराः सर्व एवैते"[२] इत्यार्तादीनामप्यौदार्यं निर्दिष्टम्। अत्र भगवतोऽयमाशयः- समागतसङ्कटनिवारणोद्देशेन सांसारिकवस्तुप्राप्तिभावेन वा क्रियमाणो भगवत्प्रेमा भक्तेरारम्भिकं स्वरूपम्, भगवतः स्वरूपज्ञानापेक्षया, तज्ज्ञानप्रतिपादकशास्त्रावगमनापेक्षया वा क्रियमाणः भगवत्प्रेमा तस्या मध्यमं स्वरूपम्, भगवतो ज्ञानप्राप्त्यनन्तरमपि तत्प्रेमा च तस्या उत्तमं स्वरूपम्।

नन्वद्वैतभावापन्नेन ज्ञानिना द्वैतभावेन क्रियमाणा भगवदाराधनरूपा भक्तिः कथमनुष्ठीयेत? इति चेन्न,

द्वैतं मोहाय बोधात् प्राक् ज्ञाते तत्त्वे मनीषया।
भक्त्यर्थं कल्पितं भेदमद्वैतादपि सुन्दरम्।।

इत्युपबृंहणवचनेन कल्पितभेदेन तथापि भक्त्या भगवदाराधनस्यावगमात्। एवं ज्ञानिना क्रियमाणा भक्तिरुत्कृष्टरूपा।

भक्तियोगे न जातिभेदः

एतादृशस्य विभिन्नरूपस्य भक्तियोगस्योत्कृष्टकुल उत्पन्ना पुण्ययोनयो जना एव न केवलमधिकारिणः, अपि तु सर्वेऽपि जीवा भगवद्भक्तिं समाचरितुमर्हन्ति। अत एव भगवता-

अपि चेत्सुदुराचारो भजते मामनन्यभाक्।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः।।
क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति।।

---

[१] भ. गी. ७.१६ सर्वतोभद्र.।
[२] भ. गी. ७.१८

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्।।
किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा।।[१]

इति सर्वेषामपि भक्तियोगेनोत्कृष्टगतिप्रापकत्वमुक्तम्। भक्तियोगस्यानुष्ठातारः सर्वेऽपि भगवदनुग्रहमवाप्य परां गतिमारोढुमर्हन्तीतीयं भक्तिः सर्वजनसाधारणी, निरायासेन साध्यस्य साधने सुलभश्च पन्थाः।

उपासनविधानम्

वस्तुतो भक्तिर्निराकाररूपाऽप्युपासनरूपेण व्यक्ता भवति। "उपासनं नाम यथाशास्त्रमुपास्यस्यार्थस्य विषयीकरणेन समीपमुपगम्य तैलधारावत् समानप्रत्ययप्रवाहेण दीर्घकालं यदासनं तदुपासनमाचक्षते"[२] इति शङ्करभगवत्पादैरुपासनशब्दस्यार्थो व्याख्यातः। एवं दीर्घकालं यावदासन उपविश्योपास्यस्योपासनाभ्यासेन कालान्तरे "सततं कीर्तयन्तो---- नित्ययुक्ता उपासते"[३] इति भगवदुक्त्याऽहर्निशमविच्छिन्नतया सततं तदुपासनं प्रचलति।

इदमुपासनं निर्गुणसगुणभेदेन द्विविधम्। निर्गुणोपासनमेव गीतायामव्यक्तोपासनमित्यभिधीयते। भगवता श्रीकृष्णेन–

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम्।।
संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः।।[४]

इत्यव्यक्तोपासनम्, तेन परमात्मावाप्तिरीति च निर्दिष्टम्। एवमेव–

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः।
अनन्येनैव योगेन मां ध्यायन्त उपासते।।

तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।
भवामि न चिरात् पार्थ मय्यावेशितचेतसाम्।।[५]

---

[१] भ. गी. ९.३०–३३
[२] भ. गी. शां. भा. १२.३
[३] भ. गी. ९.१४
[४] भ. गी. १२.३–४
[५] भ. गी. १२.६–७

इति सगुणोपासनम्, तेनापि मोक्षावाप्तिश्चोपपादिता। एतदुभयोपासनाभ्यां मोक्षोपपत्तावपि तयोर्निर्गुणोपासने क्लेशाधिक्याद् सगुणोपासनमेव सुलभं साधनम्। तदुक्तं भगवता–

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ।।[1] इति।

ननु किं तत्र क्लेश इति जिज्ञासायां श्रीरामकण्ठाचार्यैरुच्यते– "शरीरेऽहन्तया प्रतिपद्यमाने सर्वभावव्यतिरिक्तमात्मस्वरूपसमापत्तिरनुपपन्नैव। तदभिनिवेशश्च सुमहाक्लेश एव। अथास्ति काचिद्युक्तिर्यया देह एव मद्भावेन प्रतिपत्तुं शक्यः, सर्वात्मनां सर्वक्रियोपरमस्यासम्भावित्वेन प्राक्प्रतिपादित्वात्। तस्माच्छास्त्रचोदितासु क्रियास्वेव वर्तमानः पारमार्थिकसत्स्वरूपमसौ यथा सुखमवाप्नोति, न तथा दुष्करसकलक्रियानिषेधाभिनिविष्टः ; न च तादृशयोगिनः सर्वत्र समबुद्धित्वमुपपद्यते, सर्वार्थेषु द्वेषादिव्यक्तेः (भिव्यक्तेः) यस्तु सुप्रबुद्धत्वात् सर्वदा सर्वथा सत्स्वरूपैकविश्रान्तसंवित्कस्य (त्कः तस्य) सर्वत्र निवृत्तहेयोपादेयविकल्पस्य सर्वत्र समबुद्धित्वमुपपन्नम्"[2] इति निर्गुणोपासने क्लेशान् दर्शयित्वा सगुणोपासनस्य सुलभत्वं व्यवस्थापितम्। गीतायां चेमे सगुणोपसका युक्ततमाः, अर्थात् योगिश्रेष्ठा इति निर्दिष्टाः[3]।

एवं सुलभत्वात्, श्रेष्ठत्वाच्च सगुणोपासनस्य, "मामनुस्मर युध्य च"[4], "मय्येव मन आधस्व मयि बुद्धिं निवेशय"[5], "सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज"[6] इत्यादिना तदनुष्ठानार्थं वारं वारमादिशत्यर्जुनं भगवान्।

एतदतिरिक्तमिन्द्रादिविभिन्नदेवतानां पितृणां चोपासनमपि गीतायां समुपलभ्यते। देवतोपासका देवलोकम्, पित्र्युपासकाः पितृलोकं चोपगत्य तत्र तल्लोकभोगानुपभुज्य पुनरमुं लोकमागमिष्यन्ति[7]। एवंविधेभ्य उपासकेभ्यस्तत्तदुपास्येषु श्रद्धाम्, तदुपासनफलं

---

[1] भ. गी. १२.५

[2] भ. गी. १२.५ सर्वतोभद्र।

[3] मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ।। (भ. गी. १२.२)

[4] भ. गी. ८.७

[5] भ. गी. १२.२

[6] भ. गी. १८.६६

[7] द्र. भ. गी. ७.२३, ९.२०-२१,२५

च परमेश्वर एव विदधाति[1]। यदेतदुपासकेषु "क्षीणे पुण्ये मर्त्यलोकं विशन्ति"[2] "एष कर्मचितो लोकः क्षीयते" इत्यादिगीतोपनिषदुक्तिभिरीदृशैरुपासनैः पुनरावृत्तिर्न विरमतीति विवेक उदेति, तदा ते निष्कामभावेन परमेश्वरोपासनरता भवन्ति। अत एव भगवान्—

येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम्।।

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते।।[3]

इतीन्द्रादिदेवतोपासकान् प्रति सहानुभूतिं प्रदर्श्य,

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः।।[4]

इति सर्वेषामपि सरलया वक्रया वा गत्या परमेश्वरोपासनमार्गनिरतत्वमुपपादितवान्। एवमुपासनविधाने गीतायां भगवतः समन्वयदृष्टिर्दृश्यते ।

भक्तियोगस्य मोक्षहेतुत्वम्

भक्त्या त्वनन्यया शक्योऽहमेवंविधोऽर्जुन।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप।।[5]

इति भगवता भक्तेर्मोक्षहेतुत्वं दर्शितम्। अत्रेदमवधेयम् – उक्ता आर्तादयो भक्ता सगुणे निर्गुणे वोपासनेऽनन्यभावेन निरता भवन्ति। तदुपासने सिद्धे सर्वत्र सर्वजीवेषु परमात्मानमेवावलोकयन्तः सर्वकालेषु तमेवानुस्मरन्ति। तदनु देहपातसमयेऽपि तमेवानुस्मरन्ति। तदा "यान्ते मतिः सान्ते गतिः" इति श्रुत्या,

---

[1] यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ।।
स तया श्रद्धया युक्तस्तस्याराधनमीहते ।
लभते च ततः कामान् मय्येव विहितान् हि तान् ।। (७.२१-२२)

[2] भ. गीं. ९.२१

[3] भ. गी. ९.२३-२४

[4] भ. गी. ४.११

[5] भ. गी. ११.५४

यं यं वाऽपि स्मरन् भावं त्यजत्यन्ते कलेवरम्।
तं तमेवैति कौन्तेय सदा तद्भावभावितः।।[१]

इति भगवदुक्त्या च स्वाराध्यं परमात्मानमेवाधिगच्छन्ति। अत एव भगवान्-

अन्तकाले च मामेव स्मरन् मुक्त्वा कलेवरम्।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः।।
तस्मात् सर्वेषु कालेषु मामनुस्मर युध्य च।।[२]

इत्यर्जुनमादिष्टवान्। नन्वन्तकाले कृतेन परमात्मानुस्मरणेनैव मोक्षसिद्धिश्चेत् किमर्थमाजीवनं सत्कर्म-सत्सङ्ग-सदुपासनादिसाधनैस्तदर्थं प्रयतेत? इति चेत्, मैवम्, आजीवनं यादृशभावविशिष्टा बुद्धिर्वर्तते, तादृशानामेव भावानामन्तकाले बुद्धावागमनात्। भक्तः स्वजीवनपर्यन्तं भगवद्विषयकचिन्तनध्यानादिषु लीनो वर्तत इति तस्यान्तकाले समागतो भगवद्भावो भगवत्प्राप्तिहेतुर्भवति।

मां च योऽव्यभिचारेण भक्तियोगेन सेवते।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते।।[३]

इति भगवदुक्त्या भक्तियोगमाश्रितं साधकं सत्त्वादिगुणा बन्धहेतवोऽपि नानुबध्नन्तीति स गुणानतीत्य स्वयमेव स्वोपास्यं ब्रह्म भवति अर्थात् स्वोपास्यं स्वात्मरूपेण विज्ञाय मुक्तो भवति। अत एवास्य वचनस्य व्याख्यानावसरे- "यश्च यथोक्तस्वरूपं मामव्यभिचारेण मद्व्यतिरिक्तविषयान्तरालम्बव्यभिचाररहितेन भक्तियोगेन प्राक्प्रतिपादितचतुष्प्रकारेण समाधिना सेवते आर्तत्वादिज्ञानित्व-पर्यन्तावस्थासमुचितविधिपूर्वकमुपास्ते, स परां काष्ठां प्राप्तः सन् एतान् यथोक्तान् गुणानतीत्य अतिक्रम्य ब्रह्मभूयाय ब्रह्मभावाय कल्पते यथोक्तं स्वरूपं ब्रह्मैव सम्पद्यत इति, इदानीमेवोपायान्तरदुस्तरादद्वैतमोहमहासागरादुत्तीर्णो भवतीत्यर्थः"[४] इति भक्तियोगेन मोक्षसिद्धिरित्युपपादितवन्तः । एवं भक्त्या कैवल्यप्राप्तिर्भवतीतीयमपि मोक्षोपायेष्वन्यतमा।

तदेवमेतावता विचारेण ज्ञान-कर्म-ध्यान-भक्त्याख्या योगाः कैवल्याधिगमहेतव इति ज्ञायते। एतेषु ज्ञानादिषु योगेषु कस्यचित् श्रेष्ठत्वं कस्यचिच्च कनिष्ठत्वमिति

---

[१] भ. गी. ८.६
[२] भ. गी. ८.५, ७
[३] भ. गी. १४.२६
[४] भ. गी. १४.२६ सर्वतोभद्र।

गीताया नाभिप्रायः । सर्वेऽपि स्वस्वस्थानेषु श्रेष्ठा एव। अत एव भगवता "श्रेयान् द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः"[1], "न हि ज्ञानेन सदृशम्"[2] इति ज्ञानस्य सर्वोत्कृष्टत्वमुक्तम् । एवमेव "तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते"[3], "श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद् ध्यानं विशिष्यते। ध्यानात्कर्मफलत्यागः"[4] इति कर्मणः सर्वोत्कृष्टत्वम्, "तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः । कर्मिभ्यश्चाधिको योगी---"[5] इति ध्यानयोगस्य सर्वोत्कृष्टत्वम्,

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः।।[6]

इति भक्तियोगस्य सर्वोत्कृष्टत्वं च निर्दिष्टम् । एतेषां सर्वेषां मार्गाणां कैवल्यहेतुत्वं प्रागुपपादितमेव तत्तत्स्वरूपप्रतिपादनावसरे ।

एवं ज्ञानादयो मोक्षोपायाः परमोत्कृष्टा अपि न ते परस्परविरूद्धाः, अपि तु परस्परपूरकाः। तस्मादेकस्य मार्गस्योत्कृष्टत्वमङ्गीकृत्य तस्यैव परमोत्कृष्टत्व-स्थापनार्थमितरेषां मार्गाणामवहेलनं न गीतासम्मतम् । अत एवाचार्यपदविभूषिता बलदेवोपाध्यायमहाभागाः– "श्रीशङ्कराचार्याणामभिप्राये निवृत्तिमार्गप्रतिपादनम्, ज्ञानस्यैव साक्षान्मोक्षोपायत्वोपपादनं गीतायाः प्रधानं प्रयोजनम्, श्रीरामानुजाचार्याश्च कैवल्यप्राप्तये भक्तिरेव परमोपाय इति गीताभिप्राय इत्यभिप्रयन्ति। एतदतिरिक्तं लोकमान्यतिलकमहाभागः "गीतारहस्य' इति ग्रन्थं विरचय्य तत्र पूर्वाचार्याणां सिद्धान्तेष्वरुचिं प्रदर्श्य भागवतधर्माभिमतः प्रवृत्तिमार्ग एव गीतायाः लक्ष्यम्, कर्मयोगस्तत्प्राप्त्युपाय इति निरूपयति। तदेतेषां भाष्यकृतां युक्तिप्रयुक्तयस्तत्तत्स्थानेषु सारगर्भिता इत्यत्र न संशीतिलवलेशोऽपि, परन्तु त एते मनीषिणो गीताया उपदेशेषु निहितं व्यापकत्वं समग्रत्वं समन्वयभावं चालक्षितवन्तः। मानवीयप्रकृते-र्वैविध्यमवलोक्यैवोपनिषदादिशास्त्रेषु त्रिविधा उपायाश्चरमलक्ष्यप्राप्त्यर्थं निरूपिताः– चिन्तनशीलसाधकानां कृते ज्ञानमार्गः, सांसारिकविषयाभिरुचिमतां कृते कर्मयोगः,

---

[1] भ. गी. ४.३३
[2] भ. गी. ४.३८
[3] [illegible]
[4] भ. गी. १२.१२
[5] भ. गी. ६.४६
[6] भ. गी. ६.४७

अनुरागादिमानसिककवृत्तीनां विशेषरूपेण विकासीकृतवतां कृते भक्तियोग इति। त एते तत्तन्मार्गेण चरमपुरुषार्थमवाप्स्यन्ति। गीताध्ययनेनावगम्यते यद् भारतवर्षे कर्ममार्गः, ज्ञानमार्गः, ध्यानमार्गः, भक्तिमार्गश्चेति चतुर्विधा मोक्षमार्गाः प्रचलिता आसन्। तेषु यो यन्मार्गमनुसरति स्म, स तस्यैव सर्वथा श्रेष्ठत्वम्, तद्भिन्नानामसामञ्जस्यं च मनुते स्म। परन्तु गीतायां भगवता श्रीकृष्णेन एतेषां मार्गाणां सुन्दरं सामञ्जस्यं स्थापितम्। अनेन यथा गङ्गा-यमुना-सरस्वतीनामिका नद्यो भरतभूमौ प्रयागे सम्मिलिता त्रिवेणीरूपेण प्रवहन्त्यो जनानां धर्माम्भःपिपासामुपशमयन्ति, तथैव कर्म-ज्ञान-भक्तीनां प्रवाहो गीतायां मिलितस्तत्त्वजिज्ञासूनां ज्ञानपिपासामुपशमय्य भगवत्प्राप्तिरूपं मोक्षं जनयन्ति। अयं समन्वय एवास्या वैशिष्ट्यम्"[१] इत्युक्तवन्तः। अनेन कर्मादिमार्गाणां समानरूपेण मोक्षप्रतिपादकत्वं गीतायाः प्रयोजनं ज्ञायते ।

तेष्वेतेषु प्रत्येकं मार्गो यथा मोक्षहेतुर्भवति, तथेमे सर्वे मिलिता अपि मोक्षं जनयन्ति। तत्कथम् ? इति जिज्ञासायामुच्यते भगवता–

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः।
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति।।

सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा।।

बुद्ध्या विशुद्ध्या युक्तो धृत्यात्मानं नियम्य च।
शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च।।

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः।।

अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम्।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते।।

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्।।

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्।।[२] इति।

---

[१] भारतीयदर्शन, पृ. ६०-६१, बलदेवोपाध्याय।

[२] भ. गी. १८.४९-५५

अत्रेदमवधेयम् – कर्मयोगद्वारा मोक्षसाधनमालम्ब्य साधकः कर्मसिद्धिं प्राप्य तदनु क्रमेण ध्यानयोगं भक्तियोगं ज्ञानयोगं चावाप्य परमात्मनि प्रविशति। नन्वेवमत्र क्रमेण कर्मादियोगानामुपपादनमवलोक्य अत्र क्रमसमन्वयो निर्दिष्ट इति मत्वा, कर्मयोगसिद्धिद्वारा ध्यानयोगप्राप्त्यनन्तरं कर्मयोगः, नदीतरणोपरान्तं नौकेव परित्यक्तव्यः, एवमेव भक्तियोगप्राप्त्यनन्तरं कर्मध्यानयोगयोः, ज्ञानयोगानन्तरं कर्मध्यानभक्तियोगानां च नास्त्यावश्यकतेति न वक्तव्यम्, गीताया असम्मतत्वात्। तथा हि तत्र "ज्ञात्वा विशते तदनन्तरम्" इत्युक्तेः पश्चादेव

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम्।।[१]

इति मोक्षमार्गस्यान्तिमसोपानरूपस्य ज्ञानस्य प्राप्तेरनन्तरमपि तत्प्रथम-सोपानरूपस्य कर्मयोगस्य सत्त्वम्, तत्सत्त्वेऽपि मोक्षेऽबाधकत्वं च निर्दिष्टम्। प्रागपि "सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः"[२], "एकं सांख्यं च योगं च यः पश्यति स पश्यति"[३] इति तयोः समानमानत्वं प्रदर्शितम्।

ननु "ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः"[४], "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा"[५], "सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते"[६] इत्यादिषु ज्ञाते तत्त्वे सकलकर्मपरिसमाप्तिप्रतिपादनात् ज्ञानयोगे कर्मयोगस्यावस्थितिरनुपपन्ना, अत एवाज्ञानिभिरेव कर्म सम्पाद्यते, न हि ज्ञानिभिरिति चेत्, मैवम्, "ज्ञानाग्निदग्धकर्माणम्" इत्यादिभिरुक्तिभिः पूर्वकृतसञ्चितकर्मणाम्, उत वा सकामभावेन क्रियमाणानां कर्मयोगभिन्नानां कर्मणां नाशस्य प्रतिपादितत्वात्। अन्यथा परमपवित्रस्य गीताशास्त्रस्योपदेष्टुः "वर्त एव च कर्मणि"[७] इति वदतः सदा कर्मनिरतस्य भगवतः श्रीकृष्णस्याज्ञानित्वापत्तिः, येन गीताशास्त्रस्याज्ञानजन्यत्वम्, अप्रामाणिकत्वं च दुर्निवारं स्यात्। अत एवास्मिन् प्रसङ्गे श्री टी. जी. सिद्धप्पाराध्यमहाभागाः "तस्य प्राक्तनं सर्वमपि कर्म ज्ञानाग्निना दग्धं सत् पुनर्न प्ररोहेत्। तथापि सः

---

[१] भ. गी. १८.५६
[२] भ. गी. ५.४
[३] भ. गी. ५.५
[४] भ. गी. ४.१९
[५] भ. गी. ४.३७
[६] भ. गी. ४.३३
[७] भ. गी. ३.२२

लोककल्याणाय स्वधर्ममाचरति"[१] इति प्रतिपादितवन्तः। तस्मात् कर्मयोगोऽपि ज्ञाने वर्तत इति भावः। एवं कर्म-ध्यान-भक्ति-ज्ञानमार्गाः क्रमेणोत्तरोत्तरमार्गस्य कारणभूता अपि उत्तरोत्तरसाधननिरतेष्वपि साधकेषु निवसन्तीत्येतेषां समुच्चितसमन्वयः, न क्रमसमन्वयः।

अत्रेदमैदम्पर्यम्- कर्मयोगसाधननिरते साधके कर्मयोगः प्रधानरूपेण ध्यानयोगज्ञानयोगौ च गौणतया, ध्यानयोगसाधननिरते ध्यानं प्रधानतया कर्मज्ञानयोगौ चाप्रधानतया, ज्ञानयोगनिरते च ज्ञानं प्रधानतया कर्मध्यानयोगौ चाप्राधान्येन निवसन्ति। भक्तिस्तु त्रिष्वपि योगेषु समानरूपेणानुस्यूता भगवदनुग्रहहेतुर्भवति अर्थात् कर्मयोगे ईश्वरार्पणबुद्धिरूपेण, ध्यानयोगे ईश्वरश्रद्धारूपेण, ज्ञानयोगे च सर्वत्रेश्वरानुभवरूपेण भक्तिर्वर्तत इति भावः। अनेनैव कारणेन भगवद्गीतायां सर्वयोगानां प्रतिपादनावसरे भक्तेर्विषय उपदिष्टः[२]। तस्माद्यथा सत्त्वरजस्तमो गुणा अन्योऽन्याश्रया अन्योन्याभिभवरूपाश्च सन्तः प्रकृत्याश्रयेण जीवस्य बन्धजनका भवन्ति, तद्विपरीतमेते कर्म-ध्यान-ज्ञानयोगा अन्योन्याश्रयाः सन्तो भक्तेराश्रयेण तद्बन्धनं निवर्त्य परमात्मसाक्षात्काररूपं मोक्षं जनयन्तीतीमे भक्त्याश्रिताः कर्म-ध्यान-ज्ञानयोगाः श्रीमद्भगवद्गीतानुसारं समानमाना मोक्षोपाया इति सर्वं समञ्जसम्।

गुरुशिष्यस्वरूपम्

तदेतावतोपपादितानां कर्मध्यानादियोगानां रहस्यमवगन्तुं जीवः संसारानलतप्तः शिष्यरूपेण गुरुमुपगच्छति। तथा चाह श्रुतिः- तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्"[३] इति। गीतायामपि-

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः।।[४]

इत्युक्तम्। एतदुपनिषद्गीतोक्त्यनुसारं स च गुरुः शास्त्रवेत्ता ब्रह्मनिष्ठश्च भवेत्। शिष्यस्य प्रमाणगतसंशयनिवारणाय शास्त्रवित्त्वम्, प्रमेयगतसंशयपरिहारार्थं च ब्रह्मनिष्ठत्वं गुरौ भवेत्। "आचार्योपासनम्"[५] इति गीतायामयं गुरुरेवाचार्यशब्देन निर्दिष्टः। आचार्यो नाम-

---

[१] भ. गी. वीरशैवभाष्य. ४.३३
[२] द्र. गीतादर्पण. पृ. १७८-१७९
[३] मुण्ड. १.२.१२
[४] भ. गी. ४.३४
[५] भ. गी. १३.७

उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।
साङ्गं च सरहस्यं च तमाचार्यं प्रचक्षते।।[१]

इति स्मृत्या शिष्ययोग्यतामनुलक्ष्य विधिवत्तन्निःश्रेयसहेतुभूतस्य शास्त्रस्याध्यापनतत्पर इत्यर्थः। एवं शास्त्ररहस्यज्ञो ब्रह्मानुभवनिष्ठः शिष्योपदेशपरायणोऽनन्तमङ्गलगुणगणसमन्वितो ज्ञानी गीतानुसारमाचार्यापरपर्यायगुरुपदवाच्यः।

शिष्यस्तु तादृशस्य गुरोरुपदेशग्रहणपात्रम्। स च गुरुचरणशरणागतस्तत्सम्मुखे स्वस्वभावं प्रामाणिकतया निवेदयन् स्वश्रेयोजिज्ञासावान् भवेत्। यथाऽर्जुनः –

कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्मसम्मूढचेताः।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्।।[२]

इत्युक्तगुणान् निजे प्रदर्श्य स्वशिष्यत्वं समुद्घोषितवान्। एवं स्वं शिष्यत्वमङ्गीकृत्य शिष्यत्वगुणयुक्तो जीवो गुरुमुपाश्रित्य "प्रणिपातेन परिप्रश्नेन सेवया"[३] इति भगवदुक्त्या आप्त-अङ्ग-स्थान-सद्भावाख्यचतुर्विधसेवया तमाचार्यं प्रसन्नीकृत्य, तदनु प्रणिपातपुरःसरं स्वज्ञेयवस्तुप्राप्त्युपायानामुपदेशार्थं सविनयं प्रार्थयेत। एवं शिष्यप्रार्थनपर्यन्तं स गुरुरपि शिष्यं नावबोधयति। यथाऽत्र गीतायामुपर्युक्तप्रकारेण अर्जुनो यावत् शिष्यत्वमङ्गीकृत्य "यच्छ्रेयः स्यान्निश्चितं ब्रूहि" इति भगवन्तं न प्रार्थितवान्, तावन्न किञ्चिच्छास्त्रीयं ज्ञानमवबोधयामास भगवान्। एवं शिष्यप्रार्थनानन्तरं गुरुस्तद्योग्यतां परीक्ष्य कर्मध्यानादिमोक्षोपायानुपदिश्य तदनुष्ठातुमादिशति। एवं गुरूपदिष्टमार्गमनुसरन् शिष्यो मोक्षमार्गेऽग्रेसरो भूत्वा यथोक्तरूपेण ब्रह्मसाक्षात्कारवान् सन् सत्त्वादिगुणबन्धनतरणरूपं नित्यानन्दसत्यरूपं मोक्षमालभत इत्यलमतिविस्तराद् मोक्षोपायानां गीताभिमतानां निरूपणेन।

सिद्धान्तशिखामण्यनुसारं मोक्षोपायस्वरूपम्

चतुर्विधेषु पुरुषार्थेषु मोक्ष एव परमपुरुषार्थ इति सर्वैरपि दार्शनिकैरभ्युपगम्यते। स च लिङ्गाङ्गसामरस्यात्मक इति वीरशैवसिद्धान्तः। लिङ्गाङ्गसामरस्यात्मकमिदं

---

[१] म. स्मृ. २.१४०
[२] भ. गी. २.७
[३] भ. गी. ४.३४

ज्ञानं सद्गुरोः करुणां विना दुष्प्रापमिति "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्"[१] इत्युपनिषद्वचनप्रामाण्येनास्मिन् दर्शनेऽपि मुमुक्षोः साधकस्य गुरूपगमनं विधीयते। अत एवोक्तं रेणुकभगवत्पादैः–

अद्वैतपरमानन्दप्रबोधैकप्रकाशकम्।
उपायं शृणुयाच्छिष्यः सद्गुरुं प्राप्य साञ्जलिः।।[२] इति।

शिष्यस्वरूपम्

शिवजीवसामरस्यरूपं मोक्षमधिगन्तुं गुरूपसर्पणात् पूर्वं साधकः शिष्यत्वं सम्पादयेत्। शिष्यत्वं नाम–

शासनीयो भवेद्यस्तु परकायेन सर्वदा।
तत्प्रसादात्तु मोक्षार्थी स शिष्य इति कीर्तितः।।

भावो यस्य स्थिरो नित्यं मनोवाक्कायकर्मभिः।
गुरौ निजे गुणोदारे स शिष्य इति गीयते।।[३]

इति रेणुकभगवत्पादोक्त्या गुरूपदेशप्राप्तेर्योग्यता। "शासनात् शिष्यः" इति शिष्यशब्दस्य व्युत्पत्तिरप्युक्तार्थमेव दर्शयति। तस्माद् यदा साधको गुरूपदेशग्रहणयोग्यतां सम्पादयति, तदा शिष्यो भवति। ननु का नाम सा योग्यता इत्याकाङ्क्षायामुक्तं रेणुकभगवत्पादैः–

ततो विवेकसम्पन्नो विरागी शुद्धमानसः।
जिज्ञासुः सर्वसंसारदोषध्वंसकरं शिवम्।।
उपैति[४]------------------------।। इति।

आचार्यचरणैरत्रान्तःकरणस्य विशुद्धिः, नित्यानित्यवस्तुविवेकः, स्रक्चन्दनवनितादिवस्तुष्वनित्यत्वबुद्धिरूपं वैराग्यं च गुरूपदेशग्रहणयोग्यत्वेन प्रतिपादितानि। अत एव श्रीसिद्धान्तशिखामणौ प्राथमिके पिण्डस्थलेऽन्तःकरणविशुद्धिम्, द्वितीये पिण्डज्ञानस्थले नित्यानित्यरूपशरीरात्मविवेकम्, तृतीये संसारहेयस्थले इहामुत्रस्थितसकलवस्तूनामनित्यत्वप्रतिपादनद्वारा तेषु हेयताबुद्धिरूपं वैराग्यं च निरूप्य

---

[१] मुण्ड. १.२.१२
[२] सि. शि. १७.७३
[३] सि. शि. १७.५८-५९
[४] सि. शि. ६.१-२

तदनन्तरं गुरुकारुण्यस्थलमुपदिष्टम्। यथा तृणाद्यनेककल्मषयुक्तायां भूमौ निपतितं बीजं न फलप्रदं भवति, तथाऽशुद्धान्तःकरणविशिष्टे विवेकवैराग्यादिविरहिते जीवे श्रीगुरुणोपदिष्टं शिवजीवैक्यज्ञानं व्यर्थं भवति। तस्माद् विवेकवैराग्यसम्पन्नो विशुद्धान्तःकरणविशिष्टो विनय-शान्ति-संयमादिसद्गुणसमन्वितः साधक उत्तमः शिष्यः प्रभवितुमर्हति। तदुक्तम्—

शान्तो दान्तस्तपश्शीलः सत्यवाक् समदर्शनः।
गुरौ शिवे समानस्थः स शिष्याणामिहोत्तमः।।[1] इति।

एवंलक्षणः शिष्यः शिवज्ञानशिवानुभवादियोग्यतासम्पन्नमेव गुरुं भजेत। यतो हि—

गुरवो बहवः सन्ति शिष्यवित्तापहारकाः।
दुर्लभोऽयं गुरुर्लोके शिष्यहृत्तापहारकः।।[2]

इत्यागमोक्त्याऽस्मिन् प्रपञ्चे समस्ततापनिवारणैकोपायभूतमोक्षमार्गोपदेशका गुरवो विरलाः सन्ति। तस्माच्छिष्यः सर्वलक्षणसम्पन्नं गुरुं शरणं गच्छेत्।

गुरुस्वरूपम्

गुणातीतं गुकारं च रूपातीतं रुकारकम्।
गुणातीतमरूपं च यो दद्यात् स गुरुः स्मृतः।।[3]

इत्याचार्यचरणै रेणुकभगवत्पादैर्गुरोर्लक्षणमुक्तम्। अस्यायमर्थः— अक्षरद्वयात्मके गुरुशब्दे आद्यो यो 'गु' वर्णो वर्तते, तस्य प्राकृतगुणातीतत्वमित्यर्थः, द्वितीयो यो 'र' वर्णो वर्तते, तस्य चाशुद्धमायारूपातीतत्वमित्यर्थः। एतादृशं निर्गुणं निराकारं च चिन्मयं वस्तु यो ददाति, अर्थादुपदिशति, स गुरुरिति।

गुरुशब्दार्थं प्रतिपादयन्तो नीलकण्ठशिवाचार्याश्च "गुणान् रुन्ध इति गुरुः" इति व्युत्पत्तिमनुसृत्य—

गुणान् रुन्ध इति प्रोक्तो गुरुशब्दस्य विग्रहः।
सविकारान् राजसादीन् गुणान् रुन्धे व्यपोहति ।।

---

[1] सि. शि. १७.६०

[2] च. ज्ञा. क्रि. २.५४

[3] सि. शि. १५.८

गुणत्रयान् व्यपोह्याग्रे शिवं बोधयतीति सः।
विश्वस्तानां तु शिष्याणां गुरुरित्यभिधीयते।।[1]

इति शिष्यस्य प्राकृतान् राजसादिगुणान् व्यपोह्य शिवतत्त्वप्रबोधयितुरेव गुरुत्वमुक्तम्। एवं यो हि शिष्यस्य प्राकृतान् राजसादिगुणान् मलत्रयं च दीक्षादिभिर्निवर्त्य निर्गुणनिराकाररूपपरशिवतत्त्वज्ञानमुपदिशति स गुरुरित्यभिधीयते।

नन्वयं गुरुः किं लक्षणः? इति जिज्ञासायां पूज्यपादा रेणुकभगवत्पादाः-

उपैति लोकविख्यातं लोभमोहविवर्जितम्।
आत्मतत्त्वविचारज्ञं विमुक्तविषयभ्रमम्।।
शिवसिद्धान्ततत्त्वज्ञं छिन्नसन्देहविभ्रमम्।
सर्वतन्त्रप्रयोगज्ञं धार्मिकं सत्यवादिनम्।।
कुलक्रमागताचारं कुमार्गाचारवर्जितम्।
शिवध्यानपरं शान्तं शिवतत्त्वविवेकिनम्।।
भस्मोद्धूलननिष्णातं भस्मतत्त्वविवेकिनम्।
त्रिपुण्ड्रधारणोत्कण्ठं धृतरुद्राक्षमालिकम्।।
लिङ्गधारणसंयुक्तं लिङ्गपूजापरायणम्।
लिङ्गाङ्गयोगतत्त्वज्ञं निरूढाद्वैतवासनम्।।
लिङ्गाङ्गस्थलभेदज्ञं श्रीगुरुं शिववादिनम्।।[2]

इत्यादिभिर्वीरशैवसिद्धान्तानुसारं गुरोर्लक्षणानि प्रतिपादयामासुः। गुरुस्तावच्छ्रोत्रियो ब्रह्मनिष्ठश्च भवेदिति श्रुतेरादेशः। तदनुसारमत्रोक्तलक्षणस्यावलोकनेन शिवसिद्धान्ततत्त्वज्ञमित्यादिना तस्य श्रोत्रियत्वम्, लिङ्गाङ्गयोगतत्त्वज्ञं निरूढाद्वैतवासनमित्यादिना च ब्रह्मनिष्ठत्वं निश्चीयते। गुरुर्हि ज्ञानोपदेशेन स्वकीयेन शास्त्रविहितेनादर्शमयेनाचरणेन चाज्ञजनानां मार्गदर्शको भवतीति स स्वयं शिष्टाचारसम्पन्नोऽपि वर्तते। अतोऽत्र सिद्धान्ते धार्मिकम्, सत्यवादिनम्, कुमार्गाचारवर्जितम्, भस्मोद्धूलननिष्णातम्, लिङ्गधारणसंयुक्तम्, लिङ्गपूजापरायणमित्यादिना तस्य धर्माचारशीलत्वमपि निरूपितम्।

---

[1] क्रि. सा. १६.१३८-१३९, पृ. २१

[2] सि. शि. ६.२-६

चन्द्रज्ञानागमेऽपि[1] गुरोर्लक्षणप्रतिपादनावसरे– व्यसनी, वामनः, कुब्जः, कोपी, कुटिलः, खलः, अधिकचपलः, हीनाङ्गः, सूचकः, व्याधिगः, काकनादः, लम्बोष्ठः, वक्रनासः, अधोदृष्टिः, शठः, मिथ्याविनीतादिदुर्गुणवाँश्च गुरुपदवाच्यो न भवतीति प्रतिपाद्य करुणोपेतः वीतरागः, विमत्सरः, सम्प्रदायागतज्ञानः, लिङ्गाङ्गस्थलभेदज्ञः, षट्स्थलज्ञानतत्परः, दीक्षाकर्मादिकुशलः, षडध्वज्ञानवत्सलः, शिवैकाहितमानसः, गुरुवंशसमुद्भवश्चेत्यादिगुणवानेव गुरुपदाभिधेयो भवतीति स्पष्टमुपदिष्टम् । एवं सद्गुणसदाचारादिभिः स्वीयैरादर्शैः शिष्येभ्यो सत्प्रेरणां प्रददातीत्ययमेव श्रीगुरुः सिद्धान्तेऽस्मिन्नाचार्यशब्देनापि व्यवह्रियते। उक्तं चाचार्यलक्षणं भगवत्पादैः–

आचिनोति च शास्त्रार्थानाचारे स्थापयत्यलम्।
स्वयमाचरते यस्मादाचार्यस्तेन चोच्यते ।।[2] इति।

एतादृशाः शास्त्राध्ययनतदुक्तसद्गुणसदाचारादयो गुणाः केषुचिद्विशिष्टवंशीयेषु बाल्यावस्थाया आरभ्यैव संस्कारवशात् सहजतया सम्प्राप्ता भवन्तीति दर्शनान्तरेष्विव वीरशैवदर्शनेऽपि गुरुवरणवेलायां तादृशविशिष्टवंशोत्पन्नेभ्य आद्यता प्रदीयते । अत एव गुरुलक्षणनिरूपणावसरे सिद्धान्तशिखामणौ– "कुलक्रमागताचारम्"[3] इति, चन्द्रज्ञानागमे– "सम्प्रदायागतज्ञानो गुरुवंशसमुद्भवः"[4] इति च प्रतिपादितम्। सिद्धान्तशिखामणेस्तदुक्तेर्व्याख्यानवेलायां तत्र भवता मरितोण्टदार्येण– "कुलक्रमागताचारो गुरुवंशक्रमागताचारवान्"[5] इति कुलशब्दस्य गुरुवंश इति व्याख्यानं कृतम् । गुरुवंशोऽयमेव वीरमाहेश्वरवंशः जङ्गमवंशश्चेत्यभिधानान्तरेणापि प्रथितोऽस्मिन् सम्प्रदाये। एतादृशगुरुवंशोत्पन्ना मठस्थलसमुत्पन्ना इत्यप्याख्यायन्ते। अत एव–

मठस्थलसमुत्पन्नः शान्तः शैवागमार्थवित्।
अनूचानः प्रसन्नात्मा शिवदीक्षाभिषेचितः।।[6]

इति वीरशैवीयगुरुलक्षणनिरूपणावसरे श्रीनीलकण्ठशिवाचार्यास्तस्यान्यगुणैः साकं मठस्थलसमुत्पन्नत्वमपि परिगणयामासुः।

---

[1] च. ज्ञा., क्रि. २.४८–६६
[2] सि. शि. १५.९
[3] सि. शि. ६.४
[4] च. ज्ञा., क्रि. २.५०
[5] सि. शि. ६.४, *तत्त्वप्रदीपिकाव्याख्या।*
[6] क्रि. सा., भा. ३, पृ. १३३

अत्रेदमवधेयम्– वीरशैवदर्शने वीर–नन्दि–भृङ्गि–वृषभ–स्कन्दाख्याः शिवगणा गोत्रपुरुषा इत्यङ्गीक्रियन्ते। एतद्गोत्रसमुत्पन्ना वीरमाहेश्वरा जङ्गमा मठस्था वेति कथ्यन्ते। रम्भापुरी–उज्जयिनी–केदार–श्रीशैल–काशीति पावनस्थानेषु क्रमशो वीर-सद्धर्म–वैराग्य–सूर्य–ज्ञानाख्याः वीरशैवीयाः पञ्च प्रधानपीठाः सन्ति। एतेषां पीठानामधिपतयः पञ्चाचार्या महाचार्याश्चेत्यभिधानैर्व्यवह्रियन्ते। इमे वीरशैवानां मुख्या गुरव इति मन्यन्ते। एतेषां पञ्चपीठानां शाखानुवर्तिनो विपुला मठाः कर्णाटक-महाराष्ट्र–आन्ध्रप्रदेशादिप्रान्तेषु ग्रामे पत्तने च सन्ति। तेषु मठेषु पट्टाभिषिक्ता आचार्या उपाचार्याः पट्टाधिकारिण इति वा कथ्यन्ते। त इमे प्रधानपीठाधिपानां पञ्चाचार्याणां प्रतिनिधित्वेन कार्यं कुर्वन्तः तत्तत्प्रान्तीयजनान् दीक्षाशिक्षादिभिरुद्धरिष्यन्तीति गुरुपदवाच्या भवन्ति। एतेषु महापीठेषु मठेषु च वीर–नन्दि–भृङ्गि–वृषभ-स्कन्दाख्यशिवगणगोत्रोत्पन्ना वीरमाहेश्वराः पट्टाभिषिक्ता भवन्तीति।

एवं लक्षणो गुरुरेक एव दीक्षाप्रदानेन दीक्षागुरुरिति, शिक्षाप्रदानेन शिक्षागुरुरिति, ज्ञानोपदेशेन ज्ञानगुरुरिति चाभिधीयते। तदुक्तं श्रीरेणुकभगवत्पादैः–

दीयते परमं ज्ञानं क्षीयते पाशबन्धनम्।
यया दीक्षेति सा तस्यां गुरुर्दीक्षागुरुः स्मृतः।।

दीक्षागुरुरसौ शिक्षाहेतुः शिष्यस्य बोधकः।
प्रश्नोत्तरप्रवक्ता च शिक्षागुरुरितीर्यते।।

उपदेष्टोपदेशानां संशयच्छेदकारकः।
सम्यग्ज्ञानप्रदः साक्षादेष ज्ञानगुरुः स्मृतः।।[1] इति।

एतादृशसर्वलक्षणसम्पन्नमाचार्याभिधं गुरुमुपागतः सुलक्षणः शिष्यः "सेवेत परमाचार्यं शिष्यो भक्तिभयान्वितः"[2] इति रेणुकभगवत्पादोक्त्या गुरोरनुग्रहार्थं तस्य सेवां कुर्वीत।

गुरुसेवा

सेवा नाम कायेन मनसा वाचा च (त्रिकरणेन) क्रियमाणा शुश्रूषा। सा चाप्त–अङ्ग–स्थान–सद्भावेति भेदेन चतुर्धा। तत्राप्तो नाम स्वजनो बन्धुर्वा। यथा बान्धवानामागमने मनसि प्रमोदः सञ्जायते, अभ्यागतानां तेषां शुश्रूषा च विधीयते

---

[1] सि. शि. १५.७, १२, २१

[2] सि. शि. ६.७

लोके, तथा सद्गुरोरागमने सन्तुष्टान्तरङ्गेण तस्य सेवां कुर्यात्। यथाऽस्वस्थानामाप्तानामुपचर्या विधीयते लोके, तथा रोगादिभिरावृते सति गुरौ तस्य सेवा कार्या। एवमाप्तवन्मत्वा करणीया सेवाऽऽप्तसेवेत्युच्यते।

अत्रेदमवधेयम्– वस्तुतो गुरुरेव परम आप्तः। लौकिका हि आप्ता मोहबन्धप्रवर्धकाः। अत एव तेषां 'सम्बन्धिनः' इति लोके व्यवहारः। गुरुस्तु निजस्वरूपप्रबोधनद्वारा सर्वबन्धं विनिवर्त्य मोक्षप्रदायकः। "यावद्वित्तोपार्जनशक्तस्तावन्निजपरिवारो रक्तः" इति शङ्करभगवत्पादोक्त्याऽऽप्तत्वेन सम्बोध्यमाना अपि पारिवारिका जनाः सम्पदि सुखे चाप्तवद्व्यवहरन्ति, आपदि क्लेशे च पर्युषितभोजनवत् परित्यजन्ति। सद्गुरुर्हि सर्वदा शिष्यहितमेवेच्छन् तस्य सर्वक्लेशनिवारणाय प्रयतते। तस्मात्–

उत्सवे व्यसने चैव दुर्भिक्षे शत्रुविग्रहे।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः।।

इति सुभाषितोक्त्या सुखे वा दुःखे वा सर्वदा शिष्यस्य कल्याणमेव साधयन् सद्गुरुरेवाऽऽप्तपदवाच्यः।

ननु गुरुरपि सर्वदा शिष्येण साकं न वर्तते, तस्मात् कथं तस्याप्याप्तत्वमिति तु नाशङ्कनीयम्, यतो हि गुरोरभावेऽपि तदुपदिष्टं ज्ञानं तद्वदेव शिष्येण साकं विद्यमानं सत् क्लेशकाले तं संरक्षति। तस्माद् गुरुरेव परम आप्तः। तदीदृशभावेन क्रियमाणा तस्य सेवैवाऽऽप्तसेवा।

द्वितीयाऽङ्गसेवा। करचरणाद्यवयवान्यङ्गशब्देन व्यपदिश्यन्ते। यथा मनुष्यः स्वशरीरे तद्गतावयवेषु च प्रियो भवति, तथा गुरोः पादाद्यवयवेषु प्रियवृत्तिः सन् पादप्रक्षालनम्, स्नापनम्, रुग्णाद्यवस्थायामङ्गसंवाहनमित्यादिरूपेणाऽङ्गसेवां विदधाति। "पादादिकेशपर्यन्तं लिङ्गान्यङ्गानि सद्गुरोः"[१] इत्युक्त्यनुसारं तत्त्वज्ञस्य करुणावतश्च सद्गुरोरङ्गानि पवित्राणि शिवलिङ्गवत् पूज्यानि च भवन्ति। तस्मात् सद्गुरोरङ्गसेवा विधेया सच्छिष्यैः।

तृतीया स्थानसेवा। अत्र स्थानं नाम सद्गुरोर्निवासक्षेत्रम्। "गुरुर्देवो यतः साक्षात् तद्गृहं देवमन्दिरम्"[२] इत्यागमोक्त्या तदीयनिवासस्थानं देवमन्दिर–

---

[१] क्रि. सा., भा. ३, पृ. २२

[२] च. ज्ञा., क्रि. २.१२

वच्छ्रद्धार्हम् । अतो गुरुसन्निधौ यावत्कालपर्यन्तं स्थीयते, तावत्कालपर्यन्तं स्वगृहे क्रियमाणसम्मार्जन-प्रक्षालनादिवन्निर्वञ्चनतया गुरुस्थानेऽपि क्रियमाणा सेवा सद्गुरोः स्थानसेवेत्युच्यते।

अथ तुरीया च सद्भावसेवा। "भावो मानसचेष्टात्मा परिपूर्णः शिवात्मकः"[१] इत्याचार्योक्त्या शिवाश्रिता मनोवृत्तिर्भाव इत्युच्यते। अतः "गुरुः साक्षात् परब्रह्म" इत्याकारको गुरुविषयकोऽयं विश्वासः सद्भाव इत्युच्यते। आध्यात्मिकक्षेत्रे सद्भावस्य बहु प्राशस्त्यम् । अत एवोक्तं भगवत्पादैः–

भावनाविहितं कर्म पावनादपि पावनम्।
तस्माद्भावनया युक्तं परधर्मं समाचरेत्।।[२] इति।

तस्मात् पूर्वोक्तम् आप्त-अङ्ग-स्थानसेवात्रयमपि शिष्येण यदि दुर्भावनया क्रियेत, तर्हि तद्व्यर्थं दुष्फलदं च भवतीति दुर्भावं विहाय सद्भावनयैव सर्वाः सेवा विधेयाः। "षण्मासान् वत्सरं वापि यावदेष प्रसीदति"[३] इति रेणुकभगवत्पादोक्त्या सेयं सेवा यावद्गुरुतोषं कर्तव्या। यदा गुरुः शिष्यस्य चतुर्विधया सेवया सन्तुष्टो भवति, तदा विनयभावेन तदग्रतो गत्वा प्राञ्जलिः सन्–

भो कल्याण महाभाग शिवज्ञानमहोदधे ।
आचार्यवर्य सम्प्राप्तं रक्ष मां भवरोगिणम् ।।[४]

इत्येवं प्रकारेण दीक्षाऽनुग्रहार्थं सम्प्रार्थयेत् । एवं शिष्येण प्रार्थितः कारुणिको गुरुस्तस्मिन् शिष्ये शक्तिपातचिह्नानि परीक्ष्य तदनुरूपां शिवदीक्षां प्रदत्ते। तदादिष्टं भगवता–

इति शुद्धेन शिष्येण प्रार्थितः परमो गुरुः।
शक्तिपातं समालोक्य दीक्षया योजयेदमुम्।।[५] इति।

दीक्षाङ्गभूतो मलपरिपाकः

दीक्षारूपो गुर्वनुग्रहो न सर्वेषां सुलभप्राप्यः, किन्तु पक्वमलानामत एवेश्वरानुग्रहरूपशक्तिपातविशिष्टानामेव । अत एवोक्तम्–

---

[१] सि. शि. १६.६७
[२] सि. शि. १६.६८
[३] सि. शि. ६.७
[४] सि. शि. ६.९
[५] सि. शि. ६.१०

परिपक्वमला ये तानुत्सादनहेतुशक्तिपातेन।
योजयति परे तत्त्वे स दीक्षयाचार्यमूर्तिस्थः ।।[1] इति।

वीरशैवदर्शने ह्याणव-मायीय-कार्माख्यमलत्रयमेव बन्धः । एतेषां मलत्रयाणां परिपाकं विना शक्तिपातो न सञ्जायते। अत्र "मलोऽप्यामश्च पक्वश्च भवेत् संसारकारणम्"[2] इति व्यासोक्त्यनुसारं तदाणवादिको मल आमः पक्वश्चेति प्रकारद्वयात्मको भवति। तत्र तपसा प्रक्षीणः पक्वस्तद्विपरीतश्चामः । पक्वमलश्च साधकस्तप्ततनुरुच्यते, तद्विपरीतश्चातप्ततनुरपक्वमलश्चेत्यभिधीयते। तदुक्तम्-

तपस्तप्ता तनुर्यस्य स तप्ततनुरुच्यते।
परिपक्वो विमोक्षाय सोऽश्नुते लिङ्गधारणम्।।

न करोति तपः पूर्वं सोऽतप्ततनुरुच्यते।
अपक्वोऽयं विमोक्षाय नाश्नुते लिङ्गधारणम् ।।[3] इति।

अत एव श्रीमद्री रेणुकभगवत्पादैः-

अतप्ततनुरज्ञो वै आमः संस्कारवर्जितः।
दीक्षया रहितः साक्षान्नाप्नुयाल्लिङ्गधारणम्।।[4]

इत्यत्रापक्वमलस्य, अत एवेश्वरानुग्रहरहितस्य दीक्षाऽनधिकारिणो वीरशैव-सिद्धान्तानुसारं क्रियादीक्षायामुपलभमानेष्टलिङ्गधारणेऽनधिकारित्वं संसूचितम् । तस्मात् पक्वमलो मुमुक्षुरेवेश्वरानुग्रहरूपं शक्तिपातं प्राप्नोति। अत एवोक्तमाचार्यवर्यैः-

स्वकर्मपरिपाकेन प्रक्षीणमलवासनः।
शिवप्रसादाज्जीवोऽयं जायते शुद्धमानसः।।

शुद्धान्तःकरणे जीवे शुद्धकर्मविपाकतः।
जायते शिवकारुण्यात् प्रस्फुटा भक्तिरैश्वरी ।।[5] इति।

एवं जीवोऽनेकजन्मार्जितसुकृतजन्यस्वकर्मपरिपाकवशेन विनष्टमलवासनो यदा जायते, तदेश्वरानुग्रहरूपशक्तिपातोऽस्य सम्भवति।

---

१. त. प्र. १५
२. शि. पु. ७.१.३१.७२
३. वी. आ. च., पृ. ७८
४. सि. शि. ६.६०
५. सि. शि. ५.४८-४९

शक्तिपातः

भगवद्भक्तेरुन्मेष एव शक्तिपातस्य प्रधानं लक्षणमित्यवगन्तव्यम्। स चेश्वरानुग्रहजन्यः। अत एवाचार्यैः–

प्रसादादेव सा भक्तिः प्रसादो भक्तिसम्भवः।
यथैवाङ्कुरतो बीजं बीजतो वा यथाङ्कुरः।।[1]

इतीश्वरानुग्रहरूपशक्तिपातभक्त्योरन्योन्यसापेक्षत्वमुक्तम्।

अत्रायं भावः– “प्रथमतः साधकस्य मनसि सामान्यतो भक्तिरुन्मिषति। तद्भक्त्या सन्तुष्ट ईश्वरो यदा तदुपरि शक्तिपातं करोति, तदा तन्मनसि भक्तिर्द्विगुणा भवति, अर्थात् शक्तिपातपूर्वं सांसारिकविषयेऽपि तस्य रुचिर्वर्तते, शक्तिपातानन्तरं संसाराद् भयमनुभवन् तस्मान्मुक्तिमिच्छति, तदर्थं भगवद्भक्तावेव निरतो भवति। तच्छक्तिपातवशादेव पूर्णतया भगवद्भक्तिनिरते जीवे क्षणे क्षणे रोमाञ्चाऽङ्गकम्पनाऽश्रुपातादिकं च सम्भवति। तथा चोक्तम्–

लक्षणं शक्तिपातस्य प्रबोधानन्दसम्भवः।
सा यस्मात् परमा शक्तिः प्रबोधानन्दरूपिणी।।
आनन्दबोधयोर्लिङ्गमन्तःकरणविक्रिया ।।[2] इति।

स ईदृशः शक्तिपातस्तीव्रतर-तीव्र-मन्द-मन्दतराख्यया चतुःप्रकारः। तत्र तीव्रतरशक्तिपातं प्राप्तः साधको दीक्षानन्तरं तत्कालमेव मोक्षं विन्दते। तीव्रशक्तिपातविशिष्टो दीक्षानन्तरं मूर्च्छितो भवति। मन्दशक्तिपातमधिगतस्य जीवस्य शरीरकम्पनं भवति। मन्दतरशक्तिपातमवाप्तश्च रोमाञ्चितो भवति। तदुक्तम्–

चतुर्धा शक्तिपातेन तुल्यमेव फलं प्रति।
यथा तीव्रतरस्तीव्रो मन्दो मन्दतरोऽपि च।।
सद्योमुक्त्या मूर्च्छया वा कम्पाद् रोमाञ्चतस्तथा।।[3] इति।

शक्तिपातचिह्नानि

नन्वयं शक्तिपातविशिष्टः, अयं च शक्तिपातरहित इति कथं विज्ञेयम्? तत्र कानि चिह्नानि? इति जिज्ञासायामुच्यते मृगेन्द्रागमे–

---

[1] सि. शि. ९.११

[2] क्रि. सा., भा. २, पृ. १९५

[3] सि. सा. विस्तरार्थं. पृ. ८६

येषां शरीरिणां शक्तिः पतत्येव निवृत्तये।
तेषां तल्लिङ्गमौत्सुक्यं मुक्तौ द्वेषो भवस्थितौ।।

भक्तिश्च शिवभक्तेषु श्रद्धा तच्छासके विधौ।
अनेनानुमितिः शिष्टहेतोः स्थूलधियामपि।।[१] इति।

तस्मादीदृशानि शक्तिपातचिह्नान्यवलोक्यैव शिष्याणां शिवदीक्षा विधेया भवति श्रीगुरुणा। तदेतत्पर्यालोचनेन ज्ञायते यद् भगवदनुग्रहेण यस्य मनसि भक्तेः समुन्मेषः सञ्जातः, स एव दीक्षाधिकारीति।

शक्तिपाते न वर्णाश्रमभेदः

ब्राह्मणः क्षत्रियो वापि वैश्यो वा शूद्र एव वा।
अन्त्यजो वा शिवे भक्तः शिववन्मान्य एव सः।।

शिव भक्तिसमावेशे क्व जातिपरिकल्पना।
इन्धनेष्वग्निदग्धेषु को वा भेदः प्रकीर्त्यते।।[२]

इति रेणुकभगवत्पादैर्भगवद्भक्तेरुन्मेषरूपे शक्तिपाते वर्णाश्रमजातिभेदस्य निराकृतत्वाद्वीरशैवदर्शने शक्तिपाते तदाधारेण प्रदीयमानायां दीक्षायां च वर्णाश्रमभेदो नाङ्गीक्रियते, अर्थाद् वर्णाश्रमाणामाधारेण शक्तिपातो दीक्षा वा न भवति। एतद्विषये द्वितीयपरिच्छेदे वीरशैवागमवैशिष्ट्यप्रतिपादनावसरे विस्तरेण विवेचितं प्राक्। विस्तरस्तत्रैव द्रष्टव्यः।

शिष्यपरीक्षा

गुरुस्तु स्वाश्रितं शिष्यं परीक्षेद् वर्षमेककम्।
ब्राह्मणं क्षत्रियं वैश्यं द्वित्रिवर्षकमेव वा।।

प्राणद्रव्यप्रदानाद्यैरादेशैश्च समासमैः।
उत्तमांश्चाधमे कृत्वा नीचानुत्तमकर्मणि।।

आकृष्टास्ताडिता वा ये विषादं नैव यान्त्यपि।
ते योग्याः सततं शुद्धाः शिवसंस्कारकर्मणि।।[३]

---

[१] मृगेन्द्रा. वि. ५.४-५

[२] सि. शि. ११.५४-५५

[३] च. ज्ञा. क्रि. २.७६-७८

इत्यागमोक्त्यनुसारं दीक्षार्थं समागतं शिष्यं सम्यक् परीक्ष्य तत्र ये समुत्तीर्णा भवन्ति, तेषामेव मलनिवारकः शिवज्ञानप्रदायकश्च दीक्षासंस्कारो विधीयते। तत्रापि द्वादशशताब्दीयवीरशैवशिवशरणेषु षट्स्थलचक्रवर्तीति ख्यातनामा चन्नबसवेश्वरः-

ब्राह्मणं त्रीणि वर्षाणि षडब्दं क्षत्रियं तथा।
वैश्यं नवाब्दमाख्यातं शूद्रं द्वादशवर्षकम्।।[1]

इत्युक्तिं प्रमाणयन् ब्राह्मणादीनपि परीक्ष्यैव शिवदीक्षा प्रदीयेतेति प्रतिपादयामास। परीक्ष्यार्हतां सुयोग्याय प्रदत्ता दीक्षा फलदा भवतीति गुरुणा शिष्यपरीक्षाऽपि विधीयते।

दीक्षास्वरूपं तत्प्रभेदाश्च

तत्र तावद्वीरशैवदर्शने प्रत्येकं साधकस्य शिवदीक्षासंस्कारो नितान्तमावश्यकः। यथाऽद्वैतवेदान्ते विवेक-वैराग्य-शमादिषट्कसम्पत्ति-मुमुक्षुत्वादिसाधनचतुष्टय-सम्पन्नानामेव ब्रह्मविद्याधिकारः, तथा वीरशैवसिद्धान्ते दीक्षासंस्कारसम्पन्नानामेव ब्रह्मज्ञानप्राप्त्यधिकारः। अत एव श्रीपतिपण्डिताराध्यभगवत्पादाः "अथातो ब्रह्मजिज्ञासा" इति शारीरिकसूत्रव्याख्यानावसरे 'अथ' शब्दस्यानन्तरमित्यर्थमुक्त्वा, कस्मादनन्तरमिति जिज्ञासायाम् "पाशुपतदीक्षानन्तरमित्यथशब्दार्थो निर्णीयते"[2] इति प्रतिपादितवन्तः। तस्मादस्मिन् सिद्धान्ते शिवजीवसामरस्यात्मकमुक्तिहेतुभूतब्रह्मविद्यामधिगन्तुं शिवदीक्षा परमावश्यकी। उक्तं च कारणागमे-

अदीक्षासंस्कृते जन्तावपवित्रहृदाकुले।
उपदिष्टमपि ज्ञानं मरुवन्न प्ररोहति।।[3] इति।

अनेन दीक्षासंस्कारेण साधकस्य योगाङ्ग-भोगाङ्ग-त्यागाङ्गाख्येषु कारण-सूक्ष्म-स्थूलापरपर्यायेषु शरीरत्रयेषु विद्यमानानाम्, जीवस्येच्छाज्ञानक्रियाशक्तीनां सङ्कुचितत्वे कारणानाम्, अत एव सकलदुःखहेतुभूतानामाणव-मायीय-कार्माख्यानां मलानां निवृत्तिर्भवति, परशिवाख्यमहालिङ्गेन साकं स्वात्माभेदरूपं शिवज्ञानं च प्राप्यते। अत एव दीक्षालक्षणप्रतिपादनावसरे आचार्यवर्यै रेणुकभगवत्पादैः-

---

[1] चेन्नबसवेश्वरवचनसम्पुट, व. सं. १६९५

[2] ब्र. सू. श्रीकर. १.१.१

[3] का. आ. क्रि. २.७; मरुभूमौ यथाऽन्नं न प्ररोहति, तथा अदीक्षासंस्कृतं जीवं प्रत्युपदिष्टं ज्ञानं न फलप्रदं भवतीति भावः।

दीयते शिवताज्ञानं क्षीयते पाशबन्धनम्।
यस्मादतः समाख्याता दीक्षेतीयं विचक्षणैः।।[१]

इति दीक्षाशब्दस्याक्षरार्थो निरूपितः। दीक्षाशब्दस्यायमेवार्थः शिवागमे शिवपुराणेऽपि च प्रतिपादितः। तथा हि–

दीयते लिङ्गसम्बन्धः क्षीयते च मलत्रयम्।
दीयते क्षीयते यस्मात् सा दीक्षेति निगद्यते ।।[२]

इति शिवागमे।

संस्कारं परमं पुण्यं शिवेन परिभाषितम् ।।

दीयते येन विज्ञानं क्षीयते पाशबन्धनम्।
तस्मात् संस्कार एवाऽयं दीक्षेत्यपि च कथ्यते ।।[३]

इति शिवपुराणे चोपपादितम् ।

शरीरत्रयगतमलानां त्रिविधत्वात् तेषां निवारणोपायरूपदीक्षासंस्कारोऽपि वेधा-मान्त्री-क्रियेति भेदेन त्रिविधा। तदुक्तं भगवत्पादैः–

सा दीक्षा त्रिविधा प्रोक्ता शिवागमविशारदैः।
वेधारूपा क्रियारूपा मन्त्ररूपा च तापस ।।[४] इति।

श्रीमायिदेवोऽपि–

तनुत्रयगतानादिमलत्रयमसौ गुरुः ।।

दीक्षात्रयेण निर्दग्ध्वा लिङ्गत्रयमुपादिशत्।
यथा पुरत्रयं दग्धं युगपत् पुरवैरिणा ।।

तथा मलत्रयं दग्धं युगपद् देशिकात्मना।
वेधा-मनु-क्रियाकारा दीक्षा शैवी शिखा मता ।।[५]

इति गुरुकारुण्येनोपलब्धदीक्षात्रयेण मलत्रयनिवृत्तिं सदृष्टान्तं निरूपयामास। तदत्र क्रमशो दीक्षात्रयस्वरूपं विमृश्यते।

---

[१] सि. शि. ६.११

[२] का. आ. क्रि. २.७६

[३] शि. पु. ७.२.१५.५

[४] सि. शि. ६.१२

[५] अ. सू. ५.५२-५४

१. वेधा दीक्षा

हस्तमस्तकसंयोगाद् दृष्टेर्वेधेति कीर्त्यते ।[१]

इत्यागमोक्तिप्रमाणेन,

गुरोरालोकमात्रेण हस्तमस्तकयोगतः ।
यः शिवत्वसमावेशो वेधा दीक्षेति सा मता ।।[२]

इति भगवत्पादोक्त्यनुसारं च सद्गुरुर्यदा स्वदिव्यदृष्टिपातेन स्वीयेन शिवकरेण च सर्वसल्लक्षणसम्पन्नस्य शिष्यस्य मस्तकं स्पृष्ट्वा शिष्यस्य चिद्रूपतामाविष्करोति, अर्थात्, सद्गरोर्दिव्यदृष्टिप्रभावेण, करकमलस्पर्शमहिम्ना च शिष्ये स्वकीयं चिद्रूपबोधं सङ्क्रामयति, सा वेधा दीक्षेत्युच्यते ।

योगसाधनेन साधकानां हस्तपादाद्यवयवेषु विलक्षणा शक्तिरुदेति। अत एव इदानीं 'रेकी' नामिका, हस्तगतविशिष्टशक्तिप्रभावेण क्रियमाणा चिकित्सापद्धतिः प्रचलिता वर्तते। हस्तजपादिभिर्गुरोर्हस्ते, निर्निमेषदृष्ट्या इष्टलिङ्गावलोकनादिभिश्च नेत्रे च विलक्षणा यौगिकी शक्तिरुदेति। तादृशयौगिकशक्तिसम्पन्नदृष्टिहस्तयोः स्पर्शमात्रेण शिष्यस्य मनसि स्वीयचिद्रूपबोध उद्भवति। यथा रविकिरणप्रभावेण अन्धकारो निवर्तते, पङ्कजादीनि विकसितानि भवन्ति च, तथा सद्गुरोर्ज्ञानकिरणप्रभावेण शिष्यस्याणवमलो निवर्तते, 'शिवोऽहम्' इति भावनाया विकासश्च जायते। इयमेव 'शिवोऽहम्' इति भावना भावलिङ्गमित्युच्यते। एवं वेधादीक्षयाऽऽणवमलनिवृत्तौ सत्यां शिवोऽहमिति भावनया शिवजीवयोः सामरस्यरूपयोगप्राप्तिर्भवतीति वेधादीक्षया प्राप्तशिवोऽहंभावनारूपभावलिङ्गकोऽयं जीवोऽत्र सिद्धान्ते 'योगाङ्ग' इत्युच्यते। अत एव मायिदेवेनापि–

संयुयोज त्रिधाभूतं परादीक्षाबलेन तु।
योगाङ्गे भावलिङ्गं तु वेधादीक्षाबलेन वै।।[३]

इति वेधादीक्षया योगाङ्गे भावलिङ्गस्थितिरुपदिष्टा ।

---

[१] का. अ. १.१४
[२] सि. शि. ६.१३
[३] अ. सू. ५.५७

२. मान्त्री दीक्षा

श्रीगुरुर्दीक्षावेलायां शिष्यस्य दक्षिणे कर्णे निगूढं यथा स्यात् तथा प्रणवसहितं शिवपञ्चाक्षरमहामन्त्रमुपदिशति, अर्थात् षडक्षरमन्त्रमुपदिशति। तदानीमेवास्य मन्त्रस्य स्वरूपम्, छन्दः, मन्त्रद्रष्टारं महर्षिम्, तद्देवता-प्रत्यधिदेवताः, करन्यासाङ्गन्यासादिकं च निरूपयति। तदुक्तमाचार्यैः-

> ततः पञ्चाक्षरीं शैवीं संसारभयतारिणीम्।
> तस्य दक्षिणकर्णे तु निगूढमपि कीर्तयेत्।
> छन्दोरूपमृषिं चास्य देवतान्यासपद्धतिम्।।[१] इति।

एतादृशो मन्त्रोपदेश एव मान्त्री दीक्षेत्यभिधीयते। अत एवोक्तम् - "मान्त्री दीक्षेति सा प्रोक्ता मन्त्रमात्रोपदेशिनी"[२] इति सिद्धान्तशिखामणौ, "गुरुणोदीरिता कर्णे सा हि मन्त्रात्मिका भवेत्"[३] इति शिवागमे च।

"नमःशब्दं वदेत् पूर्वं शिवायेति ततः परम्"[४] इति रेणुकभगवत्पादोक्त्या 'नमः शिवाय' इति पञ्चाक्षरमन्त्रस्य स्वरूपम्। मन्त्रोऽयमेव यदा ओंकारयुक्तो भवति तदा षडक्षरमन्त्र इत्युच्यते। तदुक्तम्-

> ॐकारपूर्वो मन्त्रोऽयं पञ्चाक्षरमयः परः।
> शैवागमेषु वेदेषु षडक्षर इति स्मृतः।।[५] इति।

अस्य मन्त्रस्य वामदेवो ऋषिः पङ्क्तिश्छन्दः सदाशिवोऽधिदेवता, ओंकारो बीजम्, उमा शक्तिः, शिव इति कीलकं विज्ञेयम्। तदुक्तमागमे-

> वामदेव ऋषिश्चास्य पङ्क्तिश्छन्द उदाहृतम्।
> देवता स शिवः साक्षात् प्रणवो बीजं उच्यते।।
> उमा शक्तिरिति प्रोक्ता न्यासश्चैव षडक्षरैः।।[६] इति।

---

[१] सि. शि. ६.२०-२१
[२] सि. शि. ६.१४
[३] का. आ. क्रि. १.१४
[४] सि. शि. ८.७
[५] सि. शि. ८.१७
[६] च. ज्ञा., क्रि. ८.११; चन्द्रज्ञानागमे एव (क्रि. पा. ८.५-१०) पञ्चाक्षरमन्त्रस्य प्रत्येकाक्षरस्य ऋष्यादीनां प्रतिपादनपूर्वकं तस्य विस्तृतं स्वरूपमुपवर्णितमस्ति।

मन्त्रजपावसरे एतेषां स्वशरीरस्य विभिन्नस्थानेषु भावनमेव न्यास इत्युच्यते। तत्प्रकारो यथा– स्वदक्षिणहस्तस्य मुष्टिं बद्ध्वा तदङ्गुष्ठाग्रेण शिरः स्पृशन् तत्र मन्त्रद्रष्टारं महर्षिम्, मुष्टिं विसृज्य अङ्गुष्ठतर्जनीभ्यां मुखे छन्दः, अङ्गुष्ठमध्यमाभ्यां हृदये देवताम्, अङ्गुष्ठानामिकाभ्यां नाभौ बीजम्, अङ्गुष्ठकनिष्ठिकाभ्यां गुह्ये शक्तिम्, कुरङ्गमुद्रया पादयोः कीलकमित्येवं प्रकारेण ऋष्यादयः स्वाङ्गेषु भावनीयाः। तदुक्तं लिङ्गधारणचन्द्रिकायाम्–

ऋषिं मूर्ध्नि मुखे छन्दः देवतां हृदि विन्यसेत्।
आधारे बीजशक्तिं च पादयोः कीलकं न्यसेत्।।[1] इति।

एवं पञ्चाक्षरमन्त्रस्य स्वरूपच्छन्दादिकं मन्त्रदीक्षायां गुरुमुखेन श्रुत्वा साधको गुर्वादेशानुसारं प्राणायामपूर्वकं पुनः पुनर्जपति, अनेनास्य साधकस्य सूक्ष्मशरीरे, अर्थान्मनसि विद्यमानो मोहरूपो भेदापादकश्च मायीयो मलो निवृत्तो भवति। किञ्चानया दीक्षया शिष्ये गुरोश्चिद्रूपमयो बोधः सङ्क्रामतीति, 'चिद्रूपोऽहम्' इति ज्ञानं जायते। इयमेव 'चिदहन्ता' 'प्राणलिङ्गम्' इति च कथ्यते। एवं शिष्यस्य मायीयमलनिवारिका प्राणलिङ्गप्रबोधिका च दीक्षा मान्त्री दीक्षेत्युच्यते। एतादृशदीक्षासम्पन्नो हि साधकः सर्वाण्यपि भोग्यवस्तूनि परशिवाय विनिवेद्यैवोपभुङ्क्ते इत्ययं 'भोगाङ्ग' इत्यभिधीयते। अत एव– "मन्त्रदीक्षाबलेनैव भोगाङ्गे प्राणलिङ्गकम्"[2] इति मायिदेवेन भोगाङ्गापरपर्याये सूक्ष्मशरीरे मान्त्रीदीक्षया प्राणलिङ्गधारणमुपदिष्टम्।

३. क्रिया दीक्षा

"कुण्डमण्डलिकोपेता क्रियादीक्षा क्रियोत्तरा"[3] इति रेणुकभगवत्पादोक्त्या मण्डलनिर्माणदेवताप्रतिष्ठापनादिक्रियाप्रधाना हि दीक्षा क्रियादीक्षेत्यभिधीयते। वीरशैवसिद्धान्ते एतत्सम्प्रदायप्रवर्तका पञ्चाचार्याणां सम्प्रदायानुवर्तिन आचार्यपट्टाभिषिक्ताः परम्परागतमठस्थलसमुत्पन्ना एव गुरवो दीक्षां प्रददति[4]। ते खलु शुभे मुहूर्ते मठ–मन्दिरादिपवित्रस्थानेषु मण्डलं विरचय्य तन्मध्ये पञ्चाचार्यप्रतीकान् पञ्चकलशान् संस्थाप्य तेषु तत्तदाचार्यानाहूय तत्साक्षित्वे कलशोदकैः शिष्यं

---

[1] *लिं. धा. च., पृ. २३४*
[2] *अनु. सू. ५.५८*
[3] *सि. शि. ६.१४*
[4] *क्रि. सा., भा. ३, पृ. १३३; सि. शि. ६.४*

त्रिवारमभिषिच्य, शिष्यस्य मांसपिण्डमयं देहं मन्त्रपिण्डमयं विधातुं तस्य दक्षिणकर्णे शिवपञ्चाक्षरमहामन्त्रं निगूढम्, अर्थात् परश्रुतिगोचरीभूतं यथा न स्यात् तथा कीर्तयन्ति।

एवं मन्त्रोपदेशेन शिष्यदेहं संशोध्य पञ्चसूत्रप्रक्रियया निर्मितमङ्गुष्ठप्रमाणं शैलजं लिङ्गं[1] यद्वा नर्मदाबाणं गृहीत्वा जलाधिवास-धान्याधिवासादिप्रक्रियया पञ्चगव्यैः पञ्चामृताभिषेकैश्च तस्य शिलात्वं निवर्त्य पञ्चाक्षरमन्त्रसंस्कारेण पवित्रीभूते तस्मिन् शिवलिङ्गे शिवकलानियोजनद्वारा प्राणप्रतिष्ठां च कृत्वा तल्लिङ्गं शिष्यहस्ते निधाय–

प्राणवद्धारणीयं तत्प्राणलिङ्गमिदं तव।
कदाचित् कुत्रचिद्वापि न वियोजय देहतः।।[2]

इत्युपदिशन्ति गुरवः। एवं क्रियादीक्षया प्राप्तमिदं शिवलिङ्गमिष्टलिङ्ग-मित्यभिधीयते। एवमिष्टलिङ्गप्रदानमेव क्रियादीक्षाया परमोद्देश्यम्। उक्तं चागमे "शिष्यपाणितले दत्ता या दीक्षा सा क्रिया भवेत्"[3] इति। अनया क्रियादीक्षया कार्ममलस्य अर्थात् शुभाशुभवासनानां निवृत्तिर्जायते।

तदेवं वीरशैवसिद्धान्ते मुक्त्युपायेषु दीक्षायाः प्राधान्यं वर्तते। पूर्वोक्तो दीक्षारहितः पुरुषो बद्धजीव इति, यद्वा पशुरिति, दीक्षासम्पन्नश्च शुद्धजीव इति, गुर्वादेशानुसारं प्राप्तशिवस्वरूपश्च मुक्तजीव इति प्रतिपाद्यते। एतेषु त्रिविधजीवेषु दीक्षासम्पन्नः शुद्धजीव एव मोक्षाधिकारीति स एव मुमुक्षुरिति कथ्यते।

दीक्षाया मोक्षोपायता

मज्ज्ञानं न भवत्येव ह्यनया दीक्षया विना।
तस्मादियं महादीक्षा मोक्षदा निश्चिता खलु।।[4]

इत्यागमोक्त्या दीक्षासंस्कारसंशुद्धे चित्ते लिङ्गाङ्गसामरस्यात्मकं ज्ञानमुत्पद्यते, तज्ज्ञानेन जीवो मोक्षमाप्नोतीति दीक्षाया मुख्या मोक्षोपायता।

---

[1] *लिङ्गवृत्तसमं पीठं दैर्घ्यं विस्तार एव च।*
तदर्धं गोमुखं चैव प्रोक्तं लिङ्गस्य लक्षणम्।। (क्रि. सा., भा. ३, पृ. ४१)।

[2] *सि. शि. ६.२५*

[3] *का. आ., क्रि. १.१४*

[4] *का. आ. क्रि. २.११*

अत्रेदमवधेयम्– गुरुः क्रियादीक्षायां शिवस्य सद्रूपस्य मान्त्रीदीक्षायां चिद्रूपस्य, वेधादीक्षायामानन्दरूपस्य ज्ञानमुपदिश्य तन्मुखेन सच्चिदानन्दरूपः स परशिव स्वात्मरूप एवेत्यवबोधयति। इदं ज्ञानमेव लिङ्गाङ्गसामरस्यात्मकं ज्ञानमित्युच्यते। अनेन ज्ञानेन मोक्षसिद्धिरिति दीक्षाया मोक्षोपायता।

ननु यदि कश्चिद् दीक्षासम्पन्नो जीवो रागद्वेषानुबद्धः शिवज्ञानविवर्जितो भवेत्, तर्हि तस्य मोक्ष उपपन्नो न वेति सन्देहः। यदि शिवज्ञानं विनैव जीवस्य दीक्षामात्रेण मुक्तिः स्यात्, तर्हि, शिवज्ञानस्यापेक्षा निरर्थिका भवेदिति चेत्, मैवम्, भगवता शिवेनागमेऽस्य सन्देहस्य समाहितत्वात्। तथा हि–

> अज्ञस्य कुटिलस्यापि शाम्भवव्रतसेविनः।
> प्राणोत्क्रमणवेलायां वाराणस्यामिव ध्रुवम्।।
>
> ज्ञानमावेदयिष्यामि मत्स्वरूपनिबोधकम्।
> तेन वै मुच्यते जन्तुर्मत्प्रसादान्न संशयः।।[१] इति।

अनेनेदं ज्ञायते यद् भगवान् शिवो यथा काश्यां निवसतां जीवात्मनां प्राणोत्क्रमणसमये तेषां दक्षिणकर्णे तारकमन्त्रमुपदिश्य तेभ्यः कैवल्यं प्रददाति, तथा स शिवज्ञानरहितेभ्योऽपि दीक्षितजीवेभ्यो मरणासन्नसमये शिवज्ञानमुपदिश्य मोक्षमाददाति। तत्रापि यथा काश्यां वसन्नपि यदि कश्चिज्जीवो दुर्मार्गप्रवृत्तश्चेद् मरणोपरान्तं कालभैरवयातनामनुभूय मोक्षमाप्नोति, तथैव दीक्षासम्पन्नो जीवोऽज्ञानी पातकी च स्यात्, तर्हि भैरवयातनामनुभूय शिवत्वमधिगच्छति। अत एवोक्तम्– "दीक्षितः पातकी चेत् स्याद् गच्छेद्भैरवयातनाम्"[२] इति। तस्माद् दीक्षया मोक्ष उपपद्यत इत्यत्र न सन्देहः।

तदेवं दीक्षया मोक्षे सिद्धेऽपि भैरवयातनां विनैव सुखेन मोक्षमवाप्तुं सत्कर्म सज्ज्ञानं च परमावश्यकम्। अत इदानीं ज्ञानकर्मणोः स्वरूपं विमृश्यते सिद्धान्तशिखामण्युक्तवीरशैवसिद्धान्तदिशा।

सिद्धान्तशिखामण्यनुसारेण ज्ञानकर्मणोः स्वरूपम्

शिवदीक्षासम्पन्नो हि साधको गुरूपदिष्टज्ञानबलेन, तदादिष्टकर्मानुष्ठानेन च शिवपदमधिगच्छति। तत्र "शिवागमार्थविज्ञानं ज्ञानं नान्यार्थवेदनम्"[३] इति रेणुक-

---

[१] का. आ. क्रि. २.१७–१८

[२] का. आ. क्रि. २.२१

[३] सि. शि. ९.२४

भगवत्पादोक्त्या उपक्रमोपसंहारादिशास्त्रार्थनिर्णयहेतुभूतषड्लिङ्गद्वारा विनिर्णीतस्य शिवागमार्थस्य विज्ञानं ज्ञानशब्देन निगद्यते। शिवागमानां तात्पर्यस्तावच्छिवज्ञाने पर्यवस्यति। "शिवश्च शिवश्च शिवौ, तयोरद्वैतं शिवाद्वैतम् इति शिवाद्वैतपदस्य व्युत्पत्तिः । अत्र प्रथमशिवपदस्य सूक्ष्मचिदचिद्रूपशक्तिविशिष्टं शिवाभिधं लिङ्गमित्यर्थः, अपरशिवपदस्य स्थूलचिदचिद्रूपशक्तिविशिष्टोऽनाद्यविद्याऽभिभूतशिवांशरूपः शिवदीक्षयाऽपहृतमलो जीवोऽङ्गमित्यर्थः। एवंभूतयोर्लिङ्गाङ्गयोर्यदद्वैतं तच्छिवाद्वैतम् । अस्य विवेक एव शिवाद्वैतज्ञानम् । इदमेव ज्ञानान्तरापेक्षया सर्वोत्कृष्टं लिङ्गाङ्गसामरस्यजनकं च वर्तते। अत एवोक्तं भगवत्पादैः—

शिवाद्वैतपरं ज्ञानं ज्ञानमित्युच्यते बुधैः।
सिद्धेन वाप्यसिद्धेन फलं ज्ञानान्तरेण किम्।।
निर्मलं हि शिवज्ञानं निःश्रेयसकरं परम् ।।[1] इति।

अपरत्राऽपि तैरेव शिवाद्वैतज्ञानस्वरूपमेवमुपवर्णितम्। तथा हि—

ज्ञानं परशिवाद्वैतपरिपाकविनिश्चयः।
शिवात्मकमिदं सर्वं शिवादन्यन्न विद्यते।।
शिवोऽहमिति या बुद्धिस्तदेव ज्ञानमुत्तमम्।।[2] इति।

"शिवार्चा कर्म विज्ञेयं बाह्यं यागादि नोच्यते"[3], "शिवो हि परमः साक्षात् पूजा तस्य क्रियोच्यते"[4] इति रेणुकभगवत्पादोक्त्या शिवदीक्षायां सद्गुरुणा प्रदत्तस्य शिवस्वरूपस्येष्टलिङ्गस्य भस्मगन्धाक्षतादिभिः षोडशोपचारैः परया श्रद्धया समर्चनं वीरशैवदर्शने कर्म इत्युच्यते, न तु ज्योतिष्टोमादयो यागाः । तत्र भवद्भिर्व्याख्याकृद्भिर्मरितोण्टदार्यैः— "शिवलिङ्गपूजैव कर्मेति विज्ञेयं तत्फलस्य शाश्वतत्वात्, तद्भिन्नबहुवित्तव्ययायाससाध्यज्योतिष्टोमयागादि कर्मेति नोच्यते, तत्फलस्य नश्वरत्वात्"[5] इति शिवलिङ्गार्चनस्य नित्यफलरूपकैवल्यजनकत्वात्, यागानां चानित्यफलरूपस्वर्गसुखप्राप्त्यादिजनकत्वात्, यागाद्यपेक्षया शिवार्चनस्यैव सुकर्मत्वं कर्मपदवाच्यत्वं च समर्थितम् । अनेन वेदादिषु कर्मत्वेन प्रसिद्धा अपि यागादयो

---

[1] सि. शि. १६.७७-७८
[2] सि. शि. १६.३०-३१
[3] सि. शि. ९.२३
[4] सि. शि. १६.५
[5] सि. शि. तत्त्व. ९.२३

वीरशैवदर्शने कर्मत्वेन नाङ्गीक्रियन्त इति ज्ञायते। तस्मादेवं शिवाद्वैतविवेको ज्ञानम्, शिवलिङ्गपूजा च कर्म इति सिद्धान्तशिखामणिसिद्धान्तः।

ज्ञानकर्मसमसमुच्चयवादः

अत्र वीरशैवसिद्धान्ते न केवलं कर्मणः, न वा केवलं ज्ञानस्य मोक्षहेतुत्वमङ्गीक्रियते, किन्तु ज्ञानकर्मसमसमुच्चयस्य मोक्षकारणत्वमङ्गीक्रियते। अत एव भगवत्पादै रेणुकाचार्यैः–

भावकर्मसमायुक्तं ज्ञानमेव विमुक्तिदम्।
केवलं कर्ममात्रेण जन्मकोटिशतैरपि।
नात्मना जायते मुक्तिर्ज्ञानं मुक्तेर्हि कारणम्।।

ज्ञानहीनं सदा कर्म पुंसां संसारकारणम्।
तदेव ज्ञानयोगेन संसारविनिवर्तकम्।।[1]

इति भावकर्मसमुच्चितं ज्ञानं मोक्षहेतुरित्युक्तम् । अत्र भावना तूभयान्वयिनी, अर्थात् कर्माचरणे ज्ञानप्राप्तौ च भावनाया आवश्यकता वर्तते । भावो नाम– "भावो मानसचेष्टात्मा परिपूर्णः शिवाश्रयः"[2] इत्याचार्योक्त्या शिवात्मिकाऽन्तःकरणचेष्टेत्यर्थः। तत्र कर्मान्विता भावना भक्तिरिति, ज्ञानान्विता च भावना निदिध्यासनमिति कथ्यते। भावविरहितं कर्म ज्ञानं वा निरर्थकं भवति। अत एवाचार्यचरणैः–

अर्थहीना यथा वाणी पतिहीना यथा सती ।
श्रुतिहीना यथा बुद्धिर्भावहीना तथा क्रिया ।।[3]

इति भावनारहितस्य कर्मणः निन्दां कृत्वा,

भावनाविहितं कर्म पावनादपि पावनम् ।
तस्माद् भावनया युक्तं परधर्मं समाचरेत् ।।

भावेन हि मनःशुद्धिर्भावशुद्धिश्च कर्मणा ।
इति सञ्चिन्त्य मनसा योगी भावं न सन्त्यजेत् ।।

शिवभावनया सर्वं नित्यनैमित्तिकादिकम् ।
कुर्वन्नपि महायोगी गुणदोषैर्न बाध्यते ।।[4]

---

[1] सि. शि. १६.२५–२७
[2] सि. शि. १६.६७
[3] सि. शि. १६.१९
[4] सि. शि. १६.६८–७०

इति भावविशिष्टस्य कर्मणः प्राशस्त्यमुपपादितम् । एवमेव–

चक्षुर्हीनो यथा रूपं न किञ्चिद्वीक्षितुं क्षमः।
भावहीनस्तथा योगी न शिवं द्रष्टुमीश्वरः।।[1]

इति निषेधविधया भावनाविशिष्टस्य ज्ञानस्यापि प्राशस्त्यमुक्तम्। तस्माद् भावकर्मसमन्वितं ज्ञानं मोक्षकारणमिति निश्चीयते ।

ननु यदि ज्ञान-कर्म-भावनानां त्रयाणामपि मोक्षसाधनत्वम्, तर्हि "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय"[2] इति श्रुतौ ज्ञानातिरिक्तस्य मोक्षसाधनत्वं निरस्य ज्ञानस्यैकस्यैव मोक्षसाधनत्वश्रवणं विरुध्येत, इति चेन्न, ज्ञानकर्मणोः समसमुच्चयेन, ज्ञानकर्मणोरङ्गाङ्गिभावसमुच्चयेन चेति द्विधाऽत्र समाधातुं शक्यत्वात्। तथा हि–

अन्धपङ्गुवदन्योन्यसापेक्षे ज्ञानकर्मणी।
फलोत्पत्तौ विरक्तस्तु तस्मात् तद्द्वयमाचरेत्।।

ज्ञाने सिद्धेऽपि विदुषां कर्मापि विनियुज्यते।
फलाभिसन्धिरहितं तस्मात् कर्म न सन्त्यजेत्।।

आचार एव सर्वेषामलङ्काराय कल्प्यते।
आचारहीनः पुरुषः लोके भवति निन्दितः।।

ज्ञानेनाचारयुक्तेन प्रसीदति महेश्वरः।
तस्मादाचारवान् ज्ञानी भवेदादेहपातनम्।।[3]

इत्यादिस्थलेषु रेणुकभगवत्पादाचार्या महर्षिमगस्त्यं प्रति ज्ञानकर्मणोः समसमुच्चयं प्रतिपादितवन्तः।

इदमत्र रहस्यम्– कर्म तावत् पतिकर्म, पशुकर्म चेति द्विविधम् । तत्राऽग्निष्टोमाद्यश्वमेधान्तानि याज्ञिककर्माणि स्वर्गादिसाधनानि, नहि तैर्निःश्रेयससिद्धिरिति पाशाश्रयत्वात् तेषां पशुकर्मता। इष्टलिङ्गधारण-लिङ्गार्चन-लिङ्गार्पितप्रसादग्रहण-लिङ्गानुसन्धान-गुरु-जङ्गमपूजन-तत्पादोदकप्रसादसेवन-लिङ्गाङ्गसामरस्यबोधकपञ्चाक्षरमन्त्रजप-भस्मरुद्राक्षधारण-पञ्चाचाराचरणादिवीरशैवीयधर्माणां पाशमोचकत्वात्

---

[1] सि. शि. १६.२०
[2] श्वे. उ. ३.८
[3] सि. शि. १६.११-१४

पशुपतेः परमेश्वरस्य साक्षात्कारहेतुत्वात् तेषां पतिकर्मता। भगवत्पादैर्नीलकण्ठशिवाचार्यैः– "अथातो ब्रह्मजिज्ञासा"[1] इत्यस्य सूत्रस्य व्याख्यानावसरेऽथशब्दस्य धर्मानन्तर्यमित्यर्थमुक्त्वा,

धर्मानन्तर्यमेवातो वाच्यं धर्मो द्विधा मतः।
पशुधर्मः प्राथमिकः पतिधर्मो द्वितीयकः।।

पशुधर्म इति प्राहुर्यस्तु काम्यफलप्रदः।
निष्कामेण स्वपापस्य विच्छित्यै समनुष्ठितः।।
यो धर्मस्तं तु शास्त्रेषु पतिधर्मं प्रचक्षते।।[2]

इति तस्य धर्मस्य द्वैविध्यं प्रतिपाद्य,

भस्मधारणमुख्यं हि कालाग्न्युपनिषन्मुखैः।
बृहज्जाबालमुख्यैश्च विहितं तत्पदे पदे।।

रुद्राक्षधारणं चैव दहरोपासनादिकम्।
कालयोः शिवपूजा च त्रिषु कालेषु वा सदा।।

विद्यासु श्रुतिरुत्कृष्टा रुद्रैकादशिनी श्रुतौ।
तत्र पञ्चाक्षरो मन्त्रः शिव इत्यक्षरद्वयम्।।

इति श्रुतिशिरोरत्नशिरोरत्नमनोर्जपः।
आचार्यदेव इत्युक्तमन्त्रदेशिकपूजनम्।।

प्रसादग्रहणं तस्येत्याद्याः पाशविमोचकाः।
पतिधर्मा इमे ज्ञेयास्तदानन्तर्यमत्र च।।[3]

इति पतिधर्माणां स्वरूपं प्रपञ्चितम्। किञ्च, तैरेवाचार्यैः–

अनुतिष्ठन् पशोर्धर्मान् पतिधर्मान् स चार्हति।
यथा पिपीलिका वृक्षमूलमाघ्राय तत्फलम्।।

आरुह्य लभते तद्वत् पतिधर्मैकतत्परः।

---

१. ब्र. सू. १.१.१
२. क्रि. सा., भा. १, पृ. १६–१७
३. क्रि. सा., भा. १, पृ. १७

यथा विहङ्गः पक्षाभ्यां फलितं वृक्षमागतः।।
पश्यन् फलमवाप्नोति तद्वच्छीघ्रं तदर्हति।[1]

इत्यादिना स्वपापविच्छित्यै निष्कामभावेन पशुधर्मानुष्ठानपरस्य जीवस्य पिपीलिकासादृश्यम्, पतिधर्मानुष्ठानपरस्य च विहङ्गमसादृश्यमुक्तम्। एतेन पशुधर्माणां निष्कामसमनुष्ठितानामपि पतिधर्मसमर्पकत्वेन परम्परया मुक्तिसाधनत्वम्। पतिधर्माणां तु ज्ञानेन सह साक्षात्कारणत्वं निःश्रेयसीति पर्यवसितम्। तस्मात् पशुकर्मभिर्यज्ञादिभिः साकं ज्ञानस्य समसमुच्चये विरोधेऽपि पतिकर्मभिरिष्टलिङ्गपूजादिभिर्ज्ञानेन समसमुच्चये न कोऽपि विरोधः। अत एव रेणुकभगवत्पादैः–

भूतिरुद्राक्षसंयुक्तो लिङ्गधारी सदाशिवः।
पञ्चाक्षरजपोद्योगी शिवभक्त इति स्मृतः।।[2]

इति पतिकर्मनिरतानां शिवभक्तत्वमुक्तम्।

डॉ. टि. जी. सिद्धप्पाराध्यमहोदयास्तु कर्मज्ञानयोरङ्गाङ्गिभावसमुच्चयत्वप्रतिपादयन्तो कर्मणो मोक्षहेतुत्वं व्यवस्थापयन्ति। तद्यथा– "अत्र केचित् पुरुषार्थाधिकरणे विहिताधिकरणे च कर्मणां ज्ञानाङ्गत्वभाष्ये स्पष्टं प्रतिपादितम्। तत्र यद्यपि ज्ञानकर्मोभयानुष्ठानं सर्वेषामाश्रमिणां विधेयमिति भाष्ये ज्ञानकर्मसमुच्चयशब्दः प्रयुक्तः, अथापि पूर्वमुत्तरत्र च कर्मणामङ्गत्वस्य ज्ञानस्याङ्गित्वस्य च स्पष्टं प्रतिपादनेव समुच्चयो न समुच्चयः, अपि त्वङ्गाङ्गिभावसमुच्चय एव। कर्मज्ञानयोरङ्गाङ्गिभावेऽप्यङ्गिनोर्यत्फलं तदेवाङ्गस्यापि फलमिति न्यायेन कर्मणोऽपि मोक्षसाधनत्वं न विरुध्येत। सिद्धान्तशिखामणौ– "अन्धपङ्गुवदन्योन्यसापेक्षे ज्ञानकर्मणी"[3] इति कथनेऽपि, उपसंहारे– "ज्ञानेनाचारयुक्तेन प्रसीदति महेश्वरः"[4] इत्यत्राचारयुक्तेन ज्ञानेनेति निर्देशाज्ज्ञानस्य प्राधान्यं प्रतीयते। ज्ञानस्य प्राधान्ये कर्मणोऽङ्गत्वं स्वतः प्राप्नोत्येव। यदि "अन्धपङ्गुवत्' इत्यादिश्लोकमात्रेण ज्ञानकर्मणोरुभयोरपि मोक्षसाधनत्वं वक्तव्यमित्याग्रहः, तर्हि–

शिवोऽहमिति भावो हि शिवतापत्तिकारणम्।
न ज्ञानमात्रं नाचारो भावयुक्तः शिवो भवेत्।।[5]

---

[1] क्रि. सा., भा. १, पृ. १७
[2] सि. शि. ९.१
[3] सि. शि. १६.११
[4] सि. शि. १६.१४
[5] सि. शि. १६.१६

इति भावस्यापि मोक्षसाधनत्वकथनेन ज्ञान-कर्म-भावानां त्रयाणामेव समुच्चयो वक्तव्यो भवेत्। अतो ज्ञानमेव मोक्षसाधनम्, भावः कर्म च तदङ्गम्, 'अङ्गिफलमङ्गस्यापि' इति न्यायेन कर्मज्ञानयोरपि मोक्षसाधनत्वात् तथा व्यपदेशः। अतः कर्मज्ञानयोरङ्गाङ्गिभावो विवक्षितः, न समसमुच्चयः। तथा च कर्मणोऽप्रधानत्वेन स्वातन्त्र्येण न तस्य मोक्षसाधनत्वाभावात् 'नान्यः पन्था विद्यतेऽयनाय' इत्यत्र ज्ञानातिरिक्तस्य मोक्षसाधनत्वनिषेधो न विरुध्यत इति श्रुतिसूत्रागमानां सामरस्यमिति वदन्ति।

नान्यः पन्थेति वाक्येन मार्गान्तरनिषेधतः।
तेषां विद्याङ्गता प्रोक्ता नान्यथेति विनिश्चयः।।

इति क्रियासारेऽपि कर्मणां विद्याङ्गत्वमुक्तम्।।[1] इति।

वस्तुतस्तु वीरशैवदर्शने भक्त-माहेश्वर-प्रसादी-प्राणलिङ्गी-शरण-ऐक्य-मित्याख्यषट्स्थलोपासने (एतेषां विवरणमग्रे वक्ष्यते) साधको भक्त-माहेश्वरावस्थायां कर्मप्राधान्येन, ध्यान-ज्ञानयोरप्राधान्येन, प्रसादी-प्राणलिङ्गिनोरवस्थायां ध्यानप्राधान्येन कर्मज्ञानयोरप्राधान्येन, शरण-ऐक्ययोरवस्थायां ज्ञानप्राधान्येन कर्म-ध्यानयोरप्राधान्येन च शिवमाराधयन् लिङ्गाङ्गसामरस्यमश्नुत इत्यङ्गीकारादवस्थाभेदेन कर्मज्ञानयोरपि समानं स्थानमत्र। अत एव मरितोण्टदार्याः-

ज्ञानं प्रधानं न तु कर्महीनं,
कर्म प्रधानं न तु चिद्विहीनम्।
तस्माद् द्वयोरेव भवेत् प्रसिद्धिर्न
ह्येकपक्षो विहगः प्रयाति।।[2]

इत्यभियोक्तिं प्रमाणयन्तो ज्ञानकर्मणोः समानमानत्वमुक्तवन्तः। तस्माद्वीरशैवदर्शने तयोः समसमुच्चयोऽङ्गीकृत इत्यवगम्यते। अपि च-

विद्यां चाविद्यां च यस्तद्वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्याऽमृतमश्नुते।।[3]

इत्युपनिषदपि ज्ञानकर्मणोः समसमुच्चयं प्रतिपादयति। अस्या उपनिषदुक्तेर्व्याख्यानावसरे पण्डितप्रवरा उमचगिशङ्करशास्त्रिमहाभागा वीरशैवदर्शनस्य वैशिष्ट्यमेवं

---

[1] श. वि. द. पृ. १२८-१२९
[2] सि. शि. १६.१२ तत्त्वप्रदीपिका व्याख्या।
[3] ई. उ. ११

प्रतिपादितवन्तः। तथा हि– "विद्यां च ब्रह्मात्मैक्यज्ञानं च, अविद्यां च विद्याभिन्नां क्रियां च शिवलिङ्गयजनभजनादिरूपाम्, तदुभयं सह मिलितं परस्परं सामान्याधिकरण्यापन्नम्, यः परमपुरुषार्थसाक्षात्साधनत्वेन वेद जानाति, स अविद्यया शिवलिङ्गार्पितपतिकर्मणा, मृत्युं मरणजननादिप्रवाहमूलं मलत्रयम्, तीर्त्वा अतिक्रम्य विद्यया स्वस्वरूपशिवज्ञाने, अमृतं शक्तिविकासरूपममृतत्वम्, अश्नुते प्राप्नोति"[१] इति।

ननूत्पत्त्याप्तिविकृतिसंस्कृतीनां कर्मफलत्वादविद्यानिवृत्तिफलत्वाच्च विद्यायाः कथमनयोः सामानाधि-करण्यम्? नहि शुक्तिकाशकलं साकल्येनाकलयतः कलधौतविभ्रमनिवृत्तिः स्नानाचमनकर्मापेक्षया विलम्बते। तस्माद्ब्रह्मसाक्षात्कारस्यैव तदविद्यानिवृत्तिफलकत्वमित्यभ्युपेयम्। श्रूयते च– "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्येतऽयनाय"[२] इति। स्मर्यते च–

ज्ञानादेव तु कैवल्यं प्राप्यते येन मुच्यते।
तस्मात् कर्म न कुर्वन्ति यतयः पारदर्शिनः।।

इति चेत्, न तेषां वचनानां केवलानामेव स्थूलकर्मणां कैवल्यसाधनत्वनिराकरणपरत्वात्, समुच्चितानामुपपन्नत्वात् तत्साधनभावस्य, अन्यथा– "अन्धं तमः प्रविशन्ति"[३] इत्याद्युक्तेरेकैकनिन्दापुरस्सरम् "विद्यां चाविद्यां च" इत्यादिना ज्ञानकर्मणोः समुच्चितयोर्मोक्षसाधनत्वप्रतिपादनं न स्यात्। तथा च सङ्कुचितशक्तित्रयरूपमलत्रयनिवृत्तिः शक्तिविकासरूपशिवत्वप्राप्तिर्मोक्षः। तत्र मृत्युशब्दितकार्मादिमलनाशफलकत्वमविद्याशब्दितकर्मणां हार्दाकाशमध्यलिङ्गधारणादीनां सूक्ष्माणाम्, विद्यायास्तु तिरोहितस्वशक्तेराच्छादनविगलनफलकत्वम्, वायोः सूर्याच्छादकमेघनिःसारणफलकत्ववत्।

किञ्च, श्रुतिस्मृतयोऽपि ज्ञानकर्मणोः समसमुच्चयं प्रतिपादयन्ति। तद्यथा– "तेनैति ब्रह्मवित् पुण्यकृत् तैजसश्च"[४], "सत्येन लभ्यस्तपसा ह्येष आत्मा। सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम्"[५], "तत्प्राप्तिहेतुर्ज्ञानं च कर्म चोक्तं महामुने"[६]

---

[१] ई. उ. ११ शा./
[२] श्वे. उ. ३.८
[३] ई. उ. १२
[४] बृ. उ. ४.४.९
[५] मु. उ. ३.५
[६] भ. सं. उ. १.३२

''यथान्नं मधुसंयुक्तं मधु चाऽन्नेन संयुतम्।
एवं तपश्च विद्या च संयुक्तं भेषजं महत्।।

इति तस्मात् कर्मनिन्दाप्रतिपादकवाक्यानां केवलज्योतिष्टोमादिस्थूलकर्मविषयकत्वमेवेति निश्चीयते। नहि ज्ञानसहकृतलिङ्गधारणादिपतिकर्मजन्यमोक्षस्य भवन-दोहन-अभिषव-प्रोक्षणैः पिण्डपयःसोमव्रीहिणामिवोत्पाद्याप्य-विकार्य-संस्कार्यत्वं सम्भवति। उत्पत्त्याप्ति-विकृति-संस्कृतयस्तु ज्ञानाऽसहकृतपशुकर्मणां फलानि सन्तु नाम, ज्ञानविशिष्टलिङ्गधारणादिपतिकर्मणां तु पुनरावृत्तिरहितसर्वज्ञत्वादिषडङ्गशिवत्वप्राप्तिरेव फलमिति निश्चीयते। तस्मादेवं ज्ञानकर्मणोः समसमुच्चयेन ज्ञानवत् कर्मणोऽपि मोक्षसाधनत्वं सिद्ध्यति।

शिवानुग्रहस्य मोक्षकारणत्वम्

वस्तुतस्तु वीरशैवदर्शने-

शम्भोः शिवप्रसादेन संसारच्छेदकारिणा।
मोहग्रन्थिं विनिर्भिद्य मुक्तिं यान्ति विवेकिनः।।

विना प्रसादमीशस्य संसारो न निवर्तते।
विना सूर्योदयं लोके कुतः स्यात् तमसोलयः।।

सर्वानुग्राहकः शम्भुः केवलं कृपया प्रभुः।
मोचयेत् सकलान् जन्तून् न किञ्चिदिह कारणम्।।[1]

इत्याचार्योक्त्या परशिवानुग्रहेणैव मोक्ष इति स्वीक्रियते। ज्ञानकर्मादयस्तु परशिवानुग्रहहेतवः।

नाऽयमात्मा प्रवचनेन लभ्यो
न मेधया न बहुना श्रुतेन।
यमेवैष वृणुते तेन लभ्यस्तस्यै-
वात्मा विवृणुते तनूं स्वाम्।।[2]

इत्युपनिषद्वचनमप्यत्र प्रमाणम्। स च परशिवानुग्रहो न केवलं शिवज्ञानेनैव, अपि तु तदर्थं तदाराधनादिरूपाणि धार्मिकानि सदाचरणानि सम्पेक्ष्यन्ते। अत एवोक्तं भगवत्पादैः-

---

[1] सि. शि. १८.५९-६१

[2] कठो. १.२.२२

सदाचारप्रियः शम्भुः सदाचारेण पूज्यते।
सदाचारं विना तस्य प्रसादो नैव जायते।।[१] इति।

धार्मिकाचरणानि

अत्र हि वीरशैवसिद्धान्ते अष्टावरणम्, पञ्चाचारः, षट्स्थलमिति शिवानुग्रहसाधनानि त्रीणि प्रधानानि धार्मिकाचरणानि प्रतिपाद्यन्ते। अत एवास्मिन् दर्शनेऽष्टावरणानि साधकस्याङ्गानि, पञ्चाचारास्तस्य पञ्च प्राणाः, षट्स्थलानि चात्मेति कथ्यन्ते। यथा लोके सामान्यतो जीवानां लौकिकव्यवहारः करचरणाद्यङ्गयुक्तात् सप्राणादात्मविशिष्टात् शरीराद् भवति, तथाऽष्टावरणपञ्चाचारषट्स्थलैरेव वीरशैवसाधकानां परमपुरुषार्थसाधनव्यवहारः सम्पद्यत इत्यष्टावरणान्यङ्गमिति, पञ्चाचाराः प्राणा इति षट्स्थालानि चात्मेति व्यवह्रियन्ते।

अष्टावरणानि

तत्र १. गुरुः, २. लिङ्गम्, ३. जङ्गमः, ४. भस्म, ५. रुद्राक्षः, ६. मन्त्रः, ७. पादोदकम्, ८. प्रसादः इतीमान्यष्टौ वीरशैवदर्शनेऽष्टावरणानीत्युच्यन्ते। अत्रावरणशब्दो न स्वरूपावरणार्थकः, किन्तु रक्षाकवचवाचकः। यथा युद्धभूमौ योद्धा वैरिणां शस्त्रप्रहारैः स्वशरीरपरिरक्षणाय कवचेन स्वशरीरमावृणोति, तथैभिरष्टैर्भक्तः कामक्रोधादिभिः परिरक्ष्यत इतीमान्यष्टावरणानीत्युच्यन्ते[२]। एतेष्वष्टावरणेषु गुरुर्लिङ्गं जङ्गमश्चेति त्रय आराध्याः (पूजनीयाः) विभूति-रुद्राक्ष-मन्त्राः पूजायाः सामग्रीरूपाः, पादोदकप्रसादौ च पूजायाः फलरूपाविति विज्ञेयस्तेषां विभागः। तदिमानि व्याख्यायन्ते।

१. गुरुः

तत्र गुरुस्वरूपं तावदस्य प्रकरणस्य प्रारम्भे विस्तरेण विवेचितमिति, पुनरधुना तत्प्रतिपादनं पुनरुक्तिः मात्रं स्यात्। अतो गुरुस्वरूपविवेचनं तत्रैव द्रष्टव्यम्।

---

[१] सि. शि. १६.६६

[२] गुरुर्लिङ्गं जङ्गमश्च तीर्थं चैव प्रसादकः।
भस्मरुद्राक्षमन्त्राश्चेत्यष्टावरणसंज्ञिताः ॥
इमानि शिवभक्तानां भवदोषततेः सदा।
निवारणैककार्याणि ख्यातान्यावरणाख्यया ॥ (च. ज्ञा. क्रि. २.१-२)।

२. लिङ्गम्

लयं गच्छति यत्रैव जगदेतच्चराचरम्।
पुनः पुनः समुत्पत्तिं तल्लिङ्गं ब्रह्म शाश्वतम्।।[१]

इति रेणुकभगवत्पादाः प्रपञ्चोत्पत्तिलयकारणीभूतं परमतत्त्वमेव लिङ्गमिति तल्लक्षणमुक्तवन्तः। परं त्वत्र लिङ्गपदेन तस्यैव परमतत्त्वस्य चिह्नभूतमेतन्मताऽसाधारणमिष्टप्राणभावात्मकं सदा देहे धार्यमाणं साधकस्येष्टसाधनमिष्टलिङ्गमभिप्रेतम्।

वस्तुतस्त्विदं लिङ्गं "लिङ्गं तु त्रिविधं प्रोक्तं स्थूलं सूक्ष्मं परात्परम्"[२] इति रेणुकभगवत्पादोक्त्या इष्ट-प्राण-भावभेदेन त्रिविधम्। तत्र गुरुः क्रियादीक्षायां पञ्चसूत्रप्रमाणेन निर्मितं शैलजं वा स्फाटिकं वाऽङ्गुष्ठपरिमाणं लिङ्गमेकं गृहीत्वा जलाधिवासधान्यादिवासादिक्रियाभिस्तस्य शिलात्वं निवर्त्य मन्त्रसंस्कारेण तल्लिङ्गे प्राणप्रतिष्ठां च कृत्वा पञ्चाक्षरीमन्त्रोपदेशपूर्वकं तल्लिङ्गं शिष्यस्य पाणौ प्रदाय तत्प्राणवद्धारणीयमित्युपदिशति[३]। एवं गुर्वादेशानुसारं शरीरे सर्वदा धार्यमाणमिदं लिङ्गमेवेष्टलिङ्गमित्युच्यते। अस्य शरीरे धारणेन साधकस्य संसारपाशलक्षणानिष्टपरिहारः, इष्टरूपपरात्परमुक्तिश्च प्राप्यत इतीदम् 'इष्टलिङ्गम्' इत्युच्यते। तथा चोक्तम्-

इष्टलिङ्गमिदं साक्षादनिष्टपरिहारतः।
धारयेदवधानेन शरीरे सर्वदा बुधः।।[४] इति।

वीरशैवदर्शनेऽस्य लिङ्गस्यादेहपातपर्यन्तमवधानपूर्वकं शरीरात् कदापि तस्य वियोगो यथा न स्यात् तथा धारणम्, प्रतिदिनं द्विकालं वा त्रिकालं श्रद्धयार्चनं विधीयते। अस्य धारणे पूजने च न जातिभेदः, न वा लिङ्गभेदोऽत्र परिगण्यते। लिङ्गपूजने नारीणां प्रसूतिसूतकं रजःसूतकं वा बाधकं न भवति। अत एव रेणुकभगवत्पादाः-

लिङ्गार्चनरतायाश्च ऋतौ नार्या न सूतकम्।
तथा प्रसूतिकायाश्च सूतकं नैव विद्यते।।

---

[१] सि. शि. ६.३७
[२] सि. शि. ६.४९
[३] द्र. सि. शि. ६.२२-२८
[४] सि. शि. ६.४९-५१

गृहे यस्मिन् प्रसूता स्त्री सूतकं नात्र विद्यते।
शिवपादाम्बुसंस्पर्शात् सर्वपापं प्रणश्यति।।[१]

इति लिङ्गपूजायां धारणे वा सूतकस्याबाधकत्वं प्रतिपादितवन्तः। एवमिष्टलिङ्गार्चनमुखेन साधकः प्राणलिङ्गानुसन्धानं करोति।

प्राणापानसमाघातात् कन्दमध्याद्यदुत्थितम्।
प्राणलिङ्गं तदाख्यातं प्राणापाननिरोधिभिः।।[२]

इति रेणुकभगवत्पादाः प्राणलिङ्गस्य लक्षणमुक्तवन्तः।

श्लोकस्यास्यायं भावः– गुरोरुपदेशेन साधको यदा प्राणायामप्रक्रियया मूलाधारस्थितमपानवायुं प्राणवायुना सङ्घट्टयति, तदा तयोः सङ्घर्षेण मूलाधाराज्ज्योतिरुत्पद्य सुषुम्नामार्गेणोर्ध्वं गच्छति। तज्ज्योतिरनाहतचक्रे, अर्थात् द्वादशदलहृदयकमलकर्णिकायामङ्गुष्ठपरिमाणेन विद्रुमवर्णेन च स्वरूपेण स्फुरत् तिष्ठति। हृदये प्रकाशमानमिदं ज्योतिरेव वीरशैवाचार्यैः प्राणलिङ्गमित्युच्यते। यथा सूर्योदये तुहिनकणास्तस्मिन् ज्योतिषि लीना भवन्ति, तथा हृदयस्थितेऽस्मिन् ज्योतिषि प्राणवायोरपि विलयो जायत इति कृत्वास्य प्राणलिङ्गमित्यभिधानम्। तथा चोक्तम्–

प्राणो यत्र लयं याति भास्करे तुहिनं यथा।
तत्प्राणलिङ्गमुद्दिष्टं------------------ ।।[३] इति।

इदं प्राणलिङ्गमेव स्वकीयचिद्रूपताया बोधकम्।

क्रिया यथा लयं प्राप्ता तथा भावोऽपि लीयते।
यत्र तद्देशिकैरुक्तं भावलिङ्गमिति स्फुटम्।।[४]

इति श्रीरेणुकभगवत्पादैर्भावलिङ्गस्वरूपमुक्तम्। यथा हृदयेऽष्टदलकमलमध्ये परमात्मा प्राणरूपेण वर्तते, तथा शिरसि सहस्रारकमले भावरूपेण विराजते। इदं च भावलिङ्गं प्रमाणाद्यगोचरं भावैकसमधिगम्यं निराकाररूपम्। हृदयस्थं प्राणलिङ्गं

---

[१] *सि. शि. ९.४४-४५, इष्टलिङ्गधारणस्य वैदिकत्वम्, इष्टलिङ्गपूजायां सूतकानामबाधकत्वं च सप्रमाणं सविस्तरं च द्रष्टव्यम् (सि. शि. स., पृ. ३७१-३७५)।*

[२] *सि. शि. १२.६*

[३] *सि. शि. १२.७*

[४] *सि. शि. १५.३७*

निर्मलेन मनसा, शिरस्थं भावलिङ्गं च प्रशान्तया 'शिवोऽहम्' इति भावनयोपास्यम्। अस्याः 'शिवोऽहम्' इति भावनाया अपि यत्र लयो भवति, तदेव भावलिङ्गमिति बोध्यम्।

तदेतेषु लिङ्गेषु प्राथमिकमिष्टलिङ्गं बाह्यकरणैः षोडशोपचारादिभिश्च, प्राणलिङ्गं मनसा मनोवस्तुभिश्च[1], भावलिङ्गं च शिवोऽहंभावनया समर्चयति प्रतिदिनं साधकः। अनेन इष्टलिङ्गार्चनेन स्थूलशरीरस्य तद्गतकरणादीनां च विशुद्धिः, प्राणलिङ्गार्चनेन सूक्ष्मशरीरस्य पावित्र्यम्, भावलिङ्गानुसन्धानेन च कारणशरीरशुद्धिर्जायते।

३. जङ्गमः

जङ्गमस्वरूपं तद्भेदाश्च ग्रन्थस्यास्य पञ्चमपरिच्छेदे सिद्धान्तशिखामण्यनुसारं जीवन्मुक्तशिवयोगिस्वरूपप्रतिपादनावसरे निरूपितानीति, तत्रैव द्रष्टव्यानि जिज्ञासुभिः। वीरशैवदर्शने गुरवे तनुम्, लिङ्गाय मनः, जङ्गमाय च धनं प्रदेयमिति सिद्धान्तोऽस्ति, अर्थात् शरीरेण गुरुसेवा, मनसा लिङ्गपूजा, धनेन च जङ्गमतृप्तिर्विधेया।

४. विभूतिः

परिशुद्धगोमयोत्पादितं हि भस्म विभूतिरुच्यते। अस्य च विभूतिः, भसितम्, भस्म, क्षारम्, रक्षा इति पञ्च भेदा भवन्ति। तत्र भूतिहेतुत्वात् अर्थात्

पुरा त्रिपुरसंहारे त्रिनेत्रो जगतां पतिः।
उदपश्यत् पुरा योगमुन्मीलितविलोचनः।
निपेतुस्तस्य नेत्रेभ्यो बहवो जलबिन्दवः।
तेभ्यो जाता हि रुद्राक्षा रुद्राक्षा इति कीर्तिताः।।[5]

---

[1] सि. शि. ७.४-६

[2] द्र., सि. शि. ७.६-९

[3] द्र., सि. शि. ७.१०-११

[4] त्रिपुण्ड्रं धारयेन्नित्यं भस्मना सलिलेन च।
स्थानेषु पञ्चदशसु शरीरे साधकोत्तमः।।
उत्तमाङ्गे ललाटे च श्रवणद्वितये तथा।
गले भुजद्वये चैव हृदि नाभौ च पृष्ठके।।
बाहुयुग्मे ककुद्देशे मणिबन्धद्वये तथा।
त्रिपुण्ड्रं भस्मना धार्यं मूलमन्त्रेण साधकैः।।
(सि. शि. ७.३१-३३)।

[5] सि. शि. ७.४७-४८

विभूतिर्भूतिहेतुत्वाद् भसितं तत्त्वभासनात्।
पापानां भर्त्सनाद् भस्म क्षारणात् क्षारमापदाम्।।
रक्षणात् सर्वभूतेभ्यो रक्षेति परिगीयते।।[१] इति।

तत्र विभूतिः शिवस्य सद्योजातमुखोत्पन्नायाः 'नन्दा' इत्याख्याया कपिलवर्णाया गोर्गोमयेन, भसितं शिवस्य वामदेवमुखोत्पन्नायाः "भद्रा" नाम्न्याः कृष्णवर्णाया गोर्गोमयेन, भस्म शिवस्याघोरमुखसञ्जाताया 'सुरभि' इत्यभिधेयायाः शुभ्रवर्णाया गोर्गोमयेन, क्षारं शिवस्य तत्पुरुषमुखोद्भूतायाः सुशीलाख्याया धूम्रवर्णाया गोर्गोमयेन, रक्षा शिवस्येशानमुखसम्भूताया 'सुमना' इत्याख्याया रक्तवर्णाया गोर्गोमयेन चेति पञ्चविधा विभूतयो विनिर्मिता भवन्ति[२]। एतासां विभूतीनां क्रमात् नित्य-नैमित्तिक-प्रायश्चित्त-काम्य-मोक्षकर्मकर्तव्यावसरे धारणं विधीयते[३]। तस्मात् तदेतेषु पञ्चविधेषु भस्मसु नित्यादिकर्मकर्तव्यावसरे वीरशैवशास्त्रोक्तविधिना[४] तत्तदसाधारणभस्मधारणेन साधकस्यानिष्टपरिहार इष्टप्राप्तिश्च सञ्जायते। तदेतद्द्विधं भस्म गुरुलिङ्गजङ्गमपूजायां धारणीयं भवति वीरशैवसाधकैः प्रतिदिनम्।

५. रुद्राक्षः

पुरा त्रिपुरसंहारे त्रिनेत्रो जगतां पतिः।
उदपश्यत् पुरा योगमुन्मीलितविलोचनः।।
निपेतुस्तस्य नेत्रेभ्यो बहवो जलबिन्दवः।
तेभ्यो जाता हि रुद्राक्षा रुद्राक्षा इति कीर्तिताः।।[५]

---

[१] सि. शि. ७.४-६

[२] द्र., सि. शि. ७.६-९

[३] द्र., सि. शि. ७.१०-११

[४] त्रिपुण्ड्रं धारयेन्नित्यं भस्मना सलिलेन च।
स्थानेषु पञ्चदशसु शरीरे साधकोत्तमः।।
उत्तमाङ्गे ललाटे च श्रवणद्वितये तथा।
गले भुजद्वये चैव हृदि नाभौ च पृष्ठके।।
बाहुयुग्मे ककुद्देशे मणिबन्धद्वये तथा।
त्रिपुण्ड्रं भस्मना धार्यं मूलमन्त्रेण साधकैः।।
(सि. शि. ७.३१-३३)।

[५] सि. शि. ७.४७-४८

इति रेणुकभगवत्पादोक्त्या रुद्रनेत्रसमुत्पन्नानामेतेषां रुद्राक्ष इत्यभिधानम्। तत्र रुद्रस्य सूर्यनेत्राद् द्वादशविधाः कपिलवर्णाः, सोमनेत्रात् श्वेताः षोडशविधाः, अग्निनेत्रात् कृष्णवर्णा दशविधा इत्याहत्याष्टात्रिंशद्विधा रुद्राक्षा उत्पन्नाः। एते च रुद्राक्षा एकमुखाच्चतुर्दशमुखपर्यन्ता भवन्ति। वीरशैवा स्वेष्टलिङ्गपूजायां शरीरे शिरः-करादिस्थानेषु शास्त्रोक्तविधिना भिन्नभिन्नमुखान् रुद्राक्षान् परिधारयन्ति[१]।

एतादृशस्य शिवनेत्रसमुत्पन्नस्य रुद्राक्षस्य धारणाद् भावशुद्धिः शिवाभिमर्शश्च सञ्जायते। अत एवाचार्यचरणैः–

> दर्शनात् स्पर्शनाच्चैव स्मरणादपि पूजनात्।
> रुद्राक्षधारणाल्लोके मुच्यन्ते पातकैर्जनाः।।[२]

इति रुद्राक्षाणां पातकनिवारणसामर्थ्यमुक्तम् ।

६. मन्त्रः

> नमःशब्दं वदेत् पूर्वं शिवायेति ततः परम्।
> मन्त्रः पञ्चाक्षरो ह्येष सर्वश्रुतिशिरोगतः।।[३]

इति श्रीरेणुकभगवत्पादाः पञ्चाक्षरमन्त्रस्वरूपं निरूपितवन्तः। मान्त्री-दीक्षायां श्रीगुरुरस्य मन्त्रस्य ऋषिदेवतादिकं शिष्यायोपदिशतीत्यस्मिन्नेव परिच्छेदे दीक्षाप्रकरणे मान्त्रीदीक्षास्वरूपनिरूपणावसरे प्रतिपादितमिति तत्रैव द्रष्टव्यं तद् ऋष्यादिकम्।

---

[१] *शिखायामेकमेकास्यं रुद्राक्षं धारयेद् बुधः ।*
द्वित्रिद्वादशवक्त्राणि शिरसि त्रीणि धारयेत् ।।
षट्त्रिंशद्धारयेन्मूर्ध्नि नित्यमेकादशाननान् ।
दशसप्तपञ्चवक्त्रान् षट् षट् कर्णद्वये वहेत् ।।
षडष्टवदनान् कण्ठे द्वात्रिंशद्धारयेत् सदा ।
पञ्चाशद् धारयेद् विद्वान् चतुर्वक्त्राणि वक्षसि ।।
त्रयोदशमुखान् बाह्वोर्धरेत् षोडश षोडश ।
प्रत्येकं द्वादश वहेन्नवास्यान्मणिबन्धयोः ।।
चतुर्दशमुखं यज्ञसूत्रमष्टोत्तरं शतम् ।
धारयेत् सर्वकालं तु रुद्राक्षं शिवपूजकः ।।
(सि. शि. ७.५४–५८)।

[२] *सि. शि. ७.६१*

[३] *सि. शि. ८.७*

अस्य पञ्चाक्षरमन्त्रस्य मूलम्, विद्या, शिवः, शैवसूत्रम्, पञ्चाक्षर इति पञ्च नामानि प्रसिद्धानि[१]। तत्र सप्तकोटिमन्त्राणां मूलकारणत्वाद् मूलमिति, अस्य मननेन शिवजीवयोरेकत्वबोधकविद्याया उदयो भवतीत्येवं विद्योदये हेतुभूतत्वाद्विद्येति, शिवदर्शनस्य निमित्तकारणत्वात् शिव इति, शिवसम्बन्धिसर्वविषयाणां सूत्ररूपेण पञ्चाक्षरनिहितत्वात् शैवसूत्रमिति, 'नमः शिवाय' इति पञ्चभिरक्षरैर्युक्तत्वात् पञ्चाक्षर इति च कथ्यते।

एवंभूतस्य पञ्चाक्षरमन्त्रस्य ऋष्यादिकं गुरुमुखाज्ज्ञात्वा पूर्वमुख उदङ्मुखो वाऽऽसन उपविश्य स्वेष्टलिङ्गसाक्षित्वेन वीरशैवसाधको ह्यष्टोत्तरशतवारमितोऽप्यधिकं वा यथाशक्ति रुद्राक्षमालया हस्तेन वा जपं करोति।

जपस्तावत् त्रिविधः—वाचिकः, उपांशुः, मानसिकश्चेति भेदेन। उक्तं तेषां स्वरूपमाचार्यैः—

जपस्तु त्रिविधः प्रोक्तो वाचिकोपांशुमानसः।
श्रूयते यस्तु पार्श्वस्थैर्यथा वर्णसमन्वयः।।

वाचिकः स तु विज्ञेयः सर्वपापप्रभञ्जनः।
ईषत्स्पृष्ट्वाऽधरपुटं यो मन्दमभिधीयते।।

पार्श्वस्थैरश्रुतः सोऽयमुपांशुः परिकीर्तितः।
अस्पृष्ट्वाऽधरमस्पन्दि जिह्वाग्रं योऽन्तरात्मना।।
भाव्यते वर्णरूपेण स मानस इति स्मृतः।।[२] इति।

मानसिक एवैतेषु श्रेष्ठतमः।

अयं पञ्चाक्षरमहामन्त्र एव विभिन्नबीजाक्षरैर्युक्तः सन् प्रसादपञ्चाक्षरः, मायापञ्चाक्षरः, सूक्ष्मपञ्चाक्षरः, स्थूलपञ्चाक्षरः, मूलपञ्चाक्षर इत्यभिधानभाग् भवति। एतेषु क्रमशः ह्रां ह्रीं ह्रूं ह्रैं ह्रौं इति ह्रां ह्रीं ह्रूं ह्रैं इति, ह्रां ह्रीं ह्रूं इति, ह्रां ह्रीं इति, ॐ इति बीजाक्षरैः संयुक्तः पञ्चाक्षरमन्त्र एव क्रमशो दश–नव–अष्ट–सप्त–षड्वर्णकः सन् तत्तन्नाम्नाऽभिधीयते। बीजाक्षरयुक्तानामेतेषां मन्त्राणामुपदेशो न सर्वसाधारणेभ्यः प्रदीयते, किन्त्वेतत्सम्प्रदायमठेषु पट्टाभिषिक्तेभ्य आचार्येभ्यस्तदीयपट्टाभिषेकसमये उपदिश्यते। तत्र वीरगोत्राचार्येभ्यः प्रसादपञ्चाक्षरः, नन्दिगोत्राचार्येभ्यो

---

[१] द्र., सि. शि. ८.२३

[२] सि. शि. ८.२७–२९

मायापञ्चाक्षरः, भृङ्गिगोत्राचार्येभ्यः सूक्ष्मपञ्चाक्षरः, वृषभगोत्राचार्येभ्यः स्थूलपञ्चाक्षरः स्कन्दगोत्राचार्येभ्यो मूलपञ्चाक्षर उपदिश्यत इति विज्ञेयम्[१]। सर्वसाधारणास्तु पञ्चाक्षरमन्त्रं जपन्ति साधकाः। 'जपतो नास्ति पातकम्' इत्युक्त्यनुसारेणास्य मन्त्रस्य जपेन मननेन च सर्वपापप्रभञ्जनं भवति।

७. पादोदकम्

'पादस्योदकं पादोदकम्' इति विग्रहेण पादप्रक्षालितं जलमिति चरणामृतमिति वा सामान्यतोऽर्थो जायते। अस्य तात्त्विकार्थस्तु–

परमानन्द एवोक्तः पादशब्देन निर्मलः।
ज्ञानं चोदकशब्देन तयोरैक्यं तु दीक्षया।।[२]

इत्याचार्योक्त्या स्वकीयस्यात्मनाः परमानन्दरूपं ज्ञानमेव पादोदकम्। वीरशैवसम्प्रदाये एतादृशज्ञानप्राप्तये साधनीभूतत्वादेव गुरुजङ्गमयोश्चरणामृतमपि पादोदकमिति कथ्यते। पादोदकनिर्माणावसरे–

अङ्गुष्ठे भावयेद् रुद्रं तर्जन्यां शङ्करं स्मरेत्।
मध्यमायां महादेवमनामिक्यां त्रियम्बकम्।।
कनिष्ठिकायामीशानं पादोपरि कपर्दिनम्।
पादाधः पञ्चवदनं गुल्फयोरुग्रभर्गकौ।।
सर्वं लिङ्गमयं ध्यात्वा पादं जङ्गमलिङ्गिनः।
पिबेत् संक्षालितं तोयं पीत्वा शिरसि धारयेत्।।[३]

इति पारमेश्वरतन्त्रोक्त्यनुसारं जङ्गमस्य (जीवन्मुक्तमहापुरुषस्य) पादस्याङ्गुष्ठाद्यङ्गुलीषु शिवस्य नानामूर्तीर्ध्यात्वा पादौ सम्पूज्य तयोरधः पात्रविशेषं निधाय अङ्गुष्ठयोरुपरि जलं प्रवाह्य अधस्तनपात्रे सङ्गृह्णीयात्। एवं विधिना सङ्गृहीतं चरणामृतमेव पादोदकमिति कथ्यते। वीरशैवसम्प्रदाये स्वेष्टलिङ्गपूजाया अनन्तरं प्रतिदिनं पादोदकस्य ग्रहणमादिष्टम्। इदं च पादोदकं गुरुपादपूजया प्राप्तं चेद् गुरुपादोदकमिति, इष्टलिङ्गपूजया प्राप्तं चेल्लिङ्गपादोदकमिति, जङ्गमपादपूजया

---

[१] वी. स. सं. ५.१४-४०
[२] सि. शि. १९.७
[३] पा. तन्त्र. ७.४७-५०

प्राप्तं चेज्जङ्गमपादोदकमिति चाभिधीयते। वीरशैवास्त्रिविधमपि पादोदकं भक्त्या स्वीकुर्वन्ति। तदुक्तम्–

पादोदकं यथा भक्त्या स्वीकरोति महेशितुः।
तथा शिवात्मनोर्नित्यं गुरुजङ्गमयोरपि।।[1] इति।

त्रिविधपादोदकसेवनेन स्थूलसूक्ष्मकारणाख्यानि शरीराणि परिशुद्धानि भवन्ति।

८. प्रसादः

"नैर्मल्यं मनसो लिङ्गं प्रसाद इति कथ्यते"[2] इत्याचार्योक्त्या चित्तस्य निर्मलत्वचिह्नं प्रसाद इत्यभिधीयते। शिवसमर्पितानामेव वस्तूनां सेवनेन मनसो नैर्मल्यं जायते। वस्तूनि भोग्यधार्यभेदेन द्विप्रकाराणि। तत्रान्नादिर्भोग्यमिति, वस्त्रादिर्धार्यमिति कथ्यते। शिवभक्तः स्वकीयानि भोग्यानि धार्याणि च वस्तूनि शिवाय समर्प्यैवोपभुङ्क्ते परिधत्ते च। एवं शिवार्पितानां वस्तूनां प्रसादरूपेण सेवनेन मनसो नैर्मल्यं जायते। तदुक्तमाचार्यैः–

शिवप्रसादं यद् द्रव्यं शिवाय विनिवेदितम्।
निर्माल्यं तत्तु शैवानां मनोनैर्मल्यकारणम्।।[3] इति।

निर्मले मनसि शिवभक्तेरुदयो भवति, भक्त्युदये च शिवप्रसादो जायते। अत एव शिवप्रसादो शिवभक्तिश्च बीजाङ्कुरवदन्योन्यसम्बन्धिनौ। तथा चोक्तमाचार्यैः–

प्रसादादेव सा भक्तिः प्रसादो भक्तिसम्भवः।
यथैवाङ्कुरतो बीजं बीजतो वा यथाङ्कुरः।। इति।

वीरशैवदर्शनेऽत्र शिवप्रसादवद् गुरुजङ्गमयोरपि प्रसादो ग्राह्यो भवति साधकैः। तत्र गुरुमुखात् प्राप्तः प्रसादः शुद्धप्रसाद इति, लिङ्गमुखात् प्राप्तः सिद्धप्रसाद इति, जङ्गममुखात् प्राप्तः प्रसिद्धप्रसाद इति व्यवह्रियते[4]। पादोदकप्रसादग्रहणे स्त्रीपुरुषभेदो नास्ति। यथा पुरुषा गुरुलिङ्गजङ्गमानां प्रसादं स्वीकुर्वन्ति, तथा स्त्रियोऽपि तत्प्रसादं

---

[1] सि. शि, ९.६७

[2] सि. शि. ११.६

[3] सि. शि. ११.७

[4] *प्रसादस्त्रिविधः प्रोक्तः शुद्धः सिद्धः प्रसिद्धकः।*
शुद्धो गुरुमुखात् प्राप्तः सिद्धो लिङ्गमुखात् तथा।।
प्रसिद्धो जङ्गममुखात् प्रसादस्त्रिविधो मतः।। (वी. आ. चं., पृ. १३२)।

ग्रहीतुमर्हन्ति। तस्मादुपभुज्यमानं यत् किञ्चिद्वस्तु वर्तते, तत्सर्वमपि शिवाय समर्प्यैव गृह्णीयादिति वीरशैवसिद्धान्तः। अत एव वीरशैवाः सर्वे लिङ्गभोगोपभोगिनः, अर्थात् प्रसादभुजो नित्यम्, न तु पदार्थभोगिनः।

ननु धर्मशास्त्रे स्त्रीणां प्रतिदिनं भर्तुरुच्छिष्टभोजनप्रतिपादनात्, तन्निर्वाहे, स्त्रीभिः कथं तद् भर्तृशेषं शिवाय समर्प्येत? कथं वा तेषां नित्यं प्रसादग्रहणम्? इति जिज्ञासायामुच्यते कारणागमे–

लिङ्गभोगस्वरूपं चानुज्ञारूपमिति द्विधा।
भर्तृशेषादिरूपस्य प्रसादस्य गुरोर्मम।
तीर्थस्य चार्पणं प्रोक्तमनुज्ञारूपमेव हि।।[1] इति।

अत्रायं भावः– नैवेद्यं तावद् द्विविधम्– भोगरूपम्, अनुज्ञारूपं चेति। विशुद्धानामनुच्छिष्टानां पदार्थानां शिवाय समर्पणावसरे भोगरूपं निवेदनं विधीयते। अशुद्धानामुच्छिष्टानां भोगानां समर्पणावसरेऽनुज्ञारूपं निवेदनं विधीयते। यदा कुलीनया नार्या निजपतिव्रताधर्मपरिपालनार्थं धर्मशास्त्रादेशानुगुणं भर्तुरुच्छिष्टपदार्था उपभोक्तव्या भवन्ति, तदा शिवानुज्ञारूपं निवेदनं कृत्वा, सर्वसाधारणानां पवित्राणामनुच्छिष्टानां पदार्थानामुपभोगप्रसङ्गे भोगरूपं निवेदनं कृत्वा स्त्रियोऽपि प्रसादभोगिन्यो भवन्ति।

तदेवं वीरशैवा मोक्षमार्गनिरताः साधकाः प्रतिदिनं पूज्यान् गुरु-लिङ्ग-जङ्गमान् साधनीभूतैर्भस्म-रुद्राक्ष-मन्त्रैः सम्पूज्य फलस्वरूपौ पादोदकप्रसादौ प्राप्य कैवल्यसहकारिभूतं धार्मिकं जीवनं निर्वहन्ति।

करचरणाद्यवयवयुक्तमपि शरीरं यथा प्राणैर्विना न व्यवहारयोग्यं भवति, तथाऽष्टावरणरूपाङ्गविशिष्टो वीरशैवः पञ्चाचाराख्यप्राणरहितश्चेत् तस्य धार्मिकं जीवनं न पूर्णतामापद्येतेति वीरशैवाचार्याः पञ्चाचारानुपदिष्टवन्तः। तेषां परिपालनं सर्वैरपि वीरशैवैः क्रियते। तदधुना तेषां स्वरूपं तावद्विचारयामः।

पञ्चाचाराः

लिङ्गाचारः सदाचारः शिवाचारस्तथैव च।
भृत्याचारो गणाचारः पञ्चाचाराः प्रकीर्तिताः।।[2]

---

[1] का. आ., क्रि. पा. ९.१२-१३

[2] च. ज्ञा. आ., क्रि. पा. ९.४

इत्यागमोक्त्या लिङ्गाचारः, सदाचारः, शिवाचारः, भृत्याचारः, गणाचारश्चेति पञ्चाचाराणां नामान्यवगम्यन्ते। तदेतेषां स्वरूपं तावद् विचार्यते क्रमशः।

१. लिङ्गाचारः

अङ्गस्य लिङ्गस्वरूपप्राप्तये, अर्थाज्जीवस्य शिवस्वरूपाधिगमनायोपदिष्ट आचारो लिङ्गाचारः। शरीरेण लिङ्गपूजनम्, मनसा तच्चिन्तनम्, भावनया तस्य निदिध्यासनं च लिङ्गाचार इत्युच्यते। तदुक्तमागमे–

गुरुणा दत्तलिङ्गाद् वै नास्ति दैवं महीतले।
इति भावानुसन्धानं लिङ्गाचारः स उच्यते।।[1] इति।

वीरशैवसम्प्रदाये क्रिया-मान्त्री-वेधाख्यदीक्षात्रयेषु श्रीगुरुरिष्ट-प्राण-भावनामकलिङ्गान् प्रददाति। तदेतेषां त्रिलिङ्गानां गुरोरुपदेशानुसारेणार्चन-चिन्तन-निदिध्यासनेष्वव्यभिचाररूपेणासक्तिरेव लिङ्गाचारः। अत एव रेणुकभगवत्पादाः–

नार्चयेदन्यदेवांस्तु न स्मरेन्न च कीर्तयेत्।
न तन्निवेद्यमश्नीयाच्छिवभक्तो दृढव्रतः।।

यद्गृहेष्वन्यदेवोऽस्ति तद्गृहाणि परित्यजेत्।
नान्यदेवार्चकान् मर्त्यान् पूजाकाले निरीक्षयेत्।।

सदा शिवैकनिष्ठानां वीरशैवाध्ववर्तिनाम्।
नहि स्थावरलिङ्गानां निर्माल्याद्युपयुज्यते।।[2]

इतीष्ट-प्राण-भावलिङ्गव्यतिरिक्तानां स्थावरलिङ्गानामन्यदेवतानां वार्चनं निषिध्य लिङ्गनिष्ठाप्रतिपादनमुखेन लिङ्गाचारस्वरूपमुपवर्णितवन्तः। अत्र स्थावरलिङ्गानामन्यदेवानां वार्चननिषेधो न तेषामपकृष्टत्वप्रतिपादनाय, किन्त्विष्टलिङ्गादिषु श्रद्धादार्ढ्यार्थमेवेत्यवधेयम्।

२. सदाचारः

सज्जनानां शिवभक्तानां सन्तोषदायक आचारः सदाचार इत्युच्यते। तदुक्तं सूक्ष्मागमे–

---

[1] च. ज्ञा. आ., क्रि. ९.५
[2] सि. शि. ९.३१-३३

सज्जनः शिवभक्तश्च येन मार्गेण सर्वदा।
तोष्यते च महादेवि सदाचारः स वै स्मृतः ।।[१] इति।

ननु सज्जनानां शिवभक्तानां सन्तोषः कीदृशेनाचरणेन जायत इति जिज्ञासायामुक्तम्—

धर्मार्जितेन द्रव्येण यत्सन्तर्पणमन्वहम्।
गुरुलिङ्गजङ्गमानां सदाचार इति स्मृतः।।[२] इति।

अस्यायं भावः— वीरशैवदर्शने आराध्यरूपाणां गुरु-लिङ्ग-जङ्गमानामनुग्रहप्राप्त्यर्थं शिवभक्तो धर्ममार्गेणार्थं सम्पाद्य यथाशक्ति तेभ्यः प्रदद्यादिति नियमः। तच्च दानं सोपाधि-निरुपाधि-सहजभेदेन त्रिविधम्। तत्र तुच्छसांसारिकफलाभिलाषया विहितं सोपाधिकम्[३], तुच्छफलेच्छारहितमीश्वरार्पणबुद्ध्या क्रियमाणं दानं निरुपाधिकम्[४], "भोक्ता भोज्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्म चैतत्"[५] इति श्रुत्युक्त्यनुसारं परिग्रहीतृ-प्रदातृ-देयानां शिवत्वं चिन्तयन्, स्वयं चाकर्तृत्वं भावयन्, प्रदीयमानं दानं सहजदानमिति[६] बोध्यम्।

---

[१] सूक्ष्मा. क्रि., ८.७

[२] च. ज्ञा. आ. क्रि. ९.६

[३] फलाभिसन्धिसंयुक्तं दानं यद्विहितं भवेत्।
तत्सोपाधिकमाख्यातं मुमुक्षुभिरनादृतम् ।। (सि. शि.९.८१)
अस्य श्लोकस्य तुलना—
यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः।
दीयते च परिक्लिष्टं तद्राजसमुदाहृतम् ।। (भ. गी. १७.२१)
इति गीताश्लोकेन साकं कर्तव्या।

[४] फलाभिसन्धिनिर्मुक्तमीश्वरार्पितकाङ्क्षितम्।
निरुपाधिकमाख्यातं दानं दानविशारदैः ।। (सि. शि. ९.८२)
अस्य श्लोकस्य तुलना—
दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ।। (भ. गी. १७.२०)
इति गीताश्लोकेन कर्तव्या।

[५] श्वे. उ. १.१२

[६] अदातृदातृदेयानां शिवभावं विचिन्तयन्।
आत्मनोऽकर्तृभावं च यद्दत्तं सहजं भवेत् ।। (सि. शि. ९.८३)

एतेषु त्रिविधदानेषु–

सहजं दानमुत्कृष्टं सर्वदानोत्तमोत्तमम्।
शिवज्ञानप्रदं पुंसां जन्मरोगनिवर्तकम्।।[१]

इति रेणुकभगवत्पादोक्त्या सहजदानमेव सर्वोत्कृष्टं जननमरणलक्षणभवरोगभञ्जकं शिवसाक्षात्कारप्रदं चास्ति। तस्माद् गुरुलिङ्गजङ्गमानां शिवत्वं मत्वा धर्मार्जितेन धनेन स्वशक्त्यनुसारं सहजभावेन सन्तर्पणमेव सदाचारः। सदाचारोऽयमष्टविधशीलाढ्यः[२]। तत्र चाङ्कुर–उत्पन्न–द्विदल–प्रवृद्ध–सप्रकाण्ड–सशाख–सपुष्प–सफलाख्यान्यष्टौ शीलानि। १. गुरुकारुण्यकलितषडध्वन्यासशोभिता स्वीया तनुरप्राकृतेति यो भावस्तत् स्वाङ्कुरशीलम्, २. शिवदीक्षायुतैरेव दारादिभिर्यः सहवासस्तदुत्पन्नं शीलम्, ३. भस्मादीनामप्रमादेन धरणं द्विदलं शीलम्, ४. शिवधर्माणां माहात्म्यस्य विभावनं प्रवृद्धं शीलम्, ५. इष्टलिङ्गमनभ्यर्च्य यदभोजनं तत् सप्रकाण्डं शीलम्, ६. इष्टलिङ्गानर्पितस्य द्रव्यस्याग्रहणं सशाखं शीलम्, ७. शिवार्पितस्य प्रसादस्यापरित्यजनं सपुष्पशीलम्, ८. गुरुलिङ्गजङ्गमानां यदेकत्वभावनं तत् सफलं शीलम्। एतदष्टशीलाढ्य एव सदाचारः[३]। एतादृशस्य सदाचारस्याचरणेन शिवतुष्टिर्भवति, तदनुग्रहश्च जायते। अत एवोक्तं भगवत्पादैः–

सदाचारप्रियः शम्भुः सदाचारेण पूज्यते।
सदाचारं विना तस्य प्रसादो नैव जायते।।[४] इति।

अनेन सदाचारेणैव परमेश्वरस्य कृपाप्राप्तिर्भवति, लोकादरश्च प्राप्यत इति ज्ञायते।

३. शिवाचारः

शिव एव परं ब्रह्म पञ्चकृत्यपरायणः।
न ततोऽन्या गतिरिति शिवाचारो हि कीर्तितः।।[५]

---

[१] सि. शि. ९.८४

[२] "सदाचारोऽष्टशीलाढ्यः सेवितः कल्पपादपः"। (च. ज्ञा. आ., क्रि. ९.२२)

[३] च. ज्ञा.. आ., क्रि. ९.१९–३०

[४] सि. शि. १६.६६

[५] च. ज्ञा. आ., क्रि. ९.७

इत्यागमोक्त्या सृष्टिस्थितिसंहारनिग्रहानुग्रहात्मकपञ्चकृत्यपरायणः परः शिव एव ममानन्यसंरक्षक इति दृढो भाव एव शिवाचार इति कथ्यते। अत एव रेणुकभगवत्पादाः–

शिव एव समस्तानां शरण्यः शरणार्थिनाम्।
संसाररोगदष्टानां सर्वज्ञः सर्वदोषहा।।[1]

इति शिवस्यैवानन्यगतिकत्वप्रतिपादनमुखेन,

शिवभक्तो महातेजाः शिवभक्तिपराङ्मुखान्।
न स्पृशेन्नैव वीक्षेत न तैः सह वसेत् क्वचित्।।[2]

इति शिवभक्तस्य शिवानन्यशरणागतित्वप्रतिपादनमुखेन च शिवाचारं सूचयामासुः।

अस्मिन् शिवाचारे द्रव्य–क्षेत्र–गृह–भाण्ड–तृण–काष्ठ–वीटिका–पाक–रस–भव–भूत––भाव–मार्ग–काल–वाक्–जनाख्यषोडशपदार्थानां शिवशास्त्रोक्तमार्गेण शोधनं विहितम्। तत्र १. फलमूलादीनां भस्मप्रोक्षणेन शुद्धिकरणं द्रव्यशुद्धिः, २. क्षेत्रस्य चतुष्कोणे नन्दिमुद्राङ्कितशिलान्यासकरणं क्षेत्रशुद्धिः, ३. गृहस्य महाद्वारे शिवलिङ्गाङ्कनं गृहशुद्धिः, ४. भोजनपानोपयोगिपात्रेष्वपि शिवलिङ्गाङ्कनं भाण्डशुद्धिः, ५. गवां भक्ष्यभूतस्य तृणस्य भस्मप्रोक्षणं तृणशुद्धिः, ६. भस्मप्रोक्षितकाष्ठपरिग्रहणं काष्ठशुद्धिः, ७. भक्तारामे समुत्पन्नस्य भस्मसंस्कृतस्य वा ताम्बूलस्य ग्रहणं वीटिकाशुद्धिः, ८. शिवदीक्षितान्वितैः पक्तस्य भोज्यस्य ग्रहणं पाकशुद्धिः, ९. महिष्यादिभिरुत्पन्नं दधिघृतपयस्तक्रादिकं विहाय गव्यं तु सर्वदा ग्राह्यमिति रसशुद्धिः, १०. काम्यकर्मविसर्जनेन जन्मराहित्यापत्तिर्भावशुद्धिः, ११. सर्वभूतदयालुत्वं भूतशुद्धिः, १२. सर्वकामान् परित्यज्य सदाशिवभावानुभावनं भावशुद्धिः, १३. पद्भ्यां पिपीलिकादीनामपि हिंसनं यथा न भवेत् तथा गमनं मार्गशुद्धिः, १४. शास्त्रसंशोधिते निःशब्दे च मनोरमे काले शिवलिङ्गार्चनं कालशुद्धिः, १५. अनृत–परुष–बीभत्स–दाम्भिकवचसो विसर्जनं वाक्शुद्धिः, १६. आसने शयने याने गोष्ठ्यां वा सर्वत्र सर्वदा सद्भक्तजनसाङ्गत्यं जनशुद्धिः[3]। एवमेतादृशषोडशपदार्थ–शोधनसमन्वित आचारः शिवाचार इत्युच्यते। अस्याचरणेन शिवसायुज्यमश्नुते साधकः[4]।

---

[1] *सि. शि. १३.१०*

[2] *सि. शि. ९.२७*

[3] *च. ज्ञा. आ., क्रि. ९.३२–४९*

[4] *विद्वत्रयं शिवाचारः सर्वशास्त्रेषु गोपितः।*
एतदाचरणान्मर्त्यः शिवसायुज्यमश्नुते।। (च. ज्ञा. आ., क्रि. ९.५०)।

४. गणाचारः

"अनुष्ठितो भक्तगणैर्गणाचार इतीरितः" इत्यागमोक्त्या भक्तगणैरनुष्ठीयमान आचारो गणाचार इति कथ्यते। ननु भक्तगणैरनुष्ठीयमान आचारः कीदृश इति जिज्ञासायामुक्तं चन्द्रज्ञानागमे–

शिवस्य शिवभक्तस्य शिवधर्मादिकस्य च।
न श्रृणोति च यन्निन्दां स गणाचार उच्यते ।।[1] इति।

तस्मात् शिवस्य शिवभक्तानां शिवधर्मस्य च निन्दायाः कदाप्यश्रवणं गणाचार इत्युच्यते। शिवादिनिन्दाया अश्रवणं तावद् द्विविधम्– निन्दाविरोधो निन्दास्थानपरित्यागश्चेति। अत एव रेणुकभगवत्पादैः–

शिवनिन्दाकरं दृष्ट्वा घातयेदथवा शपेत्।
स्थानं वा तत्परित्यज्य गच्छेद्यद्यक्षमो भवेत्।।

यत्र चाचारनिन्दाऽस्ति कदाचित्तत्र न व्रजेत्।
यद् गृहे शिवनिन्दाऽस्ति तद् गृहाणि परित्यजेत्।।[2]

इति सक्षमाणां शिवनिन्दाविरोधः, अक्षमाणां च तत्स्थानपरित्यागः प्रतिपादितः। तदेवं शिवनिन्दाया अश्रवणमेवास्मिन्नाचारे प्रधानतयोपदिश्यते। अस्मिन् गणाचारे कायिक–वाचिक–मानसिकभेदेष्वाहत्य चतुःषष्टिशीलानि निरूपितानि सन्ति।[3] तथा हि–

सप्तविधं वाचिकं शीलम्

१. यथार्थभाषणम्, २. सत्यं प्रियं हितं च भाषणम्, ३. प्रत्यहं वेदागमादिसच्छास्त्रपठनम्, ४. शिवभक्तानां गुरोश्च प्रशंसनम्, ५. अन्यदेवानां सामान्यमनुष्याणां वा प्रशंसनवर्जनम्, ६. आत्मश्लाघनवर्जनम्, ७. परनिन्दाराहित्यं चेति सप्तविधं वाचिकं शीलम्।

---

[1] च. ज्ञा. आ., क्रि. ९.८

[2] सि. शि. ९.३६–३७

[3] *सर्वोत्तमे गणाचारे सद्यः सिद्धिकरे परे ।*
शीलानि तु चतुःषष्टिर्वर्तन्ते तानि संश्रृणु ।। (च. ज्ञा. आ., क्रि. ९.५२)।

पाणिगतं पञ्चविधं शीलम्

८. गुरु-लिङ्ग-जङ्गमानां नमस्कृतिः, ९. पूजापरिकराणां सम्पादनम्, १०. रुद्राक्षमालया मूलमन्त्रस्यान्वहं जपः, ११. गुरुलिङ्गजङ्गमानां प्रतिदिनमाराधनम्, १२. गुरुजङ्गमयोः शिवधर्माय च यथाशक्तिदानम्, एतत् पञ्चविधं शीलं पाणिसम्बद्धम्।

पादगतं चतुर्विधं शीलम्

१३. गुरोर्माहेश्वरस्य चाभिगमनम्, १४. गुरोर्माहेश्वरस्य च प्रदक्षिणम्, १५. पूजापरिकराणां सम्पादनाय गमनम्, १६. इष्टलिङ्गपूजार्थं स्थिरमासनम् एतत्, पादगतं चतुर्विधं शीलम्।

त्वक्सम्बद्धं द्विविधं शीलम्

१७. नित्यमिष्टलिङ्गस्याऽवियोगतः स्पर्शनम्, १८. इष्टलिङ्गस्पर्शजन्यरोमाञ्चसमलङ्कृतिश्चेति द्विविधं त्वक्सम्बद्धं शीलम्।

चक्षुर्गतं द्विविधं शीलम्

१९. अश्रान्तं सानुरागमिष्टलिङ्गनिरीक्षणम्, २०. इष्टलिङ्गेक्षणसमुद्भूतानन्दबाष्पसमुद्गमश्चेति द्विविधं चक्षुसम्बद्धं शीलम्।

जिह्वागतमेकं शीलम्

२१. अन्वहं शिवाय विनिवेदितप्रासादीयरसास्वादो जिह्वागतं शीलम्।

घ्राणगतं शीलम्

२२. शिवनिर्माल्यानां गन्धपुष्पादीनां सौरभाघ्राणनं घ्राणगतं शीलम्।

श्रोत्रगतं शीलद्वयम्

२३. गुरोः शिवस्य शिवभक्तानां च स्तोत्राकर्णनम्, २४. गुरोः शिवस्य शिवभक्तानां निन्द्रानाकर्णनं चेति द्विविधं श्रोत्रगतं शीलम्।

पञ्चविधं कायशोधनशीलम्

२५. गुरोः, इष्टलिङ्गस्य, जङ्गमस्य च प्रसादेन कायसंशोधनम्, २६. निषिद्धविषयेभ्य इन्द्रियनिग्रहः, २७. अस्पृश्यवस्तुसंस्पर्शे जलेन भस्मना वा

स्नानम्। २८. आसन-शयन-यानादिषु [1]भविसम्बन्धवर्जनम्, २९. विभूति-रुद्राक्ष-लिङ्गानां शरीरे धारणमित्येतत् पञ्चविधं कायशोधनात्मकं शीलम्।

पञ्चत्रिंशद्विधं मानसिकं शीलम्

३०. निषिद्धभोगविषये सङ्कल्पराहित्यम्, ३१. भक्तिरतौ कामो न विषयेषु, ३२. अधर्मे क्रोधो न वैरिषु, ३३. शिवाराधने लोभो न धनादिषु, ३४. भक्तजने मोहो न कान्तादिविषयेषु, ३५. करणेष्वेव मात्सर्यं न जनेषु, ३६. मायाजये मदो न धर्मे, ३७. गुरौ जङ्गमे वा गुणागुणविमर्शत्यागः, ३८. प्राणिनोऽहिंसा, ३९. प्राणिदुःखवीक्षायां दया, ४०. क्रियायां वचने चार्जवम्, ४१, रिपौ निजसुते वापि वैषम्यविवर्जनम्, ४२. गुरूदिते निगमागमवचसि विश्वासः, ४३. दुरन्तायामापद्यपि धर्मापरित्यागरूपा धृतिः, ४४. अपकारिष्वपि वैरिजनेष्वदूषणरूपा क्षमा, ४५. मानसे भोगासक्तिच्युतिः, ४६. क्रियायां वचने वापि प्रमादराहित्यम्, ४७. शिवान्यवस्तुसङ्कल्पवर्जनाख्यं दमः, ४८. परद्रव्यापरिग्रहरूपमस्तेयम्, ४९. अलब्धवस्तुविषयव्यसनाभावरूपा सन्तुष्टिः, ५०. नित्यं परमेश्वरनामरूपयोः स्मरणम्, ५१. शम्भुनामगुणादीनामनवरतं चिन्तनम्, ५२. सदा शम्भोः पादसंवाहनादिभावनम्, ५३. शम्भोरावाहनादिना मानसमर्चनम्, ५४. शम्भुपादाब्जयोर्नित्यं मानसिकप्रणामः, ५५. शम्भोर्मनसा कैङ्कर्यकरणं दास्यम्, ५६. शम्भोः कल्याणरूपस्य मनसा सख्यताभावरूपं सख्यम्, ५७. बन्धमोचनभारस्य कृत्स्नस्येश्वरे समर्पणरूपमात्मसमर्पणम्, ५८. मूलमन्त्रस्य मनसा सदा जपः, ५९. शम्भोर्दिव्यरूपानुसन्धानरूपं ध्यानम्, ६०. तैलधारावदविच्छिन्नं शिवमूर्तेर्मनसि धारणम्, ६१. निवातदीपवद् ध्याने चेतसः स्थितिरूपा समाधिः, ६२. शिवस्य सोऽहंभावेन ध्यानपूर्वकं कार्यकरणम्, ६३. महेशितुरपरिच्छिन्नरूपानुसन्धानम्, ६४. देवस्यानन्तरूपस्य निजरूपतो भावनमित्येतत् पञ्चत्रिंशद्विधं मानसिकं शीलम्। तदेवं त्रिकरणेष्वाहत्य चतुःषष्टिः शीलान्युक्तानि[2]। चतुःषष्टिशीलाढ्यस्य गणाचारस्य सम्यगाचरणेन साधकः शिवसायुज्यमाप्नोति। तथा चोक्तम्-

> यश्चतुःषष्टिशीलाढ्यः शिव एव न चापरः।
> एतदभ्यासयोगेन शिवसायुज्यमश्नुते ।।[3] इति।

---

[1] यो हि गुरुणा दीक्षासंस्कारेणेष्टलिङ्गमवाप्य स्वशरीरस्य वक्षस्थलादिषु स्थानेषु तत्र धारयति, स वीरशैवदर्शने 'भवि' इति कथ्यते ।

[2] च. ज्ञा. आ., क्रि. ९.५२-११२

[3] च. ज्ञा. आ., क्रि. ९.११३

५. भृत्याचारः

शिवभक्ता जनाः सर्वे वरिष्ठाः पृथिवीतले।
तेषां भृत्योऽहमिति यद् भृत्याचार इति स्मृतः।।[१]

इत्यागमोक्त्या शिवस्य शिवभक्तानां चाहं भृत्य इति मत्वा तेषां संसेवनमेव भृत्याचार इत्युच्यते। अत एव रेणुकभगवत्पादाः–

शिवयोगी शिवः साक्षादिति कैङ्कर्यभक्तितः।
पूजयेदादरेणैव यथा लिङ्गं यथा गुरुम्।।[२]

इति भृत्याचारस्याधारभूतकैङ्कर्यभक्त्या शिवयोगिपूजाप्रतिपादनमुखेन भृत्याचारं सूचितवन्तः। अयं भृत्याचारो भृत्यभावः, वीरभृत्यभाव इति द्विधा भवति। तत्र गुरुलिङ्गजङ्गमानां कैङ्कर्यभक्तितोऽर्चनं भृत्यभावः। पुनर्यदा भक्तेः समुत्कर्षेण गुरवे तनुम्, लिङ्गाय मनः, जङ्गमाय च स्वीयं सर्वस्वं प्रदाय पारलौकिकसुखेष्वपि निष्पृहः सन् मोक्षमात्रमभिलाषमाणस्तिष्ठति, तदा वीरभृत्य इत्युच्यते। एतादृशवीरभृत्यभावनयैव भक्तः शिवानुग्रहमाप्नोति[३]।

तदेते उपर्युक्ताः पञ्चविधा आचाराः पञ्चाचारा इति कथ्यन्ते। वीरशैवसम्प्रदाये प्रायः सर्वैरपीमे पञ्चाचारा अनुष्ठेया भवन्ति। एतादृशानामाचाराणां परिपालनेनाध्यात्मिकप्रगतिस्तु भवत्येव, तेन साकं सर्वेषां व्यावहारिकं जीवनमपि सुचारुरूपेण प्रचलति। तस्मादाचाराणां सूत्तमानां सर्वेभ्योऽप्यावश्यकतास्ति। तत्त्वज्ञानसम्पन्नोऽप्याचारहीनः पुरुषो लोके निन्दितो भवति। तस्मादज्ञानां कृते यथाचाराणां परिपालनमावश्यकम्, तथा ज्ञानिनां कृतेऽप्यावश्यकमेव। तदुक्तमाचार्यचरणै रेणुकभगवत्पादैः–

आचार एव सर्वेषामलङ्काराय कल्प्यते।
आचारहीनः पुरुषो लोके भवति निन्दितः।।

---

[१] च. ज्ञा. आ., क्रि. ९.९

[२] सि, शि. ९.६६

[३] देशिकाय तनुं चित्तं शम्भवे च धनं तथा।
जङ्गमाय समर्प्यैवं महोत्साहसमन्वितः।।
मुक्तिमेव परां काङ्क्षमाणो यदवतिष्ठते।
तन्मतं वीरभृत्यत्वं शिवानुग्रहसाधनम्।। (च. ज्ञा. आ., क्रि. ९.२५-१२६)।

ज्ञानेनाचारयुक्तेन प्रसीदति महेश्वरः।
तस्मादाचारवान् ज्ञानी भवेदादेहपातनम्।। इति।

अतो वीरशैवाः पञ्चाचारान् पञ्चप्राणानिव संरक्षयन्ति। तदेवं वीरशैवाध्यात्मपुरुषस्य अष्टावरणमङ्गम्, पञ्चाचाराः प्राणाः इति कथ्यन्ते। अनेनैतेषां माहात्म्यमभिव्यज्यते। अत एव क्रियासारे श्रीनीलकण्ठशिवाचार्याः–

अष्टावरणविज्ञानी पञ्चाचारपरायणः।
वैदिकं कर्म कुर्वीत ज्ञानैकफलसाधनम् ।।
न कुर्यात् पाशवं कर्म वीरशैवः कदाचन।।[1]

इति वीरशैवानां कृतेऽष्टावरणपञ्चाचाराणां पालनस्यावश्यकतां प्रतिपादयामासुः।

वीरशैवदर्शने न केवलमष्टावरणपञ्चाचारा एव लिङ्गाङ्गसामरस्यात्मकनिःश्रेयससिद्धये पर्याप्ता भवन्ति, किन्तु षट्स्थलोपासनमपि परमावश्यकम्। अत एवात्र सिद्धान्ते यथाऽष्टावरणमङ्गं, पञ्चाचाराः प्राणा इति कथ्यन्ते, तथा षट्स्थलमात्मेत्युच्यते। यथा शरीर-प्राण-आत्मसु आत्मनः प्रामुख्यम्, तथाऽष्टावरण-पञ्चाचारषट्स्थलेषु षट्स्थलोपासनायाः प्राधान्यं कैवल्याधिगमे। तस्मादेवमष्टावरणाङ्गः पञ्चाचारप्राणश्च वीरशैवसाधको ज्ञानकर्मोभयनिष्ठः सन् षट्स्थलोपासनामार्गेण मोक्षमाप्नोति।

षट्स्थलोपासनाविधानम्

लिङ्गाङ्गसामरस्यमेव मुक्तिरिति प्रतिपादके वीरशैवसिद्धान्ते उपासकस्तादृशसामरस्यप्राप्तये षट्सोपानक्रमेण प्रवृत्तो भवति। तान्येव षट्सोपानानि षट्स्थलानीति व्यवह्रियन्ते। आचार्यवर्या रेणुकभगवत्पादाः –

वीरशैवास्तु षड्भेदाः स्थलधर्मविभेदतः।
भक्तादिव्यवहारेण प्रोच्यन्ते शास्त्रपारगैः।।

आदौ भक्तस्थलं प्रोक्तं ततो माहेश्वरस्थलम्।
प्रसादिस्थलमन्यत्तु प्राणलिङ्गिस्थलं ततः।
शरणस्थलमाख्यातं षष्ठमैक्यस्थलं मतम्।।[2]

---

[1] सि. शि. १६.१३-१४

[2] सि. शि. ५.२२-२५

इति सक्रमं षट्स्थलानां नामानि प्रतिपादितवन्तः। तत्रोपासनायाः, कर्मणः, ज्ञानस्य च तारतम्येन साधकः प्रथमं भक्तो भवति। स भक्त एवोपासनाबलेन माहेश्वरः, माहेश्वरश्च प्रसादी, प्रसादी च प्राणलिङ्गी, प्राणलिङ्गी च शरणो भवति, शरणश्चान्ते शिवैक्यं लभत इति षट्स्थलोपासनायाः क्रमः। तदधुनोपासनाविधानं तावन्निरूप्यते सक्रमं यथाशास्त्रम्।

१. भक्तः

शैवी भक्तिः समुत्पन्ना यस्यासौ भक्त उच्यते।
तस्यानुष्ठेयधर्माणामुक्तिर्भक्तस्थलं मतम्।।[१]

इति रेणुकभगवत्पादा भक्तस्थलस्वरूपं प्रतिपादयामासुः। तदनुसारं शिवभक्तिसमन्वितः साधको भक्त इति, तस्याचरणं च भक्तस्थलमिति कथ्यते।

अत्रायं भावः– यो ह्यनेकजन्मार्जितनिष्कामकर्मप्रभावेण शुद्धान्तःकरणः सन् नित्यानित्यविवेकी च संसारमसारं मन्यमानो गुरोः शरणं गत्वा, दीक्षात्रयेण इष्ट-प्राण-भावाख्यलिङ्गत्रयं प्राप्य, यथाविधि भस्मरुद्राक्षादीन् धारयित्वा शिवपञ्चाक्षरीं जपन्, सोपाधि-निरुपाधि-सहजाख्यदानत्रयं च कुर्वन्, गुरुलिङ्गजङ्गमेषु श्रद्धान्वितः सन् शिवपञ्चयज्ञरतो भवति, स एव भक्त इति कथ्यते। तत्र शिवपञ्चयज्ञस्तु तपः, कर्म, जपः, ध्यानम्, ज्ञानं चेति पञ्चप्रकारकः। त एते यज्ञा वीरशैवीयवैशिष्ट्याभिव्यञ्जकाः, न तु सर्वसाधारणार्थकाः। अत एव रेणुकभगवत्पादास्तेषां स्वरूपमेवं प्रतिपादितवन्तः। तथा हि–

पञ्चधा कथ्यते सद्भिस्तदेव भजनं पुनः।
तपः कर्म जपो ध्यानं ज्ञानं चेत्यनुपूर्वकम्।।

शिवार्थे देहसंशोषस्तपः कृच्छ्रादि न मतम्।
शिवार्चा कर्म विज्ञेयं बाह्यं यागादि नोच्यते।।

जपः पञ्चाक्षराभ्यासः प्रणवाभ्यास एव वा।
रुद्राध्यायादिकाभ्यासो न वेदाध्ययनादिकम्।।

ध्यानं शिवस्य रूपादिचिन्ता नात्मादिचिन्तनम्।
शिवागमार्थविज्ञानं ज्ञानं नान्यार्थवेदनम्।
इति पञ्चप्रकारोऽयं शिवयज्ञः प्रकीर्तितः।।[२] इति।

---

१. सि. शि. ५.२६
२. सि. शि. ९.२१-२४

एतादृशशिवपञ्चयज्ञलक्षणतपःकर्मादियुक्तो हि साधकः श्रद्धाभक्तिमान् भक्त इति कथ्यते। तदुक्तं भगवत्पादैः–

अनेन पञ्चयज्ञेन यः पूजयति शङ्करम्।
भक्त्या परमया युक्तः स वै भक्त इतीरितः ।।[1] इति।

सोऽयं भक्तस्थलसाधकः शिवयोगमार्गेण 'आचाराख्यं लिङ्गमाराधयतीति तत्स्वरूपं विचार्यते।

शिवयोगस्वरूपम्

वीरशैवदर्शने शिवदीक्षायां श्रीगुरुः शिष्यस्य स्थूलसूक्ष्मकारणाख्यशरीरत्रये इष्टप्राणभावाख्यं लिङ्गत्रयं व्यवस्थापयति। एतादृशदीक्षासम्पन्नो हि साधको गुरूपदिष्टमार्गेण सुखासने समुपविश्य, इष्टलिङ्गपूजां कृत्वा, तदनु स्ववामहस्तपीठमक्ष्णोः समक्षं द्वादशाङ्गुलान्तरे निधाय, तदुपरि स्वेष्टलिङ्गं विन्यस्य, अर्धनिमीलिताभ्यां निर्णिमेषाभ्यां लोचनाभ्यां तदिष्टलिङ्गमवलोकयन् दृढसङ्कल्पेन स्वमनोवृत्तिं मूलाधारादिचक्रेषु स्थिरीकृत्य, नकारादिमन्त्रस्मरणपूर्वकं पुनः पुनः प्राणायामप्रक्रियया प्राणापानयोः सङ्घट्टनेनोत्पन्नानां ज्योतिस्वरूपाणामाचारादिलिङ्गानामनुसन्धानं करोति। एतदर्थं शक्तिचालिनीमुद्रायाः, अश्विनीमुद्रायाश्चोपयोगः क्रियते[2]। एवं शिवस्वरूपस्येष्टलिङ्गस्यावलोकनपूर्वकमन्तःस्थितानां शिवचिद्रूपानां लिङ्गानामनुसन्धानमेव शिवयोग इति कथ्यते। अनेन बहिरन्तश्च शिवदर्शनं सञ्जायते। जीवस्य शिवे योगश्च भवतीत्यस्य शिवयोगशब्देन व्यवहारः। शिवाद्वैततर्क-विचक्षणाः श्रीनीलकण्ठशिवाचार्याः– "शिवयोग इत्यत्रापि शिवे योगो जीवस्य, अविनाभावसम्बन्ध इति अथवा शिवस्य योगः शिवयोगः, श्रीगुरुकरुणयाऽङ्गत्रये लिङ्गत्रयरूपपरशिवस्य योगः संयोजनम्, तेन नैरन्तर्येण जीवः शिवोऽहमिति भावनया शिव एव भवतीत्ययमपि क्रमः शिवाद्वैतप्रक्रियानुसारेणैव शिवयोगिभिः समासाद्यते"[3] इति शिवयोगशब्दस्य व्युत्पत्तिं, तस्य शिवत्वप्रापकत्वं च निर्दिष्टवन्तः। लिङ्गपुराणेऽपि–

---

[1] सि. शि. ९.२५

[2] बहिर्दृष्टिपूर्वकमन्तर्मनोवृत्तिरत्र मुद्रेति विज्ञेया। प्राणायामविषयकं, मुद्राविषयकं च विशिष्टं ज्ञानं गुरुमुखादेवावगन्तव्यम्।

[3] शि. परि., पृ. ३९

कीटो भ्रमरयोगेन भ्रमरो भवति ध्रुवम्।
मानवः शिवयोगेन शिवो भवति सर्वदा।।[१]

इति शिवयोगस्य शिवत्वप्रापकत्वमुक्तम्। तदेवं बहिरिष्टलिङ्गावलोकनपुरःसरमन्तस्थानामाचारादिलिङ्गानामनुन्धानरूपया विशिष्टया शिवयोगप्रक्रियया शिवत्वप्रापणं शिवयोग इति बोध्यम्।

तदीदृशशिवयोगप्रक्रियया भक्तस्थलस्य साधक आचारलिङ्गमुपास्ते। पूर्वोक्तप्रकारेण साधको यदा शिवयोगमार्गेण स्वेष्टलिङ्गमवलोकयन् स्वमनोवृत्तिं मूलाधारे चक्रे स्थिरीकृत्य, नकारमन्त्रमनुस्मरन् तिष्ठति, यदा च प्राणायामप्रक्रियया पुनः पुनः प्राणापानयोः सङ्घट्टनं करोति, तदा मूलाधारचक्रे दिव्यज्योतिरुत्पद्यते। एवं मूलाधार उत्पन्नमिदं ज्योतिरेव वीरशैवाचार्यैः 'आचारलिङ्गम्' इति कथ्यते। इदमाचारलिङ्गं निवृत्तिकलाऽपरपर्यायक्रियाशक्तियुक्तं वर्तते। भक्त ईदृशमाचारलिङ्गं श्रद्धाख्यभक्त्या उपास्ते। एवं निरन्तरानुसन्धानेन भक्त आचाराख्यलिङ्गस्वरूपो भवति। भक्तस्थलनिष्ठा श्रद्धाभक्तिश्चाचारलिङ्गनिष्ठक्रियाशक्तिरूपेण परिणमते। इदमेव भक्त–आचारलिङ्गयोः सामरस्यम्।

भक्तस्याचारलिङ्गोपासकत्वप्रतिपादन इदमैदम्पर्यम्– "साधकोऽयं श्रद्धातिशयेन लिङ्गाचारादिपञ्चाचारान् परिपालयति। अस्याचारेष्वेव परमनिष्ठात्वादयमाचारेषु भगवद्रूपमनुसन्धत्ते। अत एवायमाचारलिङ्गोपासक इत्युच्यते। यदाऽयं भक्तोऽहमाचरामीत्यभिमानमपि परित्यज्य सहजतयाऽऽचारे तन्मयो भवति, तदाऽयमाचारलिङ्गस्वरूपो जायते। तदेवं श्रेष्ठाऽऽचारशीलत्वं लोकहितकर्मकारित्वं तदभिमानराहित्यं वाऽऽचारलिङ्गोपासकस्य, तल्लिङ्गस्वरूपभूतस्य च साधकस्य लक्षणमिति वक्तुं शक्यते। इदमेव भक्त–आचारलिङ्गयोः सामरस्यमिति।

२. माहेश्वरः

भक्तेर्यदा समुत्कर्षो भवेद् वैराग्यगौरवात्।
तदा माहेश्वरः प्रोक्तो भक्तः स्थिरविवेकवान्।।

विश्वस्मादधिको रुद्रो विश्वानुग्रहकारकः।
इति यस्य स्थिरा बुद्धिः स वै माहेश्वरः स्मृतः।।

---

[१] लि. पु., उ. भा. २१.९५

ईश्वरः सर्वभूतानां ब्रह्मादीनां महामुने।
बुद्धियोगात् तदासक्तो भक्तो माहेश्वरः स्मृतः।।

अनादिमुक्तो भगवानेक एव महेश्वरः।
मुक्तिदश्चेति यो वेद स वै माहेश्वरः स्मृतः।।[१]

इति रेणुकभगवत्पादोक्त्या भक्तस्थलस्य भक्ताभिधस्य साधकस्येष्टलिङ्गादिषु सदाचारेषु च विद्यमाना श्रद्धा सलिलमौक्तिकन्यायेन, अर्थात् स्वातिनक्षत्रे सागरशुक्तिमध्यपतितं जलं घनीभूय यथा मौक्तिकं भवति, तथा दृढीभूय यदा निष्ठारूपमाधत्ते, तदा स भक्त एव 'माहेश्वरः' इत्यभिधीयते। साधकोऽयं भक्तेः समुत्कर्षेण दृढवैराग्येण च महेश्वरेऽत्यन्तनिष्ठासम्पन्नः सन् ब्रह्मादिसर्वदेवापेक्षया महेश्वर एव श्रेष्ठतमः, स एव मोक्षप्रदश्चेति विश्वसिति। अत एवायं महेश्वरस्वरूपेभ्यो गुरुलिङ्गजङ्गमेभ्यो दानं प्रददाति। तत्राप्ययं माहेश्वरः–

आदातृदातृदेयानां शिवभावं विचिन्त्य हि।
आत्मनोऽकर्तृत्वभावं च यद्दत्तं सहजं तु तत्।।[२]

इत्युक्तलक्षणे सहजे दाने निष्ठावान् भवति। तदुक्तं रेणुकभगवत्पादैः–

केवले सहजे दाने निष्णातः शिवतत्परः।
ब्रह्मादिस्थानविमुखो भक्तो माहेश्वरः स्मृतः।।[३] इति।

किञ्चायं माहेश्वरः परमात्मानं पतिमिति, स्वात्मानं च तस्य पशुम्, अर्थात् सेवकं मत्वा स्वामिभृत्यभावेन परमात्मानमर्चयति। तस्मान्माहेश्वरावस्थायां जीवपरमात्मनोरत्यन्तं भेद एव वर्तते। माहेश्वरावस्थायाः क्रियाप्रधानत्वाद् भेदाभावे पूजादिकर्मैव न सम्भवतीति तत्र भेदावस्थाया आवश्यकता। अत एवोक्तं भगवत्पादैः–

पतिः साक्षान्महादेवः पशुरेव तदाश्रयः।
अनयोः स्वामिभृत्यत्वमभेदे कथमिष्यते।।

भेदस्य कर्महेतुत्वाद् व्यवहारः प्रवर्तते।
लिङ्गपूजादिकर्मस्थो न चाद्वैतं समाचरेत्।।[४] इति।

---

[१] सि. शि. १०.३, ८, १०, १२
[२] सि. शि. ९.८३
[३] सि. शि. १०.२
[४] सि. शि. १०.४०,४२

एवं भेदबुद्धियुक्तोऽयं माहेश्वरः–

अपगच्छतु सर्वस्वं शिरच्छेदनमस्तु वा।
माहेश्वरो न मुञ्चेत लिङ्गपूजामहाव्रतम्।।[1]

इत्याचार्योक्त्या स्वेष्टलिङ्गपूजादावेव सर्वथा निष्ठावान् भवति। अयमेव यदेष्टलिङ्गार्पितमेवान्नमुपभुञ्जन् तद्व्यतिरिक्तं चास्पृशन् स्वदेहवृत्तिं यापयति, तदा स 'महामाहेश्वरः'[2] इति, यदा च कदाचित् कुत्रचित् शिवापकर्षसम्प्राप्तौ तत्प्रायश्चितरूपेण स्वप्राणानपि त्यक्तुमुद्युक्तो भवति, तदा 'वीरमाहेश्वर'[3] इति कथ्यते।

वस्तुतस्तु "आकाशवत् सर्वगतश्च नित्यः" इति श्रुत्युक्त्या शिवः सर्वव्यापकः; तथापि–

शिवः सर्वगतश्चापि स्वाधारे व्यज्यते भृशम्।
शमीगर्भे यथा वह्निर्विशेषेण विभाव्यते।।

नित्यं भासि तदीयस्त्वं या ते रुद्र शिवा तनूः।
अघोराऽपापकाशीति श्रुतिराह सनातनी।।

तस्मात् सर्वप्रयत्नेन सर्वस्थानपराङ्मुखः।
स्वेष्टलिङ्गे महादेवं पूजयेत् पूजकोत्तमः।।[4]

इति रेणुकभगवत्पादोक्त्या यथा सर्वत्र व्याप्तोऽप्यग्निः शमीगर्भे विशेषेणाभिव्यज्यते, तथा शिवोऽपि स्वाधारे इष्टलिङ्गे विशेषेण निवसतीति माहेश्वरस्येष्टलिङ्गमात्रे शिवभावना विहिता। एवमिष्टलिङ्गमात्रे शिवं यजन्नपि कालान्तरे तस्य सर्वगतत्वमपि विभावयन् वास्तविकं महादेवरूपं विजानाति।

किञ्चायं माहेश्वरस्थलस्य साधको निष्ठाभक्त्या गुरुलिङ्गमुपास्ते। यदाऽयं साधकः पूर्वोक्तशिवयोगप्रक्रियया दृढसङ्कल्पेन च स्वमनोवृत्तिं स्वाधिष्ठानचक्रे

---

[1] सि. शि. १०.२२

[2] अर्पितेनान्नपानेन लिङ्गे नियमपूजिते।
ये देहवृत्तिं कुर्वन्ति महामाहेश्वरा हि ते ।। (सि. शि. १०.२५)।

[3] शिवापकर्षसम्प्राप्तौ प्राणत्यागेऽप्यशङ्कितः।
शिवैकनिष्ठः सर्वात्मा वीरमाहेश्वरो भवेत् ।। (सि. शि. १०.२०)।

[4] सि. शि. १०.५७

स्थिरीकृत्य मकारमन्त्रमनुस्मरन् तिष्ठति, तदा तच्चक्रेऽस्य ज्योतिःसाक्षात्कारो भवति। तज्ज्योतिर्वीरशैवाचार्यैर्गुरुलिङ्गमित्युच्यते। गुरुलिङ्गमिदं प्रतिष्ठाकला-परपर्यायज्ञानशक्तियुक्तं भवति। ईदृशं गुरुलिङ्गं माहेश्वरो 'निष्ठा' इत्याख्यया भक्त्या उपास्ते। एवमस्यानुसन्धानेन माहेश्वरो गुरुलिङ्गरूपो भवति। माहेश्वरनिष्ठा निष्ठाभक्तिर्गुरुलिङ्गस्थितज्ञानशक्तिरूपेण परिणमते। इयमेव माहेश्वरगुरुलिङ्गयोः सामरस्यम् ।

अत्रेदमैदम्पर्यम्– तात्त्विकदृष्ट्या गुरुशब्दस्यार्थो ज्ञानमिति भवति। तस्मात् सद्गुरुणोपदिष्टे ज्ञाने लिङ्गमिव निष्ठावान् भवतीत्ययं साधको गुरुलिङ्गोपासकः । एवमयं यद्यदाचरति तत्सर्वमपि सुविवेकेन करोति, स्वस्य सर्वकर्मणो वास्तवविज्ञानवान् भवति। तदेवमाचारविषयकज्ञानसम्पन्नत्वमेव गुरुलिङ्गोपासकस्य तल्लिङ्गस्वरूपभूतस्य च साधकस्य लक्षणमिति वक्तुं शक्यते । इदमेव माहेश्वर–गुरुलिङ्गयोः सामरस्यमिति।

३. प्रसादी

लिङ्गनिष्ठादिभावेन ध्वस्तपापनिबन्धनः।
मनःप्रसादयोगेन प्रसादीत्येष कथ्यते।।[१]

इति रेणुकभगवत्पादोक्त्या पूर्वोक्तो माहेश्वरः स्वस्य लिङ्गनिष्ठादिभावनादार्ढ्येन पापबन्धनिवृत्तः सन् यदा चित्तप्रसादमधिगच्छति, तदा प्रसादीति कथ्यते। निर्मलस्यैव मनसः प्रसादत्वमुपपद्यते। उक्तं हि भगवत्पादैः– नैर्मल्यं मनसो लिङ्गं प्रसाद इति कथ्यते"[२] इति। मनस्तावदन्नमयम् "अन्नमयं हि सौम्य मनः"[३] इति श्रुतेः, अर्थात् प्राणिभुक्तमन्नमेव रस–रक्त–मांस–मेदोऽस्थि–मज्जा–शुक्रनामकसप्तधातुरूपेण परिणममानमन्ते मनो भवति। तस्माद् यादृशमन्नं भुज्यते, तादृशमेव मनो भवति, अतो मनोनैर्मल्यार्थमन्नशुद्धिरावश्यकी। अन्नशुद्धिस्तावद् भगवते शिवाय समर्पणेनोपपद्यते। एवं शिवार्पणेन ह्यन्नशुद्धिः, शुद्धान्नभक्षणेन मनोनैर्मल्यम्, निर्मले मनसि चित्तप्रसादतेति। तस्मात् शिवार्पितमन्नमेव प्रसाद इति, तदुपभोगी च प्रसादीति वीरशैवसिद्धान्तः। अत एव भगवत्पादैः–

अन्नशुद्ध्या हि सर्वेषां सत्त्वशुद्धिरुदाहृता।
विशुद्धमन्नजातं हि यच्छिवाय समर्पितम् ।।

---

[१] सि. शि. ११.२

[२] सि. शि. ११.६

[३] छा. उ. ६.५.४

तदेव सर्वकालं तु भुञ्जानो लिङ्गतत्परः।
मनः प्रसादमतुलं लभते ज्ञानकारणम्।।

आत्मभोगाय नियतं यद्यद् द्रव्यं समाहितम्।
तत्तत्समर्प्य देवाय भुञ्जीतात्मविशुद्धये।।[1]

इति शिवार्पणेन विशुद्धस्यान्नस्य भक्षणेन मनःप्रसादमायातीत्युक्तम्। एतादृशमनःप्रसादमवाप्तुमेव वीरशैवदर्शने गुरु-लिङ्ग-जङ्गमानां प्रसादसेवनं विधीयते। तदुक्तम्-

यथा शिवप्रसादान्नं स्वीकार्यं लिङ्गतत्परैः।
तथा गुरोः प्रसादान्नं तथैव शिवयोगिनाम्।।[2] इति।

तदेवं गुरुलिङ्गजङ्गमप्रसादसेवनेन मनःप्रसादः समुपलभ्यते।

अत्रेदमैदम्पर्यम् – भगवदर्पितस्यान्नस्य भक्षणेन तदन्नं प्रति पदार्थभावो निर्गतो भवति, भगवत्प्रसाद इति भावश्च जायते। सोऽयं प्रसादभावो मनःप्रसादहेतुर्भवति। पदार्थभावेनान्नस्योपभोगेन रुचिरपदार्थं प्रत्यासक्तिः, अरुचिरपदार्थं प्रति हेयबुद्धिश्चोत्पद्यते तदन्नपाचकं प्रति तस्य राग-द्वेषभाव उत्पद्यत इति मनोऽशान्तं भवति। यदा प्रसादभावेनान्नमुपभुज्यते, तदा तदन्नं प्रति तत्पाचकं प्रति वा आसक्तिर्हेयादिबुद्धिर्वा, रागद्वेषादिभावो वा नोत्पद्यते। एवं रागद्वेषादिवर्जनपूर्वकं वस्तूपभोगेन जीवो मानसिकीं प्रसन्नतामनुभवति। अत एवोक्तं भगवता श्रीकृष्णेन-

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति।।

प्रसादे सर्वदुःखानां हानिरस्योपजायते।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ।।[3] इति।

तस्माद् गुरुलिङ्गजङ्गमप्रसादसेवनेनातुलं मनःप्रसादमधिगच्छति जीवः। तदेवं प्रसादिस्थलस्य साधकः शिवप्रसादमुपभुञ्जन् प्रसन्नचित्तो भवतीत्ययं प्रसादीति कथ्यते।

सोऽयं प्रसादिस्थलस्य साधकः शिवलिङ्गमुपास्ते। स यदा पूर्वोक्तशिवयोगप्रक्रियया दृढसङ्कल्पेन च स्वमनोवृत्तिं मणिपूरके चक्रे स्थिरीकृत्य शिकारमन्त्र-

---

[1] सि. शि. ११.९-११
[2] सि. शि. ११.१८
[3] भ. गी. २.६४-६५

मनुस्मरन् तिष्ठति, तदा तच्चक्रे तस्य ज्योतिषः साक्षात्कारो भवति। तज्ज्योतिरेव वीरशैवाचार्यैः शिवलिङ्गमित्युच्यते। तदिदं शिवलिङ्गं विद्याकलापरपर्यायेच्छाशक्तियुक्तं वर्तते। ईदृशं शिवलिङ्गं प्रसादी 'अवधान' इत्याख्यया भक्त्या समुपास्ते। एवमस्यानुसन्धानेन प्रसादी शिवलिङ्गरूपो भवति, प्रसादिनिष्ठावधानभक्तिश्चेच्छाशक्तिरूपेण परिणमते। इदमेव प्रसादिशिवलिङ्गयोः सामरस्यमित्युच्यते।

अत्रेदं बोध्यम्– शिवशब्दस्य भद्रं कल्याणं मङ्गलमित्याद्यर्थाः[१] भवन्ति। अतोऽत्र शिवलिङ्गं नाम शिव एव, अर्थात् शिवभावना। तस्मान्माहेश्वरो यदा शिवभावं प्रत्याकृष्टो भवति, तदा प्रसादिस्थलमाप्नोति। प्राप्तां शिवभावनां स अत्यन्तमवधानतया संरक्षतीति तस्य भक्तिरवधानात्मिकेति कथ्यते। अस्याः शिवभावनाया महिम्नाऽयं सर्वत्र शिवदर्शनं करोति। तदुक्तं भगवत्पादैः–

प्रसादे शाम्भवे सिद्धे परमानन्दकारणे।
सर्वं शिवमयं विश्वं दृश्यते नात्र संशयः।।[२] इति।

एवं सर्वत्र शिवभाव एव प्रसादिनः शिवलिङ्गसामरस्यमित्युच्यते। शिवभावविशिष्टस्य सर्वलोकहितेच्छैव सदोदेति। एवं सर्वलोकहितेच्छाप्रापकत्वमेवावधानभक्तेरिच्छाशक्तिसामरस्यं शिवलिङ्गस्येच्छाशक्तिविशिष्टत्वं चेति कथ्यते। तदेवं लोककल्याणेच्छायुक्तत्वमेव शिवभावरूपशिवलिङ्गोपासकस्य शिवलिङ्गस्वरूपस्य लक्षणमिति।

४. प्राणलिङ्गी

प्राणापानसमाघातात् कन्दमध्याद्यदुत्थितम्।
प्राणलिङ्गं तदाख्यातं प्राणापाननिरोधिभिः।।

प्राणो यत्र लयं याति भास्करे तुहिनं यथा।
तत्प्राणलिङ्गमुद्दिष्टं तद्धारी स्यात् तदाकृतिः।।[३]

इति रेणुकभगवत्पादोक्त्या प्राणायामादियौगिकप्रक्रियाप्रकटितस्य प्राणलिङ्गस्योपासकः प्राणलिङ्गीति कथ्यते। प्राणलिङ्गदर्शनसाधनीभूता यौगिकी प्रक्रिया ह्येवं विद्यते– मूलाधारस्थितेनाऽपानवायुना साकं गुरूपदिष्टमार्गेण प्राणवायोर्यदा

---

[१] *"स्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्" (अ. को १.४-२५)।*

[२] *सि. शि. ११.७४*

[३] *सि. शि. १२.६-७*

सङ्घट्टनं भवति, तदैकं दिव्यज्योतिरुत्पद्यते। मूलाधारादुत्पन्नमिदं ज्योतिः सुषुम्नामार्गेण प्रस्थाय कुण्डलिनीमूर्ध्वमुखीं कुर्वद् हृदयस्थेऽनाहतचक्रे द्वादशकमलकर्णिकात्मके स्थिरं भवति। ज्योतिरिदमङ्गुष्ठपरिमाणं विद्रुमवर्णं च भवतीति शिवयोगिनो वर्णयन्ति। भास्करोदये यथा तुहिनकणास्तत्प्रकाशे लीना भवन्ति, तथाऽस्मिन् ज्योतिषि प्राणवायोर्लयो भवतीति प्राणशक्तिविशिष्टमिदं ज्योतिः प्राणलिङ्गमिति कथ्यते। अत एव सिद्धान्तशिखामणिव्याख्याकृद्भिर्मरितोण्टदार्यैः– "कुम्भकशब्दितप्राणवायुनिरोधजनितकशेरुकदण्डान्तरस्थैकविंशतिग्रन्थिभेदनपूर्वककुण्डलिन्यूर्ध्वमुखीकरणद्वारा हृदयस्थितानाहतपद्माष्टदलव्यतिरिक्तचतुर्दलमध्यस्थकर्णिकान्तःस्थिताङ्गुष्ठपरिमाणविद्रुमप्रभप्राणशक्तिविशिष्टचित्स्वरूपमेव प्राणलिङ्गम्"[१] इति प्राणलिङ्गस्वरूपमुपवर्णितम् ।

एतादृशप्राणलिङ्गस्वरूपविज्ञानवानेव प्राणलिङ्गीति कथ्यते। षट्स्थलोपासने इयं प्राणलिङ्ग्यव्यवस्था हि तुरीया भूमिका। इतः पूर्वेषु भक्त-माहेश्वर-प्रसाद्याख्यावस्थासु क्रियायाः प्राधान्यम्, प्राणलिङ्ग्यवस्थात आरभ्य वक्ष्यमाणशरण-ऐक्याख्यावस्थासु ज्ञानस्य प्राधान्यं वर्तते[२]। अत्र प्राणलिङ्ग्यवस्थायां साधकस्य स्वीयचिद्रूपस्य, अर्थात् प्राणलिङ्गस्यावबोधो जायते। तदुक्तं भगवत्पादैः–

लिङ्गं चिदात्मकं ब्रह्म तच्छक्तिः प्राणरूपिणी।
तद्रूपलिङ्गविज्ञानी प्राणलिङ्गीति कथ्यते ।।[३] इति।

तदिदं लिङ्गमेव जङ्गमलिङ्गमित्यपि वीरशैवदर्शने व्यवह्रियते। लिङ्गमिदं शान्तिकलापरपर्यायादिशक्तिविशिष्टं भवति। प्राणलिङ्गिस्थलस्य साधक इदं लिङ्गमनुभवाख्यभक्त्योपास्ते। जङ्गमलिङ्गापरपर्यायप्राणलिङ्गार्चनमान्तरिकपदार्थैरेव क्रियते।

ननु कानि तान्यान्तरिकवस्तूनीत्याकाङ्क्षायामुक्तमाचार्यैः–

क्षमाभिषेकसलिलं विवेको वस्त्रमुच्यते।
सत्यमाभरणं प्रोक्तं वैराग्यं पुष्पमालिका।।

---

[१] वी. आ. च., पृ. ४५६

[२] भक्तो माहेश्वरश्चैष प्रसादीति च कीर्तितः ।
कर्मप्राधान्ययोगेन ज्ञानयोगोऽस्य कथ्यते ।। (सि. शि. १२-२)।

[३] सि. शि. १२.३

गन्धः समाधिसम्पत्तिरक्षता निरहङ्कृतिः।
श्रद्धा धूपो महाज्ञानं जगद्भासि प्रदीपिका।।

भ्रान्तिमूलप्रपञ्चस्य निवेद्यं तन्निवेदनम्।
मौनं घण्टापरिस्पन्दस्ताम्बूलं विषयार्पणम्।।

विषयभ्रान्तिराहित्यं तत्प्रदक्षिणकल्पना।
बुद्धेस्तदात्मिका शक्तिर्नमस्कारक्रिया मता।।

एवंविधैर्भावशुद्धैरुपचारैरदूषितैः।
प्रत्युन्मुखमना भूत्वा पूजयेल्लिङ्गमान्तरम्।।[१] इति।

एवमेतादृशैर्भावनात्मकवस्तुभिरान्तरिकं तल्लिङ्गमुपास्यते। तदनुसन्धानबलेन प्राणलिङ्गी जङ्गमलिङ्गरूपो भवति, प्राणलिङ्गिनिष्ठाऽवधानभक्तिश्च जङ्गमलिङ्गनिष्ठाऽऽदिशक्तिस्वरूपेण परिणमते। इदमेव प्राणलिङ्गि-जङ्गमलिङ्गयोः सामरस्यम्।

५. शरणः

अङ्गलिङ्गी ज्ञानरूपः सती ज्ञेयः शिवः पतिः।
यत्सौख्यं तत्समावेशे तद्वान् शरणनामवान्।।

सतीव रमणे यस्तु शिवे शक्तिं विभावयन्।
तदन्यविमुखः सोऽयं ज्ञातः शरणनामवान्।।[२]

इति रेणुकभगवत्पादोक्त्या भगवन्तं शिवमेवानन्यभावेन शरणं गतः साधकः 'शरण' इत्युच्यते। भक्तस्थले माहेश्वरस्थले चापि साधकोऽनन्यभावेन शरणं गतो यजनभजनादिभिस्तच्छिवलिङ्गमर्चयति, किन्तु तत्र शिवजीवयोः सम्बन्धः स्वामिभृत्यरूपो वर्तते; अत्र तु शरणस्थले सः पति-सतीरूपो घनिष्ठात्मकः। अत एवायं साधकः सतीपतिन्यायेन स्वात्मानं सतीं मन्यमानः परशिवं च पतिं विभावयन् "तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमेवमेवायं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्"[३] इति श्रुतिसिद्धमलौकिकं शिवानन्दमनुभवति। यथा स्वीयसम्मिलनजन्यमानन्दं सती पतिश्च समानरूपेणानुभवतः,

---

[१] सि. शि. १२.१६-२०
[२] सि. शि. १३.२, ५
[३] बृ. उ. ४.३.२१

तथाऽयं शरणः शिवानन्दमनुभवति। अत एव प्राणलिङ्गिस्थले साधकस्य यथा शिवचिद्रूपज्ञानं भवति, तथा शरणस्थले तस्य शिवानन्दरूपबोधो जायत इति कथ्यते। अनेनैव हेतुनाऽस्य साधकस्य शिवोपासनाहेतुभूता भक्तिरानन्दाभिधेया भवति। तस्मात् चिद्रूपवान् प्राणलिङ्गी यदा शिवानन्दमनुभवन् तिष्ठति, तदा स शरण इति कथ्यते।

सोऽयं शरणस्थलस्य साधक आनन्दाख्यभक्त्या प्रसादलिङ्गमुपास्ते। स यदा पूर्वोक्तशिवयोगमार्गमनुसृत्य दृढसङ्कल्पेन च स्वमनोवृत्तिं कण्ठस्थे विशुद्धचक्रे स्थिरीकृत्य यकारमन्त्रमनुस्मरन् तिष्ठति, तदा तत्र चक्रे ज्योतिःसाक्षात्कारो जायते। तज्ज्योतिरेव प्रसादलिङ्गम्। तदेवमयं शरण आनन्दभक्त्या प्रसादलिङ्गोपासकः। आनन्दस्य नित्यप्रसन्नताप्रदायकत्वात् शिवानन्दमनुभवन् शरणः प्रसादलिङ्गोपासक इत्यभिधीयते। तदिदं लिङ्गं शान्त्यतीतापरपर्यायपराशक्तियुक्तं भवति। ईदृशस्य लिङ्गस्यानुसन्धानबलेन शरणः प्रसादलिङ्गरूपो भवति, शरणनिष्ठाऽऽनन्दभक्तिश्च पराशक्तिरूपेण परिणमते। इदं हि शरण–प्रसादलिङ्गयोः सामरस्यमिति कथ्यते।

६. ऐक्यः (एकत्वमापन्नः)

प्राणलिङ्गादियोगेन सुखातिशयमेयिवान्।
शरणाख्यः शिवेनैक्यभावनादैक्यवान् भवेत्।।[१]

इत्याचार्योक्त्या, 'एकस्य भाव ऐक्यम्' इति व्युत्पत्त्या च परशिवापरपर्यायमहालिङ्गेन साकमेकीभावमुपेतो हि साधक ऐक्य इति कथ्यते। शरणस्थलेऽनुभूयमानः शिवानन्द एव यदा स्वानन्दः सन् 'शिवोऽहम्' इति भावना दृढीभवति, तदा शिवेनैकत्वमधिगतः शरण एवैक्यो भवति।

ऐक्यस्थलस्यायमैक्याख्यः साधकः समरसभक्त्या महालिङ्गमुपास्ते। स च यदा शिवयोगप्रक्रियानुसारं दृढसङ्कल्पेन स्वमनोवृत्तिमाज्ञाचक्रे उन्मनीमुद्रया स्थिरीकृत्य ॐकारमन्त्रमनुस्मरन् तिष्ठति, तदा भ्रूमध्यस्थ आज्ञाचक्रे स्फटिकवच्छुभ्रज्योतिषः साक्षात्कारो जायते। अत्र तज्ज्योतिर्महालिङ्गमित्यभिधीयते। तदिदं महालिङ्गं शान्त्यतीतोत्तरापरपर्यायचिच्छक्तिविशिष्टं वर्तते। ईदृशं महालिङ्गमैक्यस्थलस्य साधकः समरसभक्त्या समुपास्ते। तदनुसन्धानबलेनैवैक्यो महालिङ्गरूपो भवति, ऐक्यनिष्ठासमरसभक्तिश्च चिच्छक्तिरूपेण परिणमते। इदमेवैक्यमहालिङ्गयोः सामरस्यम्।

---

[१] सि. शि. १४.२

अत्रेदमवधातव्यम् – "महच्च तल्लिङ्गं महालिङ्गम्" इति व्युत्पत्त्या चराचराधिष्ठानभूतं परमतत्त्वमेव महालिङ्गमित्यभिधीयते। अतः शिवोऽहमिति भावनायुक्तः प्राणलिङ्गी यदा "सर्वं लिङ्गमयं जगत्" इत्युक्त्या सर्वोऽहमित्याकारकभावयुक्तो भवति, तदा स ऐक्य इति कथ्यते। तस्माद्यथा प्राणलिङ्गिस्थले शिवोऽहंभावस्य प्राधान्यं वर्तते, तथैक्यस्थले सर्वत्र लिङ्गदृष्टिसम्पादनजनितस्य सर्वाऽहंभावस्य प्राधान्यं विद्यते। अयं भाव एव महालिङ्गमित्युच्यते। अस्य भावस्य प्रभावेण साधकः शिखिकर्पूरन्यायेन, अर्थाद् अग्निसंयुक्तकर्पूरमिव सर्वभावेन शिवस्वरूपो भवतीति। अत एव रेणुकभगवत्पादैः–

जले जलमिव न्यस्तं वह्नौ वह्निरिवार्पितम्।
परे ब्रह्मणि लीनात्मा विभागेन न दृश्यते।।[1]

इति शिवसामरस्यमधिगतस्यैक्यस्य सामरस्यस्थितिरुपवर्णिता। एवमैक्यभावमापन्नस्य प्राक्तनः पशुपतिभावः, सतीपतिभावश्च विलीयते। ततश्च स दृढीभूतशिवोऽहंभावरूप–सर्वाऽहंभावयुक्तः सन् सर्वत्राद्वैतानन्दमनुभवति नित्यम्। तदुक्तमाचार्यैः–

पशुत्वं च पतित्वं च मायामोहविकल्पितम्।
तस्मिन् प्रलयमापन्ने कः पशुः को नु वा पतिः।।

भेदबुद्धिसमुत्पन्नमहासंसारसागरम् ।
अद्वैतबुद्धिपोतेन समुत्तरति देशिकः।।

अद्वैतभावनाजातं क्षणमात्रेऽपि यत्सुखम्।
तत्सुखं कोटिवर्षेण प्राप्यते नैव योगिभिः।।

चित्तवृत्तिसमालीनजगतः शिवयोगिनः।
शिवानन्दपरिस्फूर्तिर्मुक्तिरित्यभिधीयते ।।[2] इति।

तदेवं वीरशैवसिद्धान्ते साधको भक्तस्थले माहेश्वरस्थले च क्रियाप्राधान्येन पशुपतिरूपद्वैतभावेन, प्रसादिस्थले प्राणलिङ्गिस्थले च योगप्राधान्येन सतीपतिरूपद्वैताद्वैतभावेन, शरणस्थले ऐक्यस्थले च ज्ञानप्राधान्येन शिवोऽहं–सर्वाऽहमित्याकारकनिश्चयबुद्धिरूपाद्वैतभावेन चानुसन्धानं कुर्वन् नित्यानन्दनिर्वासंनात्मकजीवन्मुक्त्यवस्थामासादयति। इयमेव षट्स्थलोपासना षट्स्थलसाधना चेति कथ्यते।

---

[1] सि. शि. २०.६१

[2] सि. शि. १४.९, ११, १४–१५

तदेवमेतावता मोक्षोपायविमर्शाख्येऽस्मिन् षष्ठे परिच्छेदे वीरशैवदर्शनदिशा शिवदीक्षा-ज्ञान-कर्म-शिवानुग्रह-अष्टावरण-पञ्चाचार-षट्स्थलोपासनानि मोक्षोपायत्वेन निरूपितानीत्यलमतिविस्तरेण।

उभयसम्मतमोक्षोपायसमीक्षा

एवं तावद्भगवद्गीतायां कर्म-ज्ञान-ध्यान-भक्ति-उपासनानां मोक्षोपायत्वमुपदिष्टम्। सिद्धान्तशिखामण्युक्तवीरशैवदर्शने च शिवदीक्षा-कर्म-ज्ञान-शिवानुग्रह-षट्स्थलोपासनानां मोक्षसाधनत्वं व्यवस्थापितम्। कर्म-ज्ञान-भक्तिशिवानुग्रहानां मोक्षोपायत्वे उभयोः साम्यम्। वीरशैवदर्शनाभिमता शिवदीक्षा-षट्स्थलोसना च गीतायां नोपदिश्यत इतीदं वीरशैवीयं वैशिष्ट्यं मोक्षोपायरूपम्। तथैव कैवल्यसहकारिसाधनभूताष्टावरण-पञ्चाचारा अपि गीतायां न प्रतिपादिता इतीमेऽपि विषया केवलं वीरशैवसम्प्रदाये निरूप्यन्ते, आचर्यन्ते च।

ज्ञानकर्मणोर्मोक्षोपायसमीक्षा

तत्र कर्म-ज्ञान-ध्यान-भक्ति-उपासनानां मोक्षोपायत्वे गीतासिद्धान्तशिखामण्योः साम्येऽपि, गीताभिमतानां कर्मादीनाम्, सिद्धान्तशिखामण्यभिमतानां कर्मादीनां च स्वरूपविषये क्वचित् साम्यम्, क्वचिच्च वैषम्यं परिदृश्यते। तत्र कर्मणो ज्ञानस्य च मोक्षहेतुत्वमिति गीता, ज्ञानकर्मणोः समुच्चयस्य मोक्षहेतुत्वमिति सिद्धान्तशिखामणिश्च कथयतः। तथा हि गीतायाम्-

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ।
तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते।।[१]

इति कर्मयोगस्य कर्मसंन्यासरूपस्य ज्ञानस्य च कैवल्यहेतुत्वम्, तत्रापि कर्मसंन्यासात् कर्मयोगस्य वैशिष्ट्यं चोक्तम्। एवमेव तत्रैव गीतायाम्-

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्।।

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः।।[२]

---

[१] भ. गी. ५.२

[२] भ. गी. ५.१६-१७

इति ज्ञानस्य मोक्षजनकत्वम्, "नहि ज्ञानेन सदृशं पवित्रमिह विद्यते"[१] इति तस्योत्कृष्टत्वं च प्रतिपादितम्। एवं कर्मणो ज्ञानस्य च मोक्षोपायत्वं तदुत्कृष्टत्वप्रतिपादकवचनान्यवलोकयन्तो भाष्यकाराः केचन आचार्या गीतां कर्मपराम्, केचन च ज्ञानपरामित्युक्त्वा गीतामधिकृत्य कर्मपरं ज्ञानपरं वा भाष्यं विरचितवन्तः। एवमेव केचन आचार्याः कर्मज्ञानोभयपरवचनान्यवलोक्य गीता ज्ञानकर्मसमुच्चयपरेत्याकलयन्तस्तत्परमेव भाष्यं गीतामधिकृत्य विरचितवन्तः। अत्रापाततो विचार्यमाणे सति, गीताया केवलं कर्मपरत्वमेव, केवलं ज्ञानपरत्वमेव वेति प्रतिपादको गीताया एकपक्षमेवाङ्गीकुर्वाणो भवितुमर्हति। गीताया ज्ञानकर्मसमुच्चयपरत्वप्रतिपादकास्तु तस्याः सर्वाभिप्रायाभिव्यञ्जका भवन्ति। अत एव भारतीयदर्शनसाहित्ये ज्ञानकर्मसमुच्चयवादिनामाचार्याणां परम्परा प्रचलिताऽस्ति[२]। वस्तुतस्तु गीतायां क्वापि

---

२. भ. गी. ४.३८

३. पण्डितवर्या गोपीनाथकविराजमहोदयाः ब्रह्मसूत्रस्य हिन्दी-अनुवादयुक्तस्य भूमिकायां (पृ. ४२-४४) प्राचीन आचार्यो ब्रह्मदत्तो भर्तृप्रपञ्चश्च ज्ञानकर्मसमुच्चयवादिनावास्तामिति कथयन्ति। डॉ. चन्द्रशेखरशिवाचार्याः (साम्प्रतीयकाशीज्ञानसिंहासनाधीश्वराः) 'सिद्धान्तशिखामणिसमीक्षा' (पृ.१७३-१७६) इत्याख्ये शोधप्रबन्धे कुमारिलभट्टः, प्रभाकरश्च ज्ञानकर्मसमुच्चयवादमङ्गीचक्रतुरिति निरणयन्। ब्रह्मसूत्रस्य भगवद्गीतायाश्च भाष्यकारौ भास्कराचार्य-रामानुजाचार्यौ स्वीये भाष्ये ज्ञानकर्मसमुच्चयवादं व्यवस्थापितवन्ताविति विचारस्तु सर्वविदित एव।

वैशेषिकदर्शनस्य वरिष्ठविदुषा श्रीधरभट्टेन प्रशस्तपादभाष्यस्य न्यायकन्दलीति व्याख्यायां– किं ज्ञानमात्रान्मुक्तिः? उत ज्ञानकर्मसमुच्चयात्? ज्ञानकर्मसमुच्चयादिति वदामः। निवृत्तेतरलाभस्य काम्यकर्मभ्यो निवृत्तस्यापि नित्यनैमित्तिक-कर्माधिकारो न निवर्तते, तानि ह्युपनीतं ब्राह्मणमात्रमधिकृत्य विहितानि। मुमुक्षुरपि ब्राह्मण एव, जातेरनुच्छेदात्। स यद्यधिकारित्वे सत्यवश्यकरणीयान्यतिक्रमेत् प्रत्यवायोऽस्य प्रत्यहमुपचीयते, तदुपचयाच्च बद्धो न मुच्यते। यथोक्तम्–

यानि काम्यानि कर्माणि प्रतिषिद्धानि यान्यपि।
तानि बन्धन्त्यकुर्वन्तं नित्यनैमित्तिकान्यपि।। इति।

विहिताकरणमभावः, न चाभावो भावस्य हेतुरपि, अतो नास्मात् प्रत्यवायोत्पत्तिरिति चेत्? न, विहिताऽकरणेऽन्यकरणात् प्रत्यवायस्य सम्भवात्। अभावस्य हि स्वातन्त्र्येण हेतुत्वं नेष्यते, न तु भावोपसर्जनतया। न च शरीरी सन्ध्यादिकाले कायेन वाचा मनसा वा किञ्चिन्न करोति, शरीरधारणादीनामपि करणात्" (प्रशस्तपादभाष्यम्, न्यायकन्दली, पृ. ६८३-६८९) इत्यादिना ज्ञानकर्मसमुच्चयवादो विस्तरेण विवेचितः।

उदयनाचार्याश्च–"तत्त्वज्ञानमेव निःश्रेयसहेतुः कर्माणि त्वनुत्पन्नज्ञानस्य ज्ञानार्थिनस्तत्प्रतिबन्धकाधर्मनिवारणद्वारेण प्रायश्चित्तवदुपयुज्यन्ते। उत्पन्नज्ञानस्य त्वन्तरालब्धवृष्टेः कारीरिपरिसमाप्तिवत् प्रारब्धाश्रमधर्मसमापनं लोकसङ्ग्रहार्थमिति युक्तमुत्पश्यामः" (प्रशस्तपादभाष्यम्, किर., पृ. १३२) इत्यादिना प्रशस्तपादाभिप्रायप्रकटनपूर्वकं ज्ञानकर्मसमुच्चयवादं निरूपितवन्तः। अनेन श्रीधरभट्ट-उदयनाचार्यौ ज्ञानकर्मसमुच्चयवादिनाविति ज्ञायते।

'ज्ञानकर्मसमुच्चय' इति पदप्रयोगो नास्ति, अथापि ज्ञानकर्मोभयोरपि कैवल्योपायत्वप्रतिपादितत्वात्, "सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः"[१], "एकं सांख्यं च योगं च यः पश्यति स पश्यति"[२] इति तयोरेकफलप्रापकत्वात्तयोरेकत्वप्रतिपादनाच्च केवलं कर्मणः कैवल्यसाधनत्ववादिनाम्, केवलं ज्ञानस्य मोक्षोपायत्ववादिनां चापेक्षया ज्ञानकर्मसमुच्चयवादे गीताभिप्रायो बहु समन्वितो भवति।

एवमेव वीरशैवदर्शने—

अन्धपङ्गुवदन्योन्यसापेक्षे ज्ञानकर्मणी।
फलोत्पत्तौ विरक्तस्तु तस्मात्तद्द्वयमाचरेत्।।

ज्ञानेनाचारयुक्तेन प्रसीदति महेश्वरः।
तस्मादाचारवान् ज्ञानी भवेदादेहपातनम्।।[३]

इति रेणुकभगवत्पादोक्त्या मुक्त्यर्थं ज्ञानकर्मणोः समुच्चयः प्रतिपादितः। तस्माद् गीताया ज्ञानकर्मोभयोर्मोक्षोपायत्वविचारः सिद्धान्तशिखामण्युक्तवीरशैवदर्शने समन्वितो भवतीत्यस्माकं प्रतिभाति।

एवं ज्ञानकर्मणोर्मोक्षोपायत्वविषये गीतासिद्धान्तशिखामण्योः साम्यं परिलक्ष्यते, किन्तु कर्मणः स्वरूपविषये उभयोः क्वचिद्वैषम्यम्, ज्ञानस्य स्वरूपविषये च साम्यं दृष्टिपथमायाति। तत्र हि गीतायाम्—

यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर।।

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्।।[४]

इत्यादिषु यज्ञानां स्तुतिव्याजेन ज्योतिष्टोमादियागानां कर्मत्वमुक्तम्।

सिद्धान्तशिखामणौ तावत्— "शिवार्चा कर्म विज्ञेयं बाह्यं यागादिनोच्यते"[५]. इति यागादीनां कर्मत्वं निराकृत्य शिवार्चनस्यैव कर्मत्वमुक्तम्। तस्माद् गीताभिमतानां कर्मणाम्, सिद्धान्तशिखामण्यभिमतानां कर्मणां च स्वरूपे वैषम्यमस्तीति ज्ञायते।

---

[१] भ. गी. ५.४
[२] भ. गी. ५.५
[३] सि. शि. १६.११, १४
[४] भ. गी. ३.९-१०
[५] सि. शि. ९.२२

गीतायां कर्मत्वेनोक्तानां ज्योतिष्टोमादियागानां स्वर्गाद्यनित्यफलप्रापकत्वम्। स्वर्गादयस्त्वविशुद्धि-क्षय-सातिशयदोषयुक्ताः। क्षयातिशयादिदोषयुक्तफल-जनकत्वाज्ज्योतिष्टोमादीनामपि दोषयुक्तत्वम्। सिद्धान्तशिखामणौ कर्मत्वेनोक्तानां शिवार्चनादीनां च मोक्षप्रदत्वम्। अत एव रेणुकभगवत्पादाः–

किमन्यैर्धर्मकलिलैः कीकषार्थप्रदायिभिः।
साक्षान्मोक्षप्रदः शम्भोर्धर्मो लिङ्गार्चनात्मकः।।

लिङ्गनिष्ठस्य किं तस्य कर्मणा स्वर्गहेतुना।
नित्यानन्दशिवप्राप्तिर्यस्य शास्त्रेषु निश्चिता।।[1]

इत्यनित्यस्वर्गादिफलप्रदायकयज्ञाद्यपेक्षया नित्यशिवानन्दप्रदायकस्येष्ट-लिङ्गार्चनरूपस्य कर्मणः प्राशस्त्यमूचुः। मरितोण्टदार्याश्च– "शिवलिङ्गपूजैव कर्मेति विज्ञेयम्, तत्फलस्य शाश्वतत्वात्;---तद्भिन्नबहुवित्तव्ययायाससाध्यज्योतिष्टोम-यागादिकर्मेति नोच्यते, तत्फलस्य नश्वरत्वात्"[2] इति यागादिकर्मसु बहुवित्तव्ययक्लेशा-धिक्यादिदोषं प्रदर्श्य लिङ्गार्चनस्य सर्वसरलसुलभत्वमुक्तवन्तः।

श्रीमन्तो नीलकण्ठशिवाचार्याः– "अथातो ब्रह्मजिज्ञासा"[3] इति सूत्रस्य व्याख्यानवेलायामथशब्दस्य धर्मानन्तर्यनित्यर्थमुक्त्वा, धर्मस्य पशुधर्मपतिधर्मभेदेन द्वैविध्यं निरूप्य, तत्र यागादीनां पशुकर्मत्वम्, लिङ्गधारण-पूजादीनां च पतिकर्मत्वं निरूप्य, तत्र यागादीनां पशुकर्मत्वम्, लिङ्गधारणपूजादीनां च पतिकर्मत्वं व्यवस्थाप्य–

अनुतिष्ठन् पशोर्धर्मान् पतिधर्मान् स चार्हति।
यथा पिपीलिका वृक्षमूलमाघ्राय तत्फलम्।।

आरुह्य लभते तद्वत् पतिधर्मैकतत्परः।
यथा विहङ्गः पक्षाभ्यां फलितं वृक्षमागतः।।
पश्यन् फलमवाप्नोति तद्वच्छीघ्रं तदर्हति।।[4]

इत्यादिना यागादीनां निष्कामभावेनाचरितानां परम्परया भगवत्साक्षात्कार-साधनत्वम्, लिङ्गार्चनादीनां च साक्षात्साधनत्वमिति पिपीलिका-विहङ्गममार्गद्वयस्य सादृश्यपूर्वकमुपपादितवन्त इति प्रतिपादितमेव।

---

[1] सि. शि. १०.२४-२८
[2] सि. शि. ९.२२, तत्त्वप्रदीपिकाव्याख्या।
[3] ब्र. सू. १.१.१
[4] क्रि. सा. भा. १, पृ. १७

किञ्च, ज्योतिष्टोमादिवैदिककर्मानुष्ठानाधिकारहेतुभूतोपनयनसंस्कारे ब्राह्मणाद्युत्कृष्टकुलोत्पन्नानामेवाधिकारः, न शूद्रादिकनिष्ठकुलोत्पन्नानामिति, ते ज्योतिष्टोमादिवैदिककर्मानुष्ठानेऽनर्हाः, लिङ्गार्चनादिवीरशैवीयकर्मानुष्ठानाधारभूतशिवदीक्षा च पक्वमलानां शक्तिपातविशिष्टानां सर्वेषामपि प्राप्या ; अतः श्रेष्ठकुलोत्पन्ना इव शूद्रादयोऽपि स्वसदाचारबलेन पक्वमलाः शक्तिपातविशिष्टाश्च सन्तः शिवदीक्षां प्राप्य लिङ्गधारणार्चनादिकर्मानुष्ठानार्हा भवन्ति। तस्मादेवं सिद्धान्तशिखामण्युक्त-लिङ्गार्चनादिकर्म गीतोक्तयागादिकर्मापेक्षया शीघ्रकैवल्यप्रापकम्, बहुवित्तव्ययायास-रहितम्, सर्वजनसुलभं चास्त इत गीतोक्तकर्मापेक्षया सिद्धान्तशिखामण्युक्तकर्मणो वैशिष्ट्यमवगन्तव्यम्

अत्रेदमवधेयम्– गीतायामापाततोऽवलोकनेन यज्ञशब्दस्तत्र न केवलं ज्योतिष्टोमादियागार्थे प्रयुक्तः, अपि तु–

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः।।[१]

इति गीतोक्त्या तपो-योग-स्वाध्याय-ज्ञान-प्राणायाम-मनोनिग्रहादीनामपि सूचकोऽस्ति[२]। तस्माद् गीतायां यज्ञशब्दो न केवलं 'ज्योतिष्टोमादिद्रव्ययाग' इत्यर्थे, अपि तु ततोऽप्युत्कृष्टे तपोयज्ञादिविशिष्टार्थे उपदिष्ट इत्यवगम्यते। सिद्धान्तशिखामणौ रेणुकभगवत्पादा अपि–

आत्मज्योतिषि सर्वेषां विषयाणां समर्पणम्।
अन्तर्मुखेन भावेन होमकर्मेति गीयते।।[३]

इति विशिष्टेऽर्थे होमकर्मस्वरूपमुपवर्णितवन्तः। श्लोकोऽयम् –

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते।।[४]

इति गीताश्लोकेन साकं साम्यं भजते। तस्माद् यदा गीतायां पूर्वोक्ते तपोयज्ञादिविशिष्टार्थे यज्ञशब्दः प्रयुज्यते, तदा सिद्धान्तशिखामणिना साकं साम्यम्, यदा च ज्योतिष्टोमादियागार्थे प्रयुज्यते, तदा वैषम्यमायातीति विभावनीयम्।

---

[१] भ. गी. ४.२८
[२] द्र. भ. गी. ४.२४-३३
[३] सि. शि. १६.७२
[४] भ. गी. ४.२७

कर्मयोगसमीक्षा

कर्म तावद्यागादिकं भवतु, उत वा शिवार्चनरूपम्, येन केनापि प्रकारेणानुष्ठितं कर्मयोगशब्देन नोच्यते। बन्धनकारकं यथा न स्यात्, तथा कर्माचरणमेव कर्मयोगपदवाच्यम्। अत एवोक्तं भगवता– "योगः कर्मसु कौशलम्"[१] इति। फलाकाङ्क्षाराहित्येन, कर्तृत्वाभिमानवर्जनेन, ईश्वरार्पणबुद्ध्या चाचरितं कर्म न बन्धनकारकमिति फलापेक्षा–कर्तृत्वाभिमान–स्वार्थभाववर्जनपूर्वकमनुष्ठितं कर्मैव कर्मयोगपदवाच्यम्। अत एव गीतायाम्– "युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्"[२] इति कर्मफलत्यागस्य, "गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते"[३] इति कर्तृत्वाभिमानवर्जनस्य,

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्।।
शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः।।[४]

इतीश्वरार्पणबुद्धेश्च कर्मबन्धनिवारणकारणत्वं निर्दिष्टम्। एतेषु कर्मफलत्यागः, कर्तृत्वाभिमानवर्जनं चेश्वरार्पणबुद्धावेव पर्यवस्यतः, ईश्वराय कर्मार्पणे कृते तत्फलस्य तदभिमानस्य च युगपदीश्वरसमर्पितप्रायत्वात्, कर्मफलकर्माभिमानसमर्पणं विना कर्मार्पणस्यानुपपन्नत्वात्, उपपन्नत्वेऽपि तस्य निरर्थकत्वाच्च। तस्मादीश्वरार्पणबुद्ध्याऽनुष्ठितं कर्म कर्मयोगपदवाच्यमिति गीताभिमतम्।

सिद्धान्तशिखामणौ रेणुकभगवत्पादाः कायार्पितस्थले ईश्वरे देहाभिमानसमर्पणम्, करणार्पणस्थले कर्मकारणकरणसमर्पणम्, भावार्पणस्थले कर्मकारणकरणकारणमनसोऽभिमानस्य वाऽर्पणं चोक्त्वा तद्व्याजेन सर्वकर्मसमर्पणमुपदिश्य कर्मयोगं संसूचितवन्तः[५]।

तर्हि–

भावयेत् सर्वकर्माणि नित्यनैमित्तिकानि च।
शिवप्रीतिकराण्येव सङ्गराहित्यसिद्धये।।

---

[१] भ. गी. २.५०
[२] भ. गी. ५.१२
[३] भ. गी. ३.२८
[४] भ. गी. ९.२७–२८
[५] द्र., सि. शि. १७.३४–५७

शिवे निवेश्य सकलं कार्याकार्यं विवेकतः।
वर्तते यो महाभागः स सङ्गरहितो भवेत् ।।[१]

इति कर्मणामीश्वरार्पणेन सङ्गराहित्यं प्रदर्श्य कर्मयोगस्वरूपमुपदिष्टम्। तस्मादेवं गीतोक्तकर्मयोगस्वरूपं सिद्धान्तशिखामणावप्युपलभ्यत इत्यस्मिन् विषये गीता-सिद्धान्तशिखामण्योः समानः पक्षः।

ज्ञानस्वरूपसमीक्षा

गीतानुसारम् "क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम"[२] इति देहात्मनोः पार्थक्यविवेको ज्ञानमुच्यते। इयं तु ज्ञानस्यारम्भिकी अवस्था। तज्ज्ञानं "सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि"[३] इति पराहन्तादशायां पूर्णतामाप्नोति।

सिद्धान्तशिखामणौ च "शरीरात्मविवेकेन पिण्डज्ञानी स कथ्यते"[४] इति ज्ञानस्यारम्भिकीमवस्थामुक्त्वा,

शिवात्मकमिदं सर्वं शिवादन्यन्न विद्यते।
शिवोऽहमिति या बुद्धिस्तदेव ज्ञानमुत्तमम्।।[५]

इति तस्य पूर्णावस्था प्रतिपादिता। तस्मादेवं ज्ञानस्वरूपविषयेऽपि गीतासिद्धान्तशिखामण्योः साम्यं दृष्टिपथमायाति।

ध्यानयोगसमीक्षा

तत्र तावद् गीतायां "तं विद्याद् दुःखसंयोगवियोगं योगसंज्ञितम्"[६] इत्येवं दुःखाभाव-नित्यानन्दात्मकपरमात्मसंयोग एव योग इत्युक्त्वा तत्साधनत्वेन ध्यानयोगमुपदिश्य तस्यापि मोक्षहेतुत्वमङ्गीकृतम्। तथा हि–

सङ्कल्पप्रभवान् कामांस्त्यक्त्वा सर्वानशेषतः।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः।।

---

[१] *सि. शि. १६.७३-७४*

[२] *भ. गी. १३.२*

[३] *भ. गी. ६.२९*

[४] *सि. शि. ५.५५*

[५] *सि. शि. १६.३१*

[६] *भ. गी. ६.२३*

शनैः शनैरुपरमेद् बुद्ध्या धृतिगृहीतया।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत्।।

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम्।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्।।[1]

इत्यादिना ध्यानयोगस्वरूपमुक्त्वा,

युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते।।[2]

इति तस्य निर्वाणप्रापकत्वमुक्तम्। गीतोक्तोऽयं ध्यानयोगो वीरशैवदर्शनोक्त-षट्स्थलोपासनान्तर्गतशिवयोगसाधनेऽन्तर्भवति। तत्र भवद्भिर्नीलकण्ठशिवाचार्यैः– "शिवयोग इत्यत्रापि शिवे योगो जीवस्य"[3] इति शिवयोगशब्दस्यार्थ उक्तः। अनेन गीतोक्तयोगशब्दस्यार्थे वीरशैवदर्शनस्य शिवयोगशब्दस्यार्थे च सामञ्जस्यं प्रतिभाति। यथा गीतायां तद्योगप्राप्त्यर्थं ध्यानयोग उपदिष्टः, तथा वीरशैवदर्शनेऽन्तर्लिङ्गानु-सन्धानमुपदिष्टम्। इदमनुसन्धानं शिवयोगप्राप्तिहेतुकमिति तस्यापि शिवयोग इति नाम्ना व्यवहारो भवति। तत्र हि प्राणायाममनःसंयमनादिपूर्वकं मूलाधार–स्वाधिष्ठान–मणिपूरक–अनाहत–विशुद्धि–आज्ञाख्यचक्रगतानामाचार–गुरु–शिव–जङ्गम–प्रसाद–महेत्याख्यलिङ्गानामनुसन्धानमेव शिवयोग इत्यभिधीयते। अत एव रेणुकभगवत्पादैः शिवयोगिसमाधिस्थले–

परब्रह्म महालिङ्गं प्राणो जीवः प्रकीर्तितः।
तदेकभावमननात् समाधिस्थः प्रकीर्तितः।।

अन्तः षट्चक्ररूढानि पङ्कजानि विभावयेत्।
ब्रह्मादिस्थानभूतानि भ्रूमध्यान्तानि मूलतः।।

भ्रूमध्यादूर्ध्वभागे तु सहस्रदलमम्बुजम्।
भावयेत्तत्र विमलं चन्द्रबिम्बं तदन्तरे।।

सूक्ष्मरन्ध्रं विजानीयात् तत्कैलासपदं विदुः।
तत्रस्थं भावयेच्छम्भुं सर्वकारणकारणम्।।[4]

---

[1] भ. गी. ६.२४-२६

[2] भ. गी. ६.२८

[3] सि. परि., पृ. ३९

[4] सि. शि. १२.२४-२७

इति शिवयोगसाधनस्वरूपं निरूप्य, "शिवध्यानं तु संसारतमसश्चण्डभास्करः"[१] इति तस्य संसारनिवर्तनरूपकैवल्यप्रापकत्वं निर्दिष्टम् । तस्मादेवं गीतोक्तध्यानयोगो वीरशैवीयशिवयोगसाधनेऽन्तर्भवति। तथापि मूलाधारादिचक्रविषयो वाऽऽचारादिलिङ्गविषयो वा गीतायां नोपलभ्यते, वीरशैवदर्शने च प्रतिपाद्यत इत्ययं विशेषोऽप्यत्रावगाहनीयः।

शिवानुग्रहसमीक्षा

मोक्षोपायेषु भगवदनुग्रहस्यापि प्रमुखं स्थानम्। भगवदनुग्रहं विना न कस्यापि मोक्ष उपपद्यते। अत एव भगवता कृष्णेन–

तमेव शरणं गच्छ सर्वभावेन भारत।
तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्।।[२]

इति परमेश्वरप्रसादस्य कैवल्यप्रदत्वमुपदिष्टम्। आचार्यचरणै रेणुकभगवत्पादैश्च

शम्भोः शिवप्रसादेन संसारच्छेदकारिणा।
मोहग्रन्थिं विनिर्भिद्य मुक्तिं यान्ति विवेकिनः।।

सर्वानुग्राहकः शम्भुः केवलं कृपया प्रभुः।
मोचयेत् सकलान् जन्तून् न किञ्चिदिह कारणम्।।[३]

इत्यादिना मोक्षे शिवानुग्रहस्यावश्यकता समुपदिष्टा। तस्य परमेश्वरानुग्रहस्य भगवद्भक्तिरेव सुलभोपायः परमोपायश्च। भक्तिस्तावत् परमेश्वरस्यैव सर्वभावेन शरणागतिरूपा परमप्रेमरूपा चेत्यत्र भगवदस्तित्ववादिषु न कस्यापि विरोधः। लोके कदाचिद् वेदाध्ययनेन, यज्ञानुष्ठानेन, दानेन, सत्कर्मणा, उग्रतपसा वाऽनुपलब्धोऽपि भगवदनुग्रहो मोक्षश्च भगवद्भक्त्यानन्ययाऽवश्यमेवोपलभ्यते। अत एवोक्तम्–

नाहं वेदैर्न तपसा न दानेन च चेज्यया।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा।।

भक्त्या त्वनन्यया शक्य अहमेवं विधोऽर्जुन।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप।।[४]

इति गीतायाम्,

---

[१] सि. शि. १२.३१
[२] भ. गी. १८.६२
[३] सि. शि. १८.५९–६१
[४] भ. गी. ११.५३–५४

किं वेदैः किं ततः शास्त्रैः किं यज्ञैः किं तपोव्रतैः।
नास्ति चेच्छाङ्करी भक्तिर्देहिनां जन्मरोगिणाम्।।[1]

इति सिद्धान्तशिखामणौ च। भगवती श्रुतिरप्यस्मिन् विषये स्वसम्मतिं प्रदत्तवती। तथा हि–

नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुना श्रुतेन।
यमैवैष वृणुते तेन लभ्यस्तस्यै-
वात्मा विवृणुते तनूं स्वाम्।।[2] इति।

सा च भक्तिर्भावरूपा निराकारा सती उपासनरूपेणाभिव्यक्ता भवति। गीतायां सगुणनिर्गुणभेदेन भगवदुपासनस्य द्वैविध्यमुक्तम्। तत्र सगुणपरमेश्वरस्यार्चनादिकं सगुणोपासनम्, निर्गुणपरमेश्वरस्य मनसाऽनुसन्धानं निर्गुणोपासनम्। गीतोक्तं सगुणोपासनं सिद्धान्तशिखामणिनिर्दिष्टलिङ्गार्चने, निर्गुणोपासनं चाचारलिङ्गाद्यन्त-र्लिङ्गानुसन्धाने पर्यवसितं भवति। तदेवं भगवदनुग्रह-भगवद्भक्ति-भगवदु-पासनविषयेऽपि गीता-सिद्धान्तशिखामण्योः समन्वय उपपद्यते।

एतदतिरिक्तं गीतायामिन्द्रादिविभिन्नदेवानां पितृणां चोपासनं निर्दिष्टम्। सिद्धान्तशिखामणौ तु–

संसारार्तः शिवं यायाद् ब्रह्माद्यैः किं फलं सुरैः।
चकोरस्तृषितः पश्येच्चन्द्रं किं तारका अपि।।[3]

इत्यादिनैकदेवनिष्ठादार्ढ्याय शिवातिरिक्तदेवतोपासननिराकरणाद् गीतोक्त-मिन्द्रादिदेवतोपासनं पित्र्युपासनं वा वीरशैवदर्शने नाङ्गीक्रियत इत्यवधेयम्।

अपरञ्च, गीतायां मोक्षोपायत्वेनोक्ता कर्मयोग-ध्यानयोग-ज्ञानयोग-भक्तियोगाः सिद्धान्तशिखामण्युपपादितषट्स्थलोपासनेऽपि समन्विता भवन्ति। तथा हि– षट्स्थलानि तु भक्त-माहेश्वर-प्रसादी-प्राणलिङ्गी-शरण-ऐक्याभिधेयानि। तत्र भक्तस्थले माहेश्वरस्थले च साधकः शिवार्चन-शिवभजन-शिवकीर्तनादिसत्कर्माचरणनिष्ठो भवतीत्यत्र कर्मयोगः,

---

[1] सि. शि. ११.४८
[2] कठो. १.२.२२
[3] सि. शि. १३.९

प्रसादिस्थले प्राणलिङ्गिस्थले च शिवप्रसादान्नसेवन-जन्यमानसिकप्रसन्नतामापाद्य, ध्यानप्राणायामादिभिरान्तरिकसाधनैर्दृश्यमानस्य प्राणलिङ्गस्यानुसन्धाने आसक्तो भवतीत्यत्र ध्यानयोगः, शरणस्थले शिवं सती-पतिभावेनात्यन्तं समीपमवगच्छन्, ऐक्यस्थले च शिव एवाहमिति शिवज्ञानं समधिगम्य तज्ज्ञानानन्दमनुभवन् शिवसामरस्यमवाप्नोतीत्यत्र ज्ञानयोगो वर्तत इत्यवधेयम्। वस्तुतः भक्तस्थले माहेश्वरस्थले च कर्मयोगेन साकं ध्यानयोगो ज्ञानयोगश्चापि वर्तत एव, अथापि कर्मण आधिक्यात् तादृशव्यवहारः। एवमेव प्रसादि-प्राणलिङ्गिस्थले कर्म-ज्ञानयोगौ, शरण-ऐक्यस्थले कर्म-ध्यानयोगौ च स्वल्पमात्रया तिष्ठत एव। भक्तियोगस्तावद् भक्ताद्यैक्यपर्यन्तेषु स्थलेषु समानभावेन विराजत इति जीवस्याऽऽध्यात्मिकविकासाय तान् सततं प्रचोदयति। अत एवात्र दर्शने श्रद्धा-निष्ठा-अवधान-अनुभव-आनन्द-समरसाख्यभेदेन भक्तेः षड्विध्यमुक्त्वा, भक्तादिषट्स्थलेषु साधक एकैकया भक्त्या शिवलिङ्गमनुसन्धत्त इति प्रतिपाद्यते।

अत्र भगवद्गीतामधिकृत्य वीरशैवपरं भाष्यं रचयितारः, टी. जी. सिद्धप्पाराध्यमहोदयाः-

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना।
अन्ये सांख्येन योगेन कर्मयोगेन चापरे।।[१]

इति गीताश्लोकव्याख्यानावसरे- "एते त्रयोऽपि योगाः षट्स्थलोपासन-मार्गेऽनुस्यूततया मिलिताः साधकं भक्तस्थित्या शरणस्थितिपर्यन्तं देहेन्द्रिय-सहकारेणैवानायासेनानयन्तो विराजन्ते। साधकः सर्वमपि प्रपञ्चं भक्तस्थितौ शिवभावनया शुश्रूषयन्, माहेश्वरस्थितौ तत्रैवात्मीयतया प्रीणयन्, प्रसादिस्थितौ तमेव प्रपञ्चं प्रसादमिति भावयन्, प्राणलिङ्गिस्थितौ तमेव शिवात्मकत्वेन बहिरन्तश्चानुभवन्, शरणस्थितौ स्वस्य जगद्रूपस्य परमेश्वरस्य च भेदमजानन्नेवानन्दमनुभवति। एतादृग्योगी लोके व्यवहरन्नपि तदासक्तिरहितः स्वार्थशून्यश्च वर्तमानः सर्वदा लोकहितैक-दृष्टिर्नित्यसुखी सम्पद्यते। सोऽपि निर्मले मनसि विराजमाने स्वांशिनि महादेवे शिखिकर्पूरयोगेन समरसतया विलीन एकीभावमुपेतो महादेव एव सम्पद्यते। एवमेव योगत्रयसमावेशभूतस्य षट्स्थलोपासनयोगस्य सदनुष्ठानेन साधकाः सर्वेऽपि स्वान्तरङ्गस्थस्य महादेवस्य परिचयमधिगन्तुं प्रभवन्ति। अयमेव मानवकल्याणसाधको

---

[१] भ. गी. १३.२४

योगमार्गो गीतायामादित आरभ्य विस्तरशो निरूपितः"[1] इति गीतोक्तानां कर्मादियोगानां षट्स्थलोपासने समन्वयं प्रदर्शितवन्तः।

तदेवमेतावता गीतायां मोक्षोपायत्वेनोक्तानां कर्म-ज्ञान-ध्यान-भक्ति-भगवदनुग्रहानां सिद्धान्तशिखामण्युक्तवीरशैवदर्शने प्रतिपादितेषु मोक्षोपायेषु कीदृशः समन्वयो भवतीति विवेचितम्। वीरशैवदर्शने कर्मज्ञानाद्यतिरिक्तानां शिवदीक्षा-अष्टावरण-पञ्चाचाराणामपि मोक्षोपायत्वेन विवेचनं कृतमस्ति। तत्राष्टावरणपञ्चाचारा मोक्षसाधनसहकारिभूता धार्मिकाचरणरूपाः। शिवदीक्षा हि मलनिवृत्तिहेतुभूतेति मोक्षोपायेष्वस्या विशिष्टं स्थानमस्ति। गीतायां शिवदीक्षाविचारो नोच्यते, अथापि दीक्षा गुरूपदेशरूपा इत्यङ्गीकारे गीतायामपि-

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः।।[2]

इति गुरूपदेशस्यावश्यकताप्रतिपादनादत्र न सर्वथा उभयोर्वैषम्यमनुपश्यामः। किन्त्वाणवादिमलत्रयनिवारणसक्षमवेधादिदीक्षात्रयविषयो गीतायां नैव दरीदृश्यत इति शिवदीक्षा वीरशैवीयो विशिष्टः संस्कारः।

एवमेवाष्टावरण-पञ्चाचारा अपि वीरशैवसम्प्रदाये एव प्रचलिता मोक्षसहकार्युपायाः। तस्मान्न ते गीतायामुपलभन्ते; तथापि "स्वधर्मे निधनं श्रेयः परधर्मो भयावहः"[3] इति गीतायां स्वधर्माचारानुष्ठाननिर्देशादत्राप्यस्ति गीतायाः सहमतिरित्येव मन्यामहे।

तदेवं सृष्टिप्रक्रिया-धार्मिकवैशिष्ट्याचरणादिकं विहाय श्रीमद्भगवद्गीता-सिद्धान्तशिखामण्योर्दार्शनिकतत्त्वेषु सुतरां समुपपद्यते समन्वय इति सर्वं समञ्जसम्।

* * *

---

[1] भ. गी., वी. भा. १३.२४

[2] भ. गी. ४.३४

[3] भ. गी. ३.३५

उपसंहारः

उपक्रमोपसंहाराभ्यां हि शास्त्रकारैः शास्त्रस्य तात्पर्यं निर्णीयते। अत एव–

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ।।

इति कारिकोक्तेषु तात्पर्यनिर्णायकेषु षट्सु लिङ्गेषूपक्रमोपसंहारौ मिलित्वैकत्वेन गण्येते। तत्र तावद् गौडब्रह्मानन्दस्वामिनोऽपि– "उपक्रमोपसंहाराभ्यां विचार्यमाणवाक्यस्याद्यन्तभागयोरेकार्थपर्यवसानं लक्ष्यते। तत्राद्यस्यैकार्थतात्पर्यनिर्णायकत्वेन लिङ्गत्वम्; तात्पर्यविषयत्वेन सन्दिग्धानां बहूनां मध्ये यस्मिन्नर्थे आद्यन्तभागयोः पर्यवसानम्, तस्मिन्नेव तात्पर्यनिर्णयात्, अन्यथा तस्य वैयर्थ्यात्"[१] इत्यादिना तात्पर्यनिर्णयावसरे ग्रन्थसन्दर्भेणोपक्रमोपसंहारयोरेकलिङ्गत्वमुक्तवन्तः। तस्मादुपक्रमोपसंहारावेकार्थाभिव्यञ्जकौ भवतः। अत एव प्राचीना आचार्याः कस्यचिद् ग्रन्थस्योपक्रमे लिखितमेवोपसंहारेऽपि विलिख्य, उपक्रमोपसंहारयोरेकार्थकत्वपरम्परामनुपालितवन्तः। अद्यतनीया अपि तानेवानुसरन्ति च। "यद् यदाचरति श्रेष्ठः तत्तदेवेतरो जनः"[२] इति गीतोक्त्या इतः प्राग्वर्तिनामाचार्याणां व्यवस्थामनुसृत्य "भगवद्गीता-सिद्धान्तशिखामण्योः समीक्षात्मकमध्ययनम्" इति नामके शोधप्रबन्धे उपक्रमे निरूपितमेवोपसंहारेऽपि निरूपणीयम्। युक्तं चैतत्, द्वयोरपि तात्पर्यग्राहकोपाययोरेकार्थकत्वात्।

ननूपक्रमोक्तमेवोपसंहारेऽपि प्रतिपाद्येत तर्हि, पुनरुक्तिदोष इति चेन्न, पञ्चावयवात्मके न्यायप्रयोगे प्रतिज्ञावाक्यार्थमात्रावगाहित्वेऽपि निगमनस्य न वैयर्थ्यम्, किन्तु शङ्कान्तरनिराकरणमुखेन यथा पोषकत्वं भवति; तथाऽत्रापि पुनरुक्तिदोषस्य निराकृतत्वात्। तथा हि– न्यायसिद्धान्ते 'पञ्चावयवात्मकं वाक्यम्', इति न्यायवाक्यलक्षणमुक्त्वा, प्रतिज्ञा-हेतु-उदाहरण-उपनय-निगमनमिति तदवयवपञ्चकं निरूप्यते।

---

[१] अ. सि. लघुचन्द्रिका पृ. ४२५

[२] भ. गी. ३.२१

तत्र 'पर्वतो वह्निमान्' इति प्रतिज्ञा, 'धूमवत्त्वात्' इति हेतुः, 'यो यो धूमवान् स स वह्निमान्' इत्युदाहरणम्, 'तथा चायम्' इत्युपनयः 'तस्मात्तथा' इति निगमनम्। अत्र प्रतिज्ञात्वेनोक्तमेव शङ्कान्तरनिराकरणमुखेन दृढीकर्तुं निगमनेऽपि निरूप्यत इति तत्र पुनरुक्तिदोषो निरस्यते। तथैवात्राप्युपक्रमोक्तस्यैवोपसंहारेऽपि शङ्कान्तरनिराकरणार्थमुक्तविषयदृढीकरणार्थमुपक्रमोपसंहारयोरेकार्थप्रतिपादनपरम्परानुपालनार्थं च निरूपणमिति न पुनरुक्तिदोषप्रसक्तिरिति निष्पक्षपातः पन्थाः परिद्रष्टव्यः।

जननी अज्ञानवशात् प्रचण्डं पावकं प्रति गच्छन्तमात्मजं मा गच्छ, मा गच्छेति द्वित्रिचतुरधिकवारं वदन्ती, अग्निपातात् तमवरोधयति। अत्र माता एकमेव वाक्यं नैकवारं वदति, तथापि पुनरुक्तिदोष इति न मन्यते, तत्र स्वसुतसंरक्षणरूपसूद्देशात्।

किञ्च, नित्योपलब्धस्यात्मन उपलब्धये श्रुतिभगवती "तत्त्वमसि श्वेतकेतो"[1] इति वाक्यं नववारमुपदिशतीत्यत्रापि न तद्दोषापत्तिः, उक्तज्ञानदार्ढ्यायैवमुपदिष्टत्वात्। एवमेवात्रापि तादृशस्यैवोद्देशादुपक्रमोक्तार्थप्रतिपादनपरोपसंहारारम्भो न दोषावह इति बुद्ध्या प्रारभ्यते किञ्चिदिह प्रतिपादयितुम्।

इह प्रपञ्चे प्रायः सर्वोऽपि प्राणिनिवहो नित्यं सुखमिच्छन्नपि दुःखमेवानुभवति पुनः पुनः। तत्र किं नित्यसुखजनकम्? किं वाऽनित्यसुखकारणम्? इति विषयस्याऽज्ञानमेव हेतुः। अज्ञानवशाज्जीवा अनित्यं यत्किञ्चिद्वस्तुजातं दुःखमेव सुखमिति, अङ्गुष्ठे स्तनभ्रान्त्या बालानां लालापानमिव भ्रान्त्या विषयासक्ता भवन्ति, नित्यमात्मसुखं विस्मरन्ति च। तस्माद् ज्ञानं सकलदुःखोच्छेदहेतुः।

तज्ज्ञानं स्वतः शास्त्रतो गुरुतश्चेति त्रिविधैर्माध्यमैः समुपलभ्यते। तत्र स्वतस्तदधिगमने इह जन्मनि प्राग्वाऽधीतं शास्त्रम्, प्राप्तो गुरूपदेशो वा कारणम्। गुरुपदमपि शास्त्राध्ययनाचरणोपदेशकौशल्यप्राप्तम्। अत एव गुरवे 'आचार्यः' इति नामान्तरं शोभते। उक्तमाचार्यलक्षणमाचार्यचरणै रेणुकभगवत्पादैः—

आचिनोति च शास्त्रार्थानाचारे स्थापयत्यलम्।
स्वयमाचरते यस्मादाचार्यस्तेन चोच्यते ।।[2] इति।

---

[1] छा. उ. ६.८.७

[2] सि. शि. १५.९

तस्मादस्ति शास्त्रमध्यात्मज्ञानावगमने प्रधानं साधनम्। उक्तं च सुभाषितकारैः–

अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः।। इति।

भारतीयसारस्वतलोके निगमा आगमाश्चेति शास्त्रद्वयमस्ति। तच्च सर्वसंविन्मूलस्रोतः, भारतीयवाङ्मयगगनस्य भानुसोमप्रतीकम्, ईश्वरस्य श्वासवचोभ्यां जनितमिति सर्वप्रमाणमान्यम्, सश्रद्धेयं च सर्वेषाम्। निगमागमानामाधारमाधृत्यैव भारतीयदर्शनपरम्परा प्रवाहितास्ति। वेदप्रामाण्यमनङ्गीकारादेव जैन–बौद्धदर्शने विविधसद्विचारसदाचारैः संयुक्ते, अपि चार्वाकमतमिव नास्तिकदर्शन इत्यवहेलापात्रे बभूवतुः। न्याय–वैशेषिक–सांख्य–योग–पूर्वमीमांसा–उत्तरमीमांसादर्शनानि श्रुतिप्रामाण्यस्वीकारादेवास्तिकदर्शनानीति सर्वादरपात्राणि बभूवुः ।

भारतीयदर्शनेषु गीतायाः सिद्धान्तशिखामणेश्च महत्वम्

श्रीमद्भगवद्गीता निगमसारभूता, सिद्धान्तशिखामणिश्चागमसाहित्यान्तर्गतानां कामिकादिवातुलान्तानामष्टाविंशतिसंख्याकानां शैवागमानां साररूपश्च वर्तेते। तत्र शङ्कराचार्यभगवत्पादैः– "तदिदं गीताशास्त्रं समस्तवेदार्थसारसङ्ग्रहभूतम्"[१] इति गीताया वेदसाररूपत्वं दर्शितम्। अन्यच्च–

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्।।[२]

इति लोकप्रसिद्धोक्त्याऽपि गीताया निगमसाररूपोपनिषत्सारसर्वस्वत्वं ज्ञायते।

एवं सर्ववेदसाररूपत्वादेवास्या गीताया भारतीयदर्शनेषु वैशिष्ट्यपूर्णं स्थानमस्ति। तत्र न्याय–वैशेषिक–सांख्य–योग–पूर्वमीमांसा–उत्तरमीमांसादर्शनेषु मोक्षोपायत्वेनाङ्गीकृतानां ज्ञान–योग–कर्मादीनां समन्वयो गीतायां सुष्ठु विहितः। न्याय–वैशेषिक–सांख्य–उत्तरमीमांसादर्शनेषु प्रतिपादितं तत्त्वज्ञानं गीतायां ज्ञानयोगरूपेण, योगदर्शने निरूपिता ध्यानयोगप्रक्रिया गीतायां ध्यानयोगरूपेण, पूर्वमीमांसादर्शने विवेचितं कर्म गीतायां कर्मयोगरूपेण च निहितानि। एतदतिरिक्तं सर्वजनसर्वसुलभो भक्तियोगोऽपि गीतायां प्रधानतया निरूपितोऽस्ति। उक्तं हि तत्र–

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना ।

---

[१] भ. गी., शा. भा. उपो.।
[२] भ. गी. मा. ६

अन्ये सांख्येन योगेन कर्मयोगेन चापरे ।।
अन्ये त्वेवमजानन्तः श्रुत्वाऽन्येभ्य उपासते।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ।।[१] इति।

किञ्चाद्वैत-विशिष्टाद्वैत-द्वैत-शुद्धाद्वैतादिविभिन्नदर्शनप्रवर्तकाः शङ्कर-रामानुज-मध्व-वल्लभादयो बहव आचार्या भगवद्गीतायां स्वमतसम्मतविचारान् समवलोक्य स्वमतवादमुपस्थापनार्थं गीताया उपरि स्वीयानि भाष्याणि विरचयामासुः। अनेनेदं वक्तुं शक्यते यद् गीता सर्वदर्शनगर्भेति। ख्यातनामान आधुनिका विचारका बालगङ्गाधरतिलक-महात्मागांधि-सर्वपल्लिराधाकृष्णन्-अरविन्दघोषादिमहाभागा अपि भगवद्गीताया व्याख्यां विरचय्य तदधिकृत्य स्वविचारान् प्रतिपादितवन्तः। अनेनेदमवगम्यते यद् गीता प्राचीनाचार्याणामिव, आधुनिकविचारकाणामप्यादराधारभूतेति। तदेवं गीता सर्ववेदसाररूपा सर्वदर्शनसमन्वयपरा सर्वाचार्यविचारकानामादरार्हा सती भारतीयदार्शनिकपरम्परायां स्वीयं महिमानमभिव्यनक्ति।

अपरं च, भारतीयदर्शनानां प्रधानाङ्गभूतायां प्रस्थानत्रय्यामपि गीतायाः स्वीयं महत्त्वं वर्तते। प्रस्थानत्रयं नाम उपनिषद्, ब्रह्मसूत्रम्, भगवद्गीता चेति सर्वजनीनमेव, तस्माद् भारतीयदर्शनवाङ्मये उपनिषदां ब्रह्मसूत्रस्य च यावन्महत्वम्, तावदेव गीताया अपि। अत एवाचार्याः स्वमतस्य प्रामाणिकत्वव्यवस्थापनार्थमीशाद्युपनिषदधिकृत्य ब्रह्मसूत्रमधिकृत्य च यथा भाष्याणि विरचयामासुः, तथैव गीतामधिकृत्यापि।

वस्तुतस्तूपनिषद्ब्रह्मसूत्राभ्यामपि गीता वैशिष्ट्यं भजते। तत्रोपनिषद्-ब्रह्मसूत्र-भगवद्गीतात्रयमपि मानवमात्रस्य हितार्थं तत्त्वज्ञानवितरणाय प्रवृत्तम्, अथाप्युपनिषद्-ब्रह्मसूत्रयोस्तत्त्वज्ञानवितरणमाध्यमत्वेन प्रयुक्ता भाषा क्लिष्टतरास्तीति तदुपदिष्टं तत्त्वज्ञानं न सर्वावगाहनसरलसुलभम्; भगवद्गीतायां तु सरलसुरभाषामाध्यमेन भगवान् श्रीकृष्णस्तत्त्वज्ञानमुपदिशत्यर्जुनव्याजेन सकलमानवकुलं प्रतीति तदुपदिष्टं ज्ञानं सर्वावगाहनसरलं सुलभं च। तस्माद् गीतोक्तं ज्ञानं धीमन्त इवाल्पधियोऽप्यवगन्तुमर्हन्तीत्युपनिषद्-ब्रह्मसूत्राभ्यामप्यधिकजनान् स्पृशति, तोषयति, कृतकृत्यांश्च करोति गीता। एवं गीता ह्यनेककारणैर्भारतीयदर्शनेषु विशिष्टं स्थानमलङ्करोति।

सिद्धान्तशिखामणिश्च शैवागमसाररूपः। आगमेषु शैवागमानां वैशिष्ट्यपूर्णं स्थानमस्ति। इमे शैवागमाः कामिकादिवातुलान्ताः अष्टाविंशतिसंख्याकाः। एतेषां

---

[१] भ. गी. १३.२४-२५

शैवागमानामुत्तरभागे वीरशैवसिद्धान्तो मूलतया निरूपितोऽस्ति। तदुक्तं भगवत्पादैः–

सिद्धान्ताख्ये महातन्त्रे कामिकाद्ये शिवोदिते।
निर्दिष्टमुत्तरे भागे वीरशैवमतं परम्।।[1] इति।

तस्माद्वीरशैवदर्शनस्य शैवागमेषु तावदेव महत्वम्, वेदानामन्तभागोपदिष्टानामुपनिषदां वेदेषु यावत्। एवं शैवागमोत्तरभागनिहितवीरशैवसिद्धान्त एव सिद्धान्तशिखामणेः प्रतिपाद्यो विषयः। तस्मादयं श्रीसिद्धान्तशिखामणिः शैवागमसाररूपः। अत एव ग्रन्थकारेण शिवयोगिशिवाचार्येण–

आलोक्य शैवतन्त्राणि कामिकाद्यानि सादरम्।
वातुलान्तानि शैवानि पुराणान्यखिलानि च।।[2]

इति शैवागमानां स्वीयग्रन्थस्योपजीव्यत्वमुक्तम्। तेनैव पुनः–

सर्वेषां शैवतन्त्राणामुत्तरत्वान्निरुत्तरम्।
नाम्ना प्रतीयते लोके यत्सिद्धान्तशिखामणिः।।[3]

इति सिद्धान्तशिखामणिः शैवागमशिखामणिरिति सूचितः।

वैदिकदर्शनेषु द्वैताऽद्वैतादिभेदेन यथा तात्त्विकभिन्नाभिप्रायो वर्तते, तथा शैवागमदर्शनेष्वपि तात्त्विकं वैमत्यं दरीदृश्यते। शैवमतेषु द्वैत–द्वैताद्वैत–अद्वैतभेदेन त्रिधा विभागः क्रियते। तत्र पाशुपत–सिद्धान्तशैवदर्शने द्वैतपरे, लकुलीशपाशुपत–श्रीकण्ठविशिष्टाद्वैत–वीरशैव–रसेश्वरदर्शनानि द्वैताद्वैतपराणि, नन्दिकेश्वदर्शन–प्रत्यभिज्ञा–क्रम–कुलदर्शनानि चाद्वैतपराणि।

सोऽयं वीरशैवसिद्धान्तस्तत्प्रतिपादकः सिद्धान्तशिखामणिर्वा यथा भगवद्गीता विभिन्नदार्शनिकविचाराणां समन्वयप्रतिपादिनी, तथा वैदिकदर्शनानामागमिकदर्शनानां वा समन्वयं प्रतिपादयति। अत एव सिद्धान्तशिखामणौ–

अगस्त्य! खलु सिद्धान्ता विख्याता रुचिभेदतः।
भिन्नाचारसमायुक्ता भिन्नार्थप्रतिपादकाः।।
सांख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा।

---

[1] सि. शि. ५:१५

[2] सि. शि. १.२५

[3] सि. शि. १.३१

एतानि मानभूतानि नोपहन्यानि युक्तिभिः।।
वेदः प्रधानं सर्वेषां सांख्यादीनां महामुने।
वेदानुसरणादेषां प्रामाण्यमिति निश्चितम् ।।[१]

इति रेणुकभगवत्पादा नानागमश्रवणजनितसंशयिनमगस्त्यं प्रति वेदानुवर्तिनां सांख्यादीनां खण्डनं न विधेयमिति निरूप्य, पुनः–

वेदैकदेशवर्तिभ्यः सांख्यादिभ्यो महामुने।
सर्ववेदानुसारित्वाच्छैवतन्त्रं विशिष्यते।।

शैवतन्त्रमिति प्रोक्तं सिद्धान्ताख्यं शिवोदितम्।
सर्ववेदार्थरूपत्वात् प्रामाण्यं वेदवत् सदा।।

सिद्धान्ताख्ये महातन्त्रे कामिकाद्ये शिवोदिते।
निर्दिष्टमुत्तरे भागे वीरशैवमतं परम्।।[२]

इति सांख्यादीनां वेदैकदेशित्वं सूचयित्वा, सर्ववेदमयस्य सिद्धान्तागमस्योत्तरभागे निर्दिष्टस्य वीरशैवदर्शनस्य सर्ववेदमयत्वं प्रतिपाद्य वीरशैवदर्शनस्य द्वैताद्वैतश्रुतीनां द्वैताद्वैतदर्शनानां च समन्वयरूपत्वं प्रबोधितवन्तः। एवं समन्वयप्रतिपादने एवास्य दर्शनस्य ग्रन्थस्य वा वैशिष्ट्यं महत्त्वं च दरीदृश्यते।

अत्रेदमवधेयम्– वास्तविकद्वैतप्रतिपादकेषु न्याय-वैशेषिक-सांख्य-योग-पूर्वमीमांसादर्शनेषु– "द्वा सुपर्णा सयुजा सखाया"[३] इत्यादिद्वैतश्रुतीनां यथावत्तयाऽवकाशेऽपि "एकमेवाऽद्वितीयं ब्रह्म"[४] इत्याद्यद्वैतश्रुतीनामनवकाशः। उत्तरमीमांसादर्शने त्वद्वैतश्रुतीनामवकाशत्वेऽपि द्वैतश्रुतीनामनवकाशः तस्मादेतानि दर्शनानि श्रुत्यैकदेशीनीत्युच्यन्ते। वीरशैवदर्शने तु बद्धावस्थायां शिवजीवयोर्द्वैतसत्यत्वम्, मुक्तावस्थायां च तयोरद्वैतसत्यत्वमङ्गीक्रियत इत्यत्रोभयश्रुतीनां समानरूपेण प्रामाण्यमुपपाद्यते। तस्मादिदं दर्शनं सर्वश्रुति-सर्वदर्शनसमन्वयात्मकम्। तदुक्तं भाष्यकृद्भिः श्रीपतिपण्डिताराध्यैः–

श्रुत्यैकदेशप्रामाण्यं द्वैताद्वैतमतादिषु।
द्वैताद्वैतमते शुद्धे विशेषाद्वैतसंज्ञिते।।

---

[१] सि. शि. ५.३–५
[२] सि. शि. ५.७–८,१४
[३] श्वे. उ. ४.६
[४] त्रि. म. ना. ३
[५] ब्र. सू., श्रीकर मङ्गलश्लो. १५

वीरशैवैकसिद्धान्ते सर्वश्रुतिसमन्वयः।।[५] इति।

अत एव डॉ. चन्द्रशेखरशिवाचार्याः (साम्प्रतीयकाशीज्ञानसिंहासनाधीश्वराः) श्रीसिद्धान्तशिखामण्यभिमतदार्शनिकसिद्धान्तैः साकं न्याय-वैशेषिक-सांख्य-योग-पूर्वमीमांसा-उत्तरमीमांसादर्शनाभिमतदार्शनिकसिद्धान्तानां सुचारुरूपेण समीक्षां विधाय- "यत्र यत्र द्वैताद्वैतदर्शनानि परस्परं विरुद्धार्थयोः श्रुत्योर्विषये कलहायन्ते, तत्र तत्र सर्वत्र वीरशैवदर्शनाचार्याः समन्वयदृष्ट्या कलहं निवारयन्ति"[१] इति सिद्धान्तशिखामणेर्वीरशैवदर्शनस्य वा समन्वयपरत्वमुपस्थापितवन्तः। तस्माद् भारतीयदर्शनेषु भगवद्गीताया इव सिद्धान्तशिखामणेर्विशिष्टं स्थानं महत्त्वं च वर्तते।

साम्प्रतमनयोः सामाजिकी उपयोगिता सांस्कृतिकमवाधानं च

साम्प्रतं भारतीयसंस्कृतिविरोधिन भारतीयसंस्कृतिर्जातिवादस्याधारेणोच्चनीचभावप्रचोदिका असमानताप्रतिपादिकेति तां संस्कृतिं निन्दन्ति। एवं निन्दाप्रवृत्तौ भारतीयसंस्कृतेः सम्पूर्णज्ञानस्याभावः, उत वा पूर्वाग्रहपीडितभावः कारणम्। भारतीयसंस्कृतेरङ्गभूत आगमशास्त्रे बहु प्रागेव तादृशोऽसमानतावादो निरस्तः, सर्वसाम्यवादो व्यवस्थापितश्च। एवमेव भगवद्गीतया सिद्धान्तशिखामणिना च मानवसमाजनिहितोच्चनीचभावनिराकरणपुरःसरं सर्वसमानतां व्यवस्थाप्य सर्वहितसाधनार्थं बहुप्रयासः कृतोऽस्ति। तस्मादिदानीन्तनसर्वकारो जातीयोच्चनीचभावमुच्छिद्य, स्त्रीपुरुषभेदभावं च विहाय सर्वसमानताया आधारेण समाजनिर्माणार्थं यत्प्रयत्नं विदधाति, स भगवद्गीतायां सिद्धान्तशिखामणौ च प्रागेव विहितोऽस्तीति ज्ञायते।

तत्र भगवद्गीतायां भगवान् श्रीकृष्णः "चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः"[२] इति ब्राह्मणादिवर्णविभागे तत्तद्व्यक्त्यर्जितगुणानि, तत्तद्व्यक्त्यनुष्ठितकर्माणि च कारणानीत्युक्त्वा ततः प्राचीनकाले विद्यमानं जन्मना निर्धार्यमाणं जातिवादं निराकृतवान्। अत्रायं भावः- वेदाध्ययनादिबौद्धिककर्मनिरता अहिंसा-सत्य-परोपकारादि-सद्गुणसुशोभिता ब्राह्मणाः, दुष्टनिग्रहशिष्टपरिपालनकर्मनिरता राजनीतिनिपुणाः क्षत्रियाः, अर्थार्जनकर्मनिरता व्यवहारकुशलिनो वैश्याः, प्राणिहिंसामांसभक्षणादिकर्मनिरताः परिचर्याकर्मनिरताश्च शूद्रा इति गुणकर्मणोराधारेण जातिवादो व्यवस्थापितस्तत्र गीतायाम्। उक्तं च भगवता पुनः-

ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः।।[३] इति।

---

[१] सि. शि. सं., पृ. ४०३

[२] भ. गी. ४.१३

[३] भ. गी. १८.४२

वीरशैवसम्प्रदायेऽपि–

य एव जीवान् विनिहन्ति नित्यं
स एव भाव्योऽन्त्यज इत्यजस्त्रम्।
तथैव योऽश्नाति परान्नमेव
स एव भाव्योऽन्त्यज इत्यजस्त्रम्।।
यैरेव सर्वत्र हितं विचिन्त्यते
तेषां कुलं नैव विचारणीयम्।
सर्वेषु जीवेषु हिताभिशंसकाः
सद्भार्यभक्ताः कुलजाः प्रकीर्तिताः।।[1]

इति शिवशरणानामुक्त्या सद्गुणसमन्वितानामुत्कृष्टकुलोत्पन्नत्वम्, दुर्गुणयुक्तानां च हीनकुलजन्मत्वं व्यवस्थाप्यते।

अपरञ्च "तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः"[2] "शूगस्य तदनादरश्रवणात् सूच्यते हि"[3] इत्यादिश्रुतिसूत्राभ्यां शूद्राणां ज्योतिष्टोमादियाज्ञिककर्मणि ब्रह्मविद्याध्ययने चानधिकारित्वं प्रतिपाद्यते। एवमेव "स्त्रीशूद्रौ नाधीयेताम्" इति स्मृत्या स्त्रीणामपि तत्राधिकारो नास्तीत्युच्यते। दुर्बुद्धयो दुराचारिणो गुह्यतममिदमौपनिषदं ब्रह्मसौत्रिकं शास्त्रमवगच्छेयुस्तर्हि तस्य दुरुपयोगमेव कुर्युरित्युद्देशेन तत्र तेषामनधिकारत्वं व्यवस्थापितमस्ति, तथापि ये च शूद्रकुलजन्मानोऽपि भगवद्भक्तिनिरताः सदाचारिणश्च सन्ति, तेषां तत्राधिकारविरोधोऽयं महान् पक्षपातपरः प्रभवति। तस्मादेव गीतायाम्–

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्।।[4]

इति स्त्री–शूद्राणामपि भगवद्भक्तानां परमगत्यधिगमनार्हत्वप्रतिपादनव्याजेन तदुपायभूतभगवदर्चन–भगवज्ज्ञानादिष्वप्यधिकारः संसूचितः। अनेन भगवद्गीता श्रुति–सूत्रयोः प्रतीयमानं पक्षपातं परिहृत्य समाजे स्थितां जातीयामसानतां दूरीकृत्य सर्वेषां हितार्थं प्रवृत्तेति ज्ञायते।

---

[1] भ. गी. वीरशैवभाष्य २.२७

[2] तै. सं. ७.१.१.६

[3] ब्र, सू. १.३.४

[4] भ. गी. ९.३२

वीरशैवदर्शने शिवानुग्रहादिलक्षणशक्तिपातविशिष्टानामेव शिवदीक्षा प्रदेयेति निरूप्यते। सोऽयं शक्तिपातो न केवलमुत्तमकुललब्धजन्मनामेव भवति, अपि तु शिवभक्ति–गुरुनिष्ठा–सदाचाराद्युत्कृष्टगुणगणसमन्वितानां हीनकुलप्राप्तजन्मनामपि भवति। तस्माद् गुणयोग्यताया आधारेण सर्वेषामपि समानरूपेण शिवदीक्षा प्रदीयते। एवं शिवदीक्षाप्राप्त्यनन्तरं पूर्वतनकुलं नावशिष्यते। अत एवाचार्यचरणै रेणुकभगवत्पादैः–

ब्राह्मणः क्षत्रियो वापि वैश्यो वा शूद्र एव वा।
अन्त्यजो वा शिवे भक्तः शिववन्मान्य एव सः।।

शिवभक्तिसमावेशे क्व जातिपरिकल्पना।
इन्धनेष्वग्निदग्धेषु को वा भेदः प्रकीर्त्यते।।[1]

इति शिवभक्तिलक्षणशक्तिपातोपलब्धये शिवदीक्षाप्राप्तये च जातेरनवरोधकत्वमुक्त्वा सुखैकसाधनभूतधर्मार्जने सर्वेषां समानरूपेणाधिकारः प्रदत्तः।

एवमेवैतादृशदीक्षायां पुरुषाणां यावानधिकारः, स्त्रीणामपि तावानेवेत्यप्यङ्गीक्रियते वीरशैवदर्शने। दीक्षाप्राप्तस्येष्टलिङ्गस्य पूजाया यावज्जीवं कर्तव्यत्वनियमात्, ऋतुकाले सूतकप्राप्तौ स्त्रीणामिष्टलिङ्गपूजाया लोपो मा भूदिति यथाऽकरस्पर्शयोग्यापि जिह्वा मन्त्रोच्चारणे सदा सुनिर्मला, तथा ऋतुमती नारी यद्यप्यकरस्पर्शयोग्या, तथापीष्टलिङ्गपूजामात्रार्थं सुनिर्मला भवतीति स्वेष्टलिङ्गपूजायामशौचं निषिध्य ऋतुमत्या अपि लिङ्गपूजाधिकारं प्रदाय वीरशैवाचार्या धार्मिकजीवने स्त्रीपुरुषयोर्भेदनिराकरणपूर्वकं साम्यं प्रतिष्ठापयामासुः। तदुपदिष्टमाचार्यैः–

लिङ्गार्चनरतायाश्च ऋतौ भार्या न सूतकम्।
तथा प्रसूतिकायाश्च सूतकं नैव विद्यते।।

गृहे यस्मिन् प्रसूता स्त्री सूतकं नात्र विद्यते।
शिवपादाम्बुसंस्पर्शात् सर्वपापं प्रणश्यति।।[2] इति।

तस्मादेवं भगवद्गीतायां सिद्धान्तशिखामणौ चाध्यात्मपथानुसरणे धार्मिकाचरणविषये ब्राह्मण–क्षत्रिय–वैश्य–शूद्रनामकवर्णभेदं स्त्री–पुरुषयोर्भेदं च निराकृत्य, योग्यताया आधारेण सर्वेभ्योऽपि समानरूपेण तत्राधिकारं प्रदाय, साम्प्रतं भारतीयसंस्कृतेर्दुष्प्रचारकारणीभूतामसंमानतां दूरीकृत्य तद्व्याजेन भारतीयसंस्कृति-

---

[1] सि. शि. ११/५४-५५ ।

[2] सि. शि. ९/४४-४५ ।

संशोधनं तत्संरक्षणं च विहितं भगवता श्रीकृष्णेन भगवत्पादै रेणुकाचार्यैश्चेति गीता-सिद्धान्तशिखामण्योर्भारतीयसंस्कृतिसंरक्षणे महत्त्वपूर्णमवदानमस्ति।

प्रस्तुतनिबन्धस्य विहगावलोकनम्

कस्मिंश्चिदपि धर्मे नैतिक-साम्प्रदायिक-दार्शनिकभेदेन त्रिविधा विचाराः प्रतिपादिता भवन्ति। तत्र सत्य-अहिंसा-परोपकार-दया-क्षमादिसद्गुणसम्बद्धा नैतिकविचाराः, लिङ्ग-भस्म-चक्र-चन्दनधारणादितत्तद्धर्मासाधारणाचरणसम्बद्धाः साम्प्रदायिक-विचाराः, ईश्वर-जीव-जगत्-बन्ध-मोक्षादीनां स्वरूपसम्बद्धाश्च दार्शनिकविचारा इति ज्ञेयम्।

वीरशैवदर्शने इमे त्रिविधा अपि विचाराः प्रतिपादिताः सन्ति। तथा हि-

अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दया क्षमा।
दानं पूजा जपो ध्यानमिति धर्मस्य संग्रहः।।[१]

इत्यत्र रेणुकभगवत्पादैर्नैतिका विचारा उपदिष्टाः। एवमेवात्राष्टावरण-पञ्चाचार-षट्स्थलोपासनात्मकवीरशैवीयासाधारणाचरणरूपेण साम्प्रदायिकविचाराः, शिव-जीव-जगत्-बन्ध-मोक्षानां स्वरूपसम्बद्धदार्शनिकविचाराश्च प्रतिपादिता एव।

प्रत्येकस्मिन् धर्मे नैतिकविचाराः प्रायः सर्वसमाना एव भवन्ति, साम्प्रदायिक-विचारास्तु धर्मे धर्मे भिन्नभिन्नाः। दार्शनिकविचाराः क्वचिद् भिन्नाः क्वचिच्चाभिन्ना वर्तन्ते। अत एव तुलनात्मकमध्ययनम्, समीक्षा, समन्वयो वा दार्शनिकविचारेष्वेव प्राय उपपद्यते। अतः प्रबन्धेऽस्मिन् सिद्धान्तशिखामण्यभ्युपगतवीरशैवदर्शनस्येश्वर-जीव-जगत्-बन्ध-मोक्ष-मोक्षोपायाख्यदार्शनिकतत्त्वैः साकं भगवद्गीतोक्तदार्शनिकतत्त्वानां समीक्षायै तयोर्दार्शनिकसमन्वयव्यवस्थापनाय च प्रयासः कृतः ।

तत्र तावद्गीतायाम्-

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च।।[२]

इति परब्रह्मणः सगुणनिर्गुणोभयरूपत्वमुक्त्वा, "ये त्वक्षरमनिर्देश्यमव्यक्तं"[३]--इत्यादिना तस्य निर्गुणस्वरूपस्य वर्णनम्, "कविं पुराणमनुशासितारं"[४]---इत्यादिना च सगुणस्वरूपस्योपवर्णनं कृतम्।

---

[१] सि. शि. १६.५९
[२] भ. गी. १३.१४
[३] भ. गी. १२.३
[४] भ. गी. ८.९

वीरशैवदर्शनेऽविनाभावसम्बन्धेन परशिवनिष्ठायाः शक्तेरविभागपरामर्श-विभागपरामर्शेत्यवस्थाद्वैविध्यमङ्गीकृत्य, सृष्टिपूर्वकालेऽविभागपरामर्शदशायां सा परशिवे सच्चिदानन्दबोधरूपेण तिष्ठति, सृष्टिकाले विभागपरामर्शावस्थां प्राप्ता इच्छा-ज्ञान-क्रियारूपेण निवसतीति व्यवस्थाप्य, इच्छाज्ञानादिरूपेण विभागमप्राप्तया सच्चिदानन्दरूपया शक्त्या विशिष्टस्य परशिवस्य निर्गुणत्वम्, इच्छादिरूपेण विभागमधिगतस्य शक्तिविशिष्टस्य परशिवस्य सगुणत्वं प्रतिपाद्यते। अत एवात्र निर्गुणपरशिववत् सगुणस्यापि सत्यत्वम्, न तु कल्पितत्वम्। तस्माद् भगवद्गीतायाः परमतत्त्वस्य सगुणनिर्गुणोभयरूपत्वकल्पना सगुणरूपत्वैकसत्यत्ववादिनामपेक्षया निर्गुणरूपत्वैकसत्यत्ववादिनामपेक्षया चोभयसत्यत्ववादिनि वीरशैवदर्शने सर्वभावेन समन्विता भवति।

गीतायां शरीरेन्द्रिबुद्धिव्यतिरिक्तस्य जीवात्मनः "सर्वस्य चाहं हृदि सन्निविष्टः"[१], "हृद्देशेऽर्जुन तिष्ठति"[२] इत्यादिषु शरीरस्यैकदेशसत्त्वं निरूप्य तन्मुखेन तस्याणुरूपत्वं निर्दिष्टम्, अन्यथा तस्यैकदेशसत्त्वानुपपत्तिः। सिद्धान्तशिखामणौ च–

आत्मापि सर्वभूतानामन्तःकरणमाश्रितः।
अणुभूतो मलासङ्गादादिकर्मनियन्त्रितः।।[३]

इति जीवात्मनोऽणुरूपत्वस्य स्पष्टं निर्देशात् जीवात्मनो विभुत्वव्यवस्थापक-मतानामपेक्षयाऽणुरूपत्वप्रतिपादके वीरशैवदर्शने जीवात्मस्वरूपसम्बद्धो गीताविषयः समन्वितो भवति।

सोऽयं जीवात्मा परमात्मनोंऽश इत्युभयत्र स्वीक्रियते। उक्तं हि तदंशत्वम्– "ममैवांशो जीवलोके जीवभूतः सनातनः"[४] इति गीतया; "अनाद्यविद्यासम्बन्धात्तदंशो जीवनामकः"[५] इति सिद्धान्तशिखामणिना च। तस्माज्जीवपरमात्मनोरंशांशिभावः। अयमंशांशिभावो न ह्यौपाधिकः, किन्तु अङ्गाङ्गिभावरूपेण वास्तविक इति वीरशैवदर्शने स्वीक्रियते। अत एव तत्र–

अनाद्यन्तमजं लिङ्गं तत्परं परमं प्रति।
यद्गच्छति महाभक्त्या तदङ्गमिति निश्चितम्।।[६]

---

१. भ. गी. १५.१५
२. भ. गी. १८.६१
३. सि. शि. १८.७
४. भ. गी. १५.७
५. सि. शि. ५.३४
६. अनु. सू. ४.२-३

इत्यनुभवसूत्रोक्तिप्रमाणेन जीवस्याङ्गत्वं शिवस्याङ्गित्वं च निर्दिश्य तयोर्वास्तविकमंशांशित्वं व्यवस्थापितम्।

गीतायां "उत्क्रामन्तं स्थितं वापि"[1] इत्यादिभिर्जीवात्मनो गमनागमनोत्क्रमणत्व-निरूपणव्याजेन तस्य वास्तविकमंशत्वमुक्तम्। न च लिङ्गशरीरस्योत्क्रमणादिकमेवात्मनि तदुपचार इति वक्तव्यम्,

मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति।
शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः।।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्।।[2]

इति गीतायां शरीरस्वामित्वेनेश्वरशब्देनोक्तस्य जीवात्मनो गमनसमये मन आदीनामपि गमनप्रतिपादनात्। तस्मादात्मनोंऽशत्वस्य वास्तविकत्वमेवेति गीताभिप्रायः, स चाङ्गाङ्गिभावरूपेण जीवपरमात्मनोरंशांशिभावस्य वास्तविकत्व-प्रतिपादके वीरशैवदर्शने समन्वयं याति।

अपरं च गीतायां "द्वाविमौ पुरुषौ लोके"[3], "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः"[4] इत्यादिषु जीवपरमात्मनोर्भेदः, "अहमात्मा गुडाकेशः सर्वभूताशयस्थितः"[5], क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत"[6] इति तयोरभेदश्च प्रतिपादितः। अत्र भेदोक्तीनामेव सत्यत्वेऽभेदप्रतिपादकवचनानां वैयर्थ्यम्, अभेदस्यैव सत्यत्वे च भेदोपपादकवचनानां वैयर्थ्यमिति भेदाभेद एव गीताभिमत इति निश्चीयते।

सिद्धान्तशिखामण्युक्तवीरशैवदर्शनेऽयं भेदाभेद एवं व्यवस्थाप्यते– शिवः सर्वज्ञत्वादिशक्तिसमन्वितः, जीवश्च तदंशः किञ्चिज्ज्ञत्वाद्यल्पशक्तिसमन्वित इति बद्धावस्थायां शिवजीवयोर्वैधर्म्यात् तयोर्भिन्नत्वम्। एवं तयोर्भिन्नत्वेऽपि चेतनत्वेनाभिन्नयोस्तयोरुपासनमहिम्ना जीवः स्वशक्तिविकासमवाप्य मुक्तावस्थायां शिवाभिन्नत्वमुपैति। अनेनैव हेतुनात्र दर्शने भेदाभेदोपपादकश्रुतीनामपि समन्वयो भवति। तस्माज्जीवपरमात्मनोर्भेदसत्यत्वप्रतिपादकद्वैतमतानामपेक्षया, अभेदसत्यत्व-

---

१. भ. गी. १५.१०
२. भ. गी. १५.७-८
३. भ. गी. १५.१६
४. भ. गी. १५.१७
५. भ. गी. १०.२०
६. भ. गी. १३.२

प्रतिपादकाद्वैतमतानामपेक्षया च भेदाभेदोभयसत्यत्वमङ्गीकुर्वति वीरशैवदर्शने गीतोपपादकभेदाभेदवचनानां बहु समन्वयो भवति।

तत्र गीतायां "तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता"[1] इति परमेश्वरस्य जगन्निमित्तकारणत्वम्, "यच्चापि सर्वभूतानां बीजं तदहमर्जुन"[2] इति च तस्य जगदुपादानत्वं प्रतिपादितमिति प्रकृतिविशिष्टपरमेश्वरस्य प्रपञ्चं प्रत्यभिन्ननिमित्तोपादानकारणत्वं गीताभिप्रेतमिति ज्ञायते। वीरशैवदर्शने च "न शिवेन विना शक्तिर्न शक्तिरहितः शिवः"[3] इत्यागमोक्त्याऽविनाभावसम्बन्धेन शक्तिः परशिवनिष्ठा वर्तते। एवं शिवनिष्ठा विमर्शशक्तिः स्वीयेऽविभागपरामर्श-विभागपरामर्शाख्येऽवस्थाद्वये प्रथमावस्थायां सङ्कुचितकूर्माङ्गभङ्गिवत् सम्पूर्णं जगत् स्वस्मिन् विन्यस्य परशिवे तूष्णीं तिष्ठति, सृष्टिसमये च द्वितीयामवस्थामापन्ना जगद्रूपेण परिणमते। एवं स्वाभिन्नशक्त्या परमेश्वरो जगदिदं सृजतीति तस्याभिन्नानिमित्तोपादानत्वं व्यवस्थाप्यते। अत एव सिद्धान्तशिखामणौ–

जगत्सिसृक्षुः प्रथमं ब्रह्माणं सर्वदेहिनाम्।
कर्तारं सर्वलोकानां विदधे विश्वनायकः।।[4]

इति शिवस्य जगन्निमित्तत्वम्,

यस्मादेतत् समुत्पन्नं महादेवाच्चराचरम्।
तस्मादेतन्न भिद्येत यथा कुम्भादिकं मृदः।।[5]

इति तस्य जगदुपादानत्वं च प्रतिपादितम्। तस्मादत्रापि गीताभिप्रायो वीरशैवदर्शन एव समन्वयं याति।

शक्तिविशिष्टपरशिवोत्पन्नमिदं जगत् कल्पितमवास्तविकं वा नास्ति, अपि तु सत्यं वास्तविकमिति गीताभिप्रायः। अत एव तत्र–

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्।
अपरस्परसम्भूतं किमन्यत् कामहैतुकम्।।

---

[1] भ. गी. १४.४
[2] भ. गी. १०.३८
[3] वी. आ. चं., पृ. ७
[4] सि. शि. २.१४
[5] सि. शि. १०.६३

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः।।[1]

इति जगतोऽसत्यत्ववादं निरस्य, "न तदस्ति विना यत् स्यान्मया भूतं चराचरम्"[2] इत्यादिना परमेश्वरस्य सर्वजगन्मयत्वं च प्रतिपाद्य,

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्।।[3]

इति जगतः सृष्टिपूर्वं प्रलयानन्तरं च प्रकृत्यां सूक्ष्मरूपेण सत्त्वं निरूप्य च जगतः सत्यत्वं व्यवस्थापितम्।

वीरशैवसिद्धान्तेऽपि– "तथा शिवात् समुत्पन्नं शिव एव चराचरम्"[4], इत्यादिषु प्रपञ्चस्य शिवस्वरूपत्व–प्रतिपादकसिद्धान्तशिखामणिप्रमाणेन जगतः सत्यत्वमङ्गीकृतम्। अत एव तत्र भवद्भिः श्रीपतिपण्डिताराध्यैः–

जीवः सत्यं जगत्सत्यं शिवः सत्यं स्वभावतः।
तयोरभेदः सत्यं वा क्रिमिभ्रमरयोरिव।।[5]

इत्यागमोक्तिं प्रमाणयद्भिः प्रपञ्चस्य सत्यत्वं व्यवस्थापितम्। तस्मादत्रापि गीताभिप्रायो वीरशैवदर्शनस्य साम्यमेव भजते।

गीतायाम् –

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम्।।[6]

इति सत्त्व–रजस्–तम इत्याख्यास्त्रयो गुणा विभिन्नभावैर्जीवं बध्नन्तीति प्रतिपादनाद् गीतानुसारं गुणत्रयमेव बन्धः। सिद्धान्तशिखामणौ च "जीवत्वं दुःखसर्वस्वं तदिदं मलकल्पितम्"[7] इत्याणव–मायीय–कार्मिकनामकस्य मलत्रयस्य बन्धत्व–प्रतिपादनाद् वीस्शैवदर्शने मलत्रयं बन्धः। तस्माद् बन्धविषये गीतासिद्धान्त–

---

[1] भ. गी. १६.८-९
[2] भ. गी. १०.३९
[3] भ. गी. [illegible].७
[4] सि. शि. १७.६५
[5] ब्र. सू. श्रीकर २.३.४०
[6] भ. गी. १४.५
[7] सि. शि. १८.१७

शिखामण्योर्वैमत्यं प्रतीयते, किन्तु यैर्भावैर्गुणत्रयं जीवं निबध्नाति, मलत्रयमपि तैरेव भावैर्जीवं बध्नातीत्यत्रोभयोर्बन्धविषये समन्वय उपपद्यते। तथा हि– आणवमलावरणेन परमात्मनो भिन्नं जीवं सत्त्वगुणः सुखज्ञानसङ्गाभ्याम्, रजोगुणः कार्ममलश्च शुभाशुभकर्मप्रेरकत्वेन, तमोगुणो मायीयमलश्च मोहाभिवर्धकत्वेन च बध्नन्तीति गीतासिद्धान्तशिखामण्योर्बन्धविषयेऽप्युपपद्यते समन्वयः।

एवं बन्धत्वेनाङ्गीकृतस्य गुणत्रयस्य निवृत्तिपूर्वकं परमेश्वरप्राप्तिरेव मोक्ष इति गीतायाम्, मलत्रयस्य निवृत्तिपूर्वकं लिङ्गाङ्गसामरस्यरूपशिवत्वावाप्तिरेव मोक्ष इति सिद्धान्तशिखामणौ चाङ्गीक्रियते। स च स्वर्गादिवन्न क्षणिकः, अपि तु नित्यः शाश्वतः। अत एव भगवता श्रीकृष्णेन–

> आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन।
> मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते।।[1] इति।

भगवत्पादै रेणुकाचार्यैश्च

> कुतो ब्रह्मा कुतो विष्णुः कुतो रुद्रः कुतो रविः।
> साक्षात्कृतपरानन्दविलयस्य महात्मनः ।।[2]

इत्येवं मोक्षावस्थाया ब्रह्मलोकादेरतुलनीयत्वमुक्तम्। एवं बन्ध–मोक्षस्वरूपेऽपि गीता–सिद्धान्तशिखामण्योः समन्वयः सम्भवति।

एतादृशमोक्षप्राप्तिसाधनत्वेन गीतायां ज्ञान–कर्म–ध्यान–भक्तीनां प्रतिपादनं कृतम्। तत्र गीतायां ज्ञानस्वरूपप्रतिपादनावसरे "न हि ज्ञानेन सदृशम्"[3] इत्यादिना ज्ञानस्यैवोत्कृष्टत्वम्, कर्मस्वरूपनिरूपणावसरे च "तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते"[4] इत्यादिना च कर्मण एवोत्कृष्टत्वम्, एवमेव ध्यानस्वरूपनिरूपणावसरे ध्यानस्य, भक्तिस्वरूपनिरूपणावसरे च भक्तेरुत्कृष्टत्वं प्रतिपादितम्। वस्तुतस्त्वत्र ज्ञानादीनां सर्वेषां समानरूपेण मोक्षोपायत्वं गीताभिमतम्।

किञ्च, "सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः"[5] इति "एकं सांख्यं च योगं च यः पश्यति स पश्यति"[6] इति च ज्ञानकर्मणोरेकत्वप्रतिपादनाद् गीता ज्ञान–कर्मसमुच्चयप्रतिपादिनीति ज्ञायते। वीरशैवदर्शने–

---

[1] भ. गी. ८.१६
[2] सि. शि. २०.६१
[3] भ. गी. ४.३
[4] भ. गी. ५.२
[5] भ. गी. ५.४
[6] भ. गी. ५.५

अन्धपङ्गुवदन्योन्यसापेक्षे ज्ञानकर्मणी।
फलोत्पत्तौ विरक्तस्तु तस्मात्तद्द्वयमाचरेत्।।
ज्ञानेनाचारयुक्तेन प्रसीदति महेश्वरः।
तस्मादाचारवान् ज्ञानी भवेदादेहपातनम् ।।[1]

इति रेणुकभगवत्पादोक्त्या ज्ञानकर्मणोः समसमुच्चयो मोक्षोपायत्वेनाङ्गीकृतः। षट्स्थलोपासनेऽन्तर्लिङ्गोपासनप्रसङ्गे ध्यानस्यापि मोक्षोपायत्वं व्यपदिष्टम्। एवमेव भक्तेरपि निःश्रेयसोत्पादनहेतुत्वमिति तस्या अपि मोक्षोपायत्वमुक्तमेव वीरशैवदर्शने।

अपरं च, वीरशैवसिद्धान्तोपपादिते षट्स्थलोपासनायां साधकः कर्मादीनां सर्वेषामनुष्ठानं करोति। तथा हि– साधको भक्तस्थले माहेश्वरस्थले च कर्मयोगप्राधान्येन, प्रसादिस्थले प्राणलिङ्गिस्थले च ध्यानयोगप्राधान्येन, शरणस्थले ऐक्यस्थले च ज्ञानयोगप्राधान्येन लिङ्गरूपं परशिवमनुसन्धत्ते। अत्र भक्तियोगस्तु सर्वेषु स्थलेषु समानरूपेण विराजत इति जीवस्याध्यात्मिकविकासाय प्रचोदयति तान् सततम्। एवं भक्तिमान् नरः तत्तत् स्थले तत्तद्योगं प्रधानत्वेन इतरान् स्वल्पमात्रया च समाचरन् शिवसामरस्यमुपैतीति प्रतिपाद्यते। तस्मात् केवलं कर्मणः, केवलं ज्ञानस्य, केवलं ध्यानस्य, केवलं भक्तेर्वा मोक्षोपायत्वप्रतिपादकमतानामपेक्षया कर्म–ज्ञान–ध्यान–भक्तीनां[2] सर्वेषामपि मोक्षोपायत्वव्यवस्थापके सिद्धान्तशिखामण्युक्तवीरशैवदर्शने सर्वो गीताभिप्रायः सर्वभावेन समन्वितो भवति।

सोऽयं वीरशैवधर्मः स्वधर्मनिष्ठां परधर्मसहिष्णुतां च प्रतिपादयन् मानवकुलस्य शान्त्यर्थं प्रयतमानोऽस्ति। अत एवास्ति वीरशैवशब्दस्य व्युत्पत्तिरित्थमपि– "विरोधरहितं शैवं वीरशैवं विदुर्बुधाः"[3] इति। अपरं चास्य दर्शनस्य मूलाधारभूते शिवागमेऽपि–

---

[1] *सि. शि. १६.११–१४*

[2] *सोऽयमर्थो भङ्ग्यन्तरेण शैवागमेष्वपि समुपपद्यते। तथा हि– रत्नत्रयकारेण श्रीकण्ठशिवाचार्येण श्लोकोऽयं समुद्धृतः–*

सदाशिवपदं योगाच्चर्यातो वाऽथ दीक्षया।
प्राप्यते चित्तभेदेन मोक्षो वाऽथ चतुष्टयात् ।। इति। (अष्टप्रकरण, पृ. १७३)

अघोरशिवाचार्यः श्लोकममुं विस्तरेण सप्रमाणं व्याख्याते। तत्र स निदर्शयति यत् श्लोकोऽयं मतङ्गपारमेश्वराख्यस्य प्रसिद्धागमस्येति। साम्प्रतमागमोऽयं रामकण्ठवृत्तिना सह पाण्डीचेरीतः प्रकाशितः। तत्र विद्यापादे (२६.६३) श्लोकोऽयमुपलभते। अत्र रामकण्ठः "मोक्षस्त, चतुष्टयात् अर्थात् समुच्चितादेव नैकस्मात् इति व्याख्यातवान्।

[3] *क्रि. सा., भा. १, पृ. ११*

केचिद्भजन्त्यन्यदेवं केचिन्नेच्छन्ति पार्वति।
केचिद्विवाहमिच्छन्ति केचिन्नेच्छन्ति शैलजे।।

स्त्रियस्तु लिङ्गधारिण्यः पुरुषा विष्णुसेवकाः।
पुरुषा लिङ्गिनः केचिद्वैष्णव्यस्तु स्त्रियस्तथा।।
तयोरहं गतिश्चैव मत्प्रीतिरुभयोः समा।।[1]

इत्युक्तम्। अनेन वीरशैवाणां स्वधर्मनिष्ठया साकं सर्वधर्मसमादरभावोऽभिव्यज्यते। अत एवात्र गीतायाः–

येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ।।
समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।।[2]

इत्यादयो सर्वभावसमादरपरा विचारा अपि वीरशैवदर्शने समन्विता भवन्ति। ईदृशस्य धर्मस्य तत्त्वप्रतिपादकोऽयं सिद्धान्तशिखामणिः। अत एव तत्र रेणुकभगवत्पादाः–

सांख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा।
एतानि मानभूतानि नोपहन्यानि युक्तिभिः।।[3]

इति सर्वेषां शान्त्यर्थं प्रवृत्तेषु भारतीयदर्शनेषु सिद्धान्तवैमत्या समुत्पन्नं परस्परं खण्डनमण्डनादिकं निराकृत्य समन्वयार्थं प्रयतितवन्तः। अत एव समन्वयार्थं प्रवृत्ताया गीताया अभिप्रायोऽस्मिन् सिद्धान्ते बहुसमन्वितो भवति। तस्मात्–

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्।।

इति विश्वकुटुम्बभावनायुक्तैर्वीरशैवाचार्यैः सिद्धान्तशिखामणौ प्रतिपादितमिदं वीरशैवदर्शनं सर्वस्यापि जगतो हिताय अभ्युदयाय च प्रभवेदित्यत्र न कश्चन संशयावकाशः। अतस्तदनुगामिना मयाऽन्ते–

---

[1] पारमे. १७.१९-२१

[2] भ. गी. ९.२३, २९

[3] सि. शि. ५.४

तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना
नैको ऋषिर्यस्य मतं प्रमाणम्।
धर्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ।।[1]

इति महाभारतीययुधिष्ठिरवचनमेव मुहुर्मुहुरनुस्मृत्य विरम्यते "श्रीसिद्धान्त-शिखामणि-भगवद्गीतयोर्मीमांसा" इति नाम्नः शोधग्रन्थस्य लेखनव्यापारादिति शिवम्।

##

---

[1] म. भा., वनपर्व., ३१३.११७

सहायक-ग्रन्थसूची

१. अनुभवसूत्रम् शैवभारती शोधप्रतिष्ठानं जङ्गमवाडीमठ, वाराणसी, १९९८ ई.।

२. अमरकोशः, जि. विष्णुमूर्ति भट्ट, मैसूर, १९७४ ई.।

३. अष्टप्रकरणम्, सं. सं. वि. वि. वाराणसी, १९८८ ई.।

४. ईशाद्यष्टोत्तरशतोपनिषदः, व्यसप्रकाशन मानमन्दिर वाराणसी, १९९३ ई.।

५. ईशावास्योपनिषत् शाङ्करीव्याख्या, शैवभारती शोधप्रतिष्ठानं जङ्गमवाडीमठ वाराणसी, १९९६ ई.।

६. उपनिषद्वाक्यमहाकोशः, चौखम्बा विद्याभवन वाराणसी, १९९६ ई.।

७. कारणागमः, शै. भा. शो. प्र. जङ्गमवाडीमठ, वाराणसी, १९९४ ई.।

८. केनोपनिषत्शाङ्करीव्याख्या, शै. भा. शो. प्र. जङ्गमवाडीमठ, वाराणसी, १९९६ ई.।

९. क्रियासारः, भाग १-३, प्राच्यविद्या संशोधनालय, मैसूर, १९५४ ई.।

१०. गुरुवंशकाव्यम्, वाणीविलास मुद्राणालय, श्रीरङ्गम् ।

११. चन्द्रज्ञानागमः, शै. भा. शो. प्र. जङ्गमवाडीमठ, वाराणसी, १९५४ ई.।

१२. तन्त्रयात्रा, रत्ना प्रकाशन, कमच्छा, वाराणसी १९८२ ई.।

१३. तन्त्रालोकः, काश्मीर संस्कृत ग्रन्थावलिः, श्रीनगर, १९३६ ई.।

१४. तर्कसंग्रहः, मोतीलाल-बनारसीदास, वाराणसी, १९८५ ई.।

१५. देवीकालोत्तरागमः, शै. भा. शो. प्र. जङ्गमवाडीमठ, वाराणसी, २००० ई.।

१६. निगमागमीय संस्कृतिदर्शनम्, शै. भा. शो. प्र. जङ्गमवाडीमठ, वाराणसी, १९९५ ई.।

१७. न्यायसिद्धान्तमुक्तावली 'बालप्रिया' हिन्दी व्याख्या, चौखम्बा सुरभारती प्रकाशन वाराणसी १९८९ ई.।

१८. पातञ्जलयोगदर्शनम्, चौखम्बा संस्कृत संस्थान, वाराणसी, १९७० ई.।

१९. पारमेश्वरागमः, शै. भा. शो. प्र. जङ्गमवाडीमठ, वाराणसी, १९९५ ई.।

२०. प्रशस्तपादभाष्यम्, न्यायकन्दलीसंवलितम्, सं. सं. वि. वि., वाराणसी, १९७७ ई.।

२१. बृहदारण्यकोपनिषत्, शाङ्करभाष्यम्, गीताप्रेस, गोरखपुर।

२२. ब्रह्मसूत्रशाङ्करीवृत्तिः, शै. भा. शो. प्र. जङ्गमवाडीमठ, वाराणसी, १९७८ ई.।

२३. ब्रह्मसूत्रश्रीकरभाष्यम्, १-२ भाग, प्राच्यविद्या संशोधनालय, मैसूर, १९७४ ई.।

२४. भास्करी, सरस्वतीभवन टेक्स्ट नं ८३, इलाहाबाद, १९५० ई.।

२५. मनुस्मृतिः, मन्वर्थमुक्तावलीसमेता, खेमराज श्रीकृष्णदास, बम्बई, १९४५ वि. सी.।

२६. महाभारतम् (वनपर्व, शान्तिपर्व), चित्रशाला प्रेस, पुणे, १९३०, १९३२ ई.।

२७. मुकुटागमः, शै. भा. शो. प्र. जङ्गमवाडीमठ, वाराणसी, १९९४ ई.।

२८. योगवासिष्ठः, भाग १-२, निर्णयसागर प्रेस, १९७८ ई.।

२९. योगसूत्रभाष्यम्, तत्त्ववैशारदीसहितम्, जीवानन्द विद्यासागर, कलकत्ता, १९४० ई.।

३०. योगसूत्रभोजवृत्तिः, जीवानन्द विद्यासागर, कलकत्ता, १९३६ ई.।

३१. रघुवंशमहाकाव्यम्, छन्नूलाल ज्ञानचन्द पाठक, वाराणसी, १९५९ ई.।

३२. रत्नत्रयम्, वाणीविलास मुद्रणालय, श्रीरङ्गम् १९२३ ई.।

३३. लिङ्गधारणचन्द्रिका, शैवभारती भवन जङ्गमवाडीमठ, वाराणसी, १९८८ ई.।

३४. लुप्तागमसंग्रहः, भा. २ सं. सं. वि. वि., वाराणसी १९८३ ई.।

३५. वातुलशुद्धाख्यतन्त्रम्, (तन्त्रसंग्रहः, भा.१) सं. सं. वि. वि. वाराणसी १९७० ई.।

३६. वायुपुराणम्, खेमराज श्रीकृष्णदास, बम्बई, १९३३ ई.।

३७. विशेषार्थप्रकाशिका, मुरुघामठ, धारवाड, १९६१ ई.।

३८. वीरशैवसदाचारसंग्रहः, वीरशैवलिङ्गिब्राह्मणग्रन्थमाला, सोलापुर १९०५ ई.।

३९. वीरशैवसिद्धान्तशिखामणिः, पं. एन्. आर. करिबसवशास्त्रीणां "कन्नड तात्पर्यदीपिका' ख्यटीकायुक्तः, श्रीमद्वीरशैव शिवयोगमन्दिर, १९९२ ई.।

४०. वीरशैवानन्दचन्द्रिका, मूरुसाविरमठ, हुबली, १९३६ ई.।

४१. वीरागमः, डॉ. ज. च. नि. कृतकन्नडटीकोपेतः श्री. ज. पञ्चाचार्य सेवा संघ गदगः, १९९२ ई.।

४२. वेदान्तसारः, चौखम्बा विद्याभवन, वाराणसी, १९७० ई.।

४३. शक्तिविशिष्टाद्वैततत्त्वत्रयविमर्शः, शै. भा. शो. प्र. जङ्गमवाडीमठ, वाराणसी, १९३६ ई.।

४४. शक्तिविशिष्टद्वैतदर्शनम्, रम्भापुरी संस्थान मठ, वालेहोन्नूर, १९६१ ई.।

४५. शङ्करदिग्विजयः, ज्ञानमन्दिर, हरिद्वार २००० वि. सं.।

४६. शब्दार्थकौस्तुभः, (संस्कृत-कन्नडशब्दकोशः), चक्रवर्ति-श्रीनिवास-गोपालाचार्य, बेंगलूर, १९८४ ई.।

४७. शिवगीता, खेमराज श्रीकृष्णदास प्रकाशन, मुम्बई, १९९६ ई.।

४८. शिवतत्त्वरत्नाकरः, भाग १-२, प्राच्यविद्या संशोधनालय, मैसूर, १९६४, १९६९ ई.।

४९. शिवमहापुराणम्, पण्डित पुस्तकालय, काशी २०२० वि. सं.।

५०. शिवसूत्रविमर्शिनी, काश्मीर संस्कृतग्रन्थावलि, श्रीनगर १९११ ई.।

५१. शिवाद्वैतदर्पणः, शै. भा. शो. प्र. जङ्गमवाडीमठ, वाराणसी १९९९ ई.।

५२. शिवाद्वैतपरिभाषा, जङ्गमवाडीमठ, वाराणसी १९८३ ई.।

५३. शिवाद्वैतमञ्जरी, जङ्गमवाडीमठ, वाराणसी १९८६ ई.।

५४. शिवाद्वैतमञ्जरी, कन्नडटीकासहिता, काशीनाथ ग्रन्थमाला, मैसूर, १९३४ ई.।

५५. श्रीकरभाष्यचतुःसूत्री, जङ्गमवाडीमठ, वाराणसी, १९[illegible]६ ई.।

५६. श्रीमद्भगवद्गीता, अष्टटीकोपेता, मुंशीराम मनोहरलाल पब्लिशर्स प्रा. लि. नई दिल्ली १९७८ ई.।

५७. श्रीमद्भगवद्गीता, डॉ. राधाकृष्णन् महोदयानां हिन्दी व्याख्यायुक्ता, हिन्द पाकेट बुक्स, प्रा. लि. दिल्ली १९९६ ई.।

५८. श्रीमद्भगवद्गीता, रामकृष्णाश्रम, मैसूर १९९४ ई.।

५९. श्रीमद्भगवद्गीतारामानुजभाष्यम्, गीताप्रेस गोरखपुर।

६०. श्रीमद्भगवद्गीतावीरशैवभाष्यम्, श्रीबृहन्मठमहासंस्थान चित्रदुर्ग, १९६५ ई.।

६१. श्रीमद्भगवद्गीता शाङ्करभाष्यम्, गीताप्रेस गोरखपुर १९८८ सं.।

६२. श्रीमद्भगवद्गीता सर्वतोभद्रटीका, रामकण्ठाचार्यविरचिता।

६३. षड्दर्शनसमुच्चयः, चौखम्बा संस्कृत सीरिज, वाराणसी १९०५ ई.।

६४. सर्वलक्षण संग्रहः, भारत-भारती, वाराणसी १९८५ ई.।

६५. सांख्यकारिका, साहित्यभण्डार, मेरठ १९८० ई.।

६६. सिद्धान्तशिखामणिः काशीनाथशास्त्रीकृतभावप्रकाशाख्यकन्नडव्याख्यासहितः, काशीनाथ ग्रन्थमाला मैसूर १९७२ ई.।

६७. सिद्धान्तशिखामणिः, तत्त्वप्रदीपिकाव्याख्याहिन्दीभावानुवादसहितः, शै. भा. शो. प्र. जङ्गमवाडीमठ वाराणसी १९९३ ई.।

६८. सिद्धान्तशिखामणिः, मल्लिकार्जुनस्वामिनां कन्नडप्रवचनयुक्तः, ज. श्री शिवरात्रीश्वरग्रन्थमाला, मैसूर, १९९९ ई.।

६९. शिवरात्रीश्वरग्रन्थमाला, मैसूर, १९९९ ई.।

७०. सिद्धान्तशिखामणिः श्री १००८ ज. डॉ. चन्द्रशेखरशिवाचार्यमहास्वामिनां प्रवचन प्रभे इत्याख्य कन्नडप्रवचनयुक्तः, ज. पञ्चाचार्यमानवधर्मसंस्थान

७१. सिद्धान्तशिखामणिसमीक्षा, शैवभारती भवनम्, जंगमवाडीमठ वाराणसी १९८९ ई.।

७२. सिद्धान्तशिखोपनिषद् वीरशैवभाष्यम, शै. भा. शो. प्र. जङ्गमवाडीमठ वाराणसी १९९८ ई.।

७३. सिद्धान्तसारावलिः शै. भा. शो. प्र. जङ्गमवाडीमठ वाराणसी १९९८ ई.।

७४. सूक्ष्मागमः शै. भा. शो. प्र. जङ्गमवाडीमठ वाराणसी १९९४ ई.।

७५. स्कन्दपुराणम्, खेमराज श्रीकृष्णदास, मुम्बई, १९६५ वि. सं.।

हिन्दी

१. उपनिषद्–दर्शन का रचनात्मक सर्वेक्षण, राजस्थान हिन्दी ग्रन्थ अकादमी जयपुर, १९८३ ई.।

२. कूर्मपुराण धर्म और दर्शन, मोतीलाल बनारसीदास, वाराणसी, १९४४ ई.।

३. गीता–चिन्तन गीताप्रेस गोरखपुर, २०५८ सं.।

४. गीतादर्पण, गीताप्रेस गोरखपुर २०५१ ई.।

५. गीतादर्शन, ओशो रजनीश आश्रम पुणे।

६. तत्त्वचिन्तामणि गीताप्रेस गोरखपुर, २०५२ सं.।

७. तन्त्रागमीय धर्म–दर्शनं, भा. १–२, शै. भा. शो. प्र. जङ्गमवाडीमठ वाराणसी २०००,२००१ ई.।

८. भारतीय दर्शन, आचार्य बलदेव उपाध्याय कृत, शारदा मन्दिर वाराणसी, १९९७ ई.।

९. भारतीय दर्शन, डॉ. राधाकृष्णन् कृत भा. १ राजपाल एण्ड सन्स, दिल्ली १९९५ ई.।

१०. भारतीय दर्शन का इतिहास, डॉ. एस्. एन्. दासगुप्त कृत, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर १९७८ ई.।

११. शिवाङ्क, गीताप्रेस् गोरखपुर २०५२ सं.।

कन्नड

१. गीताभावधारे, श्रीरामकृष्णाश्रम मैसूर १९७२ ई.।

२. गीतामते, गान्धीग्रन्थमाला मैसूर १९६४ ई.।

३. चन्नबसवेश्वर वचन सम्पुट, कन्नड साहित्य परिषत्, बेंगलोर।

४. प्रपञ्चद प्रसिद्ध विज्ञानिगलु।

५. बदुकलु कलिचिरि, रामकृष्णाश्रम मैसूर।

६. बसवण्णनवर वचन सम्पुट, कन्नड साहित्य परिषत्, बेंगलोर।

७. भगवद्गीते ओन्दु वैचारिक ओळनोट, नवकर्णाटक प्रकाशन, बेंगलूर, १९९७ ई.।

८. भारतीय आध्यात्मिक परम्परे।

९. महायात्रे, कन्नड. वि. वि. हम्पि (कर्नाटक) १९९७ ई.।

१०. युगयात्री भारतीय संस्कृति, भा. २, मैसूर वि. वि. १९७१ ई. ।

११. शैवागमगलल्लि वीरशैव, वीरशैव अनुसन्धान संस्थान बेंगलोर, १९९९ ई.।

१२. श्रीजगद्गुरु आदि रेणुकरु, श्रीमति गिरिजादेवी सदाशिवशास्त्री हिरेमठ गदग, १९८३ ई.।

* * *

ಶ್ರೀ ಜಗದ್ಗುರು ರಂಭಾಪುರೀಶ್ವರ ಗ್ರಂಥಮಾಲೆಯ ಪ್ರಕಟಣೆಗಳು

1. ಶ್ರೀಮದ್ರಂಭಾಪುರೀ ಜಗದ್ಗುರುಗಳವರ ಶುಭಾಶೀರ್ವಾದ ಸಂದೇಶ
2. ಶ್ರೀ ಜಗದ್ಗುರು ರೇಣುಕಾಚಾರ್ಯ ಸುಪ್ರಭಾತ
3. ಕವನ-ಕುಸುಮಾಂಜಲಿ
4. ಅಮೃತಸಿಂಧು
5. ಶಿವಪೂಜಾಭಿಷೇಕ ವಿಧಿಃ
6. ನಿಂದಕರು, ನಿತ್ಯ ಸುಖದಾಯಕರು
7. ಮೌಲ್ಯ ತುಂಬಿದ ಮಾತುಗಳು
8. ಶ್ರೀ ಜಗದ್ಗುರು ಸೋಮೇಶ್ವರ ಸಂದೇಶ
9. ಶ್ರೀ ಜಗದ್ಗುರು ರಂಭಾಪುರೀಶ್ವರ ಸುಪ್ರಭಾತ
10. ಹೂದಳ
11. ಸುಮಾಂಜಲಿ
12. ವರ್ಷದ ವಾರ್ತಾ ಸಂಕಲನ 1992
13. ವರ್ಷದ ವಾರ್ತಾ ಸಂಕಲನ 1995
14. ಗುರು-ಗೀತಾಂಜಲಿ
15. ಶ್ರೀದೇವಿ ಸ್ತೋತ್ರ ಅಷ್ಟೋತ್ತರ
16. ಶ್ರೀ ಗಂಗಾಧರ ಜಗದ್ಗುರುಗಳವರ - ಪ್ರಸಾದ
17. ಚಿಕ್ಕಮಣ್ಣೂರೇಶನ ಶಿವ - ಭಕ್ತಿಗೀತೆಗಳು
18. ಶ್ರೀ ಜಗದ್ಗುರು ಪಂಚಾಚಾರ್ಯ ಪೂಜಾ ಪೂಜಾವ್ರತ - ವಿಧಾನಮ್
19. ಶ್ರೀ ರಂಭಾಪುರಿ ಜಗದ್ಗುರು ವೀರಗಂಗಾಧರ ಸುಪ್ರಭಾತ ಸ್ತವನ
20. ವೀರಶೈವ ಬಾಲಬೋಧಿನಿ

21. ಸೋಮೇಶ ಸೂಕ್ತಿ
22. ವರ್ಷದ ವಾರ್ತಾ ಸಂಕಲನ 'ಸುಗಂಧ' 1996
23. ಸಿದ್ಧಾಂತ ಶಿಖಾಮಣಿ ಸಂಗ್ರಹ
24. ಶ್ರೀ ನಿಶ್ಚೀತಾತ್ಮ ವಿರಚಿತ ಶರಭ ಚರಿತ್ರೆ
25. ಶ್ರೀ ಉಜ್ಜನೀಶ ವಿರಚಿತ ಸಿದ್ಧಾಂತ ಶಿಖಾಮಣಿ ವ್ಯಾಖ್ಯೆ
26. ಕವನಾಂಜಲಿ
27. 'ಗುರು ಕಾರುಣ್ಯ' (ಸಂಗ್ರಾಹ್ಯ) ಸ್ಮರಣ ಸಂಚಿ[illegible]
28. ಶ್ರೀ ರಂಭಾಪುರಿ ಪೀಠ ದರ್ಶನ
29. ಸಾಂಸ್ಕೃತಿಕ ಶ್ರೀ ವೀರಭದ್ರಸ್ವಾಮಿ
30. ರಂಭಾಪುರೀಶ್ವರ ಪ್ರಕಾಶ (ಕವನ ಸಂಕಲನ)
31. ಶಾಸನಗಳಲ್ಲಿ ಶ್ರೀ ಜಗದ್ಗುರು ಪಂಚಾಚಾರ್ಯರು
32. ರಂಭಾಪುರಿ ಪೀಠದ ಶ್ರೀ ಜಗದ್ಗುರು, ಪರಂಪರಾ ಚಾರಿತ್ರ್ಯ
33. ಶ್ರೀ ಜಗದ್ಗುರು ರೇಣುಕ ಚರಿತೆ
34. ರುದ್ರ ಭದ್ರ ದರ್ಶನಂ
35. ಶ್ರೀ ರಂಭಾಪುರೀಶ ವಚನ ನವನೀತ
36. ವೀರಶೈವ ಧರ್ಮದಲ್ಲಿ ಅಷ್ಟಾವರಣಗಳು
37. ಶ್ರೀ ಜಗದ್ಗುರು ರೇಣುಕಾಚಾರ್ಯರು
38. ಶ್ರೀ ರಂಭಾಪುರೀ ಗಂಗಾಧರ ಜಗದ್ಗುರುಗಳವರ ಧರ್ಮಸಂದೇಶ
39. ಸದ್ಬೋಧಾಮೃತ ಶತಕ
40. ಪರಮ ರಹಸ್ಯ
41. ಚಿಕ್ಕಮಣ್ಣೂರೇಶನ ಜಾನಪದ ಮತ್ತು ಭಕ್ತಿಗೀತೆಗಳು

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamawadi Math, Varanasi
ACC No. ೫೩೬೯

विद्वत्सम्मतयः

आशास्महे वयं यद्, अयं ग्रन्थः प्राचीनाचार्यपरम्परामनुसरन् विद्वल्लोकमाकर्षति, प्रवर्धयति च तेषां मनसि वीरशैवीयवैशिष्ट्यतत्त्वावगमनलालसामिति।

श्री १००८ ज. प्रसन्नरेणुकवीरसोमेश्वरशिवाचार्यभगवत्पादाः

संशोधकलेखकः शिवाचार्योऽतिशयेन प्रयत्नेन तौलनिकबुद्ध्या उभयोर्ग्रन्थयोर्दार्शनिकमीमांसा कृता, सातीव शोभना सामाजिक प्रज्ञाया च परिपूर्णाऽस्ति। ग्रन्थयोरनयोः समन्वयपरा समीक्षा नान्यत्रोपलभ्यत इत्ययमत्रत्योऽनितरसाधारणो विषयः। एतादृशसमन्वयविचारधाराविशिष्ट-ग्रन्थानामध्ययनमध्यापनं च परमावश्यकम्।

श्री १००८ ज. डॉ. चन्द्रशेखरशिवाचार्यभगवत्पादाः

विदुषा लेखकेन सर्वेऽप्यत्र समालोचिता धार्मिका दार्शनिकाश्च विषयाः पूर्वं भगवद्गीतापद्धत्या, तदनु सिद्धान्तशिखामणिपद्धत्या अन्ते च तौलनिकसमालोचनपद्धत्या विवृता इति निभालयन्तु तत्र भवन्तो भवन्तः। अभ्युदयनिःश्रेयसोः साधकोऽयं ग्रन्थो भारतीयदर्शनसंस्कृतिप्रियाणां नूनं पठनार्हः।

पं. व्रजवल्लभ द्विवेदः

प्रस्तुतः ग्रन्थोऽयं सर्वेषामेव जिज्ञासूनां जिज्ञासोपशान्त्यर्थमुपायभूतः सन्नुपकरिष्यति'तानिति दृढीयान्नो विश्वासः।

डॉ. सुधांशुशेखरशास्त्रिणः

श्रीसिद्धान्तशिखामणेरनुदिनं कृत्वा समीक्षां सुधीः
वेदार्थं निखिलागमादिनिवहं सम्यक् समीक्ष्यादरात्।
यत् सारस्वतवैभवं बुधनुतं तत्सारभूतं पुनः
ग्रन्थानां यदि लेखनं वितनुते धन्यस्तदन्यः कुतः।।

डॉ. मल्लिकार्जुनपरड्डिः

कर्नाटकप्रदेशीयबागलकोटमण्डलान्तर्गत-हिप्परगी-हिरेमठाधिपोऽयं प्रबन्धस्यास्य लेखकः **डॉ. सिद्धरामपण्डिताराध्यशिवाचार्यः** २००२ तमे वर्षे काशीहिन्दूविश्वविद्यालयस्य 'दर्शनचक्रवर्ती' (पि-एच.डी) इत्युपाधिना समलङ्कृतः। सम्पूर्णानन्दसंस्कृतविश्वविद्यालयतः श.वि.वेदान्ताचार्यः परीक्षायामनेन सम्पूर्णानन्दस्वर्णपदक-अन्नप्रसादमुखर्जीस्वर्णपदक-रामप्रतापशास्त्रीस्वर्णपदकाख्यानि त्रीणि स्वर्णपदकान्यवाप्तानि; काशीहिन्दूविश्वविद्यालयेन कन्नडविषये एम्.ए. पदवी च प्राप्ता; षट्स्थलचिन्तन-नामककन्नडग्रन्थोऽपि लिखितः।

प्रकाशकः
श्रीमद्वीरशैवसद्बोधनसंस्था
श्रीजगद्गुरुरम्भापुरीवीरसिंहासनमहापीठम्
बाळेहोन्नूर - ५७७ ११२
चिक्कमगळूर (मण्डलम्), कर्नाटक